ISSN - 2320-740X

# शारदा

UGC-CARE listed and Peer-Reviwed Journal



**संरक्षकः**

आचार्यः श्रीनिवास वरखेडी

**प्रधानसम्पादकः**

आचार्यः सि. एस्. एस्. नरसिंहमूर्तिः

**सम्पादकौ**

डा. राघवेन्द्रभट्टः

डा. विश्वनाथहेगडे

## केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेनस्थापितः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः

## श्रीराजीवगान्धीपरिसरः

मेणसे, शृङ्गेरी - ५७७१३९, (कर्णाटकराज्यम्)

# शारदा

UGC-CARE listed and Peer-Reviwed Journal

ISSN - 2320-740X

**संरक्षकः**

**आचार्यः श्रीनिवास वरखेडी**

**प्रधानसम्पादकः**

**आचार्यः सि. एस्. एस्. नरसिंहमूर्तिः**

**सम्पादकौ**

**डा. राघवेन्द्रभट्टः**

**डा. विश्वनाथहेगडे**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

संसदः अधिनियमेनस्थापितः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः

**श्रीराजीवगान्धीपरिसरः**

मेणसे, शृङ्गेरी - ५७७१३९, (कर्णाटकराज्यम्)

# शारदा

UGC-CARE listed and Peer-Reviwed Journal

ISSN - 2320-740X

संरक्षकः - आचार्यः श्रीनिवास वरखेडी

प्रधानसम्पादकः - आचार्यः सि. एस्. एस्. नरसिंहमूर्तिः

सम्पादकौ - डा. राघवेन्द्रभट्टः, डा. विश्वनाथहेगडे

प्रकाशनवर्षम् - २०२३

प्रतिः – १५०

© केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी

प्रकाशकः - निदेशकः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी

पृष्ठविन्यासः – डा. रवीशः एन्,

मूल्यम् - ₹ ४५०.००

© All the rights are reserved for Publisher. Provided that contributors are responsible for their respective articles.

प्रो. श्रीनिवास वरखेड़ी
कुलपतिः
केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्,
भारतसर्वकारस्य शिक्षामन्त्रालयाधीनम्)

Prof. Shrinivasa Varkhedi
Vice-Chancellor
Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Under Ministry of Education, Govt. of India)



# शुभसन्देशः

भारतीयज्ञानसागरस्य अस्ति अनितरसाधारणं वैशिष्ट्यम्। अस्मिन्निहितानि ऐहिकम् आमुष्मिकञ्च फलन्ति वेदशास्त्रपुराणकाव्यादिरत्नानि जगतो गर्वकारणम्। तेषां काण्डे विनियोगेन राष्ट्रोन्नतिः विश्वकल्याणञ्च सम्पत्स्यते। अध्ययनम्, अध्यापनम्, लेखनम्, संशोधनम्, प्रसारः, सामाजिकापेक्षानिर्वाहः इत्यादिभिः नानाक्रियाभिः भारतीयविद्याशाखानां साधुसमाश्रयः कर्तव्यः। एतदुद्देशेन भारतसर्वकारेण प्रतिष्ठापितः केन्द्रीयसंस्कृतविश्वविद्यालयः कर्मण्यस्मिन् अग्रेसरो वर्तत इति नाविदितं सर्वेषाम्। शिक्षाशोधप्रकाशनादिकार्यतत्परेण विश्वविद्यालयस्य श्रीराजीवगान्धीपरिसरेण शारदाख्या शोधपत्रिका प्रकाश्यमाना वर्तते। अस्यां बुधैः विशिष्य तरुणैः विद्वद्भिः लिखिता भारतीयज्ञानपरम्पराप्रकाशका विमर्शात्मकाः शोधलेखाः सन्ति। पत्रिकेयं विद्वन्मनोरञ्जनी विद्यार्थिजिज्ञासाशमनी च भूयादित्याशासे।

विद्वज्जनविधेयः

(प्रो. श्रीनिवास वरखेड़ी)
कुलपतिः

56-57, संस्थानीयक्षेत्रम्, जनकपुरी, नवदेहली - 110058
56-57, Institutional Area, Janakapuri, New Delhi -110058 (INDIA)
Ph.: (O) 011-28523949, EPABX: 28524993, 28521994, 28524995
EMAIL : vicechancellorcsu@gmail.com/ vc@csu.co.in, WEBSITE : www.sanskrit.nic.in

आचार्यः सि. एस्. एस्. एन्. मूर्तिः
निदेशकः
केन्द्रियसंस्कृतविश्वविद्यालयः
श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी

Prof. C. S. S. N. Murthy
Director
Central Sanskrit University
Shri Rajiv Gandhi Campus, Sringeri - 577 139




## देद्युत्यतां सुरवाणी

"विद्यया प्राणिनां मुक्तिस्तस्मात्तद्दानमुत्तमम्" इत्यभियुक्तोक्तिः । अतः प्राणिनः आजन्म वेदितुं प्रायतन्त । तेषु उत्कृष्टो मानवः । सोऽर्जितस्य विज्ञानस्य संरक्षणं संक्रमणं चैच्छत् । तत्संकल्पक्रम एव गुरुकुलानि, विद्यालयाः, विश्वविद्यालयाश्च आविर्बभूवुः । जगति सम्प्रति नैकाः संस्थाः, नैके विश्वविद्यालयाः ज्ञानसमुपार्जनाय वरीवृत्यन्ते । तत्र विश्वगुरोरस्माकं भारतावनौ गैर्वाण्याः समभिवृद्ध्यै समुपासनायै च बहवो ह्युपायाः अनुष्ठीयन्ते । तदर्थं सर्वकारः नैकान् संस्कृतविश्वविद्यालयान् नाना दिक्षु अस्थापयत् । अमीषु संस्कृतविश्वविद्यालयेषु नाना परिसरयुक्तः नैकशास्त्रपरिपोषणरतः विश्वविद्यालयमूल्याङ्कनप्रत्यायनपरिषदा A++ प्राप्तः केन्द्रीयसंस्कृतविश्वविद्यालयः सर्वातिशायी वरीवर्ति । तत्रान्यतमत्वेन राराज्यते शृङ्गेरीस्थराजीवगान्धीपरिसरः । यतोऽयं नानाशास्त्रनदीष्णैः संयमीन्द्रैः पुम्भावसरस्वतीरूपैः जगद्गुरुभिः श्री श्री भारतीतीर्थमहास्वामिभिः समकल्पि समारम्भि च । अमीषाम् असीमानुकम्पया समेधमानो वरीवर्त्ययम् । अत्र निदेशकाः अध्यापकाश्च समे शास्त्रेषु बद्धादराः अवृतन्, वर्तन्ते च । तेऽन्तेवासिनां तत्तच्छास्त्रेषु कौशलवर्धनाय नैकान् उपायान् समकल्पयन् । ते यथा – "१.स्पर्धिष्णुपरिषत् २. वाक्यार्थपरिषत् ३. वाग्वर्धिनीपरिषत्" इति ।

हायनेऽस्मिन् देशे विख्यातैः विपश्चिद्भिः प्रेषितानि लेखनानि संगृह्य पुनरीक्षणपुरस्सरं शारदा इति नाम्ना शोधपत्रिका प्रकाश्यते । लेखनानां प्रामाणिकतासम्पादनाय बाह्याः प्रसिद्धाः विद्वांसः आचार्याः ए.पी सच्चिदानन्दवर्याः , आचार्याः एम्.पि.भट्टाः, आचार्याः लक्ष्मीनारायणभट्टाः, आचार्याः दत्तात्रेयमूर्तिवर्याः, डा.महेशकाकत्करवर्याश्च प्रायतन्त । तेभ्यः धन्यवादान् आविष्करोमि । सन्दर्भेऽत्र केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिभ्यः कर्मठेभ्यः प्रो.श्रीनिवासवरखेडिमहोदयेभ्यः, कुलसचिवेभ्यश्च सादरं प्रणामान् निवेदयामः । अवसरेऽत्र सम्पादनकर्मणि निरतयोः प्रो. राघवेन्द्र भट् डा.विश्वनाथहेगडे इत्यनयोः कृतज्ञतां निवेदयामि । समये लेखान् प्रेषितवद्भ्यः विद्वत्तल्लजेभ्यः धन्यवादान् आविष्करोमि । शुभावसरेऽस्मिन् परमकरुणामूर्तीनां जगद्गुरूणां श्री श्री भारतीतीर्थमहास्वामिनां तत्करकमलसञ्जातानां श्री श्री विधुशेखरभारतीमहास्वामिनाञ्च अनुग्रहाशीर्भिः परिसरीयाणां सर्वेषां श्रेयांसि भूयासुरित्याशास्महे |

इत्थं बुधजनविधेयः

आचार्यः सि. एस्. एस्. एन्. मूर्तिः

# सम्पादकीयम्

भारतीयज्ञानशाखानां विस्तृतिः तादृशी वर्तते यासामवयवानामपि पूर्णारोहः दुःशकः। तत्र परम्पराश्रयेण कस्याश्चन शाखायाः सीमा गोचरीक्रियेत। तद्रहस्यं पुनः ज्ञातव्यं चेत् कारणसामग्री पात्रता यत्नश्च वैपुल्येन आसादनीयो भवति । तत्त्वप्रतिपत्तये पुनःपुनः तद्विषयको विचारः प्रवर्तनीयः। वेदः, आयुर्वेदः, दर्शनम्, गणितम्, गोलविज्ञानम्, साहित्यम्, कला, भौतिकशास्त्रञ्च शाखोपशाखतया इह देशे समृद्धं वर्तते। समृद्धशाखाया विस्तृतिः अद्य विश्वकल्याणायापेक्ष्यते। शाखागतानां रहस्यानां लोकोपकारकतया चिन्तनं विमर्शः प्रसारश्च भवेत्। अतः विहिता विचारा लेखबद्धाः कर्तव्या भवन्ति। तदेतदुद्देश्येन केन्द्रीयसंस्कृतविश्वविद्यालयद्वारा शारदानाम्नी वार्षिकी शोधपत्रिका प्रकाश्यमाना वर्तते। विश्वविद्यालयस्य शृङ्गेरीस्थः श्रीराजीवगान्धीपरिसरः प्रकाशनस्योत्तरदायी भूत्वा विदुषां शोधलेखानां सङ्ग्रहः, सम्पादनम्, मुद्रणम् इत्यादिकार्यं विधाय पत्रिकास्वरूपम् अनैषीत्। पत्रिकायामस्यां भारतीयविद्याशाखाभिः अन्विताः संस्कृतभाषायां, हिन्द्याम्, आङ्ग्लभाषायाञ्च आहत्य ५५ शोधलेखाः सन्ति।

शारदापत्रिकायाः प्रकाशनाय शुभसन्देशं प्रदाय अस्मानन्वग्रहीषुः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतयः आचार्याः श्रीनिवासवरखेडीमहाभागाः, परिसरनिदेशकाः आचार्याः सि. एस्. एस्. नरसिहमूर्तिवर्याश्च। समीक्षणसमितिसदस्याः लेखान् आमूलाग्रं परिशील्य प्रकाशनयोग्यान् चित्वा प्रादुः। एतेभ्यः, विद्वद्भ्यः लेखकेभ्यः, सम्पादकमण्डलीसदस्येभ्यः, पत्रिकायाः विन्यासं कृतवते सङ्गणकप्राध्यापकाय डा.रवीशवर्याय च धन्यवादा आविष्क्रियन्ते।

ज्ञानवैराग्यतपोधनानां जगद्गुरूणां दक्षिणाम्नायशृङ्गेरीशारदापीठाधीश्वराणां श्रीश्रीभारतीतीर्थमहास्वामिनां तथा तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारतीमहास्वामिनां चरणाम्बुजयोः सभक्तिश्रद्धं प्रणामं समर्पयावः।

जिज्ञासवश्च विद्वांसः शास्त्रमर्मप्रकाशकैः॥
शारदीयैः शोधलेखैर्लभन्तां प्रीतिमुत्तमाम्।

**विद्वज्जनविधेयौ**

राघवेन्द्रभट्टः

विश्वनाथ हेगडे च

## Peer-Review Committee

**आचार्यः ए. पि. सच्चिदानन्दः**
कुलपतिचराः, राष्ट्रियसंस्कृतसंस्थानम्
जनकपुरि, नवदेहली

**आचार्यः महाबलेश्वर पि. भट्टः**
प्राचार्यचराः, राष्ट्रियसंस्कृतसंस्थानम्
श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

**आचार्यः एन्. लक्ष्मीनारायणभट्टः**
एस्. एम्. एस्. पि. संस्कृतमहाविद्यायः
उडुपि, कर्णाटकम्

**आचार्यः एस्. दत्तात्रेयमूर्तिः**
आचार्यः, व्याकरणविभागः
श्री जगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, ओदिशा

**डा. महेशकाकत्कर्**
सहायकाचार्यः, सर्वकारीयपद्विविद्यालयः
कोप्पा, चिक्कमगळूरु

## Editorial Board

**आचार्यः सि. एस्. एस्. नरसिंहमूर्तिः** — प्रधानसम्पादकः
निदेशकः, केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

**डा. राघवेन्द्रभट्टः** — सम्पादकः
साहित्यविभागाध्यक्षः,
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

**डा. विश्वनाथहेगडे** — सम्पादकः
सहायकाचार्यः, अद्वैतवेदान्तविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

**डा. रवीशः एन्.** — सदस्यः
सहायकाचार्यः (सं), सङ्गणकविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

# सम्पादकीयम्


| Sl. No | Article Name | Author | Page No |
|---|---|---|---|
| 1 | अनुषङ्गन्यायः | प्रो. सुब्राय वि.भट्टः | 01 |
| 2 | शब्दशक्तिः शब्दोऽपि शाब्दबोधे भासते | डा. सिहेच्. एस्. एस्. नरसिंहमूर्तिः | 05 |
| 3 | देवताप्रसादस्य प्रयोजकत्वविवेचनम् | प्रो. सूर्यनारायणभट्टः | 10 |
| 4 | श्रीरुद्राध्याये वेदान्ततत्त्वाविर्भावः | डा. गणेश ईश्वर भट्टः | 15 |
| 5 | अभिनवभारत्यां शान्तरसविचारः | डा. राघवेन्द्रभट्टः | 20 |
| 6 | मनोवृत्तिप्रपञ्चनम् | डा. दयानन्द ए. आर्. | 26 |
| 7 | ध्वनितत्त्वावबोधे ध्वन्यालोकप्रभारूपायाः 'ध्वन्यालोकप्रभा'याः प्रभा | डा. सौम्यजित् सेनः | 33 |
| 8 | स्वप्नसृष्टिमीमांसा | डॉ. राघवेन्द्र शर्मा | 43 |
| 9 | चतुर्थ्यर्थनिरूपणे जगदीशगदाधरयोर्मतभेदः | डा. देवन् ई. एम् | 53 |
| 10 | The Krishnapadi Commentary of Bhagavata Purana and the Treasure House of Manuscripts in Kerala | Maneesha S | 59 |
| 11 | A Brief Overview of Ancient Indian Geometry | Vijayakumari T. Chilakwad | 66 |
| 12 | शिक्षायां शैक्षिकप्रविधेः आवश्यकता | डा. बी. नरेशकुमारनायकः | 71 |
| 13 | वर्षप्रश्नः | Dr. Eswaran E. N. | 83 |
| 14 | सद्यः परनिर्वृतिः - एकं विवेचनम् | Dr. Chandrakala R. Kondi | 89 |
| 15 | ब्रह्मसूत्रे बौद्धसन्दर्भपरिशीलनम् | Dr. Nepal Das | 95 |
| 16 | कर्मणां विद्यायाम् उपयोगः उत विविदिषायाम्? | डा. विश्वनाथ हेगडे | 99 |
| 17 | व्याकरणदर्शने कालशक्तिः | डा. प्रियव्रतमिश्रः | 105 |
| 18 | इदुदुपधस्य चाप्रत्ययस्य | डा. प्रमोदभट्टः | 110 |
| 19 | Asyavāmīya Sukta: An Overview | Arya S Vijayan | 116 |
| 20 | संपन्नो व्रीहिः इत्यत्र व्रीहिपदोत्तरैकवचनार्थःगदाधरभट्टाचार्यमते | डा अजिमोन् सि एस् | 125 |
| 21 | राजशेखरस्य कविसमाजायवदानम् | डॉ. सौरभ दुबे | 131 |
| 22 | प्रथमलक्षणार्थविचारः | डा. श्रीराम ए.एस्. | 140 |
| 23 | दिनकरी-प्रभा-मञ्जूषामतदिशा | सुव्रत-गायेनः | 147 |

| | | | |
|---|---|---|---|
| | सिद्धान्तमुक्तावलीग्रथितद्रव्यत्रयसमीक्षणम् | | |
| 24 | Yogic Concepts In Taittirīyopaniṣad With Compilation Of Other Yogic Contexts | Gopalakrishna Hangari | 155 |
| 25 | शब्दोपादानखण्डनम् | डा. कोम्पेल्लि विनयकुमारः | 163 |
| 26 | श्रीमच्छङ्कररामानुजाचार्यमतयोः मोक्षस्वरूपं मोक्षोपायनिरूपणञ्च | शान्तिघोषः | 172 |
| 27 | न्यायनये संशयस्वरूपविमर्शः | श्रीशशांकशेखरपात्रः | 184 |
| 28 | फलविमर्शदृष्ट्या ज्योतिष-सामुद्रिकशास्त्रयोः सम्बन्धनिरूपणम् | डॉ. उमाकान्ततिवारी | 191 |
| 29 | भूगोलः | डा. प्रसाद भट्टः | 196 |
| 30 | गणेशगीता-भगवद्गीतयोः प्रतिपादितस्य आत्मतत्त्वस्य समीक्षणम् | विद्वान् निरञ्जन भट्टः | 201 |
| 31 | पुरुषार्थचतुष्टये वेधोपलब्धग्रहाणामुपयोगिता | ब्रजेशपाठकः | 206 |
| 32 | विशेषनिरूपणम् | शशांक शिवराम भट्टः | 211 |
| 33 | श्रीकृष्णविलासमहाकाव्ये संलक्ष्यक्रमव्यङ्ग्यध्वनेः परामर्शः | रमेश चन्द्र बरमोला | 215 |
| 34 | पदवृत्तिप्रपञ्चनम् | कार्तिक् भाग्वत् | 219 |
| 35 | Natakantam Hi Sahityam - An Outlook | Dr. M. Srinivasa Murthy | 226 |
| 36 | अपूर्वसाधनम् | डा. प्रशान्तगांव्करः | 231 |
| 37 | अरिष्टचिन्तनम् | श्रीनागपतिहेगडे | 236 |
| 38 | भारतीयज्ञानपरम्परायाः आधुनिकशिक्षाक्षेत्रे क्रियान्वयनस्य विमर्शः | डॉं मुरलीश्यामः एच् | 239 |
| 39 | ब्रह्मविद्याभरणप्रकाशितम् अध्यासभाष्यतात्पर्यम् | श्रीजित् टि.जि. | 247 |
| 40 | दशोपनिषत्सु प्रणवमाहात्म्यम् | आतिरा हरिहरन् | 255 |
| 41 | स्वतन्त्रतासंग्रामप्रसङ्गे गान्धिविजयनाटकस्य महत्त्वम् | अजयकुमारमिश्रः | 262 |
| 42 | देवस्वरूपा गौ माता | डॉ० विवेक शर्मा | 267 |
| 43 | Importance of "Pramāṇatrayam" in Yoga | Amiya Das | 274 |
| 44 | Campū kāvyas of Prof. A.V.Sankaran-An overview | Dr.N.A.Shihab | 282 |
| 45 | Negation of 'negation' in Guru and Śaṅkara | Dr. Anandaraj G | 293 |
| 46 | वैद्यनाथपायगुण्डेकृतप्रभाव्याख्यायाः प्रथमाह्निकस्य | शंखशुभ्र-गच्छितः | 305 |

| | | | |
|---|---|---|---|
| | मातृकाधारेण पाठसमीक्षणम् | | |
| 47 | संस्कृतस्य कृते संगणकभाषाशास्त्रस्य उपयोगिता | देवेन्द्रकुमारः | 313 |
| 48 | कतमपदार्थविचारः | Rahul Maity | 322 |
| 49 | रामायणे राज्यानुशासनस्य स्वरूपं व्याख्या च | डॉ. नारायन सामाइ | 330 |
| 50 | बृहद्वास्तुमालोक्ताः गृहारम्भमुहूर्तविचाराः | गिरीशभट्टः बि, | 336 |
| 51 | उपासकस्य उत्क्रान्तिः | भोजराजः. टि | 345 |
| 52 | औणादिकसूत्रविमर्शः - उणादिसूत्रप्रयोगदीपिकावृत्तेः परिप्रेक्ष्ये | कारिया राजेशकुमार वासुदेव | 351 |
| 53 | वेदेषु गुरुत्वाकर्षणसिद्धान्तः | उज्ज्वलदासः | 363 |
| 54 | अभिराजयशोभूषणे गलज्जलिका | B Mohan Kumar | 370 |
| 55 | ईशावास्योपनिषद्प्रेक्षे विद्याविद्याविवेचनम् | स्वागतिका दाशः | 376 |

# अनुषङ्गन्यायः

**प्रो. सुब्राय वि.भट्टः**
मीमांसाविद्याशाखाध्यक्षः
केन्द्रीयसंस्कृतविश्वविद्यालयः
राजीवगान्धीपरिसरः, शृङ्गेरी

मनुकुलस्य ऐहिकपारमार्थिकसुखसाधनमस्ति धर्मः । धर्माधर्मविवेचनार्थं प्रवृत्तमिदं पूर्वमीमांसाशास्त्रम् । धर्मस्य परिग्रहार्थम् अधर्मस्य च परिहारार्थं च उभयोर्जिज्ञासा समर्थिता शास्त्रकारैः । अयमधर्मः इतिज्ञाते सत्येव परित्यक्तुं शक्यते नान्यथा । अतःअधर्मस्यापि प्रासङ्गिकरूपेण वा जिज्ञासा कृता । धर्मजिज्ञासायाः फलं प्रदर्शितं शबरस्वामिना भाष्ये – “सोऽयमविचार्यप्रवर्तमानः कञ्चिदेवोपाददानो विहन्येत अनर्थं च ऋच्छेत्” । (शा. भा.जि.अ.१-१-१) एवं अजिज्ञासायाः अनिष्टसाधनत्वमितिनिन्दामुखेन फलमुपवर्ण्य अग्रे पुनः धर्मलक्षणाधिकरणे धर्मजिज्ञासायाः विशिष्टं फलं प्रदर्शयामास –“स हि निःश्रेयसेन संयुनक्तीतिप्रतिजानीमहे । तदभिधीयते – चोदनालक्षणोऽर्थो धर्मः” । इति(शा. भा.अ.१-१-२)

सूत्रकारः भगवान् जैमिनिः धर्मस्य लक्षणम् एवं सूत्रयामास – चोदनालक्षणोऽर्थो धर्म इति। एवं च वेदबोधित श्रेयस्साधनाताको धर्म इतिधर्मलक्षणं, वेदः तत्प्रमाणमितिच अनेन सूत्रेण धर्मस्य लक्षणं प्रमाणं च प्रदर्शितम् । वेदः इत्यनेन उपलक्षणविधया तन्मूलकानां स्मृत्यादीनामपि धर्मप्रमाणत्वं सिद्ध्यति। भगवान् मनुरपि – “वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्” ।(म.स्मृ.२-६) इत्यादिना वेदस्य धर्मप्रमाणत्वं स्पष्टीचकार । स च वेदः अपौरुषेयः, नित्यः, अनधिगताबाधितार्थबोधकश्च । यद्यपि विद ज्ञाने इतिधातोः घञ्-प्रत्यये वेदशब्दःनिष्पन्नः । स च ज्ञानरूपमर्थं बोधयति। किन्तु आपस्तम्बाचार्यैः “मन्त्रब्राह्मणयोर्वेदनामधेयम्”(आ.ध.सू) इति मन्त्रब्राह्मणरूपशब्दपरत्वं प्रतिपादितम् । स च वेदः विधिमन्त्रनामधेयनिषेधार्थवादभेदेन पञ्चधा विभक्तः । तत्र अन्यतमः विभागः मन्त्रः । मन्त्राणां कर्मसमवेतार्थप्रकाशकत्वं प्रयोजनम् । “तच्चोदकेषु मन्त्राख्या”(जै-सू-२-१-३२) इत्यनेन अभियुक्तानां यत्र मन्त्रत्वेन प्रसिद्धिःस मन्त्रः इतिलक्षणं लक्षितम् । तत्प्रसङ्गात् ऋग्यजुस्साम्नां लक्षणं प्रदर्शितम् । ततश्च ऋग्लक्षणं सामलक्षणं च अभिधाय “शेषे यजुश्शब्दः” (जै.सू.२-१-३७) इत्यनेन ऋक्सामभिन्नत्वे सतिमन्त्रत्वं यजुष्ट्वमितियजुर्लक्षणमुक्तम् ।

तत्प्रसङ्गात् यजुष्ट्वं कुत्र पर्याप्तं भवतिइतिविमृश्य- “अर्थैकत्वादेकं वाक्यं साकांक्षं चेत् विभागे स्यात्” । (जै.सू.२-१-४३) अर्थैकत्वे सतिविभज्यमानसाकांक्षत्वं वाक्यत्वमितिवाक्यलक्षणमुक्त्वा यावत्सु वाक्यत्वं पर्याप्तं तावत्सु यजुष्ट्वं पर्याप्तम् इत्युक्तम् । तावदेकं वाक्यं यजुरित्यर्थः। यत्र एवंविधं विभज्यमानसाकांक्षत्वं नास्ति यथा – “इषे त्वा” “ऊर्जे त्वा” इत्यनयोः, यथा वा “आयुर्यज्ञेन कल्पताम्, प्राणो यज्ञेन कल्पताम्” इत्यादौ तत्र अर्थैकत्वे सत्यपि मन्त्रभेदः । तादृशस्थले यजुर्भेदः सिद्धः । तत्प्रसङ्गात् अनुषङ्गविचारः आगतः। तदुक्तं सूत्रकृता – “अनुषङ्गो

वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात्" (जै.सू.२-१-४८) इतिअस्य विचारस्य यजुःपरिणामरूपत्वात् प्रासङ्गिकी सङ्गतिः। अत्रास्ति विचारद्वयम्।

प्रथमः – यत्र बहूनां वाक्यशेषसापेक्षाणां शेषिणां मध्ये प्रथमस्य अनन्तरम् आकांक्षापरिपूर्णसमर्थो वाक्यशेषः श्रूयते तत्र अनुषङ्गः अस्ति न वा ? कथम् ? इति।

द्वितीयः – यत्र निराकांक्षाणां शेषिणाम् एकार्थानां सन्निधौ सर्वानन्तरं वाक्यशेषः श्रूयते – तत्र कथं व्यवस्था कर्तव्येति।

<u>प्रथमः विचारः</u> – यथा ज्योतिष्टोमे उपसद्धोमे विनियुक्तः – "या ते अग्ने अयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीत्वेषं वचो अपावधीत् स्वाहा, या ते अग्ने रजाशया, या ते अग्ने हराशया" इति। अस्यायमर्थः– अयसा रजतेन हिरण्येन च निर्मिता अग्नेः तिस्रः तनवः। तास्वाद्या तनूः सा अतिशयेन प्रवृद्धा, गह्वरे – तीक्ष्णद्रव्ये लोहे अवस्थिता, तया तन्वा क्षुत्पिपासे गोवधाद्युपपातकं वीरहत्यादिमहापातकं च हतवानस्मीति। अशनया पिपासे ह वा उग्रं वचः एनश्च वैरहत्यं च त्वेषं वचः" इतिब्राह्मणानुसारात् । तत्र उत्तरौ मन्त्रौ उदाहरणम्।

तयोः किं लौकिकः शेषो अध्याहर्तव्यः उत पूर्वमन्त्रानन्तरं पठितःतनूर्वर्षिष्ठेत्यादिः, स एव पूर्वस्येव उत्तरयोरपि अनुषङ्गेण शेषः इतिसंशयः।

अत्रायं पूर्वपक्षाशयः – शेषः एकत्र निबद्धत्वात् अन्यत्र न नेतव्यः। लौकिकस्तु अनिबद्धत्वात् सर्वार्थः। स च यत्र कार्यं तत्र सर्वत्र विनियुज्यमानो न विरुध्यते। वैदिकस्तु शेषः यदर्थमाम्नातःतेनैव निबद्धो नान्यत्र नेतुं शक्यः। नीयमाने समाम्नायबहिर्भावात् लौकिक एव स्यात्। लौकिकोऽपि सर्वार्थमाम्नातःइतिचेत् – सकृदाम्नातस्य अनेकार्थत्वे सकृदुच्चरितन्यायविरोधापत्तेः। एकत्रैव ग्रहणे आनन्तर्यमेव नियामकम्। द्वितीयमन्त्रस्य आनन्तर्यसत्त्वेऽपि परस्ताद्भावि वाक्यशेषस्यैव आकांक्षितत्वेन द्वितीयमन्त्रात्पूर्वभाविशेषान्वयो न स्यात्। तृतीयस्य तु आनन्तर्याभावात् सम्बन्ध एव नास्ति। वैदिकस्य यथापाठं देशविशेषस्यैव व्यवस्थितत्वेन लौकिक अध्याहर्तव्यः इति।

अत्रेदं समाधानम् – तत्र "या ते अग्ने रजाशया, या ते अग्ने हराशया" इत्येवं शेषापेक्षिणोः मन्त्रयोः तनूर्वर्षिष्ठा...... इत्ययमेव शेषो अनुषज्यते न तु अक्लृप्तः लौकिको अध्याह्रियते। अनुपस्थितत्वात्। ननु एकत्र निबद्धः अन्यत्र नेतुं न शक्यते इतिचेत् – स्वाध्यायविधिना यद्यत्प्रयोजनम् अधीतेन स्वाध्यायेन सम्पादयितुं शक्यं तत्सर्वं भावयेत् इतिविधानेन द्वितीयाकांक्षापूरणमपि सिद्ध्यति।

ननु शाब्दबोधे आकांक्षायोग्यतासत्तीनां कारणत्वम्। तत्र आकांक्षायोग्यतयोर्भेदो नास्ति। मध्ये द्वितीयमन्त्रस्य व्यवधानात् तृतीयस्य आसत्तिःकथमितिचेत् – असम्बन्धिपदव्यवधानाभावरूपा आसत्तिः। सा च प्रथमद्वितीयमन्त्रयोः आनन्तर्यात् पदव्यवधानं न भवति। तृतीयस्य तु द्वितीयमन्त्रव्यवधानसत्त्वेऽपि तस्य असम्बन्धित्वाभावेन आसत्तिःन बाध्यते।


ISSN: 2320-740X

ननु तर्हि त्रिःपाठः सर्वानन्तरपाठो वा कुतो नेतिचेत् लाघवेन सकृत्पाठे निरुक्तकारणेनैव सर्वसम्बन्धोपपत्तौ गौरवापादकत्रिःपाठादेः प्रयोजनाभावात् । तर्हि आनन्तर्यस्य अनियामकत्वे समानपदश्रुतिरूपानन्तर्यबलात् धात्वर्थस्यैव करणत्वमितिभावार्थाधिकरणसिद्धान्तःविरुध्यते । पदश्रुत्या धात्वर्थयागस्यैव फलभावनायां करणत्वं न स्यादितिचेत् – तस्य अव्यवधानत्वस्य शाब्दबोधं प्रतिकारणत्वाभावेऽपि धात्वर्थस्य करणत्वसंशये व्यवस्थापकत्वमात्रमङ्गीक्रियते । प्रकृते च एकस्यैव शेषः इतिव्यवस्थापकप्रमाणाभावेन आकांक्षादिवशेन च सर्वार्थत्वं प्रतीयते इतिअनुषङ्ग एव युक्तः ।

<u>द्वितीयमुदाहरणं तु –</u> यत्र निराकांक्षाणाम् एकार्थानां शेषिणां सन्निधौ सर्वानन्तरं वाक्यशेषः श्रूयते यथा – ज्योतिष्टोमे दीक्षाप्रकरणे यजमानपवनार्थेषु - "चित्पतिस्त्वा पुनातु, वाक्पतिस्त्वा पुनातु" इतिमन्त्रयोः एकार्थत्वे सत्यपि "त्रिभिः पवयति" इतिवचनात् समुच्चितेषु अन्ते – "अच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः" इतिशेषः श्रूयते । स च परस्यैव मन्त्रस्य शेषः उत पूर्वयोरप्यनुषज्यते इतिसन्देहे – शेषस्तु एकेनैवानन्तरेण सम्बध्य निराकांक्षः । शेषिणस्तु स्वतःनिराकांक्षाः । तेन अप्रामाणिकोऽत्र अनुषङ्गः इतिचेत् – असम्बन्धिपदव्यवधानाभावरूपसन्निधेः योग्यतायाः च सर्वत्र समानत्वात् सर्वत्रानुषङ्गः कर्तव्यः ।

ननु शेषिणां निराकांक्षत्वात् शेषस्य आकांक्षाबलेन शेषिणाम् आकांक्षामुत्थाप्य अन्वयो वक्तव्यः । तदा च शेषस्य एकस्मिन् शेषिणि आकांक्षामुत्थाप्य तदन्वयेन चरितार्थत्वात् सर्वशेष्यन्वयो न युक्तः इतिचेत् आकांक्षायाः उत्थाप्यत्वेऽपि शेषिणां प्रधानत्वेन प्रतिप्रधानं गुणावृत्तिन्यायेन विनिगमनाविरहाच्च सर्वेषामेव आकांक्षोत्थापनेन सर्वैरन्वयः । आनन्तर्यस्य नियामकत्वेन तन्मात्रे अन्वयः इत्यङ्गीकारे बाधकमपि । तथा हि – बहुहविष्कविकृतिषु नक्षत्रेष्ट्यादिषु "अग्नये कृत्तिकाभ्यः" इत्यादिवाक्यविहितेषु आम्नातानाम् उपहोमानां "अग्नये स्वाहा, कृत्तिकाभ्यः स्वाहा" इत्यादीनां "पुरस्तात् स्विष्टकृतःस्रुवेणोपहोमान् जुहोति" इतिविधिविहितानां सर्वार्थत्वमेव । आनन्तर्यस्य नियामकत्वे यस्य प्रधानस्य आनन्तर्यं वर्तते तदङ्गत्वमेव स्यात् न सर्वाङ्गत्वम् ।

पवनकर्मणि तु मन्त्राणां पवनरूपैकार्थत्वात् विकल्पः इतिचेत् – मन्त्राणां पवनार्थत्वेऽपि मुखनाभिगुल्फप्रदेशानां पवनसंस्कार्याणाम् अनेकत्वात् "त्रिभिर्यजमानं पवयति" इतिवचनाच्च समुच्चय एव युक्तः । तथा च सर्वशेषत्वं युक्तम् ।

एवम् आदावन्ते च पठितस्य शेषस्य सर्वत्रानुषङ्गेण मन्त्रत्वस्याविशिष्टत्वेऽपि उभयत्र पठ्यमानः एक एव शेषः "तेषां सहस्रयोजनेव....." इत्यादिः होमाद्युपयुक्तः । एवं मन्त्राणां मध्ये मध्ये प्रश्लिष्य पठितानां शेषाणामपि – "नमो रुद्रेभ्यः" इतिशतरुद्रीयान्तिममन्त्रे पृथिव्यन्तरिक्षद्युपदानां अन्नवातवर्षपदैःव्यतिषक्तानां विभजनेन मन्त्रत्रयीकरणाद्यात्मकोऽपि आकांक्षादिकृत एव । एवं "ऋताषाडृतधाम" इतिमन्त्रे "स इदं ब्रह्मक्षत्रं पातु, ता इदं ब्रह्मक्षत्रं पान्तु" इत्यंशयोः "तस्मै स्वाहा" "ताभ्यः स्वाहा" इत्यंशयोः क्रमेणान्वयोऽपि आकांक्षादिमूलक एव । तस्मात् सर्वत्रानुषङ्गः इतिसिद्धान्तः॥

॥इतिशम् ॥

अनुशीलितग्रन्थसूची –


- शाबरभाष्यम् ।
- तन्त्रवार्तिकम् ।
- भाट्टदीपिका ।
- शम्भुभट्टियम् ।
- मीमांसाकौस्तुभः ।


**********

 **ISSN: 2320-740X**

# शब्दशक्तिः शब्दोऽपि शाब्दबोधे भासते

**डा. सिहेच्. एस्. एस्. नरसिंहमूर्तिः**
आचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः
राजीवगान्धीपरिसरः, शृङ्गेरी

**सारांशः -**

**प्राणिषु श्रेष्ठो वर्वर्ति मनुष्यः। स व्यवहारार्थं भाषामसृजत भाषायां पदानि वाक्यानि च भवन्ति । सर्वत्रापि मूलभूतः, शब्द एव । तस्य महत्वं, प्रामाण्यञ्च नानाविधै शास्त्रज्ञैः कथं प्रतिपादितमितिसविस्तरमत्र निरुपितम् । प्रातिशाख्यानुगुणं वागुत्पत्तिःप्रदर्शिता । दार्शनिकाग्रेसरस्य भतृहरेराशयः वाक्यपदीयग्रन्थानुसारेण निरुपितः। तथैव अरुपाधिकरणे भट्टपादानामाश्योऽपि लेखेऽत्र न्यरूपयमह्म् । अन्याभिः महतीभिः युक्तिभिः शुद्धः शाब्दबोधे कथं भासते इतिसोदाहरणं सप्रपञ्चं चात्र प्रतिपादितमत्र प्रबन्धे । शब्दार्थ सम्बन्धो नित्य इत्यत्र जैमिनेः सूत्रमपि प्रमाणत्वेन प्रादर्शि ।**

प्राणिनः सर्वेऽपि स्वाभीष्टानि कार्याणि सर्वाणि शब्दद्वारैव साधयन्ति। तेषूत्कृष्टतमो वर्तते मनुष्यः। सः स्वाभिप्रायानन्येभ्यः बोधयितुं भाषामसृजत्। सा च भाषा पद-वाक्यरूपेण लोके व्यवह्रियते। वाक्यस्य पदस्य वा मूलभूतः शब्द एव। वाङ्मयेऽस्मिन् जगतिशब्दस्य अत्यन्तं महत्त्वं विद्यते। तादृशस्य शब्दस्य प्रामाण्यं सर्वैः दार्शनिकैः निश्शङ्कम् अङ्गीकर्तव्यमेव। आह च महाभाष्यकारः - शब्दप्रमाणकाः वयम् - **यच्छब्द आह तदस्माकं प्रमाणम्**[1] इति।

"अन्तःकरणमेव मनोवाय्वादिद्वारा शब्दत्वेन विवर्तते" इतिवेदान्तिनः ब्रुवते। आहुश्च ते -

**अथायमन्तरो ज्ञाता, सूक्ष्मो वागात्मनि स्थितः।**

**व्यक्तये स्वत्वरूपस्य, शब्दत्वेन विवर्तते॥**[2] इति॥

**शाब्दिकैः शब्दलक्षणमेवमुच्यते –**

येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवतिस शब्दः[3] इति। अथवा प्रतीतपदार्थको लोके ध्वनिश्शब्दः[4] इति। प्रथमलक्षणे उच्चारितेनेत्यस्य प्रकाशितेनेत्यर्थः। तेन मध्यमावाग्रूपायाः वाचः शब्दत्वमितिसूचितम्। लोकव्यवहारानुसारं द्वितीयं लक्षणं भगवतोक्तम्। शब्दस्य लक्षणान्तरमपि भाष्ये प्रोक्तम् - **शब्दो ज्ञानस्य परिणामः**[5] इति। आख्यातोपयोगे(१-३-२९) इतिसूत्रप्रत्याख्यानाय "अयमपि योगः शक्योऽवक्तुम्। कथमुपाध्यायादधीते इति?

---

1 महाभाष्यम् पस्पशाह्निकम्

2 वेदन्तपरिभषा

3 महाभाष्यम् पस्पशाह्निकम्

4 महाभाष्यम् पस्पशाह्निकम्

5 महाभाष्यम् पस्पशाह्निकम्

अपक्रामतितस्मात् तदध्ययनम्। यद्यपक्रामतिकिम्, नात्यन्तायापक्रामति? सन्ततत्वात्। अथवा ज्योतिर्वज्ज्ञानानि भवन्ति" इत्युक्तम्। तस्यायमाशयः - उपाध्यायादपक्रामच्छब्दजातमधीयान उपादत्ते इत्यर्थके उपध्यायादधीते इत्यत्रापक्रमजन्यविश्लेषाश्रयत्वादुत्सर्गेणापादानत्वं संसाध्य शब्दानामपक्रमणं न युक्तम्। यथा फलं वृक्षादपक्रान्तं न पुनर्वृक्षे भवति, एवं शब्देऽपि प्रसङ्गः इत्याशङ्क्योक्तम् - सन्ततत्वात् इति। शब्दस्य व्यञ्जका ध्वनयः उपाध्यायेनोत्पद्यमाना अपि सादृश्यात् तत्त्वेनाध्यवसीयमानाः श्रोतुः पुनः पुनः श्रोत्रदेशं गच्छन्तो व्यक्तिस्फोटरूपं जातिस्फोटरूपं वा शब्दमभिव्यञ्जयन्ति। अथवा यथा ज्वालारूपं ज्योतिरविच्छेनोत्पद्यमानं सादृश्यात् तत्त्वेनाध्यवसीयमानं सन्ततं तथैवोपाध्यायज्ञानानि भिन्नानि भिन्नरूपशब्दतामापाद्यमानानि सन्ततानीत्युच्यन्ते। सन्ततत्वादितिध्वनयता भाष्यकृता शब्दस्य ज्ञानपरिणामत्वं सूचितम्। तत्र भाष्यव्याख्याने कैयटोपाध्याय एवमलिखत् - ज्ञानस्य शब्दरूपतापत्तिरितिदर्शनमत्र भाष्यकारस्येति। अयमेवाशयो वाक्यपदीयकारेण एवमसूच्यत -

**वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते।**

**कैश्चिद्दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः॥**[1] (वाक्यप. कां १ का १०८)

ध्वनिरूपा वैखरी वाग् वायोः परिणाम इतिकेषाञ्चिन्मतम् - वायुः खात्[2] (शुक्लयजुप्रातिशाख्ये प्रथमाध्याये षष्ठं सूत्रम्) इतिकात्यायनसूत्रव्याख्याऽवसरे "वायुः कारणभूतः शब्दस्य, स च खात् = आकाशादुत्पद्यते" इत्युक्त्वा निमित्तकारणत्वेनापि वायोः शब्दकारणत्वमुपपद्यते इत्युक्तम्। तदनन्तरसूत्रं "शब्दस्तत्"[3] इति। तस्यायमर्थः - शब्दः तदात्मकः = वाय्वात्मकः इति। यदि वाय्वात्मकः शब्दः वायोः सर्वगतत्वात् सदाकालं सर्वत्रोपलब्धिः प्राप्नोतीत्याशङ्कायामुच्यते - "सङ्करोप"[4] इतिसूत्रम्। सम्यक् करणैरुपहितो हृदि वायुः वेणुशङ्खादिभिः शब्दीभवति। अत्र वायुः शब्दीभवतीतिकथनेन वायोः शब्दस्य परिणामत्वं सूचितम्। ततः परं सूत्रं विद्यते - "स सङ्घातादीन् वाक्"[5] इति। यो वायुः सम्यक् करणैरुपहितो वेणुशङ्खादिभिः शब्दीभवतिस एव सङ्घातादीन् प्राप्य वाग्भवति। सङ्घातः = पुरुषप्रयत्नः स आदौ येषां स्थानादीनां ते = सङ्घातादयः। तान् प्राप्य वाग् = वर्णो भवति।

उक्तञ्च दार्शनिकाग्रेसरेण भर्तृहरिणा -

**लब्धक्रियः प्रयत्नेन, वक्तुरिच्छाऽनुवर्त्तिना।**

**स्थानेष्वभिहतो वायुः, शब्दत्वं प्रतिपद्यते॥**[6]

लोके "गामानय, गां नय, घटमानय, घटं नय" इत्यादीनां पदानां प्रयोगाः विद्यन्ते। तत्र नयनम्, आनयनं वा

---

1 वाक्यपदीयम् काण्डे कारिका संख्या 108

2 शुक्लयजुप्रातिशाख्ये प्रथमाध्याये सूत्र संख्या-6

3 शुक्लयजुप्रातिशाख्ये प्रथमाध्याये सूत्र संख्या-7

4 शुक्लयजुप्रातिशाख्ये प्रथमाध्याये सूत्र संख्या-8

5 शुक्लयजुप्रातिशाख्ये प्रथमाध्याये सूत्र संख्या-9

6 वाक्यपदीये १काण्डे १०९ कारिका

 ISSN: 2320-740X

व्यक्तीनामेव दृशयते। तत्र दार्शनिकैः विशिष्य घटपदम् घटत्वावच्छिन्ने शक्तम्, गोपदं गोत्वावच्छिन्ने शक्तमितिकथनात्तत्रावच्छेदकतया जातिरपि प्रतीयते। केवलायाः जातेः, व्यक्तेर्वा प्रतीतिः न भवितुमर्हति। जातिं विना व्यक्तेः, व्यक्तिं विना जातेश्च प्रतीत्यसम्भवात्। अत उभयोः वाच्यत्वं बहुभिः दार्शनिकैः स्वीक्रियते। आह च महाभाष्यकारः पस्पशायाम् - न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थ इतिन, न द्रव्यपदार्थकस्याकृतिर्न पदार्थ इतिन। उभयोरुभयं पदार्थः इति। जातिबोधकत्वम् अथवा व्यक्तिबोधकत्वं वा शब्देनैव खलु वक्तव्यम्। अतः शब्दो व्यवहारस्य मूलमस्ति। आहुश्च भट्टपादाः अरुणाधिकरणे -

**आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।**

**शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति॥**[1]

भावानाम् = पदार्थानाम् (व्यक्तीनाम्), आनन्त्येऽपि = अनन्तत्वेऽपि, एकं = जातिरूपं धर्मम्, उपलक्षणं कृत्वा, शब्दः = घटादिशब्दः, सुकरसम्बन्धः = सुकरशक्तिग्रहः, न च व्यभिचरिष्यति= असम्बद्धां व्यक्तिं न बोधयति। उपलक्षीभूतधर्मेण सकलव्यक्तीनामनुगमको भवतिशब्द इतितेषामाशयः।

शास्त्रे घटमानय, गामानयेत्यादिवाक्यैः घटकर्मकमानयनं, गोकर्मकमानयनमित्यर्थप्रतिपादनेन घट - गवाद्यर्थानामेव बोधदर्शनादर्थस्यैव प्रतीतिर्जायते। सतिसम्भवे अर्थबोधनार्थमेव खलु शब्दप्रयोग इतिनिर्णयात्।

**शब्दः शाब्दबोधे कथं भासते?**

वृत्त्योपस्थितस्यैव शाब्दे भानमङ्गीक्रियते। अन्यथा घटपदजन्यबोधे आकाशस्यापि भानप्रसङ्गात्।

न च घटादिपदानां जात्याद्यर्थेष्विव शब्देऽपि शक्तिरस्तु इतिचेद् - उच्यते, घटमानय, गामानयेत्यादित एकत्वसंख्याविशिष्टघटकर्मकमानयनमितिबोधस्य सर्वानुभवसिद्धतया तदुपपत्तये जात्याद्यर्थेषु शक्तिस्वीकारेऽपि शब्दे तथा स्वीकारे किमपि प्रमाणं नास्तीतिन मान्तव्यम्। "विष्णुमुच्चारय" इत्यादिप्रयोगाः एव प्रमाणानि भवन्ति। तत्रार्थस्य विष्णोः ताल्वोष्टपुटसंयोगरूपोच्चारणक्रियानिरूपितकर्मत्वासम्भवेन शब्द एव स्वीकर्तव्यः। शब्देऽपि शक्तिस्वीकारात्तस्य वृत्त्योपस्थितत्त्वाद् विष्णुकर्मकमुच्चारणमितिशाब्दबोध उपपद्यते। तथा च विष्णुमुच्चारयेत्यादौ शब्दे शक्तिस्वीकारस्यावश्यकतया तदनुरोधेन घटमानयेत्यादावपि तत्स्वीकार आवश्यकः। एवञ्च घटपदवाच्यघटकर्मकमानयनमितिबोधो भवति।

अत्रेयं शङ्का - शब्दे शक्तिस्वीकारो मास्तु। विष्णुमुच्चारयेत्यादावर्थस्योच्चारणा-सम्भवरूपानुपपत्त्या शब्दस्वरूपे लक्षणा स्वीक्रियते। एवञ्च लक्षणया शब्दप्रतीतिः भवति। अन्यथा गङ्गायां घोषः इत्यत्र गङ्गादिपदानां तीरादौ शक्तिस्वीकारापत्तौ लक्षणोच्छेदप्रसङ्ग इतिचेद् -

उच्यते, कथञ्चिद् विष्णुमुच्चारयेत्यत्र लक्षणया साधयतिचेदपि जबगडदशमुच्चारयेत्यत्र शक्यार्थाग्रहेण शक्यसम्बन्धरूपलक्षणायाः सुतरामग्रहाच्च। जबगडदश इतिपदं किञ्चिदर्थबोधकमितिशक्यार्थमादाय लक्षणा वक्तुं तु न शक्यते। अज्ञाता शक्तिः लक्षणोपयोगिनी न भवति। अतश्शब्दोऽपि तत्र नियमेन प्रतीयत इत्यङ्गीकर्तव्यम्।

1 मिमांसा शाबर भाष्यम्

लोकव्यवहारे शब्दाः द्विधा विद्यन्ते। १) इतिशब्दसहिताः, २) इतिशब्दरहिताश्च। इतिशब्दस्यायं स्वभावः पदार्थविपर्यासकत्वम्। उक्तं हि न वेतिविभाषा (१-१-४४) इतिसूत्रे भाष्ये - लोके "गौरित्ययमाह" इतिगोशब्दादितिकरणः प्रयुज्यमानो गोशब्दं स्वस्मात्पदार्थात्प्रच्यावयति। सोऽसौ स्वस्मात्पदार्थात्प्रच्युतः- याऽसावर्थपदार्थकता तस्याः शब्दपदार्थकः संपद्यते।[1] इति। शब्दार्थसम्बन्धस्य नित्यत्वात् कथमेवमितिचेद् - उच्यते, तत्त्वतस्तु आदावेव स्वरूपपदार्थको गोशब्दः प्रयुक्तः, सादृश्यात्तु तमर्थमनभिव्यक्तं "इति" शब्दो द्योतयतीतिकैयटः। लोके शब्दविशेषणकार्थप्रतीतिः, शास्त्रे स्वं रूपमितिशास्त्रबलेनार्थविशेषणकशब्दप्रतीतिः। इतिशब्दसमभिव्याहारे विपरीतमितिविपर्यासः।

एवञ्च लोके शब्दा अर्थपराः। यतोऽह्यर्थबोधनायैव खलु शब्दप्रयोगः क्रियते। यथा - गामानय, घटमानय। अत्र तत्पदश्रवणेन श्रोता गवानयनं मे कार्यमितिविचिन्त्य गवानयनं करोति। तत्र शब्दस्यार्थपरत्वमेव वर्तते। यदा एकेन वाक्यप्रयोगः कृतः गामानयेति, तदा तृतीयः कश्चित् सः किमुक्तवान्? इतिपृच्छतिचेदयं तस्मै एवं श्रावयति- सः गामानयेत्युक्तवानिति। अत्र वर्तमानः शब्दः अनुकरणशब्दः। अत्र शब्द एव बोध्यते, न त्वर्थः। आह चाभियुक्तैः -

**शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा।**

**नो चेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थोऽवभासते॥**[2]

कारिकाया अयमाशयः - भेदेन = अनुकार्यानुकरणयोः, भेदेन विवक्षा यदि स्यात् तदा शब्दोऽपि तथा = प्रातिपदिकार्थः। नो चेत् = भेदविवक्षा ने चेद्यदि, तदा श्रोत्रादिभिः = श्रोत्रशक्तिज्ञानतत्संस्कारैः, सिद्धोऽपि उपस्थितोऽपि, असौ = शब्दः, अर्थः व = अर्थ इव, भासते = शाब्दबोधविषयो भवति। एवञ्च पटद् इति, कुरु इति, इत्याद्यनुकरणेषु अनुकार्यानुकरणयोः भेदविवक्षायां शब्दोऽपि प्रातिपदिकार्थो भवति। तयोरभेदविवक्षायां शब्दो न प्रातिपदिकार्थः। अयमत्र विशेषः - पक्षद्वयेऽपि शब्दो बोधविषयो भवति।

**ग्राह्यत्वं ग्राहकत्वञ्च द्वे शक्ती तेजसो यथा।**

**तथैव सर्वशब्दानामेते पृथगवस्थिते॥**[3]

तेजसो यथा ग्राह्यत्वं, ग्राहकत्वमितिद्वे शक्ती पृथगिव प्रत्यवभासेते, तथैव सर्वेषामपि शब्दानाम् एते = ग्राह्यत्वग्राहकत्वशक्ती पृथगिव अवभासेते। पृथगित्यस्य पृथगिवेत्यर्थः। यद्यपि व्यवहारे घटादयो ग्राह्या एव, न तु ग्राहकाः। चक्षुरादीनि ग्राहकाण्येव, न तु ग्राह्याणि। तथापि तेजसो दृष्टान्तत्वमुपपद्यते - तेजो यथा उपलब्धौ विषयभावमापन्नमेव विषयोपलब्धौ कारकत्वं प्रतिपद्यते, तथा शब्दोऽपि। ते चास्य प्रतिपाद्यप्रतिपादकशक्ती नित्यमात्मभूते पृथगिव प्रत्यवभासेते।

**विषयत्वमनापन्नैः शब्दैः नार्थः प्रतीयते**[1] इतिचाह दार्शनिकाग्रेसरो भर्तृहरिः। तस्यायमाशयः - शब्दैः

1 महाभाष्य प्रदीप व्याख्या

2 वाक्यपदीयम्

3 वाक्यपदीयम्

 **ISSN: 2320-740X**

विषयत्वम् = स्वविषयत्वमनादृत्य, अर्थः न प्रकाश्यते। शब्दः स्वरूपसम्बद्ध एवार्थं प्रकाशयति।

**न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥**[2]

यः प्रत्ययः = यद् ज्ञानम्, शब्दानुगमात् + ऋते = शब्दानुगमं विना, अस्ति = विद्यते, सः = तादृशः प्रत्ययः, लोके नास्ति। सर्वं ज्ञानम् = प्रत्यक्षानुमितिशाब्दादिकं सर्वम्, शब्देन + अनुविद्धम् + इव = शाब्दानुविद्धमेव भासते। घटमानयेत्यादौ शब्दस्यार्थे विशेषणतया भानम्, तेनात्र शब्दप्रकारकार्थविशेष्यको बोधो भवति। अग्नेर्ढक्(४-२-३३) इत्यादौ अर्थविशेषणकशब्दविशेष्यको बोधो भवति।

विषयेऽत्र भगवतः जैमिनेः सूत्रमपि प्रमाणं वर्तते - औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धेस्तत्प्रमाणं बादरायणस्यानपेक्षत्वात्[3] इति। अस्यार्थः - शब्दार्थयोः सम्बन्धः औत्पत्तिकः = उत्पत्तिभावः, तेनावियुक्तः, उत्पत्तिकालमारभ्य प्रलयपर्यन्तस्थायी, नोत्पन्नयोरनयोः पश्चात्सम्बन्धः इति। नित्य एव सम्बन्ध इत्याशयः। अतोऽर्थेन साकं शब्दोऽपि भासते।

**उपयुक्त ग्रन्थ सूचि**

1. महाभाष्यम्
2. महाभाष्य प्रदीप व्याख्या
3. वाक्यपदीयम्
4. शुक्लयजुप्रातिशाख्यम्
5. मिमांसा शाबर भाष्यम्

******

1 वाक्यपदीयम्

2 वाक्यपदीयम्

3 जै.सू. १-१-५

# देवताप्रसादस्य प्रयोजकत्वविवेचनम्

**प्रो. सूर्यनारायणभट्टः**

आचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः

राजीवगान्धीपरिसरः, शृङ्गेरी

मीमांसाशास्त्रे द्वितीयाध्यायस्य प्रथमे पादे चोदना पुनरारम्भ[1] इतिसूत्रार्थवेलायां यागध्वंसस्यैव क्लृप्तत्वात्, व्यापारत्वपक्षे तस्य नित्यत्वात् स्वर्गोत्पत्यनन्तरमपि स्वर्गान्तरोत्पत्तिप्रसङ्गात् प्रधानेन स्वर्गादिफले जननीये अङ्गेन च प्रधानादौ जननीये अपूर्वं तदवान्तरव्यापारः, तस्मादस्त्यपूर्वमितिनिर्णीतम्। अत्र नवमे ऊहनिरूपणावसरे अपूर्वमङ्गीकृत्य देवताप्रसादस्य प्रयोजकत्वम् निराकृतम्, पुनश्च देवतायाः विग्रहादिकं निराकृत्य अपूर्वस्यैव प्रयोजकत्वं साधितम् । यजेत स्वर्गकाम[2] इत्यादौ स्वर्गयागयोः विद्यमानः साध्यसाधनभावःश्रौतः, क्लृप्तश्चेतिअपूर्वद्वारा यागस्यैव फलजनकत्वं वक्तव्यम् अन्यथा देवताप्रसादस्याङ्गगीकारे श्रुतश्रौतसाध्यसाधनभावभङ्गापत्तिरपरिहार्या स्यात् । देवताप्रसादस्तु विग्राहिदिष्वेव सम्भवतीतियागस्यैव पदश्रुत्या फलसाधतोच्यत इतिच निरूपणीयम् ।

## उपक्रमः-

द्वादशलक्षण्यां नवम ऊहाध्यायः, ऊहस्तु प्रकृतावन्यथादृष्टास्य विकृतावन्यथाभावः। तत्त्वं च येन सम्बन्धेन यद्धर्मावच्छिन्नवृत्तित्वं यस्य प्रकृतौ श्रुतं, तेन सम्बन्धेन विकृतौ तद्धर्मावच्छिन्नभिन्नवृत्तित्वमिति[3] तथा हि - व्रीहीन् अवहन्तीतिप्रकृतौ व्रीहीणामवघातो विहितः। तत्र वितुषीभावरूपद्वारेण व्रीह्यादिषु विद्यमानस्यावघातस्य विकृतावपि तेनैव द्वारेण नीवारेषु अन्यथाभाव ऊह इति। मन्त्रोहस्सामोहस्संकारोहश्चेतित्रिधोहश्चिन्त्यते नवमे । यथा मन्त्राणां हि स्मारकत्वसंबन्धेन अग्नित्वाद्यवच्छिन्नवृत्तित्वं श्रुतं प्रकृतौ । विकृतौ च तेनैव सम्बन्धेन तद्धर्मावच्छिन्नभिन्नसूर्यादिवृत्तित्वात् । एवं प्रोक्षणावघातादीनामपि संस्कार्यतासम्बन्धेन व्रीहित्वाद्यवच्छिन्नवृत्तित्वं श्रुतं प्रकृतौ, विकृतौ च तेनैव संबन्धेन तद्धर्मावच्छिन्नभिन्नश्यामाकादिवृत्तित्वात्। एवं साम्नामपि आईभावादिरूपाणां येन सम्बन्धेन यत्स्थानगतैकारवृत्तित्वं प्रकृतौ (अत्र प्रकृतिशब्देन सामवेदीयप्रकृतिग्रन्थो ग्राह्यः) श्रुतं, विकृतौ (उत्तराग्रन्थे) तेषां तेनैव सम्बन्धेन तत्स्थानभिन्नस्थानगतैकारवृत्तित्वादूहः[4]॥ एवं त्रिविधोऽप्यूहो नवमे विवेचितः।

## विषयप्रवेशः-

तथा हि यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात्[5] इतिनवमे प्रथममिदं

---

1 जैमिनिसूत्रम् २-१-६

2 ताण्ड्यब्राह्मणंम् १६.१५.५१

3 भाट्टदीपिका ९-१-१

4 भाट्टदीपिका ९-१-१

5 जैमिनिसूत्रम् ९-१-१

 ISSN: 2320-740X

सूत्रम्। यज्ञसंबन्धिनः सर्वेऽपि धर्माः अपूर्वप्रयुक्ता इतिसप्तमाध्यायप्रथमाधिकरणसिद्धान्तः। यथा व्रीहिभिर्यजेत, यवैर्यजेत, दध्ना जुहोतिपयसा जुहोतिइत्यादिभिर्वाक्यैः यागहोमसाधत्वेन विहिता व्रीह्यादयोऽपूर्वप्रयुक्ताः, अपूर्वमेवैतेषां प्रयोजकम् । इमानि द्रव्याण्युद्दिश्य व्रीहीनवहन्ति, तण्डुलान् पिनष्टि, पिष्टं संयौतिइत्यादिभिः वाक्यैर्विहितानाम् अवघातपेषणसंयवनादीनामपूर्वार्थत्वं प्रतिपादितम् । अपूर्वं हि साध्यम्, व्रीह्यादीनि द्रव्याणि, तदुद्देशेन विहितान्यवघातादीनि तत्साधनानीतिनिश्चयः।

प्रोक्षणादीनां व्रीह्यादिप्रयुक्तत्वे श्यामाके चरौ वा व्रीह्यादीनामभावात् प्रोक्षणादीनां लोप एव भवेन्नतूहः। किन्तु अपूर्वप्रयुक्तत्वे श्यामाकादीनामपि तद्रूपावच्छिन्नत्वात् सिध्यत्यूहः । अपूर्वस्य शाब्दं प्रयोजकत्वं सप्तमे वर्णितम् । इह तु नवमे आर्थिकी निमित्तता वर्ण्यते इतिवैलक्षण्यं विषये। एवम् अपूर्वप्रयुक्तत्वात् अङ्गीकृतमेवापूर्वम्। एवं द्वितीयाध्याये चोदना पुनरारम्भ इत्यत्र अपूर्वसद्भावः स्थापित इति तदङ्गीकार्यमेव। तदनु अपूर्वमङ्गीकृत्य देवताप्रसादस्य प्रयोजकत्वं निराकृतम्। सम्प्रतिपुनः देवताप्रसादस्यैव प्रयोजकत्वमाशङ्क्य प्रसङ्गान्निराक्रियते ।

## आक्षेपः-

कर्मकारकं हि क्रियया ईप्सिततमं सत् प्रधानम् । तेनापि व्याप्यमानं सम्प्रदानं ततोऽपि प्रधानम्। अतःक्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छती[1]त्यत्र किं प्रतिपत्तिकर्म उतार्थकर्म इतिसंशयमुपस्थाप्य चतुर्थीसामर्थ्यात् अर्थकर्मेतिनिर्णीतम्। एवमत्रापि चतुर्थ्या सम्प्रदानस्य प्राधान्यमवगम्यते । सम्प्रदानं च देवता, तस्मात्प्रधान्यं तस्याः। सम्प्रदानस्याभिप्रेयमाणत्वेन प्राधान्यम् । यद्यपि यदाग्नेयोऽष्टाकपालः अमावास्याया[2]मित्यादौ आग्नेय इतिदेवतात्वबोधने संप्रदानार्था चतुर्थी नैव वर्तते ।तद्धितेन देवताबोधः अङ्गीक्रीयते। तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः । देवताया विधिस्तत्र दुर्बलं तु परं परमित्यादि[3] वचनात् ।अग्निः देवता अस्येत्यर्थे व्युत्पन्ने आग्नेयशब्दे, तद्धितेन द्रव्योद्देश्यकत्वेन यागक्रियाव्याप्यद्रव्यं प्रतिव्याप्यमानत्वात् तस्याः सम्प्रदानत्वमुक्तम्। अतो देवतायाः प्राधान्यमवगम्यते। अतःयागस्य पूजारूपत्वं देवतायाश्च पूज्यरूपत्वम् । एवमेव यजि देवपूजासङ्गतिदानकरणेषु इतिशाब्दानुशासनात् पूजारूपो दानरूपोऽपि वा यजेरर्थः, न त्वेतदतिरिक्तः कश्चनान्यः । उभयरूपस्यापि तस्य देवतार्थत्वं निर्विवादं सिध्यत्येव। इत्थं सम्प्रदानत्वेन वा पूज्यत्वेन देवतायाः प्राधान्यम् अभिप्रेत्य यजेत स्वर्गकाम इत्यादौ यागेन देवतामाराधयेत् ततःदेवताप्रसादात् स्वर्गो भविष्यतीत्यभ्युपगन्तव्यम् । तदा देवतानां विग्रहवत्वं हविषां भोक्तृत्वं प्रसादवत्वं, फलैश्वर्वत्वं फलदातृत्वञ्चेतिपञ्चकं उक्तयागविधानसामर्थ्यात्कल्पनीयम् । तदुक्तं यथा-

**विग्रहो हविषां भोग ऐश्वर्यं च प्रसन्नता ।**
**फलप्रदानमित्येतत् पञ्चकं विग्रहादिकमिति[4] ॥**

---

1 तैत्तिरीयसंहिता ६-१-४

2 तैत्तिरीयसंहिता २-६-३

3 तन्त्रवार्त्तिकम् १-४-३

4 मीमांसाकोशः

यथा वा राज्ञ आराधनं तत्प्रासादजननद्वारा फलसाधनम्, प्रसन्नः स फलं प्रयच्छतीतिसूत्रितं देवता वा प्रयोजयेत् अतिथिवद्भोजनस्य तदर्थत्वादिति[1] । सूत्रस्यायमर्थः, देवता इन्द्रादिः सर्वान् साङ्गप्रधानरूपान् कर्मणि प्रयोजयेत्, भोजनस्य देवताभोजनरूपस्य यागस्य तदर्थत्वात् देवतार्थत्वात् । अतिथिवत् । यथा अतिथये दीयमानं चान्नं तदर्थं, तथा कर्तुः प्रियतमं कर्म संप्रदानं कर्मणः प्रियतमम् । तथा च यत्कर्तुः प्रियतमं तस्य प्रियतमं कर्तुरपि परम्परया प्रियतममेवेतितदर्थत्वं युक्तमितियावत् ।

अतो यागैराराध्यमानाः देवताः प्रसन्नाः सत्यः फलं प्रददति। फलदातृत्वं तु तास्वेव भवितुमर्हति। अतःफलैश्वर्यवत्वं तासु देवतासु अभ्युपगन्तव्यम् यतोऽप्रसन्नाः कदापि फलं न प्रयच्छन्तीतिअनुभवसिद्धमितिहेतोस्तासां देवतानां प्रसादोऽप्यावश्यकः । तदर्थं विग्रहादि पञ्चकमभ्युपेयम्। इदं विग्रहादिपञ्चकं मन्त्रार्थवादादिभ्योऽवगम्यते। विग्रहः, हविःस्वीकारः, तद्भोजनम्, तृप्तिः, प्रसादश्चेतीदं पञ्चकं चेतनस्येवोचितम्। सहस्राक्षो गोत्रभिद्वज्रबाहुरिति विग्रहः, अग्निरिदं हविरजुषतेतिहविःस्वीकारः, अद्धीदिन्द्र प्रस्थिते मा हवींषि इतिहविर्भोजनम्, तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयतीति[2] तृप्ति-प्रसदौ। । । एभिर्वाक्यैः स्पष्टं देवतानां विग्रहादिकमभिधीयत इतितु निर्विवादम् । यद्यपि अर्थवादादिभिः प्रतीयमानत्वात् स्वार्थे प्रामाण्याभावेऽपि विध्येकवाक्यतया प्रामाण्यस्य सत्वात् निराकर्तुं न शक्यते। तस्मात् देवताप्रसादस्य विग्रहभोगादिव्यतिरेकेणानुपपत्तेः अर्थवादाद्यनुसारेण विग्रहभोगादिकल्पने न दोषः । अतः पूजितदेवतायाः फलप्रदत्वेन प्राधान्यात् सैव धर्माणां प्रयोजिका।तथा सतियत्र सौर्यादौ अग्नितत्र अग्निदेवतायां नियता धर्मा नातिदिश्यन्त इतिनास्त्योहप्रसक्तिः। र अत एव वक्तव्यं यथा - यागाराधिता देवता फलं प्रयच्छतीतिदेवता प्रधानम् देवताराधनार्थो याग इतिप्राप्ते -

**समाधीयते**

**"यागस्यैव पदश्रुत्या फलसाधनतोच्यते ।**

**देवतायाश्च तादर्थ्यं तन्निर्वृत्युपयोगतः[3] ॥ इति।**

किं देवतायाः फलप्रदत्वलक्षणं प्राधान्यं शब्दादापाद्यते उत वस्तुसामर्थ्यात् **?** । न प्रथमः**,** स्वर्गकामो यजेत इत्यादौ शब्देन विधेयस्य यागस्य फलप्रदत्वावगमात् । द्रव्यदेवते तु सिद्धत्वेन सिध्यनर्हे । तत्र द्रव्यस्य विधानं प्रतिगुणत्वं यथा, तथैव देवताया अपि गुणत्वं न तु प्राधान्यम् ।नापि वस्तुसामर्थ्यात् फलप्रदत्वं देवतायाः, विग्रहादिपञ्चकप्रतिपादकवाक्यानां स्वार्थे तात्पर्याभावात् । अन्यथा वनस्पतिभ्यः स्वाहा**,** मूलेभ्यः स्वाहा इत्यादिमन्त्रेष्वपि विग्रहदिपञ्चकयुक्तं देवतात्वं भवेत्। यच्च प्रत्यक्षविरुद्धम् ।एवं स्वर्गकामो यजेत इत्यादिषु वाक्येषु फलं प्रति यागस्य विधानं स्पष्टं यागेन स्वर्गं भावयेदितिप्रतीयते । तत्र प्रत्ययाभिहिता भावना अंशत्रयोपेता भाव्यं स्वर्गमपेक्षते स्वर्गस्यैव पुरुषार्थत्वात् । शान्तायां भाव्याकाङ्क्षायां साधनमाकाङ्क्षन्ती भावना समानपदश्रुत्युपनीतं

1 जैमिनिसूत्रम् ९-१-६

2 जैमिनीयन्यायमालाविस्तरः९-१-४

3 शात्रदीपिका

 ISSN: 2320-740X

यागमविरोधात् ग्रहीत्वा इतिकर्तव्यताकाङ्क्षायां भूतं द्रव्यदेवतं भव्ययागनिर्वर्तनसमर्थं तादर्थ्येन गृह्णन्ती देवतां यागार्थं करोति। न तु देवतायाः फलप्रदानार्थं तदाराधनाय यागविधिः भवेत् ।

देवतोद्देशपूर्वकद्रव्यत्यागो हि यागः । देवतोद्देशो नाम इदं द्रव्यम् अग्न्यादि स्वामिकम्, अथवा अग्नेरिदम्, अथवा अग्न्यर्थमिदम् इत्याकारकद्रव्यत्यागश्च इदं मदीयं न इत्याकारकं ज्ञानं तदा ज्ञाने विध्यनुपपत्तिः। तस्य कृतिसाध्यत्वाभावात् यदाकारकं ज्ञानं तदाकारकत्यागस्यैवापत्तौ अग्नय इदं न ममेतित्यागानुष्ठानापत्तेश्च । तादृशमानसयज्ञोत्पत्तिमात्रेणैव यागानुष्ठानसिद्धौ वाचनिकतादृशत्यागे प्रमाणाभावप्रसङ्गः । अतो द्रव्यत्यागकाले देवतावाचकपदस्य चतुर्थीप्रकृतिकत्वेनोच्चारणमात्रमेव देवतोद्देशपदार्थःकृतिसाध्यो विधिविषयः, द्रव्यत्यागोऽपि द्रव्यवृत्तिस्वस्वत्वनिवृत्यनुकूलेदं न ममेत्याकारकज्ञानपूर्वी व्यापार इदं ममेत्याकारकशब्दोच्चाररूपःस एव । यद्यपि द्वितीयाध्याये अपूर्वाधिकरणे कौस्तुभे देवताप्रसादस्यैव रात्रिसत्रन्यायेन द्वारत्वोपपत्तेः न अनुपस्थितापूर्वकल्पनं युक्तमित्याक्षिप्य अर्थवादोपात्तदेवताप्रसादापेक्षय उपस्थिततध्वंसद्वारकत्वेनैव नैराकाङ्क्ष्ये रात्रिसत्रन्यायानवतारात् देवताप्रसादस्येच्छाविशेषरूपस्य क्षणिकत्वेन व्यापारान्तरापेक्षा, अतो यागध्वंसस्यैव व्यापारत्वकल्पनं वरमितिनिरस्तः देवताप्रसादपक्षः । यागध्वंसस्यापि व्यापारत्वकल्पनं नास्त्येव ।

तस्माद् देवताप्रसादकारणीभूतविग्रहादिस्वीकारः कथमपि न सम्भवति। हविस्त्यागसमये चतुर्थ्यन्तपदेन निर्दिश्यमानत्वात् देवतायाः प्राधान्यं प्राक्प्रदर्शितम् । न तद्युज्यते चोदनागम्यत्वाभावात् । गुणत्वेन देवताश्रुतिः । फलवाक्ये हि यजिः यदाग्नेयादिवाक्योत्पन्नयागपरः । उत्पत्तिवाक्ये आग्नेय इतितद्धिन्तान्तेन अग्निदेवताकः पुरोडाश इतिपुरोडाशस्य प्राधान्यम् । देवतायाः तत्र गुणभावोऽवगतः। द्रव्यदेवतासंबन्धात् कल्प्यमानो यागः तदनुगुणमेव कल्प्यते - अग्निदेवताकाष्टाकपालपुरोडाशहविष्को याग इति। एवंविधयाग एव फलवाक्ये यजिना परामृश्यत इतिदेवता गुणभूतैव त्यागांशं प्रतीतियुज्यते । अनेनापि यागस्यैव प्राधान्यमवगम्यते ।

ननु देवतायाः विग्रहादिकं नाङ्गीक्रियते, तर्हि किं रूपं तस्याः इत्याशङ्कायामुच्यते " शब्दमात्रं देवता । अर्थस्तु प्रातिपदिकानुरोधात् चेतनोऽचेतनो वा कश्चित् स्वीक्रियते “ इत्थं च शब्दमात्रस्य देवतात्वेऽपि द्रव्यसंबन्ध कर्मसु आरोपित एव । एवमुपासनादौ मन्त्रप्रतिपाद्यार्थस्य स्वीकारात् तस्मिन्नर्थे विग्रहाद्यारोपेण वाचनिकं ध्यानमात्रं विधीयते । तद्विशिष्टात् उपासानारूपकर्मणः फलम् । अपि च "मन्त्रार्थवादेतिहासपुराणेष्वपि देवतानामपि तपश्चरणक्रत्वनुष्ठानब्रह्मास्त्रादिमन्त्रतश्च समीहितसिध्यनुकीर्तनात् कर्मण एव फलं गम्यते । मन्दधियस्तु श्रद्धालवस्तात्पर्यमजानाना भ्राम्यन्तु नामे " तिशास्त्रदीपिकायां मिश्रपादाः ।7

किञ्च स्तेग - मण्डूकादीनां तिरश्चाम्, अचेतनानां चौषधिवनस्पतीनाम्, अश्वानां गवां च हनुदन्तानाम्, अश्वरूपाणां च कृष्णश्वेतादीनाम् अश्वचरितानां चेङ्कार- शकृत्करणादीनां देवतात्वेन होमेषु श्रूयमाणानां को नाम विग्रहादिकं फलदायित्वं च श्रद्दधीत । किञ्च सैव आग्निहोत्रदेवता दध्ना पूज्यमाना इन्द्रियं ददाति, पसया पशुमितिको हेतुरन्यदतो वस्तुस्वभावात् यावकभोजनानशनादिभिश्च किमितिदेवतास्तुष्यन्ति, किमितिवा सुरापानादिभिः कुप्यन्ति ? येनाभ्युदयं प्रत्यवायं च कुर्वन्ति कर्तुः । अथैवमादिषु कर्मण एवापूर्वद्वारं फलं तस्मादापूर्वप्रयुक्ता धर्माः”।

**उपसंहारः**

एवं च यजेत स्वर्गकाम इत्यादौ स्वर्गयागयोः साध्यसाधनभावःश्रौतःक्लृप्तश्च अतोऽपूर्वद्वारा यागस्यैव फलजनकत्वं स्पष्टम् । देवताप्रसादस्य अङ्गीकारे श्रुतश्रौतसाध्यसाधनभावभङ्गापत्तेः यागस्यैवाभ्युपगन्तव्यम् । यथा चोक्तं भृटपादैः

"तस्मात् फले प्रवृत्तस्य यागादेः शक्तिमात्रकम् ।
उत्पत्तौ वाऽपि पश्चादेरपूर्वं न ततः पृथक् [1]॥ इतिशम्॥

**आधारग्रन्थाः**

१. भाट्टदीपिका । (प्रभावलीसहिता)

२. जैमिनिसूत्रवृत्तिः।

३. शास्त्रदीपिका (प्रभासहिता)

४. श्लोकवार्त्तिकम्

५. भाट्टकौस्तुभः

६. तन्त्रवार्त्तिकम्

७. शाबरभाष्यम्

८. अध्वरमीमांसाकुतूहलवृत्तिः

*********

1 श्लोकवार्त्तिकम्१-१-१९९

 ISSN: 2320-740X

# श्रीरुद्राध्याये वेदान्ततत्त्वाविर्भावः

**डा. गणेश ईश्वर भट्टः**

सहाचार्यः विभागाध्यक्षश्च

केन्द्रीयसंस्कृतविश्वविद्यालयः

राजीवगान्धीपरिसरः, शृङ्गेरी

**रुद्राध्यायः लोके प्रसिद्धः वेदभागः । पूजादिषु कर्मसु अस्य प्राचुर्येण उपयोगः क्रियते । कर्मकाण्डे पठितःअपि अयं वेदान्ततत्त्वप्रतिपादकः । वेदान्तार्थस्य सम्यग् अवगमनम् अस्ति चेदेव रुद्राध्यायस्य अर्थःस्फूटीभवति। एकस्यैव परमात्मनः जगतिनानाजीवरूपेण अवस्थानात् स एव सर्वस्यापि आत्मा । इदं सर्वात्मकत्वं रुद्राध्याये स्फुटं प्रकाशितम् । अन्यांश्च नैकान् वेदान्तसिद्धान्तान् आश्रित्य भगवतःरुद्रस्य अत्र नमस्कारः कृतः। एते विषयाः अस्मिन् लेखे विचारिताः ।**

तैत्तिरीयसंहितायां चतुर्थकाण्डे पञ्चमप्रश्ने आम्नातःश्रीरुद्राध्यायः लोके याज्ञिकसमवाये च विश्रुतः। संहितायां पठितत्वात् अयं प्रयोगसमवेतं कञ्चिदर्थं प्रतिपादयतीतिआपाततःप्रतीयते । किन्तु अयं भागः वेदे अनितरसाधारणः सन् कर्मकाण्डे पठितःअपि अपूर्वाणि अध्यात्मतत्त्वानि प्रतिपादयतीतिभाष्याद्यवलोकनेन अवगम्यते । अत एव **"विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनी श्रुतौ**[१]" इतिवचनं प्रवृत्तम् । वेदान्तार्थज्ञानोत्पत्तिद्वारा रुद्राध्यायः अमृतत्वे पर्यवस्यति। तथा च जाबालोपनिषदि रुद्राध्यायस्य अमृतत्वहेतुत्वं श्रूयते- **अथ हैनं ब्रह्मचारिण ऊचुः किञ्जप्येनामृतत्वं ब्रूहीति। स होवाच याज्ञवल्क्यः शतरुद्रीयेणेत्येतान्येव ह वा अमृतस्य नामान्येतैर्ह वा अमृतो भवतीति**[२]" इति। अत एव सायणाचार्याः प्रोचुः –

> **कर्मप्रकरणे पाठात् कर्माङ्गत्वमपीष्यते ।**
> **ज्ञानहेतुत्वमप्यस्य सर्वोपनिषदीरितम्**[३] **॥** इति।

साक्षात् वेदान्तप्रतिपाद्यं परं ब्रह्मैव इह श्रीरुद्रनाम्ना सङ्कीर्तितः। अत्रत्यानि वेदान्ततत्त्वानि सम्प्रतिकिञ्चिद् अवलोकयामः ।

रुद्राध्याये एकादश अनुवाकाः सन्ति । तत्र प्रथमे अनुवाके "**नमस्ते रुद्र मन्यव उतोत इषवे नमः**[४]" इत्यादिभिः मन्त्रैः रुद्रस्य प्रसन्नता सम्प्रार्थिता । दुष्टानां वधाय भगवान् विविधानि आयुधानि धरति। दुष्टानां वधे कृते एव समाजे स्वास्थ्यं प्राप्यते । रुद्रः धनुषि बाणान् संयोज्य बाणान् प्रयुज्य दुष्टान् हन्ति । एतत् रुद्रस्य कार्यं ज्ञात्वा, किं मयि अपि तादृशाः दोषाः सन्ति? किं मयि अपि रुद्रः बाणान् क्षिपति? इत्येवं भीतःविदित्वा अविदित्वा वा कृतपापाचरणः जीवःरुद्रस्य प्रसादम् अभिवाञ्छति।

रुद्राध्याये विद्यमानाः अनेके मन्त्राः किरातमिव रुद्रं वर्णयन्ति । किरातो हि धनुर्बाणधरः दुष्टमृगान् हत्वा जनान् भयाद् विमोचयति। तथैव रुद्रः अस्मासु विद्यमानान् दुर्गुणान् नाशयित्वा अस्मान् संसारभयाद् विमोचयति। इममर्थं मनसि निधाय भगवत्पादाः शिवानन्दलहर्यां शिवमेवम् अस्ताविषुः-

**मा गच्छ त्वमितस्ततो गिरिश भो मय्येव वासं कुरु**

**स्वामिन्नादिकिरात मामकमनःकान्तारसीमान्तरे ।**

**वर्तन्ते बहुशो मृगा मदजुषो मात्सर्यमोहादयः**

**तान्हत्वा मृगयाविनोदरुचितालाभं च संप्राप्स्यसि**[५] ॥ ४३ ॥

अध्यात्मदृष्ट्या अन्योऽपि अर्थःअत्र स्मरणीयः । बाण इव लक्ष्यं जीवःब्रह्म प्राप्नुयात् । धनुषा हि विसृष्टः बाणः लक्ष्यं प्राप्य तिष्ठति। धनुस्स्थनीयः प्रणवः। प्रणवे चित्तमावेश्य विगलितविषयान्तरसम्बन्धः क्रमेण स्वसंसारिभावं विहाय जीवःअसंसारिब्रह्मभावम् आपद्येत । तथा च मुण्डकश्रुतिः-

**प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।**

**अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्**[६] ॥ इति।

अपि च, परमेश्वरः बाणान् क्षिप्त्वा त्रिपुरवासिनः असुरान् अवधीत् इतिपुराणेषु प्रसिद्धम् । पुरशब्दःशरीरवाचकोऽपि इति**पुरमेकादशद्वारम्**[७] **नवद्वारे पुरे देही**[८] इत्यादिश्रुतिस्मृतिषु दृष्टम् । शरीरं च स्थूलसूक्ष्मकारणभेदेन त्रिविधम् । एतेषां त्रयाणामपि नाशः तत्त्वज्ञानेनैव साध्यः । अतःजीवेन तत्त्वज्ञानाख्येन बाणेन शरीरत्रयस्य नाशः कर्तव्यः | अयमपि अर्थःपरमेश्वरस्य धनुर्बाणादिस्तवेन स्मार्यते ।

द्वितीयानुवाकम् आरभ्य रुद्राध्याये परमेश्वरस्य सर्वात्मत्व-सर्वेश्वरत्ब-सर्वान्तर्यामित्वानि प्रतिपादितानि । एक एव भगवान् रुद्रः बहूनि शरीराणि प्रविश्य बहुविधो भवति। अतःउच्चवचजीवरूपेण विद्यमानाः सर्वेऽपि आत्मानः भगवतःरुद्रस्यैव रूपभेदाः । तथा च श्रुतिः **"इन्द्रो मायाभिः बहुरूप ईयते**[९]**"** इति। गीतायां

**"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।**

**शुनि चैव श्वपाके च पण्डिताः समदर्शिनः**[१०]**"** ॥

इतिश्लोकेन उत्कृष्टेषु निकृष्टेषु वा जीवेषु एकस्यैव आत्मतत्त्वस्य अवस्थितिः उक्ता । इममर्थम् आश्रित्य रुद्राध्यायस्य चतुर्थे अनुवाके स्तेनादिरूपेण अपि रुद्रः नमस्कृतः। न चैतावता रुद्रः निन्द्यते । यतो हि स्तेनादिशब्दानां वाच्यार्थाः यद्यपि लोकप्रसिद्धाः चोरादयः । किन्तु अत्र ते शब्दाः वाच्यार्थाविवक्षया केवलं चैतन्यम् उपलक्षयन्ति । स्तेनादिशरीरेषु विद्यमानम् अद्वितीयं चैतन्यमेव तत्र लक्ष्यम् । चैतन्यं च विकारेषु विद्यमानमपि तदीयैः धर्मैः असंस्पृष्टं सत् सर्वदा विशुद्धमेव अवतिष्ठते । यथोक्तं भगवत्पादैः**तत्रैवं सतितत्कृतेन गुणेन दोषेण वा अणुमात्रेणापि स न सम्बध्यते**[११] इति। विवृतमेतद् भाष्यकारैः सायणाचार्यैः **स्तेनादिशरीरेषु रुद्रो द्वेधा वर्तते जीवरूपेण ईश्वररूपेण च । तत्र यज्जीवरूपं तत् स्तेनादिशब्दानां वाच्योऽर्थः। स एव शास्त्रेषु निन्द्यः । यत्तु ईश्वररूपं तत् स्तेनादिशब्दैः उपलक्ष्यते । तदनुसन्धानं च पापक्षयहेतुत्वेन परमपुरुषार्थ इतिवाच्यार्थविवक्षया मन्त्रेषु लौकिकाः शब्दाः प्रयुज्यन्त इतिद्रष्टव्यम् । उपलक्षकवाच्यार्थद्वारेण लक्ष्यार्थःमुग्धैरपि सहसा सम्यग् बोद्धं शक्यते, यथा शाखाग्रे चन्द्र इति।**

 **ISSN: 2320-740X**

**तस्मात् लक्ष्यार्थस्यैव विवक्षायाम् अपि सुखावबोधद्वारत्वेन मुख्यार्थवाचकाः शब्दाः प्रयोक्तव्याः**[१२] इति। तथा च उत्कृष्टनिकृष्टभेदेन अवस्थिताः सर्वे अपि जीवाः रुद्रादभिन्नाः । एवं भक्तः रुद्रस्य सर्वात्मकत्वम् अनुसन्धातुं शक्नोति। तथा च छान्दोग्यश्रुतिः **ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा**[१३] इति। तथा च रुद्राध्याये आन्तं यावन्तःजीवविशेषवावाचकाः शब्दाः प्रायोजिषत, सर्वेषामपि तेषाम् अद्वितीये सर्वात्मनि चैतन्यमात्रे तात्पर्यम् । अतःभगवान् रुद्रः सर्वात्मा ।

उपनिषत्स्वपि आत्मनः सर्वात्मकत्वम् एवमेव वर्णितम् । यथा श्वेताश्वतरोपनिषदि-

**"त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी ।**

**त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः[१४]"** ॥ इति।

**"नमो ज्येष्ठाय[१५]"** इत्यस्मिन् अनुवाके, रुद्रे पूर्वज-अपरज-मध्यमशब्दाः श्रुताः । ते च भगवतःविभिन्नेषु कालेषु उत्पन्नानां जीवानां रूपेण अवस्थितिं ज्ञापयन्ति । यथा- पूर्वं जगदादौ हिरण्यगर्भादिरूपेण उत्पन्नः पूर्वजः । अपरस्मिन् जगदवसानकाले संहर्तुं कालाग्न्यादिरूपेण उत्पन्नः अपरजः । तथा च स्मृतिः **"कालोऽस्मि लोकक्षयकृत्[१६]"** इति। मध्यकाले देबतिर्यगादिरूपेण उत्पन्नः मध्यमः । तथा च त्रिष्वपि कालेषु नानारूपःरुद्रः तिष्ठति।

अस्मिन्नेव अनुवाके "**नमः सोभ्याय** च" इतिरुद्रे सोभ्यशब्दःवर्तते । भाष्ये सोभ्यशब्दस्य अर्थःप्रदर्शितः- **"उभाभ्यां पुण्यपापाभ्यां सह वर्तत इतिसोभः मनुष्यलोकः । अत एव आथर्वणिका आमनन्ति पुण्येन पुण्यं लोकं जयतिपापेन पापमुभाभ्यामेव मनुष्यलोकम् इति। तत्र भवःसोभ्यः**" इति। एवं भगवान् रुद्र एव मनुष्यलोके जीवो भूत्वा कर्मवशात् सञ्चरतिइतिरुद्राध्याये तत्र तत्र रुद्रस्य स्तुतौ प्रयुक्ता नैके शब्दाः ज्ञापयन्ति ।

अस्मिन् अनुवाके **नमः श्लोक्याय चावसान्याय** इत्यत्र रुद्रे आवसान्यशब्दःश्रूयते । तेन वेदान्तप्रतिपाद्यं परं ब्रह्मैव रुद्र इतिज्ञाप्यते । यतःअवसानशब्दःवेदान्तपरः तस्य अन्तार्थवाचित्वात् । अवसाने भवःआवसान्यः, वेदान्तप्रतिपाद्य इत्यर्थः। परमात्मनः वेदैकवेद्यत्वात् स्वप्रतिपादके वेदान्ते प्रतिपाद्यत्वेन सः स्थितः।

परमात्मन एव रुद्ररूपेण अवस्थानात् रुद्रे भगवच्छब्दःप्रयुज्यते । अत एव पाठकाः रुद्राध्यायस्य आरम्भे **"ओं नमो भगवते रुद्राय"** इत्यामनन्ति । **"विकिरिद विलोहित नमस्ते अस्तु भगवः[१७]"** इतिमन्त्रेऽपि अयमर्थःनिहितः।

जीवस्य कर्मफलभोक्तृत्वे अपि भगवान् स्वयं तु स्वस्वरूपेण तद्रहितःजीवं भोजयतिकेवलम् । इममर्थमाह आलाद्यशब्दः**"नम आलाद्याय च[१८]"** इति। अलं सम्पूर्णं यथा भवतितथा कर्मफलम् अत्तीतिअलादः जीवः। **तयोरन्यः पिप्पलं स्वाद्वत्ति** इतिश्रुतेः । तस्य प्रेरकत्वेन तत्सम्बन्धित्वात् रुद्रः आलाद्यः । "**ऋतं पिबन्तौ सुकृतस्य लोके**[१९].. इत्यस्मिन् मन्त्रे कर्मफलभोक्त्रा जीवेन परमात्मनः सह अवस्थितिः उक्ता । जीवं भोजयन् परमात्मा तेन सह भवति, अतःश्रुतौ पिबन्तौ इतिद्विवचनम् इति**"ऋतं पिबन्तावात्मानौ हि तद्दर्शनात्[२०]"** इतिअधिकरणे निर्णीतम् ।

**"द्रापे अन्धसस्पते दरिद्रत्**[२१]..." इतिमन्त्रे भगवन्तं रुद्रम् उद्दिश्य दरिद्रत् इतिशब्दःप्रयुक्तः । तेन भगवतःनिर्विशेषत्वम् उक्तं भवति। भाष्यं च तत्र **दरिद्रत् अकिञ्चनः स्वयं विरक्तः केवल इत्यर्थः, एकमेवाद्वितीयम्,**

**नेह नानास्ति किञ्चन इतिश्रुतेः** इति। तथा च वस्तुतःपरमात्मनः निर्विशेषत्वात् तस्मिन् एकस्मिन् अद्वितीये प्रपञ्चः भवितुं नार्हतिइत्यभिप्रायेण सः शब्दःप्रयुक्त इतिज्ञायते ।

एकस्यैव परमात्मनः विष्णुरुद्रादीनि रूपाणि भवन्ति इतिवेदान्तशास्त्रे पुराणादिषु च विश्रुतःविषयः । अतः **नमो गिरिशाय च शिपिविष्टाय**[२२] च इत्यत्र **शिपिविष्ट** इतिशब्दप्रयोगपूर्वकं रुद्रस्य नमस्कारः कृतः। अत्र शिपिविष्टशब्दःभगवतःरुद्रस्य विष्णुरूपतां ज्ञापयति। तथा च श्रुतिः **"विष्णुः शिपिविष्ट**[२३]" इति।

सर्वव्यापी सर्वात्मकः भगवान् सर्वेषामपि हृदये तिष्ठति। अत्र हृदये अवस्थानं नाम स्थानान्तरापेक्षया अतिशयेन हृदये उपलभ्यमानत्वम् । तथा च श्रुतिः **"अङ्गुष्ठमात्रः पुरुषः मध्य आत्मनि तिष्ठति**[२४]" इति। स्मृतिरपि **"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति**[२५]" इति। अयमर्थःरुद्राध्याये गर्तसत् इतिशब्देन प्रकाशितः। गर्तसदृशे हृदयपुण्डरीके सर्वदा तिष्ठतीतिगर्तसत्  इतितस्य शब्दस्य निर्वचनम् ।

एवं रुद्रस्य वाचकानि नैकानि पदानि वेदान्ततत्त्वमूलानि । यथा **"नमो भवाय च रुद्राय च नमः शर्वाय च**[२६]" इत्यत्र पदार्थविवरणं भवति- भवन्ति प्रणिनः अस्मादितिभवः, रुत् रोदनहेतुं दुःखं द्रावयतिइतिरुद्रः, शृणोतिहिन्स्ति पापमितिशर्वः इति। तथैव - ताराय तारः प्रणवप्रतिपाद्यः, **"नमः शङ्कराय च मयस्कराय च**[२७]" मित्रादिरूपेण शं लौकिकसुखं करोतीतिशङ्करः आचार्यशास्त्रादिरूपेण मोक्षसुखं करोतीतिमयस्करः। परमात्मा पापस्य तज्जन्यस्य दुःखस्य च नाशक इत्ययमर्थः**"अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः**[२८]**"** इत्यादिस्मृतौ प्रसिद्धः । तथैव परमात्मनः जगत्कारणत्वम् **"अक्षरात् सम्भवतीह विश्वम्**[२९]**" "अहं कृत्स्नस्य जगतःप्रभवःप्रलयस्तथा**[३०]**"** इत्यादिश्रुतिस्मृतिषु निरूपितम् । **"एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः**[३१]**" "एष ह्येवानन्दयाति**[३२] इत्यादिश्रुतौ परमात्मनः ओङ्कारप्रतिपाद्यत्वम् आनन्दहेतुत्वं च निगदितम् ।

रुद्राध्याये भगवान् रुद्रः सोमः(उमापतिः), नीलग्रीवः, त्र्यम्बकः इत्येवं नामभिः संस्तुतः। इमान्येव नामानि परमात्मनः उपनिषत्सु श्रूयन्ते । यथा कैवल्योपनिषदि-

**"उमासहायं परमेश्वरं विभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ।**

**ध्यात्वा मुनिर्गच्छतिभूतयोनिं समस्तसाक्षिं तमसः परस्तात्** [३३]**"॥** इति।

एतत् सर्वं सायणभाष्यम् आश्रित्य विवृतम् । विष्णुसूरिकृतम् अभिनवशङ्करकृतं च इतिरुद्राध्यायस्य अन्यद् भाष्यद्वयम् उपलभ्यते । तदनुसारेण अर्थे वर्ण्यमाने रुद्राध्यायस्य सर्वात्मना अध्यातत्त्वप्रतिपादकत्वम् एव अवगम्यते ।

तदेवं परमात्मनः रुद्राध्याये सर्वात्मकत्ववर्णनेन औपनिषदं ब्रह्मैव प्रदर्शितम्, यस्यैव ज्ञानं कैवल्यं साधयति। कैवल्योपनिषत् शतरुद्रियस्य माहात्म्यम् उपवर्ण्य अन्ते श्रावयति-

**"अनेन ज्ञानमाप्नोतिसंसारार्णवनाशनम् ।**

**तस्मादेवं विदित्वैनं कैवल्यं पदमश्नुते**[३४]" ॥ इति।

अत एव यतीनामपि रुद्राध्यायः उपादेयः । **"श्रीरुद्रं प्रणवं चैव नित्यमावर्तयेद्यतिः**[३५]" इति स्मृतिः । तस्मात् अविरक्तैः विरक्तैश्च श्रीरुद्रध्यायः आवर्तनीयः अनुसन्धेयश्च इतिशम् ।


**ISSN: 2320-740X**

सङ्केतसूची –

| | |
|---|---|
| १. करणागमः ०८-०४ | २. जाबालोपनिषत् ०७ |
| ३. तै. सं. ५-४ सायणभाष्यम्, उपोद्घातः | ४. तै. सं. ५-४-१ |
| ५. शिवानन्दलहरी-४३ | ६. मुण्डकोपनिषत् २-४ |
| ७. कठोपनिषत् २-२-१ | ८. भगवद्गीता ५-१३ |
| ९. बृहदारण्यकोपनिषत् २-५-१९ | १०. भगवद्गीता ५-१८ |
| ११. ब्रह्मसूत्रशाङ्करभाष्यम्, उपोद्घातः | १२. तै. सं. ५-४-३ सायणभाष्यम् |
| १३. छान्दोग्योपनिषत् ६-८-७ | १४. श्वेताश्वतरोपनिषत् ४-६ |
| १५. तै. सं. ५-४-६ | १६. भगवद्गीता ५-१८ |
| १७. तै. सं. ५-४-१० | १८. तै. सं. ५-४-८ |
| १९. कठोपनिषत् १-३-१ | २०. ब्रह्मसूत्रम् १-२-३ |
| २१. तै. सं. ५-४-१० | २२. तै. सं. ५-४-५ |
| २३. तै. सं. सायणभाष्यम् ५-४-५ | २४. कठोपनिषत् २-१-१२ |
| २५. भगवद्गीता १८-६१ | २६. तै. सं. ५-४-५ |
| २७. तै. सं. ५-४-८ | २८. भगवद्गीता १८-६६ |
| २९. मुण्डकोपनिषत् १-२-३ | ३०. भगवद्गीता ७-६ |
| ३१. प्रश्नोपनिषत् ५-२ | ३२. तैत्तिरीयोपनिषत् २-१-७ |
| ३३. कैवल्योपनिषत् ७ | ३४. कैवल्योपनिषत् २६ |
| ३५. विश्वेश्वरस्मृतिः | |

**********

# अभिनवभारत्यां शान्तरसविचारः

**डा. राघवेन्द्रभट्टः**

सहाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः

राजीवगान्धीपरिसरः, शृङ्गेरी – ५७७१३९,

अपूर्वं यद्वस्तु प्रथयतिविना कारणकलां

जगद्ग्रावप्रख्यं निजरसभरात्सारयतिच ।

क्रमात्प्रख्योपाख्याप्रसरसुभगं भासयतित-

त्सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते[१]॥

अस्ति कविसहृदयाख्यस्य सरस्वतीतत्त्वस्य रसस्यन्दिता एवानुस्यूतं सूत्रम्। अपूर्वस्य वस्तुनः सरसं प्रथनं शब्दार्थशरीरे सन्निवेशनं च प्रतिभानवतःकवेः कर्म भवति। तत्कर्मणः साफल्यं सहृदया निर्णयन्ति। एतदुभयमार्गम् अनुसन्धाय परीक्षां समीक्षां च विदधते विमर्शकाः। महत्यस्मिन् समालोचनामार्गे सुप्रतिथेन अभिनवगुप्तपादेन सविमर्शं रसाः प्रत्यपाद्यन्त। मुनिना भरतेन उक्ता रसा नाट्यशास्त्रस्य व्याख्यायाम् अभिनवभारत्यां तेन विस्तृततया न्यरूप्यन्त। शान्तरसस्य अङ्गीकारानङ्गीकारविषयिणी चर्चा बहोः कालात् प्रवर्तते। अभिनवगुप्तपादेन उक्ताः शान्तरससम्बन्धिनो विचाराः चर्चायाः नवीनां दृष्टिमुन्मीलयन्ति। अभिनवभारतीगतःशान्तरसविचारः लेखेऽस्मिन् विमृष्टः। नाट्यशास्त्रे

'अथ शान्तो नाम शमस्थायिभावात्मकः मोक्षप्रवर्तकः। स तु तत्त्वज्ञानवैराग्याशयशुद्ध्यादिभिर्विभावैः समुत्पद्यते। तस्य यमनियमाध्यात्मध्यान-धारणोपासनसर्वभूतदयालिङ्गग्रहणस्तम्भरोमाञ्चादिभिः अनुभावैः अभिनयः प्रयोक्तव्यः। व्यभिचारिणश्चास्य निर्वेदस्मृतिधृतिसर्वाश्रमशौचादयः[२]' इतिशान्तरसः उक्तः।

अभिनवगुप्तेन शान्तसम्बन्धि इतरमतं विचार्यते। 'ये पुनर्नव रसा इतिपठन्ति तन्मते शान्तस्वरूपम् अभिधीयते। तत्र केचिदाहुः- शान्तःशमस्थायिभावत्मकः तपस्यायोगसम्पर्कादिभिः विभावैः उत्पद्यते। तस्य कामक्रोधाद्यभावैः अनुभावैः अभिनयः। व्यभिचारी धृतिमतिप्रभृतिः' इति**केचित्पक्षः** उल्लिखितः। शान्तस्य रसत्वेन अनभ्युपगमे सन्त्यनेके हेतवः।

1. शान्तस्य शमः स्थायिभावःइतिउच्यते। किन्तु स न भवितुमर्हति। यतःशान्तस्य पर्यायवाची शब्दःशमः - अन्तरिन्द्रियनिग्रहः। अतःशान्तस्य स्थायिभावःशमः भवितुं नार्हतीति।
2. किञ्च यदि शमः स्थायिभावःइतिस्वीक्रियते तर्हि भरतमुनिवचनं विरुध्येत। मुनिना च ४९ भावाः उक्ताः[४]। ३३ व्यभिचारिणः, ८ सात्विकाः, ८ स्थायिनः इति।
3. किञ्च विभावानुसन्धाने वैषम्यम् वर्तते। यथा ऋतुमाल्यचन्द्रिकादिः शृङ्गाररसस्य उद्दीपनविभावतया हेतुर्भवति, न तथा तपःअध्ययनं योगः इत्यादिः। यतःअध्ययनादिः अन्तःकरणस्य शमस्य हेतुः भवति, न तु शान्तस्य।
4. तपःअध्ययनं च तत्त्वज्ञानस्य कारणम्, अतःतौ शमस्य विभावःइतिकथनम् अनुचितं स्यात्।

 ISSN: 2320-740X

5. कामक्रोधभयादीनाम् अभावःशान्तरसस्य अनुभावःइत्युक्तम्। तदपि न सम्यक्, यतःशमाद्युपरमः प्रयोगयोग्यो न भवति। चेष्टाभावःतत्त्वज्ञानावस्थायां अभिनेतुं न शक्यते। सुप्तमोहादिभावाः अपि निःश्वासः उच्छ्वासः, पतनम् इत्यादिभिः चेष्टाभिः अभिनीयन्ते।

6. धृतिमतिप्रभृतिः विषयोपभोगस्य प्राप्तेःकारणमित्यतःसः धृत्यादिः शान्तस्य व्यभिचारिभावःन भवति।

उद्भटरुद्रटादिभिः अभिनवगुप्तपादात् पूर्ववर्तिभिः अयं आक्षेपःकृतो वर्तते। अभिनवभारत्यां तदुल्लेखं विधाय समाधानं विहितम्। किञ्च मुनिना भरतेन अष्टौ रसाः[५] अष्टौ स्थायिभावाः[६] च उक्ताः। तत्र शान्तो न लिखितः। शान्तस्य रसत्वेन अनुपादेयत्वे अन्यदपि कारणमुक्तम्-

शान्तस्य शमसाध्यत्वात् नटे च तदसम्भवात्।
अष्टावेव रसा नाट्ये न शान्तस्तत्र युज्यते[७]॥ इति।

**समाधानम्** धर्मः अर्थः, कामः इतिपुरुषार्थाः इव मोक्षोऽपि पुरुषार्थःस्मृत्यादिप्रमाणसिद्धः। मोक्षस्य तस्य उपायत्वेन धर्मादयः पुरुषार्थाः तत्र प्रतिपादिताः। अभिनवगुप्तपादः दार्शनिकदृष्ट्या अत्र शान्तोपादाने समादधौ। किञ्च कामाख्यस्य पुरुषार्थस्य सम्बन्धिचित्तवृत्तीः नटाः अभिनीय सहृदयेषु शृङ्गाररसास्वादं कारयन्ति, तथैव मोक्षाख्यस्य परमपुरुषार्थस्य सम्बन्धिनी चित्तवृत्तिःरसपदवीं नीयते । लौकिकेषु सम्भवन्त्यः चित्तवृत्तय एव रसत्वं प्राप्यन्ते खलु। एवं मोक्षसम्बन्धिनी चित्तवृत्तिःजायते इत्यतःतादृशः रसः स्थायिभावश्च भवेदेव।

**निर्वेदपदार्थविचारः** निर्वेदः तत्त्वज्ञानजन्यः इतिप्रसिद्धिरस्ति। मुनिना व्यभिचारिषु आद्यतया कश्चन निर्वेदः पठितः। तत्र दारिद्र्यव्याध्यवमानाधिक्षेपाकृष्टक्रोधताडनेष्टजन-वियोगतत्त्वज्ञानादिभिर्विभावैः समुत्पद्यते स्त्रीनीचकुसत्त्वानाम् इत्युक्तम्। तत्र दारिद्र्यादिभिः जन्यः निर्वेदः तत्त्वज्ञानजन्यः निर्वेदश्च भिद्यते। अतःएव मुनिना सप्तमे अध्याये अयं निर्वेदः स्थायिसञ्चारिणोः मध्ये पठितः। **अन्यथा माङ्गलिको मुनिः न तथा पठेत्**[८] इतिगुप्तपादवचनं प्रकृतार्थसमर्थनत्वे मुख्यं वर्तते।

तत्त्वज्ञानाद् जन्यः निर्वेदः शान्तस्य स्थायी । किन्तु इतरेभ्यः रत्यादिभ्यः स्थायिभ्यः असौ विलक्षणः। निर्वेदः पर्यन्ते तान् इतरान् स्थायिनः नाशयति-उपमर्दयतीत्यतःनिर्वेदः परमस्थायी भावःइत्यसौ विचारः सूक्ष्मेक्षिकया चिन्तनीयः येन शान्तस्य स्थायिनः निर्वेदस्य इतरेभ्यः अतुलनीयता विज्ञायते।

शान्तस्य रसत्वेन परिग्रहे शङ्का समाधानं च निर्रोप्यते।

**शङ्का १-** शान्तरसस्य निर्वेदः स्थायी, तत्त्वज्ञानं विभावःइतिचेत् **वैराग्यस्य** कारणं तत्वज्ञानस्य विभावःकथं भवति? तत् तत्त्वज्ञानस्य उपायः भवति। किञ्च सर्वेषु वैमुख्यभावःनिर्वेदः। निर्वेदो नाम सर्वत्र अनुपादेयताप्रसङ्गः। वैराग्यलक्षणः।(अभिनवभारती) अत्र पूर्वापरीभावःवर्तते। निर्वेदात्- वैराग्यात् तत्त्वज्ञानं, तत्त्वज्ञानात् मोक्षः। न तु तत्त्वज्ञानात् निर्वेदः। अत्र गुप्तपादेन 'वैराग्यात् प्रकृतिलयः' इतिसांख्यकारिका प्रमाणत्वेन दत्ता।

**शङ्का २-** तत्त्वज्ञानमेव शान्तस्य स्थायी भवतु इति। यतःतत्त्वज्ञानी सर्वात्मना विरक्तो भवति। अतःतत्त्वज्ञानिनः दृढतरं वैराग्यं दृश्यते। 'ज्ञानस्यैव पराकाष्ठा वैराग्यं' इतिव्यासभाष्यम् । अतःतत्त्वज्ञानमेव शान्तस्य स्थायी न निर्वेदः

इतिउच्यताम् इति। तत्त्वज्ञानं मिथ्याज्ञानविनाशस्य कारणम्। तच्च तत्त्वज्ञानं वैराग्यस्य कारणम् इत्युक्तं न्यायदर्शने। तर्हि वैराग्यमेव निर्वेदः इत्यतःवैराग्यं शान्तरसस्य स्थायीतिउच्यताम् इति।

यद्यपि निर्वेदो हि शोकप्रवाहप्रसररूपःचित्तवृत्तिविशेषः, वैराग्यं तु रागादीनां प्रध्वंसः इतिईषद्भेदः वर्तते तथापि प्रवृत्तिजनकभावानां नाशः उभयत्र वर्तते इत्यतःतयोः अभेदः अङ्गीकर्तुं शक्यः । 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायाद् अपवर्गः' इतिसूत्रे अयं विचारः प्रवृत्तः। तत्त्वज्ञानात् मिथ्याज्ञानस्य नाशः, मिथ्याज्ञानस्य नाशात् रागादिदोषनाशः, दोषनाशे प्रवृत्त्यभावः, प्रवृत्त्यभावे जन्माभावः, जन्माभावे सर्वविधदुःखाभावःइति। दुःखाभाव एव मोक्षः। अतःवैराग्यं शान्तरसस्य स्थायिभावःइतिउच्यमाने न हानिः।

किञ्च तत्त्वज्ञानाद् जन्यः निर्वेदः एव शमः। शमशान्तयोः पर्यायवाचित्वं खलु इतिचेत् तत्र हासहास्यौ इव शमः स्थायी शान्तःरसः।

किन्तु रत्यादिः स्थायी लौकिकः साधारणश्च, शृङ्गारादिः रसः अलौकिकः असाधारणश्च इतिसिद्धान्तः। साधारण-असाधारणरूपवैलक्षण्यं शमे शान्ते च सुलभतया वक्तुं शक्यते। अतःशमः एव शान्तरसस्य स्थायी न निर्वेदः।

**शङ्का ३**-रत्यादयः अष्टावेव चित्तवृत्तयः उक्ताः। अतःतासु अन्यतमा चित्तवृत्तिःशान्तस्य स्थायीतिकथनम् उचितम्। यथा अनाहतनादव्यक्त-अद्वयानन्दमयः स्वात्मविषया रतिरेव मोक्षसाधनम् इतिरतिः शान्तस्य स्थायिभावःभवतु। शान्ते समस्तं जगत् विकृतं दृश्यते अतःहासः स्थायी भवतु, विश्वं शोचनीयं मन्यते इत्यतःशोकः स्थायी भवतु, सांसारिकः सर्वोऽपि व्यवहारः अपकारात्मकः इत्यतःक्रोधः स्थायी भवतु, असम्मोहप्राधान्येन ज्ञानमुख्यस्य वीर्यस्य आश्रयाद् उत्साहः स्थायी भवतु, सर्वेभ्यः विषयेभ्यः भीतिर्जायत इत्यतःभयं स्थायी भवतु, सर्वस्पृहणीयवस्तुषु जुगुप्सा भवतीतिजुगुप्सा स्थायी भवतु, अपूर्वार्थप्राप्त्या विस्मयो भवतीतिविस्मयः स्थायी भवतु इति।

**अभिनवं समाधानम्-** यदि उपायस्य बहुत्वं स्वीक्रियते तर्हि उपेयस्यापि बहुत्वं स्यात्। रतिः पुरुषात्पुरुषं भिद्यते इत्यतःशान्तस्य रतिः स्थायिभावःइतिकथने शान्तस्यापि अनन्तत्वप्रसङ्गः। अतःउपेयस्य मोक्षस्य एकस्य एकः उपायः शान्तःइतिकथनमुचितम्। किञ्च शान्तस्य इतरेषु रसेषु अन्तर्भावःचिन्त्यते चेत् वीररौद्रयोरपि एकत्वं स्यात्।

सर्वे रत्यादिस्थायिनः पानकरसन्यायेन एकत्वमाप्ताः शान्तस्य स्थायिभावतां प्रतिपद्यन्ते इतिकथनमपि न हृदयङ्गमम्। यतःसर्वाः चित्तवृत्तयः न युगपद्भान्ति।

तर्हि शान्तस्य कः स्थायी? इतिचेदुच्यते। स्वगुरोः भट्टतौतस्य उपदेशानुसारं समाधीयते अभिनवगुप्तेन। तत्त्वज्ञानमेव मोक्षसाधनम्। अतःतत् तत्त्वज्ञानमेव स्थायीतिकथनम् उचितम्। तत्त्वज्ञानं नाम आत्मज्ञानमेव। आत्मज्ञानं च इन्द्रियजन्यज्ञानाद् अतिरिक्तमेव भवति। रत्यादिज्ञानं तु न इन्द्रियातीतम्। आत्मज्ञानमपि यदि इन्द्रियजन्यमितिउच्यते तर्हि आत्मा तत्त्वज्ञानाद् मेयः न भवति। एवं हि तत्त्वज्ञानमेव शान्तस्य स्थायिभावः। रत्यादीनां भावानां शान्तस्य व्यस्ततया समस्ततया वा स्थायित्वं नास्ति। सांसारिकविषयेषु अरक्तः, विशुद्धानन्दादिधर्मोपेतःआत्मा अपि न शान्तस्य स्थायी। तथा चेत् रत्यादयः स्थायिनः न भवेयुः। यतःते रत्यादयः चित्तवृत्तिविशेषाः स्थायिरूपायां आत्मभित्तौ फलिताः सन्तःक्षणकालं यावत् शृङ्गारादीनां स्थायिनो भवन्ति। उभयोः तुल्यताभावात् तादृशस्य आत्मनः शान्तस्थायित्वकथनेन रत्यादीनां स्थायित्वं नोपपद्येत। तत्त्वज्ञानं हि सकलानां भावानां भित्तिस्थानिकं भवति। अतःएव रत्यादिभ्यः अत्यन्तमेव

 ISSN: 2320-740X

वैलक्षण्यात् रत्यादीनपि व्यभिचारिणः कुर्वन् आत्मा सहजरूपेण स्थायीतिकारणेन शान्तरसस्य स्थायिभावःनाट्यशास्त्रग्रन्थे अनुक्तं सङ्गच्छते। सर्वभावाधारस्य अस्य ४९ भावेभ्यः अतिरिक्ततया गणनापि न कृता। तर्हि शान्तस्य पृथग् गणना कुतः? इतिचेत् उच्यते। शान्तस्य अन्येभ्यः विलक्षणतया आस्वादो भवति। परिगणितेषु रसेषु शान्तस्य स्थायिनः उपयोगोऽपि न वर्तते। किन्तु सोऽपि लक्षणीयः अतःव्यभिचारिषु तस्य गणना मुनिना कृता। अतः४९ भावसंख्या न विरुध्यति। शमस्य आत्मरूपस्य व्यभिचारिष्वपि गणना नोचिता, अतःमुनिना निर्वेदपदं प्रयुक्तम्। आत्मस्वरूपं तत्त्वज्ञानमेव शमः। अतःशमस्य पुरतःसर्वेऽपि भावाः व्यभिचारिणः एव भवन्ति। यमनियमादयः अनुभावाः। ईश्वरानुग्रहादयः विभावाः। केचन शान्तं दयावीरं धर्मवीरं वा मन्वते। तत्र उत्साहः अहङ्कारप्राणः शान्तःशिथिलाहङ्कारः इतिकेचन भेदं वदन्ति। तन्न समीचीनम्।

शय्या शाद्वलमासनं शुचि शिला सद्म द्रुमाणामधः
शीतं निर्झरवारि पानमशनं कन्दाः सहायाः मृगाः।
इत्यप्रार्थितसर्वलभ्यविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत्परार्थघटनावन्ध्यैर्वृथा स्थीयते[९]॥

अत्र परोपकारकरणे उत्साहः लक्ष्यते। उत्साहशून्या न काचिदप्यवस्था। शान्तस्वभावानां परोपकाराय शरीरादिसर्वस्वदानं न शान्तविरोधि। अतःतत्त्वज्ञानमेवात्र निदानम्। तत्त्वज्ञानिनां सर्वेषु आश्रमेषु मुक्तिः सम्भवति।

देवार्चनरतःतत्त्वज्ञाननिष्ठोऽतिथिप्रियः।
श्राद्धं कृत्वा ददद् द्रव्यं गृहस्थोऽपि हि मुच्यते॥

अतःशान्ते शमः स्वभावःभवति। अन्ते नागानन्दे कः रसः इत्यपि प्रसङ्गवशात् विचारः कृतः। अमुकफलप्राप्तये क्रियमाणः परोपकारः धर्मादित्रितये अन्वेति। न मोक्षपर्यवसायी। नागानन्दे जीमूतवाहनेन वृद्धायाः त्राणं फलम् उद्दिष्टम्। एवम् अन्येषु रसेषु धर्मादिषु त्रिषु पुरुषार्थेषु समन्वयः। शान्ते च मोक्षे समन्वयः। तस्मात् अस्ति शान्तो रसः।

तर्हि मुनिना नोक्तः इतिसंशयस्यापि ' चिरन्तनपुस्तकेषु स्थायिभावान् रसत्वमुपनेष्यामः इत्यनन्तरं शान्तो नाम शमस्थायिभावात्मकः इत्यादिशान्तलक्षणं पठ्यते[१०]'। इतिअभिनवगुप्तपादो लिखति। लक्ष्याणि दृश्यश्रव्यानि लभ्यन्ते शान्तप्रधानानि। तानि महाभारतम्, सङ्कल्पसूर्योदयम्, प्रबोधचन्द्रोदयम्, सौन्दरनन्दम् इत्यादीनि। नागानन्दे अङ्गत्वेन शान्तरसः वर्तते। जैनाः कवयः शान्तरसं स्वीकृतवन्तः। अनुयोगद्वारसूत्रम्, शृङ्गारार्णवचन्द्रिका इत्यादिषु ग्रन्थेषु शान्तरसः प्रतिपादितः।

नाट्यशास्त्रस्य अन्यः पाठोऽपि लभ्यते यत्र रसत्वेन शान्तःप्रतिपादितोऽस्ति। यथा

अध्यात्मध्यानसमुत्थस्तत्त्वज्ञानार्थहेतुसंयुक्तः।
नैःश्रेयसोपदिष्टः शान्तरसो नाम सम्भवति[११] ॥

तस्य वैराग्यसंसारभीरुतादयो विभावाः। मोक्षशास्त्रचिन्तादयः अनुभावाः। निर्वेदमतिस्मृत्यादयो व्यभिचारिणः।

बुद्धीन्द्रियकर्मेन्द्रियसंरोधाध्यात्मसंस्थितोपेतः।
सर्वप्राणिसुखहितःशान्तरसो नाम विज्ञेयः ॥

न यत्र दुःखं न सुखं न द्वेषो नापि मत्सरः ।

समः सर्वेषु भूतेषु स शान्तःप्रथितो रसः ॥

भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः।

विकारः प्रकृतैर्जातःपुनस्तत्रैव लीयते ।

स्वं स्वं निमित्तमासाद्य शान्ताद्भावःप्रवर्तते ॥

पुनर्निमित्तापाये च शान्त एवोपलीयते ।

एवं नवरसा दृष्टा नाट्यज्ञैर्लक्षणान्विताः ॥

एवमेते रसा ज्ञेयास्त्वष्टौ लक्षणलक्षिताः ।

अत ऊर्ध्वं प्रवक्ष्यामि भावानामपि लक्षणम् [१२]॥

शान्तस्य आस्वादः कीदृशः इतिअभिनवगुप्तपादः प्रसङ्गेऽस्मिन् विशदीकरोति।

उपरागदायिभिः उत्साहरत्यादिभिः उपरक्तं यदात्मस्वरूपं तदेव विरलोम्भितरत्नान्तरालनिर्भासमानसिततरसूत्रवदाभातस्वरूपं सकलेषु रत्यादिषूपरञ्जकेषु तथा भावेनापि सकृद्विभातोऽयमात्मेतिन्यायेन भासमानं परोन्मुखतात्मसकलदुःखजालहीनपरमानन्दलाभसंविदेकत्वेन काव्यप्रयोगप्रबन्धाभ्यां साधारणतया निर्भासमानमन्तर्मुखावस्थाभेदेन लोकोत्तरानन्दनयनं तथाविधहृदयं विधत्ते[१३] इति।

अर्वाचीनैः आलङ्कारिकैः शान्तरसः निर्विवादं स्वीकृतो वर्तते। लक्ष्याणि काव्यानि शान्तप्रधानानि समुपलभ्यन्ते। परमपुरुषार्थस्य अपवर्गस्य उपदेशः काव्यमार्गे वर्तत एव। अतःशान्तरसप्रकाशनमपि काव्यस्य उद्देश्यतया स्थितेः तत्काव्यं परमार्थस्यापि उपदेशं ग्राहयतीतिशिवम्।

******

**अन्त्यटिप्पणी**

१. ध्वन्यालोकः, प्रथमोद्योतः- लोचनम् पृ.सं.१

२. नाट्यशास्त्रम्, षष्ठाध्यायः- पृ.सं. ७६२-७६३

३. अभिनवभारती- पृ.सं.७६२

४. एकोनपञ्चाशदिमे भावास्त्र्यवस्था गदिता मया वः।नाट्यशास्त्रम् ६.१०७ पृ.सं. १३२

५. शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः।

बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥

एते ह्यष्टौ रसाः प्रोक्ताः द्रुहिणेन महात्मना। नाट्यशास्त्रम्, षष्ठाध्यायः- ६.१६,१७. पृ.सं. ९१

६. रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।

जुगुप्सा विस्मयश्चेतिस्थायिभावाः प्रकीर्तिताः॥ नाट्यशास्त्रम्, षष्ठाध्यायः- ६.१८. पृ.सं. ९१

७. रसगङ्गाधरे प्रथमानने प्राचीनाभिप्रायः उल्लिखितः। पृ.सं. २६

८. अभिनवभारती- पृ.सं. ७६४

 **ISSN: 2320-740X**

९. नागानन्दः ४.२

१०. अभिनवभारती- पृ.सं. ७६५

११. नाट्यशास्त्रम् ६.८३

१२. नाट्यशास्त्रम् ६.८४-८८

१३. अभिनवभारती पृ.सं. ७८०

**सन्दर्भग्रन्थाः**


१. नाट्यशास्त्रम्, भरतमुनिः, चौखम्बा सुरभारती, वाराणसी

२. नात्यशास्त्रम्, भरतमुनिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

३. अभिनवभारती, अभिनवगुप्तः चौखम्बा सुरभारती, वाराणसी

४. ध्वन्यालोकः, आनन्दवर्धनः चौखम्बा सम्स्कृतसंस्थान, वाराणसी

५. काव्यप्रकाशः, मम्मतःचौखम्बा सुरभारती, वाराणसी

६. वक्रोक्तिजीवितम्, कुन्तकः

७. रसगङ्गाधरः, जगन्नाथः

८. काव्यालङ्कारः, उद्भटः


*******

# मनोवृत्तिप्रपञ्चनम्

**डा. दयानन्द ए. आर्.**
सहायकाचार्यः
MIT School of Vedic Sciences,
MIT ADT University, Rajbag,
Loni kalbhor – 412201, Pune.

**मुख्यशब्दाः -**
चित्तम्, मनः, बुद्धिः, योगः, अहङ्कारः, साङ्ख्यः, वेदान्तः, एकाग्रम्, मूढम्, क्षिप्तम्, विक्षिप्तम्, निरुद्धम्, मनोवृत्तयः, चित्तमलाः,कामः, सङ्कल्पः, विचिकित्सा, श्रद्धा, अश्रद्धा, ह्रीः, धीः, भीः, धृतिः, अधृतिः

**सारांशः -**
प्रबन्धेऽस्मिन् मनोवृत्तीनां प्रपञ्चनं योगशास्त्रानुगणं वेदान्तानुगुणं च कृत्तं वर्तते। मनसः वृत्तयः नानाप्रकाराः भवन्ति। तासां विवेकः आधुनिकमनःशास्त्रस्य छात्रेभ्यः यथा सुलभरूपेण अवगमनं भवेत् तथा अत्र प्रयत्नः कृतःवर्तेते। योगशास्त्रोक्तमूढ-क्षिप्त-विक्षिप्त-एकाग्र-निरुद्धचित्तभूमीनां वर्णनम् एतत्कालानुगुणं क्रियते। वेदान्तोक्-कामः सङ्कल्पः विचिकित्सादि मोनोवृत्तयः अत्र विवृताः वर्तन्ते। मनोवृत्तीनाम् अवगमनोत्तरं भगवद्गीतोक्तअधिकारिभेदाः योगशास्त्रोक्त-अधिकारिभेदैःसह तोल्यन्ते। तदनुगुणं कोष्ठकाधारेण विषयाः अत्यन्तं सुललितरूपेण विवृत्ताः वर्तेन्ते।

सर्वेषामपि कार्याणां प्रवृत्तौ निवृत्तौ वा मनः एव कारणमिति[1] भारतीयानामस्माकमवधारणम्। तस्य मनसः किं लक्षणं? किं च तस्य कार्यम्? इतिअत्र तावद्विचार्यते। मनसः वृत्तिविषये, प्रवृत्तिविषये वा आधुनिकमनोविज्ञानस्य अध्ययनं विद्यते। परन्तु मनसः स्वरूपविषये अपि च तस्य उत्पत्तिविषये स्वभावविषये तेषां गाढमध्ययनं न हि दृश्यते। तत्र तावत् आधुनिकजनाः मनसः आवरणक्षेत्रे एव रमणाणाः तत्रैव अध्ययनं, संशोधनं च कुर्वन्तःस्वीयम् आत्मानं मनोविज्ञानीत्वेन मन्यन्ते। किन्तु यथार्थतया तत् मनसः अध्ययनं नैव भवति। तत्रापि वयं यदा समीचीनतया परिशीलनं कुर्मः तदा ज्ञायते यत् अधुनिकैः मनसः ये च वषयाः उपस्थापिताः ते सर्वेऽपि विषयाः पश्चाद्भवैः खण्डिताः इति। ह्यस्तनः सिद्धान्तःअद्यतनैः सिद्धान्तिभिः खण्डितःइत्यतःतन्मनसः विषये पाश्चात्यैः ये च विषयाः उपस्थाप्यन्ते ते केवलं क्षणिकत्वेन उत तात्कालिकत्वेन एव ग्राह्याः अस्माभिः भारतीयैः। यतोऽहि आर्षैः मुनिभिः श्रुति-युक्ति-अनुभूतिभिः ये सिद्धान्ताः उपस्थापिताः ते इतोऽपि चिरं जीवन्तःसन्ति इतिमम विचारः। ते च विषयाः अस्माकं योग-वेदान्तादि शास्त्रैः सम्यक् सुस्पष्टं निरुपिताः दृश्यन्ते।

तत्र तावत् मनसः विषये अस्माकं शास्त्राणि किं वदन्ति इतिअत्र विचारयामः।

---

1 मन एव मनुष्याणां कारणं बन्धमोक्षयोः। बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥ (चाणक्यनीतिः-१३,११)

मनसः इन्द्रियत्वम् - साङ्ख्यदर्शने एकादशेन्द्रियाणि निर्दिष्टानि श्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि वागादीनि पञ्च कर्मेन्द्रियाणि मनश्च । "इन्द्रस्य सङ्घातेश्वरस्य करणमिन्द्रियं तथा चाहङ्कारकार्यत्वे सतिकरणत्वमिन्द्रियत्वम्" इतिसाङ्ख्यप्रवचनभाष्ये विज्ञानभिक्षुणा इन्द्रियशब्दार्थो निर्दिष्टः ।

वाचस्पतिमिश्रास्तु "इन्द्रस्यात्मनश्चिह्नत्वादिन्द्रियमुच्यते" इतिइन्द्रियशब्दस्य व्युत्पत्त्यर्थं निर्दिश्य इन्द्रियान्तरैः श्रोत्रादिभिस्साधर्म्यात् मनसः इन्द्रियत्वमित्यभिप्रयन्ति। मनसः इन्द्रियान्तरैस्साधर्म्यञ्च सात्त्विकाहङ्कारोपा दानत्वम्। मनः सर्वाण्यपीन्द्रियाणि स्व स्वव्यापारेषु प्रवर्तयति। अतःइन्द्रियान्तरापेक्षया मनसः प्राधान्यम् ।

इन्द्रियाणि द्विविधानि । बाह्यानि आभ्यन्तराणि चेति। बुद्धीन्द्रियाणि, कर्मेन्द्रियाणि च बाह्यानि, यतःतानि बाह्यविषयग्राहकाणि । मनश्च आन्तरङ्गिकसुख- दुःखादिज्ञानविषयकम्। प्रत्यक्षप्रमाणेनोपलब्धुं न शक्यत इतिमनसः आभ्यन्तरत्वम्।

वेदान्तशास्त्रानुसारेण तत् ब्रह्म सृष्ट्यादौ सृष्टिविषयकं चिन्तयत्[1] सगुणत्वमवाप्नोत्। तदग्रे च मायायाः प्रकृतेः वा चेतनसम्पर्कवशात् चेतनत्वप्राप्तिरभवत्। तत्र च अपञ्चीकृतपञ्चमहाभूतानां सात्त्विकांशैः अन्तःकरणं सृष्टम्। अत्र च अन्तःकरणं नाम वृत्तिसमूहः इत्यर्थः। इदमेव अन्तःकरणचतुष्टयमितिप्रसिद्धमस्ति लोके। तच्च अन्तःकरणं –
**मनः बुद्धिः अहङ्कारः चित्तम्** इति चतुर्धा विभक्तम्। मनः हृदयपुण्डरीके स्थित्वा सकलमपि कार्यं करोतीति तस्याणुत्ववादिनः वदन्ति। मनसः मध्यमपरिमाणवत्ववादिनः साङ्ख्यास्तन्नाङ्गीकुर्वन्ति। हृदयपुण्डरीकस्य देहव्यापि मनोऽपेक्षयाऽल्पत्वात् मनसः तत्र स्थितिः न सम्भवति। मनसः नियतं नास्ति स्थानम्। तस्य नियतस्थानत्वाङ्गीकारे देहव्यापिनां सर्वेषां ज्ञानानां युगपत् उत्पत्तिःन सम्भवतीतितेषामाशयः।

एतेषु प्रत्येकस्यापि प्रत्येकः विषयः भवति। मनसः विषयः संशयः इति।

तदुक्तं पञ्चदश्यां - **"मनो विमर्शरुपं स्यात्"**[2] इति। साङ्ख्यकारिकायां च **"उभयात्मकमत्र मनः"**[3] इति। एवं यच्च सङ्कल्पविकल्पात्मिकां चित्तवृत्तिमुत्पादयतितन्मनः। अर्थात् यदा किञ्चित् खाद्यरुपं वस्तु परतःविषयत्वेन भवतितदा खादामि उत न वा इतिविकल्परूपात्मिकां वृत्तिं यत् उत्पादयतितत् मनः। एवमेव अन्नम्भट्टविरचिते तर्कसङ्ग्रहे मनसः लक्षणमेवं निरूपितं दृश्यते- **"सुखाद्युपलब्धिसाधनमिन्द्रियं मनः**[4]**"** इति। अर्थात् अहं सुखी स्याम्, अहं दुःखी न स्याम्, शुभं मे भूयात् इतिकामनाकामनात्मकं साधनम् अन्तःकरणात्मकं यदिन्द्रियं तन्मनः इति।

---

1 तदैक्षत वहुस्या प्रजायेयेति। तत्तेजोऽसृजत। (छा,उ – ६,२,३)

2 पञ्चदशी – १,२०

3 साङ्ख्यकारिका -२७

4 तर्क्रसङ्ग्रहः- १६

बुद्धेः स्वरुपं तावत् निश्चयात्मिका इति। उच्यते तदेव – "**बुद्धिःस्यान्निश्चयात्मिका**[1]" इति। अर्थात् खाद्यरुपं वस्तु यदा पुरतःभवतितदा इयं बुद्धिःनिश्चयात्मिकरुपेण इदं खाद्यं, इदम् अखाद्यम्, एवमेव अयं पुरुषः एव न स्थाणुः इतिनिर्दिशति।

तर्कसंङ्ग्रहे च बुद्धिलक्षणं "**सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्**"[2] इतिरूपेण निरूपितमस्ति। प्रपञ्चे सर्वविधव्यवहारार्थं यत् ज्ञानमुपयुज्यते तत् बुद्धिशब्देन व्यवह्रियते।

पुनश्च अहङ्कारो नाम अहम् इत्याकारक-सात्त्विकचित्तवृत्तेः रूपम्। तदुक्तं साङ्ख्यकारिकायां "**अभिमानोऽहङ्कारः**"[3] इति। अहङ्कारः अत्र न रजोगुणात्मकः नैव तमोगुणात्मकः इत्यवधार्यम्।

अन्तिमं चित्तम्। चित्तस्य विषयः तावत् स्मरणम्। सोऽयं देवदत्तः इत्यादि पूर्वं इन्द्रियद्वारानुभूतान् विषयान् यत् स्मरणरूपं कार्यं करोतितत् चित्तमिति। योगशास्त्रे तावत् अयं चित्तशब्दः किञ्चित् भिन्नरूपेण व्याख्यातः। योगशास्त्रे चित्तशब्दस्य मनः इत्यर्थःअवधेयः।

एतत् सर्वमपि संगृह्य श्लोकेन एकेन उच्यते –

**"मनो बुद्धिरहङ्कारश्चित्तं करणमन्तरम्।**
**संशयो निश्चयो गर्वः स्मरणं विषया इमे॥**[4]

एवं च मनसि उत्पद्यमानसर्वविधचित्तवृत्तयः अन्तःकरणस्यैव रूपान्तरम् इतिआर्षं मतम्। अत्र श्रुतिः –

**"कामः सङ्कल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिः ह्रीःधीः भीः इत्येतत् सर्वं मन एव"**।[5]

एतादृशं मनः अविद्यया काम-क्रोध-लोभ-मोह-मद-मात्सर्यैः दुर्बलं भवति। तदानीं च मानवःदुष्कार्ये प्रवर्तते। अविद्यया अस्मिता, अस्मितया रागः, रागेण सुखम्, सुखाभावे दुःखम्, दुःखप्राप्तौ च द्वेषः।[6] इतिमनसः विकाराः अनुवर्तन्ते। एवमेव तदेव मनः यदा यम-नियमादिभिः युतं भवतितदा सत्कार्ये प्रवर्तते।[7] तदा च मनः सत्त्वगुणभूयिष्ठं भवति। एवं स्पष्टरूपेण ज्ञायते यत् मनसः एव अवयवाः सर्वाः वृत्तयः इति। अत्र –

- **कामः** नाम इयं मे भूयात् इत्यादि इच्छा।

---

1 पञ्चदशी -१,२०

2 तर्कसंग्रहः - ३४

3 साङ्ख्यकारिका-२४

4 शारीरकोपनिषत् - २

5 बृहदारण्यकोपनिषत् – १,५,३)

6 अविद्या-अस्मिता-राग-द्वेषाभिनिवेशाः क्लेशाः। (योगसूत्रम्-२,३)

7 योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः। (योगसूत्रम्-२,२८)

 ISSN: 2320-740X

- **सङ्कल्पः** पुरतःस्थितविषाणां भेदकरणम् अयं श्वेतवर्णः अयं च कृष्णवर्णः, इत्यादि।
- **विचिकित्सा** नाम संशयज्ञानम् अर्थात् अयं श्वेतवर्णो वा उत कृष्णवर्ण इत्यादि संशयः एव विचिकित्सा।
- **श्रद्धा** नाम अदृष्टार्थेषु कर्मसु आस्तिक्यबुद्धिःदेवतादिषु च।
- **अश्रद्धा** नाम श्रद्धाभावस्थितिः।
- **धृतिः** नाम धारणम् अर्थात् देहपाते सतितस्य पुनः उत्थम्भनम्।
- **अधृतिः** नाम देहादि पाते उत्थम्भनाभावस्थितिः।
- **ह्रीः** लज्जा।
- **धीः** प्रज्ञा।
- **भीः** भयम्।

  इत्येवमादिकं मनसः अन्तःकरणस्य रूपमेव इतिश्रुत्यर्थः।

साङ्ख्ययोगपक्षे च इदं मनः प्रकृतेः विकारः। अर्थात् इदं मनः सात्त्विकात् वैकृतात् अहंकारात् जायते। अस्य अन्तःएव सर्वविधाः वृत्तयः उत्पद्यन्ते। अविद्याभूयिष्ठं मनः अस्मिता-राग-द्वेष-अभिनिवेशैः प्रवृत्तिं करोतिइन्द्रियद्वारा। साङ्ख्यपक्षे तावत् इमाः विपर्यय-अशक्ति-तुष्टि-सिद्ध्याख्याः[1] इतिसर्वाः वृत्तयः मनसि जायन्ते इत्यतःमनसः अवयवाः इतिमतम्। भवतु तावत् विमतिः उभयोः किन्तु उभयोरपि मनचित्तयोः सदृशं व्याख्यानं दृश्यते इत्यतःन अस्माकं क्लेशः अत्र। तस्मात् न तावान् भेदो वर्तते उभयोः।

तदाधारेण अर्थात् विपर्ययाशक्तितुष्टिसिद्ध्याधारेण योगपक्षे अस्य मनसः पञ्चभेदाः(अवस्थाः) त्रिगुणानां वैपरीत्येन उक्ताः। ते च पञ्चभेदाः इत्थं सन्ति –

1. क्षिप्तम्
2. मूढम्
3. विक्षिप्तम्
4. एकाग्रम्
5. निरुद्धम् इति।

- **क्षिप्तम्** – तत्र अत्यन्तं रजसा विषयेषु क्षिप्यमाणं चित्तमेव क्षिप्तम्। अर्थात् रजसः उद्रेकात् अस्थिरं सत् बहिर्मुखतया सुखदुःखादिविषयेषु विकल्पितेषु व्यवहितेषु सन्निहितेषु वा रजसा प्रेरितं भवति। तच्च सदैव दैत्यदानवादीनां भवति। अर्थात् ये च सर्वदा अर्थलोलुपाः भवन्ति अर्थप्राप्त्यै च किमपि कार्यं कर्तुं सिद्धाः भवन्ति ते परमलौकिकाः आसुरीभावमाश्रिताः जनाः अत्र ग्राह्याः। ये च न हि मोक्ष-धर्मौ पश्यन्ति केवलम् अर्थाप्तिं पश्यन्ति तेषाम् इयमवस्था भवतीतिमे मतिः।

1 साङ्ख्यकारिका - ४६

- **मूढम्** – तमसः उद्रेकात् कृत्याकृत्यविभागम् अन्तरेण क्रोधादिभिः विरुद्धकृत्येषु एव नियमितं तच्च सदैव राक्षसपिशाचादीनां भवति। अर्थात् ये च सर्वदा कामादिषु इन्द्रियभोगरताः सर्वदा इन्द्रियसुखमेव चिन्तयन्तःतत्प्राप्तये दुष्कर्मणि रताः इन्द्रियसुखमेव परमं सुखं मन्वानाः तदिन्द्रियसुखार्थं दुष्कर्मणि रताः निर्दयाः जनाः मूढाः इतिमे मतिः। इन्द्रियसुखमेव अन्तिमलक्ष्यं भवतियेषां ते मूढाः इत्यपि वक्तुं शक्नुमः। व्याख्यानान्तरे च मूढस्थितिं निद्रया सह तोलयित्वा दर्शयन्ति व्याख्याकाराः। निद्रायां किमपि न स्फुरतिइत्यतःमूढत्वम् अभ्युपगच्छन्ति।
- **विक्षिप्तम्** – सत्त्वोद्रेकात् सुखं जीवनं कामयमानचित्तस्थितिः। ज्ञानेन दुःखं दूरीकुर्वन्तःधर्ममनुसरन्तःये च धार्मिकाः भवन्ति ते अत्र ग्राह्याः। धर्ममनुतिष्ठन्तःज्ञाने अधिकारित्वं प्राप्यन्ते इमे अग्रे। तद्यथा धर्मः ज्ञानम् उत्पादयति। ज्ञानं च विरागम् उत्पादयति। विरागः सिद्धं ददातिइतिसाङ्ख्यमतम्। [1]

एतावता उक्ताधारेण एतदुक्तं भवतियत् रजसा प्रवृत्तिरूपं, तमसा परापकारनियतं, सत्त्वेन च सुखमयं चित्तं भवतिइति। एते त्रिविधचित्तभूमिकास्थाः जनाः लोके दृश्यन्ते। तान् अहं मूढान् कामरतान् शूद्राः इति, क्षिप्तान् धनधान्यैश्वर्यरतान् वैश्याःइति, विक्षिप्तान् दानधर्मरतान् राजानः अथवा क्षत्रियाः इतिव्यवहरामि।

गुणाः भिद्यन्ते इत्यतःगुणाधारेण मनुष्याः अपि भिद्यन्ते। तेषां सर्वविधभेदकारणानां गुणानां लक्षणं साङ्ख्यकारिकायामेवम् उक्तम्-

**"प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।**
**अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः॥**[2]
**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।**
**गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः"॥**[3]

एवं प्रकृत्याः गुणाः मानवं धर्मार्थकाममोक्षादिषु प्रेरयन्ति इतिमे मतिः। तदाधारेणैव मानवानां स्वभावोऽपि ग्राह्यः। स्वभावाधारेणैव मानवानां वर्णोऽपि ग्राह्यः। तेदेवोक्तं भगवद्गीतायां श्रीकृष्णेन- **चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः**[4]
इतिश्लोकेन। तस्मादिमे एव गुणाः मानवं दानवं वा देवं वा कुर्तन्ति।

- **एकाग्रम्** – अस्यां च अवस्थायां सत्त्व-रजस्तमोगुणानां स्वभावं जानन्तःज्ञानिनः सत्त्वगुणाधिष्ठिताः सन्तःमोक्षनिष्ठाः दृश्यन्ते। अस्यामवस्थां मानवःगुणान् तीर्त्वा निर्गुणो भवितुम् इच्छति। एते मानवाः स्वाध्याय-ईश्वरप्रणिधानादिभिः गुणान् तर्तुमिच्छन्ति। एते जनाः परमम् अलौकिकं जीवनं यापयन्ति। एतानेव अहमत्र ब्राह्मणाः इतिवदामि। यतःइमे नितान्तं ब्रह्मनिष्ठाः अर्थात् मोक्षनिष्ठाः भवन्ति।

---

1 साङ्ख्यकारिका - २३

2 साङ्ख्यकारिका -१२

3 साङ्ख्यकारिका - १३

4 भगवद्गीता – ४,१३

 ISSN: 2320-740X

➢ **निरुद्धम् –** गुणातीता अवस्था इयम्। इयमवस्था तावत् योगिनां भवति। तान् एव वयं तत्त्वदर्शिनः इतिवदामः। इत्याधारेण मानवानां मनसः चित्तवृत्तिप्रपञ्चनमुक्तम्।

इदानीं विवृतचित्तवृत्तीनां तोलनं वर्णैः सह कृत्वा अधिकारिभेदः दर्श्यते। तदनुगुणं तस्मै कः योगः(अनुष्ठानमार्गः) युक्तः इत्यपि दर्श्यते। तथा च मूढादि चित्तावस्थानां तोलनं भगवद्गीतायाः आर्तादि अधिकारिभिः सह क्रियते। एवमेव तेषां जीवनं कीदृशं भवति अर्थात् धर्मार्थकाममोक्षेषु कः प्रधानः भवति तेषां जीवने इति किञ्चित् दर्श्यते। अग्रे च मानवजीवनं यदि वयं पश्यामः तर्हि तत्र बाल्यादिषु कीदृशं जीवनं भवति इत्यपि अवगन्तुं शक्नुमः।

| **चित्तावस्थाः** | **वर्णाः** | **अधिकारित्वम्** | **योगाधिकारः** | **भगवद्गीताधारः** | **गुणप्राधान्यम्** | **जीवम्** | **जीवनावस्था** |
|---|---|---|---|---|---|---|---|
| मूढम् | शूद्रः | अधमाधिकारी | कर्मयोगः,तपः | आर्तः | तमोगुणः | कामप्रधानम् | बाल्यम् |
| क्षिप्तम् | वैश्यः | अधमाधिकारी | कर्मयोगः,तपः | अर्थार्थी | तमोगुणप्रेरितरजः | अर्थप्रधानम् | यौवनम् |
| विक्षिप्तम् | क्षत्रियः | मध्यमाधिकारी | ज्ञानयोगः,स्वाध्यायः | जिज्ञासुः | सत्त्वगुणप्रेरितरजः | धर्मप्रधानम् | वानप्रस्थम् |
| एकाग्रम् | ब्राह्मणः | उत्तमाधिकारी | भक्तियोगःई,प्रणिधानम् | ज्ञानी | सत्त्वोत्कर्षः | मोक्षप्रधानम् | सन्यासदीक्षावस्था |
| निरुद्धम् | सन्यासी | | | गुणातीतः | गुणातीतावस्था | ब्रह्मनिष्ठम् | मुक्तावस्था |

गुणव्यतिरेकनिरूपणकोष्ठकम्। अस्मिन् कोष्ठके मूढादिचित्तभूमिषु गुणव्यतिरेकः कथं भवति इति दर्शितं वर्तते। तदग्रे च अवगमनार्थं तदनुकूल दण्डव्यवस्था अपि दर्शिता वर्तते।

| **चित्तावस्थाः** | **गुणव्यतिरेकः** | **(अनुकूलदण्डप्रकारः)** |
|---|---|---|
| मूढम् | सत्त्वम् 10%,रजः 30%, तमः 70% | दण्डसंहिता |
| क्षिप्तम् | सत्त्वम्20%, रजः50%, तमः30% | प्रभुसंहिता |
| विक्षिप्तम् | सत्त्वम्30%, रजः50%, तमः20% | कान्तासंहिता |
| एकाग्रम् | सत्त्वम् 70%,रजः 30%, तमः 10% | मित्रसंहिता |
| निरुद्धम् | गुणातीतत्तवम् | |

**चित्तस्य धर्माः**

चित्तस्य द्विविधाः धर्माः वर्तन्ते । प्रत्यक्षाः परोक्षाश्चेति। तेषामेव परिदृष्टापरिदृष्टशब्दाभ्यां व्यवहारः प्रमाणविपर्ययविकल्पनिद्रास्मृत्यात्मक- वृत्तिरूपाः प्रत्यक्षाः। निरोधादिचित्तधर्मरूपाः शास्त्रप्रमाणेन वा अनुमानप्रमाणेन वा ज्ञातव्या भवन्तीतिअन्येषां परोक्षत्वम्। एते च सप्तविधा भवन्ति। निरोधः[1], धर्मः, संस्कारः, परिणामः, जीवनम्, चेष्टा, शक्तिरितिसप्त परोक्षधर्माः। तदुक्तं व्यासभाष्ये – "चित्तस्य द्वे धर्माः परिदृष्टाश्चापरिदृष्टाश्च । तत्र प्रत्ययात्मा परिदृष्टा, वस्तुमात्रात्मिका अपरिदृष्टाः ते च सप्तैव भवन्त्यनुमानेन प्रापितवस्तुमात्रसद्भावाः" इति एतेषां परोक्षत्वं कथं भवतीति वाचस्पतिमिश्रस्य विवरणमेवं दृश्यते।

**चित्तमलाः**

चित्ते चतुर्विधं कालुष्यं वर्तते। ईर्ष्याकालुष्यं, परापकारेच्छाकालुष्यं, असूयाकालुष्यं, द्वेषकालुष्यमिति। एतानि कालुष्यानि चित्तस्य स्थितिसम्पादने प्रतिबन्धकानि अर्थात् एकाग्रता सम्पादने भवन्ति। अत एवैतेषां चित्तमलव्यवहारः। एतेषां चित्तमलानं विनाशाय प्रयत्नः करणीयः। ईर्ष्याकालुष्यं रजस्तोमोगुणाभ्यामुत्पन्नं सत् इतरजनस्य आधिक्यदर्शनेन मनसि दाहमुत्पादयति। अतःतद्विनाशाय सुखिषु सर्वेष्वपि प्राणिषु मैत्रीं कुर्यात् ततःईर्ष्यानाशो भवति। परापकारेच्छाकालुष्यमपि रजस्तमोगुणकं भवति। तेनान्यस्मिन् पुरुषे प्रतिकूलभावनया तदपकारेच्छा जायते। तद्विनाशाय दुःखितेषु जनेषु करुणां भावयेत्। पुण्यात्मनां सद्गुणेषु दोषारोपणमेवासूयाकालुष्यम्। एतदपि रजस्तमोगुणाभ्यां सञ्जायते। तन्निरासायापुण्यवत्सु औदासीन्यं भावयेत्। नानुमोदनं न वा द्वेषः। एतैः उपायैः चित्तमलानां नाशात् वर्षास्वतीतासु शरत्कालनदीजलमिव चित्तं प्रसन्नं भवति। ततश्चैकाग्रता सिद्ध्यति।

**निगमनम्**

इत्थं मनोवृत्तिप्रपञ्चनं कृतम्। आधुनिक-मनःशास्त्रस्य अध्येतृच्छात्रान् मनसि निधाय। अत्र यद् तोलनं कृतं तत् केवलं वयक्तिम्। यदि स्युः दोषाः बुधाः तान् वारयन्तु इतिसविनयं प्रार्थयामि । मूढादिचित्तभूमीः शूद्रादिषु युज्यन्ते न वा इति बुधाः परिशीलयन्तु।

**Bibliography :**

योगसूत्रम् षट्टीकोपेतम्।

वेदान्तसारः,

वेदान्तपरिभाषा,

भगवद्गीता, शङ्करभाष्यसहिता।

दर्शनेषु मनस्तत्त्वपरिशीलनम्।

******

1 निरोध-धर्म-संस्काराः परिणामोऽथजीवनम्। चेष्टाशक्रतिश्च चित्तस्य धर्माः दर्शनवर्जिताः।। (व्यासभाष्यम्-3,15)

 ISSN: 2320-740X

# ध्वनितत्त्वावबोधे ध्वन्यालोकप्रभारूपायाः 'ध्वन्यालोकप्रभा'याः प्रभा

**डा. सौम्यजित् सेनः**

सहायकाचार्यः, संस्कृतविभागः

Cooch Behar Panchanan Barma University

Cooch Behar – 736101 West Bengal; India.

**प्रबन्धसारः**

सूत्रस्थानीया हि ध्वनिकारिकाः। वृत्तौ तेषामेव कारिकाणां सयुक्ति उदाहरण-प्रत्युदाहरण-वाक्याध्याहारादि-प्रणालीमाश्रित्य ध्वनिरहस्यमुन्मोचितमाचार्यानन्दवर्धनेन। ग्रन्थस्यास्य प्रसिद्धासु टीकासु विद्वत्समाज आलङ्कारिकप्रवरेण श्रीमहामहेश्वराचार्याभिनवगुप्तपादेन विरचिता 'लोचन'नाम्नी टीकेव सर्वाधिकतया समादृता भवतीत्यत्रापि नास्ति केषाञ्चिदपि मतानैक्यम्। परन्त्वस्या टीकायाः स्थलेष्वनेकेषु विषयाणां गाम्भीर्येण तथा च भाषाया दुरवबोधत्वेन ध्वनिशास्त्रे प्रवेशेच्छूनां बालानामानन्दवर्धनाय विख्यातवङ्गीयाचार्येण विष्णुपदभट्टाचार्येण विनिर्मिता कारिकाबद्धा 'ध्वन्यालोकप्रभा' ('प्रभे'तिकेचित्) इत्याख्या काचिट्टीका सश्रद्धं स्मर्तव्या, या खलु नूनमेव लोचनचन्द्रिकेतिनात्युक्तिः। प्रत्येकं कारिकाया व्याख्या सुतरामेव सुललितया सुरगिरा निबद्धा, ततःसुबोध्या मूलानुसारिणी च। ध्वन्यालोकस्य कारिकास्थपदानां सच्छेदं सोदाहरणं समासप्रदर्शनपुरःसरं चार्थख्यापनमाध्यमेनास्याः टीकाया रचनाकारि प्रभाकृता। ध्वनिकारस्य वक्तव्यस्य सारं स्वीकृत्य 'लोचना'नुसारि तस्य सरलया वाचा परिवेशनमेवासीदस्याः टीकायाः प्रधानमुद्देश्यम् ।

तथाहि ध्वनिस्वरूपावबोधेऽस्याः टीकायाः सर्वातिशायिमाहात्म्यनिरूपणतत्परस्यास्य प्रबन्धस्य बन्धोद्यमः। तत्र केवलमेव ध्वनिस्वरूपव्याख्यानावसरे ध्वन्यालोककारस्य मतावगमने विष्णुपदस्य 'प्रभा'याः कीदृशी प्रभा विद्यते, प्रबन्धेऽस्मिन् स एव विषयः खलु मामकः प्रधान आलोच्यः।

**मुख्यशब्दाः** - आनन्दवर्धनः, ध्वन्यालोकः, विष्णुपद-भट्टाचार्यः, ध्वन्यालोकप्रभा, प्रभा चेत्यादयः।

**१. उपोद्घातः**

'अलंक्रियतेऽनेने'ति करणसाधनोऽयं शब्दः शब्दार्थालंकारानभिधत्ते। साहित्यशास्त्राभिधानः अलंकारशब्दस्तु तावद्भावसाधनः – 'अलंकरणमलंकार' इति। अत एवोच्यते वामनेन –

"काव्यं ग्राह्यमलंकारात्। सौन्दर्यमलंकारः"[1] इति।

अतः काव्यं हि ग्राह्यं भवत्यलंकारसमन्वयादेव। ननु किं काव्येषु यमकोपमादीनां शब्दार्थालंकाराणां सन्निवेशाभावादकाव्यत्वापत्तिरितिचेन्नालंकारस्य सौन्दर्यवत्त्वात्। तथाहि वामनेनोक्तम् –

1 काव्यालंकारसूत्रवृत्तिः (१/१/१-२)

'अलंकृतिरलंकारः। करणव्युत्पत्त्या पुनरलंकारशब्दोऽयमुपमादिषु वर्तत'[1] इति।

अलंकारशब्दोऽयं सामान्यतया सौन्दर्यशब्देन निर्दिश्यते। शोभनतममपि नायिकाया वदनं कुण्डलादिभिर्भूषितं सदेव रोचते, अलंकारविरहितं तन्न दृष्टिसुखं जनयति। तथाहि भामहेनोक्तं –

'न कान्तमपि निर्भूषं विभातिवनितानन्म्'[2] इति।

किन्तु महाकविनोदितं कालिदासेन –

'किमिव हि मधुराणां मण्डनं नाकृतीनाम्'[3] इति।

यथा स्त्रीणां सौन्दर्यं तथैव काव्यकलादिषु निरूप्यते शोभानिदानम्। रमणीयं नारीसौन्दर्यमपि क्वचिदलंकारबाहुल्याद्विक्रियत इत्यपि लोके श्रूयते। तथैवालंकारबाहुल्येन काव्यरसो विनश्यतामियात्। तेन मम्मटेन तदीये काव्यलक्षणे ('तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि'[4]) 'अनलंकृती पुनः क्वापि' इत्यनेन स्फुटरसविरहे अलंकृतौ, कदाचित् स्फुटरससहितौ शब्दार्थौ नालंकृतौ भवतः। स्फुटालंकाराभावादपि काव्यत्वं न व्याहन्येत। अत्रायं प्रश्नः – काव्यकलाशिल्पकर्मसु अङ्गीक्रियमाणं सौन्दर्यं किं नाम? वस्तुतोऽलंकार एव सौन्दर्यम्। यत्र यत्र सौन्दर्यं तत्र तत्र काव्यत्वम्। अतःसौन्दर्यं काव्यकलासु अनुस्यूतं वरीवर्त्ति। स चायमलंकारो दोषहानाद्गुणाधानाच्च यशःकामुकस्य कवेरतिशयसम्पाद्यतया विवक्षितः। तस्मात् काव्योत्कर्षाभिलाषुकेण कविना दोषा यत्नतो हातव्या गुणाश्च पुनराधातव्या भूयसायासेन। तदानीमेव काव्यं चारु सत् प्रीतिजनकं कीर्तिकरञ्च सम्पद्यते, नान्यथा। तथाहि ब्रवीतिवामनः –

"स दोषगुणालंकारहानादानाभ्याम्।

खल्वलंकारो दोषदानाद् गुणालंकारादानाच्च सम्पाद्यः कवेः"[5] इति।

मम्मटाचार्योऽप्यलंकारं लक्षयितुमाह –

"उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।

हारादिवदलंकारास्तेऽनुप्रासोपमादयः"[6] ।।इति।

विश्वनाथस्याशयेऽलंकारस्तावत् –

"शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।

1 तदेव, तत्रैव वृत्तौ

2 काव्यालंकारः (१/१३)

3 अभिज्ञानशकुन्तलम् (१/१७)

4 काव्यप्रकाशः (१/४)

5 काव्यालंकारसूत्रवृत्तिः (१/१/३, वृत्तिः)

6 काव्यप्रकाशः (८/६७)

 ISSN: 2320-740X

रसादीनुपकुर्वन्तोऽलंकारास्तेऽङ्गदादिवत्”[1] ।।इति।

अलंकारा अङ्गदादिवत् शब्दार्थयोः शोभावर्धकाः, रसादीनां चोपकर्तारः। प्रसादादिगुणवदलंकारा नापरिहार्याः। अत एवैतेऽस्थिरा धर्मा उच्यन्ते। अपि चालंकारः काव्यस्यानित्यो धर्मः, परं गुणोऽनित्यः। पूर्वाचार्यैः कल्पितालंकाराणां यथेच्छहानोपादानरीतिर्न लौकिके न वा साहित्यिकक्षेत्रे समीचिनेतिध्वनिकृतोऽभिमतम्। ध्वनिकारस्यानन्दवर्धनस्य नयेऽलंकाराः काव्यस्यात्मना सहाविच्छेद्यसम्बन्धेन सम्बद्धाः। तन्नये प्रतिभावतःरससमाहितस्य कवेश्चेतसि सालंकृतैव भाषा सदा अभिव्यक्तये व्याकुलीभवति। वाग्देवी स्वयमेव सालंकृता काव्यभाषा तस्मै उपायनीकरोति। आदावेव काव्यस्योत्पत्तिस्ततोऽलंकारयोजनेतितु न। तथा चोक्तं तेन –

“रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।

अपृथग्यत्ननिर्वर्त्यः सोऽलंकारो ध्वनौ मतः”[2]।।इति।

प्रख्याताङ्गलप्राबन्धिकस्य Walter Pater – महोदयस्य मतेऽपि ग्रहणयोग्योऽलंकारः प्राधान्येन काव्यस्याङ्गभूतःप्रयोजनभूतो वा। व्यवहारिकजीवने व्यवहृता भाषैव कवेः प्रतिभास्पर्शेन अलंकारसंयोदनेन च काव्यरूपं विधत्ते। यथोदितं नीलकण्ठदीक्षितेन –

“यानेव शब्दान् वयमालपामो यानेव चार्थान् वयमुल्लिखामः।

तैरेव विन्यासविशेषभव्यैः सम्मोहयन्ते कवयो जगन्ति”[3]।।इति।

समभाव एव प्रस्फुटितःAristotle - महोदयैरपि –

“Rhetoric may be defined as the faculty of observing in any given case the available means of persuasion.” इति।

मानवस्वभाव एवालंकारयोनिः। येन कदापि अलंकारस्य नामापि न श्रुतं, तेनापि नित्यप्रयोजनसाधनेऽलंकारो बहुलतया प्रयुज्यते। वस्तुतः, अलंकारः स्वत एव बहिरागत्य पदं न करोति, मानवानां स्वभावादेव तस्य जन्म। अलंकारस्य नामापि ये कदापि न शृण्वन्ति, ते निरक्षरा मानवा अपि प्रात्यहिकार्थसाधनार्थं स्वकभाषायामलंकारस्य बहुलतया प्रयोगं कुर्वन्ति। तस्मादेव श्रूयते प्रतिदिनं वाग्व्यवहारेषु उपमारूपकातिशयोक्त्याद्यलंकाराणां नियतो व्यवहारः। तेऽलंकारा अनायासेन स्वच्छन्दोगत्या साहित्ये समागताः। तथाहि वक्तुं शक्यते यदलंकारस्तु मानवमनःशासनशिल्पमतिरिच्य नान्यत्किमपि वस्तु हृदयहारि। अत एवाह Plato - महाभागः –

“Rhetoric is the art of ruling the minds of men” इति।

प्रख्यातवङ्गीयप्राबन्धिकेन सुधीरकुमारदाशगुप्तेनापि तदीये ‘काव्यश्री’ इतिग्रन्थे समभाव एवावेदितः– अलंकारस्तु मानवभाषाया आयासाभावरूपमात्रमेव, न तु देवदुर्लभं किमपि वस्तु। वेदादारभ्य समेषां साधारणमनुजनूनामेव

1 साहित्यदर्पणः (१०/१)

2 ध्वन्यालोकः (२/१६)

3 शिवलीलार्णवः (१/१७)

प्रात्यहिकव्यवहारे स्वत एवायं निःसरति। अन्तःपुरिकाणां मनोहारि अङ्गमिव भाषायामपि सर्वदा विकीर्य्यतेऽलंकारच्छटा। अश्राव्यवाक्प्रयोगेऽप्यलंकाराः प्रयुज्यन्ते। न केवलमेतदेव, प्रात्यहिकवाग्व्यवहारे बहूनामलंकाराणां प्रयोगेण तद्दीप्तिरम्लानैव मन्यते विद्वत्परिषदि।

**२. अलंकारशास्त्रे सम्प्रदायाः**

अलंकारशास्त्रग्रन्थानामनुशीलनेनैवावगम्यते यदासन्ननेके एव सम्प्रदायाः। काव्यस्यात्मा कः? - इत्ययं विषय एवालंकारिकाणां समक्षं प्रधानतया विवेच्य आसीत्। किमिदं तद् वस्तु विद्यते यद्विद्यमाने काव्ये काव्यत्वं तिष्ठतितद्रहिते च तदपसरतीतिजिज्ञासामवलम्ब्य स्वस्वबुद्ध्यनुसारेणोत्तरदानायैव नानाविधसम्प्रदायानामुत्पत्तिरभवत्। अलंकारसर्वस्वस्य टीकाकर्त्रा समुद्रबन्धनेनोक्तम् –

"इह विशिष्टौ शब्दार्थौ काव्यम्। तयोश्च धर्ममुखेन व्यापारमुखेन व्यङ्गमुखेन वेतित्रयः पक्षः। आद्येऽप्यलंकारतो गुणतो वेतिद्वैविध्यम्। द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्त्वेन वेतिद्वैविध्यम्। इतिपञ्चसु पक्षेष्वाद्य उद्भटादिभिरङ्गीकृतः, द्वितीयो वामनेन, तृतीयो वक्रोक्तिजीवितकारेण, चतुर्थो भट्टनायकेन, पञ्चम आनन्दवर्धनेन" इति।

**३. आचार्यः आनन्दवर्धनः**

भारतीये अलङ्कारसाहित्ये काश्मीरवास्तव्यस्य राजानकानन्दवर्धनाचार्यस्य ध्वनितन्त्रप्रकाशको ध्वन्यालोकग्रन्थो नवीनप्रस्थानप्रवर्तकत्वेन सर्वैरेव विद्वद्भिः समस्वरेणाङ्गीकृतः। राज्ञोऽवन्तिवर्मणः समय एव कश्मीरप्रदेशे स खल्वाचार्य आनन्दवर्धनो विद्यमानो बभूव। तथाहि महाकविना कल्हणेन तदीये राजतरङ्गिणीग्रन्थे स्पष्टमेवोद्घोषितं –

"मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः।
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मण।।"[1] इति।

पण्डितराजो जगन्नाथोऽपि आनन्दवर्धनाचार्यस्य परमप्रामाणिकत्वमभिहितं –

'ध्वनिकृतामालङ्कारिकसरणिव्यवस्थापकत्वात्'[2] इत्युक्तेः।

अभिनवगुप्तपादेनापि तदीये लोचने आनन्दवर्धनः कविविद्वत्सहृदयचक्रवर्तीतिसश्रद्धमुल्लिखितम्। किं बहुना, ध्वनिसिद्धान्तं दूषयितुकामेन व्यक्तिविवेककृता राजानकमहिमभट्टेनापि ध्वनिकारस्य प्रशस्तिरुपनिबद्धा –

"इह सम्प्रतिपत्तितोऽन्यथा वा ध्वनिकारस्य वचोविवेचनं नः।
नियतं यशसे प्रपत्स्यते यन्महतां संस्तव एव गौरवाय।।"[3] इति।

पि. भि. काणे-वर्येणापि काव्यशास्त्रे ध्वन्यालोकस्य महनीयं स्थानं वर्णयितुकामेनोच्यते –

1 ध्वन्यालोकः (सम्पा. सत्यनारायण-चक्रवर्ती), भूमिका

2 तत्रैव

3 तत्रैव

 ISSN: 2320-740X

'The Dhvanyāloka is an epoch-making work in the history of Alaṅkāra Literature. It occupies the same position in the Alaṅkāraśāstra as Pāṇini's sūtras in grammar and the Vedāntasūtras in Vedānta.'[1] इति।

**४. ध्वन्यालोकः**

काव्यालोकेतिनाम्नापि प्रसिद्धोऽयं ध्वन्यालोकग्रन्थः। कारिका-वृत्तिनामकेन भागद्वितयेन विभक्तस्यास्य ग्रन्थस्य एककर्तृकत्वं भिन्नकर्तृकत्वं वेत्येतद्विषये विदुषां वर्तते महती विप्रतिपत्तिरद्यत्वेऽपि। केचन पण्डिता मन्यन्ते यत् कारिकाभागस्य प्रणेता खलु सहृदयनामा कश्चन आनन्दवर्धनादपि प्राचीन आचार्यप्रवरः इतिध्वन्यालोके बहुशः कारिकायां तथा च वृत्तौ सहृदयपदस्योल्लेखोपलम्भात्। परं नैतत् समीचीनतामाधत्ते - 'येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता तेऽत्र सहृदयसंवादभाजः सहृदयाः' इतिप्रथमोद्योतस्थायां लोचनव्याख्याया तथा च 'वैयटिका एव हि रत्नतत्तवविदः, सहृदया एव हि काव्यानां रसज्ञाः' इतितृतीयोद्योतस्थे वृत्तिग्रन्थे काव्यभावनावासितान्तःकरणेषु रसज्ञेषु एव सहृदयशब्दस्य रूढित्वप्रदर्शनात्। अपि च, अर्वाचीनालङ्कारग्रन्थेष्वपि ध्वन्यालोकस्य कर्तृत्वेन आनन्दवर्धनस्यैव नामोल्लेखनात् कारिकावृत्यात्मकस्य सम्पूर्णस्यापि ध्वन्यालोकग्रन्थस्य एक एव प्रणेता, स खलु निश्चयेन आनन्दवर्धनाचार्य इतिनिश्चप्रचम्।

**५. विष्णुपदभट्टाचार्यप्रणीता ध्वन्यालोकप्रभा**

सूत्रस्थानीया हि ध्वनिकारिकाः। वृत्तौ तेषामेव कारिकाणां सयुक्ति उदाहरण-प्रत्युदाहरण-वाक्याध्याहारादि-प्रणालीमाश्रित्य ध्वनिरहस्यमुन्मोचितमाचार्यानन्दवर्धनेन।

"सूत्रेष्वेव हि तत् सर्वं यद्वृत्तौ यच्च वार्तिके ।
सूत्रं योनिरिहार्थानां सूत्रे सर्वं प्रतिष्ठितम्।।"[2]

- इत्युक्तेः कारिकाग्रन्थस्यार्थो यद्यवगतो भवेत् तदा ध्वन्यालोककारस्य विवक्षापि सुष्ठु प्रकटिता स्यादित्यत्र किं चित्रम्। ग्रन्थस्यास्यानेकासु प्रसिद्धासु टीकासु विद्वत्समाज आलङ्कारिकप्रवरेण श्रीमहामहेश्वराचार्याभिनवगुप्तपादेन विरचिता 'लोचन'नाम्नी टीकेव सर्वाधिकतया समादृता भवतीत्यत्रापि नास्ति केषाञ्चिदपि मतानैक्यम्। परन्त्वस्या टीकायाः स्थलेष्वनेकेषु विषयाणां गाम्भीर्येण तथा च भाषाया दुरवबोधत्वेन ध्वनिशास्त्रे प्रवेशेच्छूनां बालानामानन्दवर्धनाय विख्यातवङ्गीयाचार्येण विष्णुपदभट्टाचार्येण विनिर्मिता कारिकाबद्धा 'ध्वन्यालोकप्रभा' ('प्रभे'तिकेचित्) इत्याख्या काचिट्टीका सश्रद्धं स्मर्तव्या, या खलु नूनमेव लोचनचन्द्रिकेतिनात्युक्तिः।

प्रत्येकं कारिकाया व्याख्या सुतरामेव सुललितया सुरगिरा निबद्धा, ततःसुबोध्या मूलानुसारिणी च। ध्वन्यालोकस्य कारिकास्थपदानां सच्छेदं सोदाहरणं समासप्रदर्शनपुरःसरञ्चार्थख्यापनमाध्यमेनास्याः टीकाया रचनाकारि प्रभाकृता।

---

1 तत्रैव

2 ध्वन्यालोकप्रभा, प्रस्तावना

ध्वनिकारस्य वक्तव्यस्य सारं स्वीकृत्य 'लोचना'नुसारि तस्य सरलया वाचा परिवेशनमेवासीदस्याः टीकायाः प्रधानमुद्देश्यम्। अनया 'प्रभा'प्रभया नूनमेव विष्णुशर्मणो विविधशास्त्रेषु विशेषतोऽलङ्कारव्याकरणदर्शनशास्त्रेषु प्रगाढं निष्णातत्वं प्रकटीभवतीत्यत्र नास्ति संशीतिः काचित् ।

ध्वन्यालोकस्य प्रधानतया कारिकासु निबद्धानां निगूढानां ध्वनितत्त्वानामवगमनायासीत्खलु प्रयोजनं कयाचित् सरलसंस्कृतगिरा प्रणीतया टीकया, या खल्वभिनवगुप्तपादानां 'लोचनस्या'पि चन्द्रिकेव सर्वान् सहृदयहृदयानाह्लादयेत्। प्रयोजनमिदमेव हृदि निधायेयं 'प्रभे'त्याख्या टीका समजनीतिमन्मतिः। अतो ध्वनिस्वरूपावबोधनेऽस्याः टीकायाः सर्वातिशायिमाहात्म्यनिरूपणतत्परस्यास्य मे प्रबन्धस्य बन्धोद्यमः। तत्र केवलमेव ध्वनिस्वरूपव्याख्यानावसरे ध्वन्यालोककारस्य मतावगमने विष्णुपदस्य प्रभायाः कीदृशी प्रभा विद्यते, प्रबन्धेऽस्मिन् स एव विषयः खलु मामकः प्रधान आलोच्यः।

"पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजनम्।

आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं स्मृतम्।।"[1]

- इतिरीतिमाश्रयता श्रीमता विष्णुपदशर्मणा ध्वन्यालोकप्रभा-नाम्नी काचिन्नूत्ना व्याख्यालिखिता। न केवलमिह कारिकाणामन्वयमुखेन प्रतिपदव्यावृत्तिप्रदर्शनपुरःसरं व्याख्यानमुपनिबद्धमपि तु ध्वनिकारात् प्राचीनानां पूर्वाचार्याणां भरतभामहदण्डिवामनादीनां तथा च अर्वाक्कालीनानामालंकारिकाणाम् अभिनव-मम्मटराजशेखर-विश्वनाथ-जगन्नाथादीनामलङ्कारग्रन्थेभ्यो यथावसरं यथोपयोगं च उद्धृतयः सन्निवेशिताः। तेन काव्यमीमांसाशास्त्रे ध्वन्यालोकस्य महत्त्वं तदीयराद्धान्तस्य ध्वनितत्त्वस्य च गाम्भीर्यं सम्यक् काशितं भवति।

प्रभाया मङ्गलाचरण एव तेनाचार्यस्यानन्दवर्धनस्य तथा च ध्वन्यालोकस्य लोचनचन्द्रिकाख्ययोः टीकयोः सश्रद्धमुल्लेखः श्लेषेण विहितः। तथाहि –

"ध्वन्यालोकप्रभा सेयं विष्णुशर्मविनिर्मिता।

आनन्दवर्धनी भूयात् सतां लोचनचन्द्रिका।।"[2]

इत्यत्र स्वीया 'प्रभा'ख्या व्याख्या सत्पुरुषाणां सहृदयहृदयानां वा लोचनस्य चन्द्रिका कौमुदी वा भवतु तथा तेषामाह्लाददायिका च स्यादितिप्रार्थना व्यक्तीकरोतिव्याख्याकर्ता विष्णुशर्मा।

### ६. ध्वनिस्वरूपव्याख्याने 'प्रभा'याः प्रभा

विष्णुपदभट्टाचार्यस्य प्राञ्जलव्याख्या नितरामेव सर्वान् पाठकानाह्लादयतीत्यत्र नास्ति काचित् संशीतिः। यथा ध्वनेः स्वरूपवर्णनावसरे राजानकानन्दवर्धनेन यदुक्तं –

"यत्रार्थःशब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।

---

1 तत्रैव

2 तत्रैव, पृ. १

 **ISSN: 2320-740X**

व्यङ्क्तः काव्यविशेषः स ध्वनिरितिसूरिभिः कथितः।।"[1]

- इत्यत्र प्रभाकर्त्रा सुतरामेव सरलया संस्कृतगिरा लक्षणस्थपदानां व्यावृत्तिप्रदर्शनपुरःसरं प्रतिपदमर्थाः सम्यक् प्रकाशिताः। अस्य लक्षणस्य व्याख्यायां तेन यदुक्तं तत्त्वत्रोद्धरामि प्रसङ्गसङ्गत्या –

"स काव्यविशेषः सूरिभिर्ध्वनिरितिकथित इतिमुख्यं वाक्यम्। अत एव अस्यां कारिकायां विशिष्टस्य कस्यचिदेव काव्यस्य, न तु काव्यमात्रस्य ध्वनिरितिसंज्ञा प्रतिपाद्यते। कीदृशः स काव्यविशेषः इतिअन्यस्मात् काव्यप्रकारात् अस्य व्यावृत्तिप्रदर्शनार्थं विशेषणत्वेन अवान्तरवाक्यमुपन्यस्यते - यत्र अर्थःशब्दो वा उपसर्जनीकृतस्वार्थौ तमर्थं व्यङ्क्तः इति। यत्र यस्मिन् काव्यविशेषे अर्थःवाच्यविशेषरूपःशब्दःवाचकविशेषः। वा-शब्दोऽत्र समुच्चयार्थो द्रष्टव्यः। व्यङ्क्तः इतिद्विवचनश्रवणात्। न तु विकल्पार्थः। तथा सतिव्यनक्ति इतिएकवचनं स्यात्। कीदृशोऽर्थःकीदृशश्च शब्द इत्याह - उपसर्जनीकृतस्वार्थौ इति। अनुपसर्जनः उपसर्जनः कृतःइतिअभूततद्भावे च्विप्रत्यये उपसर्जनीकृत इतिरूपम्। स्वश्च अर्थश्च इतिस्वार्थौ। स्वशब्देन प्रथमोद्दिष्टस्य अर्थस्यैव परामर्शः, अर्थशब्दस्य च अनन्तरोद्दिष्टेन शब्देनैव अन्वयः। उपसर्जनीकृतौ स्वार्थौ याभ्यां तौ उपसर्जनीकृतस्वार्थौ। अर्थात् अर्थःउपसर्जनीकृतःस्वः शब्दश्च उपसर्जनीकृतार्थ इतियथासंख्यमन्वयः पर्यवस्यति। यत्र अर्थःवाच्यविशेषरूपःस्वमात्मानं गुणीकरोतितत्र अर्थस्य उपसर्जनीकृतस्वत्वम्। शब्दश्च यत्र अर्थमर्थात् स्ववाच्यभूतं गुणीकरोतितत्र शब्दस्यापि उपसर्जनीकृतार्थत्वं भवति। उपसर्जनशब्दस्य अप्रधानपर्यायत्वं द्रष्टव्यम्। ईदृशौ शब्दार्थौ यत्र यस्मिन् काव्यविशेषे। यत्तदोर्नित्यसम्बन्धात् स काव्यविशेष इतितच्छशब्देन च काव्यविशेषस्यैव परामर्शो भवितुं युक्तः। तमर्थमित्यत्र तच्छब्देन पूर्वोद्दिष्टं प्रतीयमानरूपमेवार्थं परामृशति-- सोऽर्थस्तद्व्यक्तिसामर्थ्येत्याद्यासु तच्छब्देन यथा। वस्त्वलंकाररसादिरूपस्त्रिविधोऽपि प्रतीयमानोऽर्थोऽत्र तच्छब्देन परामृश्यते। तमर्थं प्रतीयमानरूपं व्यङ्क्तः अर्थात् व्यञ्जनावृत्या बोधयतःन तु अभिधया, न वा लक्षणया, न वा तात्पर्येण, नापि केनचित् प्रमाणान्तरेण अनुमानार्थापत्त्यादिना। स काव्यविशेषः ध्वनिरितिसूरिभिः विद्वद्भिः काव्यतत्त्वार्थविद्भिःसहृदयैः कथितःव्यपदिष्ट इतिकारिकार्थः।"[2] इति।

अधुना प्रश्नः समुपैतियत् प्रतीयमानार्थसद्भावमात्रेणैव किं काव्यस्य ध्वनिरितिव्यपदेशः सम्भवी? तत्र समाधानं वक्ति *प्रभा*कृत् यन्न, यत्र वाच्यार्थापेक्षया तस्य रसादिरूपस्य प्रतीयमानार्थस्य निरतिशयं चमत्कारित्वं, तत्रैव ध्वनिकाव्यव्यपदेशो भवेदिति। प्रतीयमानार्थापेक्षया यत्र वाचकानां शब्दानां तद्धर्मभूतगुणालंकारादीनां वा, वाच्यानामर्थानां तद्धर्मभूतगुणालंकारादीनां वा चारुत्वोत्कर्षः सहृदयानामनुभवगोचरः, तत्र न ध्वनिकाव्यत्वम्। तत्र तु तस्य गुणीभूतव्यङ्ग्यमितिव्यपदेशः ध्वनिकृतामभिप्रेतःकाव्यस्य ध्वनि-गुणीभूतव्यङ्ग्यौ इतिद्विविधभेदोक्तेः। एतदेव स्पष्टीकरोतिप्रभाकारः –

"काव्यस्य तावद् द्वौ भेदौ ध्वनिकृद्भिरङ्गीकृतौ - ध्वनिः गुणीभूतव्यङ्ग्यश्चेति। यत्र प्रतीयमानस्य सद्भावः, तत्कृतं च चमत्कारित्वं सहृदयैरनुभूयते तत्रैव काव्यव्यपदेशो भवति। तस्य च द्वैविध्यं सम्भवति- यत्र प्रतीयमानस्य प्राधान्यं,

---

1 तत्रैव, पृ. १४

2 तत्रैव, पृ. १४-१५

वाच्यस्य च गुणीभावः, स एकः प्रकारः। तस्य ध्वनिरितिसंज्ञा। तस्यैव लक्षणं निरूप्यते - यत्रार्थःशब्दो वेति। यत्र तु प्रतीयमानापेक्षया वाच्यस्यैव चारुत्वातिशयः सहृदयानुभवगोचरः, स द्वितीयः प्रकारः। तस्य च गुणीभूतव्यङ्ग्य इतिसंज्ञा। एतत्प्रकारद्वयातिरिक्तः खलु नास्ति काव्यस्य अन्यः कोऽपि तृतीयः प्रकारः।"[1] इति।

अत्रापि प्रश्नः समुपैतियत् शब्दार्थालंकाराणां प्राधान्येन यत्र चित्रकाव्यव्यपदेशो भवतितत्र किं ध्वनिमतानुसारिणां नये काव्यव्यपदेशो न भवेदिति? तत्र *प्रभा* समाधानं प्रददातियन्न, तादृशस्थलेषु यदि कथञ्चित् काव्यव्यपदेशः स्यादपि स तु गौण इतिमन्तव्यम्। आनन्दवर्धनेनापि वृत्तिग्रन्थेऽभाणि –

'न तन्मुख्यं काव्यम्, काव्यानुकारो ह्यसौ।'[2] इति।

प्रभाकारो विष्णुशर्मा व्याख्यायामुदाहरणमुखेन विषयमिमं स्पष्टीकरोति–

'यथा अश्वानपकारो नाश्वः तथैव न काव्यानुकारः काव्यम्।

अनुकारस्य मुख्यत्वायोगात्।'[3] इति।

कारिकास्थ-व्यङ्क-पदस्य व्याख्यानावसरे व्यञ्जनावृत्तिरेवाश्रयणीयेतितेनोक्तम्। ततो व्यञ्जना नाम किमितिप्रतिपादयितुकामः स ब्रूबते –

"व्यञ्जना तावत् एतद्व्यापारत्रयातिरिक्ता तुरीया शक्तिः शब्दगता अर्थगता च। यत्र शब्दःअर्थश्च उभावपि व्यञ्जनावृत्त्या वाच्यलक्ष्यातिरिक्तं प्रतीयमानमर्थं प्राधान्येन प्रतिपादयतःतत्रैव ध्वनिसंज्ञा सिद्ध्यति।"[4] इति।

ध्वनिशब्दस्य व्युत्पत्तिविचारोऽपि प्रभाकृता टीकायामाटीकिता। तत्र तेन स्पष्टमेवोक्तं यत् –

"ध्वनिशब्दस्य कर्त्तरि कर्मणि भावे वा व्युत्पत्तिसम्भवात्। एतत् त्रितयसम्बलितं काव्यमपि समुदायात्मकं ध्वनिरितिउच्यते। ... तेन वाच्योऽपि ध्वनिः वाचकोऽपि शब्दो ध्वनिः, द्वयोरपि व्यञ्जकत्वं ध्वनतीतिकृत्वा। शब्दनं शब्दःशब्दव्यापारः न चासावभिधादिरूपः, अपि त्वात्मभूतः, सोऽपि ध्वननं ध्वनिः, उक्तप्रकारध्वनिचतुष्टयमयत्वात्।"[5] इति।

तथाहि साहित्यशास्त्रे ध्वनिवादः वैयाकरणैरङ्गीकृतं स्फोटवादं व्यञ्जनाव्यापारञ्च समाश्रित्य प्रवर्तित इतिनिश्चप्रचम्। वैयाकरणैः क्वचित् तस्य ध्वनेः नित्यस्फोटात्मकशब्दस्य व्यञ्जकेषु अनित्येषु क्रमवत्सु अनर्थकेषु वर्णेषु प्रवृत्तिःप्रदर्शिता, क्वचिद्वा अनित्यवर्णाभिव्यक्तं स्फोटात्मकं नित्यं शब्दं बोधयितुं तस्य प्रयोगो विहितः। एवं काव्येऽपि

1 तत्रैव, पृ. १५-१६

2 तत्रैव, पृ. १६

3 तत्रैव

4 तत्रैव, पृ. १६

5 तत्रैव, पृ. १७-१८

 ISSN: 2320-740X

व्यञ्जकः शब्दःअर्थो वा ध्वनिपदेन व्यपदिष्टः, शब्दार्थयोश्च यः व्यञ्जकत्वलक्षणः व्यापारः प्रसिद्धेभ्यः अभिधालक्षणातात्पर्येभ्यो विलक्षणः सोऽपि ध्वनिपदवाच्य इतिप्रभाकृतां सुनिश्चितो राद्धान्तः।

**७. उपसंहृतिः**

आदावेव मयोक्तं यदियं टीका ध्वन्यालोकस्य केवलमेव कारिकाणां व्याख्यात्मिका। वृत्तिग्रन्थस्य व्याख्या नैवात्र तेन विहिता। अपरोऽपि दुःखदो विषयो यदस्मिन् ग्रन्थे केवलं ध्वन्यालोकस्य प्रथमद्वितीयोद्योतयोरेव व्याख्या प्राप्यते। तृतीयचतुर्थयोरुद्यतयोर्व्याख्या नैवास्माभिरवाप्ता। तेन टीकाकृता तयोरुद्यतयोः टीका प्रणीता न वेतिमयका न ज्ञायते। वस्तुतःसाहित्यशास्त्रे प्राथम्येन प्रवेशेच्छूनां विशेषतःध्वन्यालोकग्रन्थे प्रतिपादितस्य ध्वनितत्त्वस्य ज्ञानेप्सूनां कृत एव टीकाया अस्याः प्रणयनोद्देश्यम्। तथाहि तेन ग्रन्थस्यास्य प्रस्तावनायां स्पष्टमेवोक्तं – "यद्यपि वृत्तौ अभिनवगुप्तव्याख्याने लोचने च सविस्तरं कारिकाणां विवृतिः प्रदर्शिता, तथापि विस्तरभीरुभिः प्राथमिकविद्यार्थिभिः तेषां ग्रन्थानामध्ययनं नातीव सुकरमितिपर्यालोच्य अस्माभिः ... ध्वन्यालोक-प्रभा-नाम्नी इयं नवीना व्याख्या कारिकाग्रन्थस्य प्रणेतुमध्यवसिता।"[1] इति।

अन्तिमेऽवश्यमेव वक्तुमलं यदियं विष्णुपदीया *प्रभाख्या*भिनवा व्याख्या अलङ्कारशास्त्ररसिकानां संसदि सादरमधिष्ठानमधिगत्याधिकाधिकविद्यार्थिनां ध्वनितत्त्वावबोधे साहाय्यं विदध्यादित्येव मामको मनोरथ इत्यलमतिपल्लवितेनेतिशिवम् ।

**परिशीलिता ग्रन्थानुक्रमणी**

प्रधानः ग्रन्थः - भट्टाचार्यः, विष्णुपदः। १९८६। ध्वन्यालोक-प्रभा (प्रथमखण्डः उद्योतः १-२)। कोलकाता। संस्कृत-साहित्य-परिषत्।

**सहायकाः प्राचीनसंस्कृतग्रन्थग्रामाः**

आनन्दवर्धनः। १९८२ (द्वितीयं संस्करणम्)। ध्वन्यालोकः। (सम्पा.) के. कृष्णमूर्थिः। दिल्ली। मोतीलाल बनारसीदास।

---। २०१६ (पुनर्मुद्रितसंस्करणम्)। ध्वन्यालोकः। (सम्पा.) सत्यनारायण-चक्रवर्ती। कोलकाताः। संस्कृत पुस्तक भाण्डार।

भरतः। २००३ (पुनः प्रकाशितम्)। नाट्यशास्त्रम् (प्रथमतः चतुर्थखण्डः)। (सम्पा.) आर. एस. नागरः। दिल्ली। परिमल पाब्लिकेशन।

विश्वनाथः। १८७५ (पञ्चमं संस्करणम्)। साहित्यदर्पणः (कुसुमप्रतिमा-टीकोपोतः)। (सम्पा.) हरिदाससिद्धान्तवागीशः। कलिकाता। सिद्धान्तविद्यालयः।

1 ध्वन्यालोकप्रभा, प्रस्तावना

**आङ्ग्लभाषानिबद्धा ग्रन्थग्रामाः**

De, S. K. 1960. History of Sanskrit Poetics. Calcutta: Firma K. L. Mukhopadhyay.

Dutta, Kali Kumar. 1974. Bengal's Contributions to Sanskrit Literature, (Calcutta Sanskrit College Research Series No. CIII, Studies No. 66). Calcutta: Sanskrit College.

Keith, A. B. 1928. A History of Sanskrit Literature. Oxford: Clarendon Press.

**सहायको वङ्गभाषानिबद्धो ग्रन्थः –**

चट्टोपाध्याय, ऋता. २०१२. काव्यमीमांसा - विष्णुपद भट्टाचार्य. कोलकाता. संस्कृत बुक डिपो.

******

 **ISSN: 2320-740X**

# स्वप्नसृष्टिमीमांसा

**डॉ. राघवेन्द्र शर्मा**
संस्कृतसाहित्यविभागाध्यक्षः
शास. दू.श्री.वै. स्नातकोत्तरः संस्कृतमहाविद्यालयः
रायपुरम् ( छत्तीसगढम्)

**कुञ्जीशब्दाः** - सृष्टिः, स्वप्नावस्था, निद्रा, दृष्टः, श्रुतः, प्रार्थितः, कल्पितः,भाविकः,दोषजः, कर्मफलम्, प्रहरम्, मनः ।

**शोध सारः**

भारतस्य समग्रं प्राचीनं ज्ञानं विज्ञानं वेदादिषु ग्रन्थेषु शास्त्रेषु पुराणेषु संस्कृतकाव्यादिषु च विद्यते । तत्र सर्वाः विद्याः विराजमानाः वर्तन्ते स्वप्नविद्यायाः स्थितिः तथैवास्ति । तस्याः गूढविवेचनं वेदोपनिषत्स्मृतिपुराणादिषु वर्तते। इयं स्वप्नविद्या मानवहितसाधिका स्वप्नोत्पत्तिसूचिका सदसत्फलबोधिका पूर्वकृतकर्मफलदायिका पापपुण्यस्वरूपात्मिका आनन्दानुभूतिकारिका अशुभापहारिका सच्चिदानन्दध्यानगम्या नूतनसृष्टिकारिका ईश्वरीयभावसाधिका प्रेरिका वैचित्र्यपूर्णा विलक्षणख्या च वर्तते । अस्याः स्वप्नसृष्टेः मीमांसा प्रस्तूयते । अस्यां मीमांसायां स्वप्नोत्पत्तिःभेदः कारणं शुभाशुभविज्ञानं फलितकालं विमृश्यते।

**मूलशोधालेखः**

मानवजीवनं जन्मतःमृत्युपर्यन्तं तिसृषु अवस्थासु विभक्तं जायते। ताः सन्ति जाग्रत्स्वप्नसुषुप्त्यः। जाग्रदवस्थायां मनुष्यः प्रबुद्धो भवति, सुषुप्त्यवस्थायाञ्च स्वपिति। जाग्रतसुषुप्त्यवस्थयोः मध्यस्थानीया भवतिस्वप्नावस्था। अस्याः स्वप्नावस्थायाः विवेचनं सम्पूर्णसंस्कृतवाङ्मये उपलभ्यते । इयं स्वप्नसृष्टिः का भवति? कीदृशी भवति? कस्य भवति? कथं वा भवति? इत्यादयः नैके प्रश्नाः मनसि समुद्भूताः जायन्ते येषां विमर्शः वेदेषु उपनिषत्सु दर्शनेषु आयुर्वेदे स्मृतिषु पुराणेषु रामायणमहाभारताकाव्यादिषु च विद्यते । यस्यानुसन्धानं कियतेऽत्र।

**स्वप्नशब्दनिष्पतिः**

स्वप्धातुना नक् प्रत्यये कृते सतिस्वप्नः शब्दःनिष्पद्यते । वामनशिवरामआप्टेमतेन शब्दोऽयं त्रिषु अर्थेषु व्यवह्रियते । 1 निद्रार्थे 2 स्वप्नार्थे, 3 आलस्यार्थे च । [1]

अमरकोशकारः निद्रार्थे गृह्णातिइमं शब्दम् । यथा –

स्यान्निद्रा शयनं स्वापःस्वप्नः संवेश इत्यपि ।। [2]

अनेकार्थसङ्ग्रहो नाम कोशे आचार्यहेमचन्द्रेणोल्लिख्यते यत् सुप्तावस्थायां यद् ज्ञानं भवतितदेव स्वप्नः उच्यते । यथा - स्वप्नः स्वापे सुप्त ज्ञाने । [1]

---

1 संस्कृत हिन्दी कोश पृष्ठः 1158

2 अमरकोशः 1/7/36 पृष्ठः 42

मेदिनीकोशानुसारेणापि प्रसुप्तस्य निद्रावस्थायां यद् दर्शनं विज्ञानं जायते स स्वप्नः उच्यते । यथा –

स्वप्नः स्वापे प्रसुप्तस्य विज्ञाने दर्शने पुमान् ।[2]

साहित्यदर्पणकार आचार्यविश्वनाथः रसनिरूपणावसरे त्र्यस्त्रिंशद्व्यभिचारिभावनिरूपणप्रसङ्गे स्वप्ननामाख्यं व्यभिचारिभावं वर्णयति। अस्य मतेन निद्रानिमग्नपुरुषस्य विषयानुभवो नाम स्वप्नः वर्तते । अस्यां स्वप्नावस्थायां कोपःआवेगः भयः ग्लानिः सुखदुःखादयश्च भवन्ति । तद्यथा –

स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः ।
कोपावेगभयग्लानिसुखदुःखादिकारकः ॥ [3]

**अथर्ववेदे स्वप्नसृष्टिः**

अथर्ववेदस्य षष्ठकाण्डस्य 45-46 सूक्तौ दुःस्वप्नविनाशाख्यौ स्तः । अत्र वैदिकर्षिः दुःस्वप्नविनाशनाय अग्न्यादिदेवं स्तौति। अथर्ववेदानुसारेण जाग्रदवस्थायां मनुष्यः हिंसादिदुष्कर्मणा पीडितो भवतितदेव स्वप्ने अनुभवति। अस्य दुःस्वप्नस्य निमित्तं वर्तते पूर्वकृतं पापमेव। तद्यथा-

अवशसा निःशसा यत् पराशसोपरिम जाग्रतो यत् स्वपन्तः।
अग्निर्विश्वान्यप दुष्कृतान्य जुष्टान्यारे अस्मद् दधातु ।।
यदिन्द्र ब्रह्मणस्पतेऽपि मृषा चरामसि।
प्रचेता न अंगिरसो दुरितात् पात्वंहसः ।। [4]

एष स्वप्नः न जीवितो वा न मृतो वा भवतिअपितु अमृतपूर्णो वर्तते। अस्य माता वरुणस्य पत्नी वरुणानी पिता च यमः। अस्य दुःस्वप्नस्य नामानि सन्ति अशुभाररुः अन्तकः मृत्युश्च। यथा –

योन जीवोऽसि न मृतो देवानाममृतगर्भोऽसि स्वप्न ।
वरुणानी ते माता यमः पितारुर्नामासि ॥

विद्म ते स्वप्न जनित्रं देवजामीनां पुत्रोऽसि यमस्य करणः ।
अन्तकोऽसि मृत्युरसि त्वं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुष्वप्नयात् पाहि ।[5]

**स्वप्नभेदः**

श्रीधराचार्येण कमालाकरग्रन्थे दैविकशुभाशुभमिश्रभेदैःस्वप्नः चतुर्धा स्वीक्रियते । यथा –

स्वप्नं चतुर्विध प्रोक्तं दैविकं कार्यसूचकम् ।

---

1 अनेकार्थसङ्ग्रहो नाम कोशः 2/292 पृष्ठः 25

2 मेदिनीकोशः 20/22 पृष्ठः 84

3 साहित्यदर्पणः 3/152 पृष्ठः 98

4 अथर्ववेदः 6/45/2-3

5 अथर्ववेदः 6/4/1-2

 **ISSN: 2320-740X**

द्वितीयं तु शुभस्वप्नं तृतीयमशुभं तथा ॥

मिश्र तुरीयमाख्यातं मुनिपुंगव कोटिभिः।[1]

स्वप्नप्रकाशिकायां दृष्टश्रुतानुभूतप्रार्थितकल्पितभाविकदोषजभेदैःस्वप्नः सप्तधा गृह्यते । तद्यथा –

दृष्टः श्रुतोऽनुभूतश्च प्रार्थितःकल्पितस्तथा ।

भाविकोदोषजश्चैव स्वप्नः सप्तविधो विदुः ॥[2]

आचार्यश्रीधरः स्वप्नकारणत्वेन इमं स्वप्नं नवधा स्वीकरोतिस्वप्नकमालाकरे ।

स्वप्नं नव भुवि भावाः पुंसां भवन्ति हि ।

श्रुतं तथानुभूतं च दृष्टं तत्सदृशं तथा ।।

चिन्ता च प्रकृतिश्चैव विकृतिश्च तथा भवेत् ।

देवाः पुण्यानि पापानि इत्येव जगतीतले ॥[3]

श्रुतानुभूतदृष्टचिन्ताप्रकृतिविकृतिदेवपुण्यपापभेदैःस्वप्नफलप्रदर्शकाः नवभावाः भवन्ति ।

**स्वप्नकारणम्**

यत्स्वप्नः दृश्यते तस्य एकं सुनिश्चितं कारणमनुश्रूयते । यस्योल्लेखः प्राप्यते प्रश्नोपनिषदि । तत्र उल्लिख्यते लोके यद् दृष्टं भवतिस्वप्ने तद्दृष्टम् अनुपश्यति, लोके यत् श्रुतं भवतितमेवानुशृणोति, लोके यद् अनुभूतं भवतिस्वप्ने तदेव पुनः पुनः अनुभवति। तद्यथा –

अत्रैष देवःस्वप्ने महिमानमनुभवति। यद् दृष्टं दृष्टमनुपश्यतिश्रुतं श्रुतमेवार्थमनुशृणोति। देश दिगन्तरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवतिदृष्टं चादृष्टं च श्रुतं चाश्रुतं चानुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यतिसर्वः पश्यति।[4]

अनेन स्पष्टं भवतिपुरुषः यद् दृष्टादृष्टं श्रुताश्रुतम् अनुभूताननुभूतं सदसत्स्वरूपं सर्वं स्वप्ने पश्यति।

**स्वप्नसृष्टिः**

पुरुषस्य स्थानद्वयं वर्तते इहलोकः परलोकश्च । स्वप्नस्थानं तृतीयं वर्तते । स्वप्नस्थाने तिष्ठन् असौ पापपुण्यसाधनेन इहलोकं परलोकं च पश्यति। स्वप्नावस्थायां असौ स्वस्थूलशरीरम् अचेतनं कृत्वा वासनामयं स्वकीयं देहं रचयित्वा स्वप्रकाशेन ज्योतिस्वरूपेण वा शयनं करोति। अस्यां स्वप्नावस्थायां सः ज्योतिस्वरूपो भवति। यथोक्तं बृहदारण्यकोपनिषदि –

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं च सन्ध्यं तृतीयं स्वप्नस्थानं, तस्मिन् सन्ध्ये स्थाने तिष्ठनेते उभे स्थाने पश्यतीदं च परलोकस्थानं च । अथ यथाक्रमोऽयं परलोकस्थाने भवतितमाक्रममाक्रम्योभवान्

1 स्वप्नकमलाकरः 1/2-3 पृष्ठः 1

2 स्वप्नप्रकाशिका 3 पृष्ठः 1

3 स्वप्नकमलाकरः 2/3-4 पृष्ठः 1

4 प्रश्नोपनिषद् 4/5 पृष्ठः 394

पाप्मन आनन्दांश्च पश्यतिस यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयं ज्योतिर्भवति। [1]

ब्रह्मसूत्रेऽपि व्यासमुनिनोल्लिखितं यत् स्वप्नेऽपि जाग्रतवदेव सृष्टिर्भवति। यथा जाग्रदवस्थायां व्यवहारो भवतितथैव स्वप्नावस्थायां सृष्टिर्जायते। तद्यथा -

सन्ध्ये सृष्टिराह हि ।[2]

स्वप्नसृष्टौ अयं पुरुषः कर्मफलानुरूपं उच्चावचगतिं प्राप्नोति। तद्वदेव स्वप्ने महाराजसदृशं वा महाब्राह्मणादिरूपं वा व्यवहरति। तद्यथा बृहदारण्यकोपनिषदि उल्लिख्यते –

स यत्रैतत्स्वप्न्यया चरतिते हास्य लोकास्तदुतेव महाराजो भवत्यतेव महाब्राह्मण उतेवोच्चावचं निगच्छतिस यथा महाराजो जानपदान्गृहीत्वा स्वेजनपदे यथाकामं परिवर्ततैवमेवैष एतत्प्राणान्गृहीत्वा स्वे जनपदे यथाकामं परिवर्तते।[3]

**शुभाशुभस्वप्नः**

पुराणेषु शुभाशुभस्वप्नविवेचनं विस्तरेण प्राप्यते । अग्निपुराणस्य ऊनत्रिंशत्यधिकद्विशततमोऽध्यायः स्वप्नाध्यायत्वेन प्रशिद्धो वर्तते। अत्र पुष्करेण शुभाशुभस्वप्नानां विस्तरेण विवेचनं क्रियते । तद्यथा -

स्वप्नं शुभाशुभं वक्ष्ये दुःस्वप्नहरणं तथा ।[4]

एवमेव मत्स्यपुराणस्य द्विचत्वारिंशदधिकद्विशततमाध्यायो स्वप्नाध्यायो वर्तते तत्रपि शुभाशुभस्वप्नोल्लेखो विद्यते । तद्यथा -

स्वप्नाख्यानं कथं देव गमने प्रत्युपस्थिते ।
दृश्यन्ते विविधाकाराः कथं तेषां फलं भवेत् ।।[5]

अत्र मुनुना पृच्छयते यद् गमनपूर्वरात्रौ स्वप्ने विविधाकाराः दृश्यन्ते तत्फलं कथं भवेद् इति। मत्स्यः तत्फलम् उपदिशति।

ब्रह्मवैवर्तपुराणस्य श्रीकृष्णजन्मखण्डस्य सप्तसप्ततितमोऽध्यायः सुस्वप्नदर्शन नामा अस्ति । तत्र श्रीभगवान् नन्दं सुस्वप्नदर्शनफलमुपदिशति। यथा –

स्वप्नाध्यायं प्रवक्ष्यामि बहुपुण्यफलप्रदम् ।
स्वप्नाध्यायं नरं श्रुत्वा गंगास्नानफलं लभेत् ।।[6]

अस्यैव पुराणस्य श्रीकृष्णजन्मखण्डस्य द्वयशीतितमोऽध्यायः दुःस्वप्ननामा वर्तते । तत्र दुःस्वप्नदर्शनफलमुच्यते ।

1 बृहदारण्यकोपनिषद् 4/3/9 पृष्ठः 921

2 वेदान्तदर्शन ब्रह्मसूत्र- 3/2/1 पृष्ठः 282

3 बृहदारण्यकोपनिषद् 2/1/18 पृष्ठः 441

4 अग्निपुराणम् 229/1 पृष्ठः 469

5 मत्स्यपुराणम् 242/1

6 ब्रह्मवैवर्तपुराणम् श्रीकृष्णजन्मखण्डः 77/4

 ISSN: 2320-740X

छान्दोग्योपनिषदि उल्लिख्यते यद् काम्यकर्मावसरे यदि काचिद् स्त्री स्वप्ने दृश्यते तदा तस्य कर्मणः सिद्धिः जायते । तद्यथा –

तदेष श्लोको यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यतिसमृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने तस्मिन्स्वप्न-निदर्शने ।[1]

शारङ्धरसंहितायामपि दुःस्वप्नशुभस्वप्नवर्णनं प्राप्यते। दुःस्वप्नलक्षणानि यथा -

स्वप्नेषु नग्नान्मुण्डाँश्च रक्तकृष्णाम्बरावृतान् ।
व्यङ्गाँश्च विकृतान्कृष्णान्सपाशानसायुधानपि ॥
वध्नतो निघ्नतश्चापि दक्षिणं दिशमाश्रितान् ।
महिषोष्ट्रखरारूढान्स्त्रीपुंसान्यस्तु पश्यति।।
स स्वस्थो लभते व्याधिं रोगी यात्येव पञ्चताम् ॥[2]

**आयुर्वेद स्वप्नसृष्टिः**

चरकसंहितायां रोगचिकित्साप्रसङ्गे स्वप्नमाहात्म्यमुल्लिख्यते । रोगग्रस्ताः कीदृक्स्वप्नं पश्यन्ति ? तत्स्वप्नस्य च फलं किं भवति? तत्र यक्ष्मारक्तपित्तगुल्मकुष्ठप्रमेहोन्मादापस्मारबहिरायामादिषु रोगेषु रुग्णः कीदृशं स्वप्नं यदि पश्यतिचेत् तस्य मृत्युः भवतीति।[3] स्वप्नसृष्टिप्रसंगे चरकेणोच्यते यद् नातिप्रसुप्तः पुरुषः मनःसहायतया अनेकधा सफलाफलस्वप्नान् पश्यति। यथा –

नातिप्रसुतःपुरुषः सफलाफलांस्तथा ।
इन्द्रियेशेन मनसा स्वप्नान् पश्यत्यनेकधा ।।[4]

आचार्यसुश्रुतानुसारेण रुग्णाः वा तत्सुहृदः वा मरणसूचकान् शुभसूचकान् स्वप्नान् पश्यन्ति । तद्यथा –

स्वप्नानतःप्रवक्ष्यामि मरणाय शुभाय च ।
सुहृदो याश्च पश्यन्ति व्याधितो वा स्वयं तथा ।।[5]

**स्वप्नफलमीमांसा**

दृष्टश्रुतानुभूतप्रार्थितकल्पितभाविकदोषज सप्तविधस्वप्नेषु आद्यस्थानीयाः दृष्टतःकल्पितपर्यन्तं पञ्चविधाः स्वप्ना निष्फला भवन्ति । दिवास्थप्नः अतिह्रस्वः अतिदीर्घश्च स्वप्नः अपि सदा निष्फलो भवति। तद्यथा निर्दिश्यते चरकसंहितायाम् -

---

1 छान्दोग्योपनिषद् 5/2/18 पृष्ठः 436

2 शारङ्धरसंहिता 3/14-15 पृष्ठः-24

3 चरकसंहिता 5/5/8,9,13, 15, 17, 21, 23, 26 पृष्ठ: 1009-1011

4 चरकसंहिता 5/5/42 पृष्ठ: 1013

5 सुश्रुत संहिता1/29/54 पृष्ठः 119

तत्र पञ्चविधं पूर्वमफलं भिषगादिशेत् ।

दिवास्वप्नमतिह्रस्वमतिदीर्घं च बुद्धिमान् ।।[1]

रात्र्याः प्रथमप्रहरे दृष्टस्य स्वप्नस्य फलोदयकालः एकवर्षः भवति, द्वितीयप्रहरे दृष्टस्वप्नस्य फलोदयकालः षण्मासाः, तृतीयप्रहरे दृष्टस्य त्रयमासाः, चतुर्थप्रहरे दृष्टस्य मासार्धः, अरुणोदये च दृष्टस्य दशदिनानि निर्दिश्यते । तद्यथा अग्निपुराणे निगद्यते -

स्वप्नास्तु प्रथमे यामे संवत्सर विपाकिनः ॥

षड्भिर्मासैर्द्वितीयेतु त्रिभिर्मासैस्त्रियामिकाः ।

चतुर्थे त्वर्द्धमासेन दशाहादरुणोदये ।।[2]

चरकसंहितायां लिखितं वर्तते यत् प्रथमप्रहरे दृष्ट स्वप्नः स्वल्पं फलतिस्वल्पबलो वा भवति। स्वप्नं दृष्ट्वा यदि न स्वपेत् तत्स्वप्नः सद्यः महाफलदायको भवति। यथा -

दृष्टः प्रथमरात्रे यः स्वप्नः स्वल्पो फलोभवेद् ।

न स्वपेद् यं पुनर्दृष्ट्वा स सद्यः स्यान्महाफलः ।। [3]

**दुःस्वप्नफलहरणोपायः**

दुःस्वप्नदर्शनेन यदरिष्टफलप्राप्तिः भवतितस्यारिष्टस्य शान्तये नैके उपायाः संस्कृतवाङ्मये
विद्यते। पाराशरस्मृतौ लिखितं वर्तते यद् दुःस्वप्नदर्शनेन जायमानारिष्टनिर्वृतये स्नानं कुर्यात् । तथथा -

दुःस्वप्नं यदि पश्येदवा.......स्नानमेव विधीयते ।। [4]

दुःस्वप्नदर्शनानन्तरं पुनः स्वपेत् अथवा स्वप्नं रात्रौ एव अन्यं श्रावयेत् तदा तस्य अनिष्टफलं विनष्टं भवति। तद्यथोक्त कमलाकरे

अनिष्टं प्रथमं दृष्ट्वा तत्पश्चात् स स्वपेत्पुमान् ॥

रात्रौ वा कथयेदन्यं ततो नाप्नोतितत्फलम् ।। [5]

मत्स्यपुराणानुसारेण दुःस्वप्नजन्तिदोषशान्तये प्रातःस्नानं, तिलैर्होमं, ब्राह्मणानां पूजनं, श्रीकृष्णस्य पूजनं, स्तवनं, गजेन्द्रमोक्षश्रवणञ्च कुर्याद् । तद्यथोक्तं मत्स्यदेवेन मत्स्यपुराणे -

कल्कस्नानं तिलैर्होमो ब्राह्मणानां च पूजनम् ।

स्तुतिश्च वासुदेवस्य तथा तस्यैव पूजनम् ॥

गजेन्द्रमोक्षश्रवणं ज्ञेयं दुःस्वप्ननाशनम् ।[1]

---

1 चरकसंहिता 5/5/44 पृष्ठः 1014

2 अग्निपुराणम् 229/16-17 पृष्ठः 470

3 चरकसंहिता 5/5/45 पृष्ठः 1014

4 पाराशरस्मृतिः 12/1 पृष्ठः 95

5 कमलाकरः 2/22-23 पृष्ठः 14

 ISSN: 2320-740X

एतैः उपचारैः दुःस्वप्नजनितारिष्टः अवश्यमेव विनश्यति।

**भाविशुभाशुभसूचकस्वप्नोद्धरणानि**

संस्कृतसाहित्ये अनेकानि भाविशुभाशुभसूचकस्वप्नोद्धरणानि मिलन्ति । वाल्मीकिव्यासकालिदासभासादयः कवयः स्वकाव्येषु भाविशुभाशुभप्रकटीकरणाय स्वप्नं स्वीकुर्वन्ति। आदिकविवाल्मीकिः रामायणस्य अयोध्याकाण्डे दुःस्वप्नान् उल्लिखति। तत्र भरतःदशरथमृत्युपूर्वमनेकान् दुःस्वप्नान् पश्यति। तद्यथा -

यामेव रात्रिं ते दूताः प्रविशन्ति स्म तां पुरीम् ।
भरतेनापि तां रात्रिं स्वप्नो दृष्टोऽयमप्रियः ॥
व्युष्टामेव तां रात्रिं दृष्ट्वा स्वप्नमप्रियम् ।
पुत्रोराजाधिराजस्य सुभृशं पर्यतप्यत ।
स्वप्ने पितरमद्राक्षं मलिनं मुक्तमूर्धजम्।
पतन्तमद्रिशिखिरात् कलुषे गोमये ह्रदे ॥[2]

रामायणस्यैव सुन्दरकाण्डे त्रिजटा भाविराक्षसविनाशसूचकं सीतापतिरामाभ्युदयकारकं स्वप्नं पश्यति। तद्यथा -

स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ।
राक्षसानामभावाय भतुरस्या भवाय च ॥ [3]

महाभारतस्य उद्योगपर्वे श्रीकृष्णः युधिष्ठिरस्य पक्षे युद्धं कर्तुम् युद्धपूर्वं कर्णं प्रेरयति, तदा कर्णः कथयतियत् स्वप्नः दृष्टः मया युद्धे कौरवपक्षीयाः सर्वे योद्धाः वीरगतिं प्राप्ताः। अतः मित्रघाताय अपकीर्तये च कथं मां प्रेरयतिइति। यथा -

स्वप्ना हि बहवो घोराः दृश्यन्ते मधुसूदनः ।
निमित्तानि च घोराणि तथोत्पाताः सुदारुणाः ॥
पराजयं धार्तराष्ट्रे विजयं च युधिष्ठिरे ।
शंसंत इव वार्ष्णेय विविधा रोमहर्षणाः ।।[4]

कादम्बर्य्यां चन्द्रापीडजन्मपूर्वं विलासवती स्वप्ने पश्यतियत् चन्द्रः विलासवती मुखे प्रविशति। स्वप्नोऽयं भाविचन्द्रापीडजन्मसूचकं वर्तते । शुकनाशः स्वप्ने पश्यतियत् सुन्दराकृतिब्राह्मणेन विकसितं कमलं मनोरमादेव्याः अंके स्थापितं च । स्वप्नोऽयं भाविवैशम्पायनजन्मसूचकं वर्तते। अतएवोच्यते शुकनाशेन -

अवितथफला हि प्रायोनिशावसानसमयदृष्टाः भवन्ति स्वप्नाः ।[5]

---

1 मत्स्यपुराणे 242/ 16-17

2 रामायणम् अयोध्याकाण्डः 69/1,2,8

3 रामायणम सुन्दरकाण्डः 27/6

4 महाभारतम् उद्योगपर्व 143/6-7

5 कादम्बरी पूर्वार्धः स्वप्नविषयकवर्णनम् पृष्ठः 203

नलचम्पूकाव्ये दमयन्तीजन्मपूर्वं प्रियंगुमञ्जरी स्वप्ने शिवं पश्यति। सा अवदत् यत् प्रभाते दमनकमुनिः आगत्य अपत्यप्राप्तये वरं दास्यतिइति। अनेनैव भाविदमयन्तीजन्मसूचना प्राप्यते स्वप्नेन ।[1]

हर्षचरितेऽपि राज्ञः प्रभाकरवर्धनस्य राज्ञी यशोमती भाविराजकुमारराज्यवर्धनहर्षवर्धनजन्मसूचकं स्वप्नं पश्यति। स्वप्ने सूर्यमण्डलात् कन्यैका द्वौ कुमारौ च ममोदरे प्रवेशं कृतवन्तः। [2]

वेणीसंहारनाटके भानुमती भाविकौरवविनाशसूचकं स्वप्नं पश्यति। स्वप्ने एकः नकुलः शतसंख्याकान् सर्पान् हन्ति । तद्यथा -

पर्यायेण हि दृश्यन्ते स्वप्नाः कामं शुभाशुभाः ।
शतसंख्या पुनरियं सानुजं स्पृशतीव माम् ॥[3]

एवं प्रकारेण नैकेषु काव्येषु स्वप्न विन्यासो जायते तत्र भाविसूचना दीयते स्वप्नेन । अनेनैव तस्मिन् स्वप्नविन्यस्तकाव्ये रोचकतायाः विचित्रतायाश्च वृद्धिःजायते।

**विलक्षणस्वप्नप्रयोगः**

संस्कृतसाहित्ये नैकानि उदाहरणानि प्राप्यन्ते यत्र विलक्षणस्वप्नप्रयोगाः दृश्यन्ते। महाकविः भासः स्वप्नप्रयोगकुशलो वर्तते। कविरस स्वप्नाश्रितं नाटकं रचयतिस्वप्नवासवदतम् । अस्य नाटकस्य आधारः स्वप्नः एवास्ति । तत्र शिरोवेदनापीडित उदयनः सुमुद्रगृहं गत्वा विश्रामं करोतिस्वप्ने च पूर्वपत्नीं वासवदत्तां पश्यति, तया सह आलपति। तस्मिन् समये वासवदत्ता साक्षात् उपस्थिता भूत्वा तदुत्तरं ददाति। ततःउदयनः स्वप्ने तस्याः हस्तं गृह्णाति। ततःवासवदत्ता हस्तम् आकृष्य वेगेन निर्गच्छति। निद्रायां सः तस्या पृष्ठं गच्छति। द्वारपक्षघातेन स प्रबोधितो भवति। यथा -

वासवदत्ता - दिष्ट्या स्वप्नायते खलु आर्यपुत्रः । नात्र कश्चिज्जनः | यावन्मुहूर्तकं स्थित्वा दृष्टिं हृदयं च तोषयामि।.......

राजा - (सहसोत्थाय) वासवदत्ते तिष्ठ, तिष्ठ । हा धिक् ।

निष्क्रामन् सम्भ्रमेणाहं द्वारपक्षेण ताडितः।
ततो व्यक्तं न जानामि भूतार्थो मनोरथः ।। [4]

कर्पूरमञ्जरीनाटके राजशेखरः विलक्षण स्वप्नस्य प्रयोग करोति। तत्र तृतीयजवनिकान्तरे विदूषकः राजानं विलक्षणं स्वप्नं श्रावयति। स्वप्नेऽस्मिन् गंगया प्रक्षालनात् राजमहिषीस्तनाभ्यां नोदनपर्यन्तं विचित्रं स्वप्नं चित्रयतिमहाकविः।

1 नलचम्पू 3/6 गद्यभागः पृष्ठः 142

2 हर्षचरितम् चतुर्थोच्छ्वासः 350

3 वेणीसंहारः 2/14 पृष्ठः 72

4 स्वप्नवासवदत्तम् 5/7 संवादः पृष्ठः 73

 ISSN: 2320-740X

निष्कर्ष रूपेण वक्तुं शक्यते यत् मानव जीवनं स्वप्नं विना नैव सम्भवमस्ति । प्रत्येकं मानवःस्वप्नं पश्यतितस्य शुभाशुभ फलज्ञानाय प्रयत्नं करोति। अशुभसूचकस्वप्नफलनिवारणाय प्रयत्नं करोति। स्वप्नाः मनसः सहायतया आगच्छन्ति। मनुष्यः यद् व्यवहरतिपश्यति, शृणोतिअनुभवतितदेव स्वप्ने पश्यति। तत्र आत्मज्योतिरूपेण अवस्थितो भूत्वा पुरुषोऽसौ सर्वं स्वप्नं स्वयमेव पश्यति। अस्याः स्वप्नसृष्टेः विवेचनं वेदेषु उपनिषत्सु स्मृतिषु आयुर्वेदे पुराणेषु ज्योतिषशास्त्रे दर्शनेग्रन्थेषु संस्कृतसाहित्ये च विशदतया विद्यते।

**सन्दर्भग्रन्थसूची- ( APA Format)**


- शर्मा गंगा सहाय, 2015, अथर्ववेद, संस्कृत साहित्य प्रकाशन, नई दिल्ली.
- शास्त्री जगन्नाथ, पांडेय घनानंद, ज्योतिर्विद जनार्दन, विक्रम संवत् 2026, अनेकार्थसंग्रहो नाम कोषः द्वित्तीय संस्करण, चौखंबा संस्कृत सीरीज ऑफिस, वाराणसी.
- शास्त्री कृष्ण मोहन, विक्रम संवत् 2067, कादंबरी, पुनर्मुद्रण संस्करण, चौखंबा प्रकाशन, वाराणसी.
- मूसलगांवकर डॉ. केशवराव, मूसलगांवकर डॉ. गजानन शास्त्री, 2004, हर्षचरितम्, द्वितीय संस्करण, चौखंबा संस्कृत संस्थान, वाराणसी.
- संवत् 2073 छांदोग्योपनिषद्, 21 वा पुनर्मुद्रण संस्करण, गीता प्रेस, गोरखपुर.
- विक्रम संवत् 2072 बृहदारण्यकोपनिषद् 18 वा पुनर्मुद्रण संस्करण, गीता प्रेस, गोरखपुर.
- विक्रम संवत् 2071, ईशादि नौ उपनिषद् ,11 वा पुनर्मुद्रण संस्करण, गीता प्रेस, गोरखपुर.
- गोयन्दका हरिकृष्णदास, विक्रम संवत् 2069, वेदांत दर्शन ब्रह्म सूत्र, 29 वा संस्करण, गीता प्रेस, गोरखपुर.
- त्रिपाठी डॉ. बह्मानंद, 2009, चरकसंहिता पूर्वार्ध, पुनर्मुद्रित संस्करण, चौखंबा सुरभारती प्रकाशन, वाराणसी.
- त्रिपाठी राधावल्लभ, दास अच्युतानंद, 2014, स्वप्नवासवदत्तम्, नवम संस्करण, मध्यप्रदेश हिंदी ग्रंथ अकादमी, भोपाल.
- त्रिपाठी डॉ. कृष्णकांत, तिवारी दिनेशप्रसाद, 2000, वेणीसंहारनाटकम्, अष्टम संस्करण, साहित्य भंडार, मेरठ.
- त्रिपाठी कैलाशपति, विक्रम संवत् 2060, नलचम्पू, पंचम संस्करण, चौखंबा संस्कृत संस्थान, वाराणसी.
- आचार्य राम कुमार, 1980, कर्पूरमंजरी, चतुर्थ संस्करण, चौखंबा विद्याभवन, वाराणसी.
- दिवेदी शिवप्रसाद, 200,4 अग्निपुराण, प्रथम संस्करण, चौखंबा संस्कृत प्रतिष्ठान, दिल्ली
- शास्त्री अम्बिकादत्त, 1954, सुश्रुतसंहिता, प्रथम संस्करण, चौखंबा संस्कृत सीरीज, बनारस.
- उपाध्याय डॉ कामेश्वर, विक्रम संवत्, 2013, स्वप्न विद्या, प्रथम संस्करण, श्री स्कनध ज्योतिषम् प्रकाशन, वाराणसी.

- शर्मा पं. श्री गुरु प्रसाद, अभिमन्यु श्री मन्नालाल, 1998, पाराशरस्मृति, द्वितीय संस्करण, चौखंबा विद्याभवन, वाराणसी.
- विष्णु गंगा, विक्रम संवत् 1950, स्वप्नप्रकाशिका, लक्ष्मी वेंकटेश्वर प्रेस, कल्याण मुंबई.
- शास्त्री पंडित जगन्नाथ, विक्रम संवत् 2069, मेदिनीकोश, पुनर्मुद्रण संस्करण,चौखंबा संस्कृत संस्थान, वाराणसी.
- शर्मा जानकीनाथ, विक्रम संवत् 2071, श्रीमद्वाल्मीकीय रामायण प्रथम खंड, 45 वा पुनर्मुद्रण संस्करण, गीता प्रे,स गोरखपुर.
- शर्मा जानकी नाथ, विक्रम संवत् 2071, श्रीमद्वाल्मीकीय रामायण द्वितीय खंड, 45 वा पुनर्मुद्रण संस्करण, गीता प्रेस, गोरखपुर.
- अभिमन्युः श्रीमन्नालालः, 2008, अमरकोशः, पनर्मुद्रितसंस्करणम्, चौखम्बाविद्याभवनम्, वाराणसी.
- शास्त्री शालिग्राम, 2000 साहित्यदर्पणः, पुनर्मुद्रणसंस्करणम्, मोतीलालबनारसीदासः, वाराणसी.
- आप्टे वामनशिवरामः, 2001 संस्कृतहिन्दीकोशः, पुनर्मुद्रणसंस्करणम्, मोतीलालबनारसीदासः, वाराणसी.


******

# चतुर्थ्यर्थनिरूपणे जगदीशगदाधरयोर्मतभेदः

**डा. देवन् ई. एम्**

सहायकाचार्यः, सर्वकारीयसंस्कृतमहाविद्यालयः

अनन्तपुरम्, केरलम्

**मुख्यपदानि -**

संप्रदानत्वम्, निरूपितत्वं, प्रतियोगित्वं, स्वत्वम्, दानम्, विषयित्वम्, आधेयत्वम्, आश्रयत्वम्, चतुर्थ्यर्थः

**सारांशः -**

चतुर्थ्यर्थं सम्प्रदानत्वस्वरूपं च जगदीशतर्कालङ्काराः शब्दशक्तिप्रकाशिकायां, गदाधरभट्टाचार्याः व्युत्पत्तिवादे च सम्यक् प्रत्यपादयन्। चतुर्थ्यर्थनिरूपणे जगदीशगदाधरयोः क्वचित् संवादः क्वचित् विवादश्च दृश्यते। गत्यादिभिन्ने यद्धातूपस्थाप्ये यादृशार्थे विग्रहस्थचतुर्थ्या यः स्वार्थो बोधयितुं शक्यते स तद्धातूपस्थाप्यतादृशक्रियायां सम्प्रदानत्वमुच्यते इतितर्कालङ्काराः। भट्टाचार्यास्तु क्रियाजन्यफलशालितया कर्तुरिच्छाविषयत्वं सम्प्रदानत्वं इतिस्वीकुर्वन्ति। एवं तर्कालङ्कारमते निरूपितत्त्वं प्रतियोगित्वं वा चतुर्थ्यर्थः। इच्छाघटितं निरूपितत्वप्रकारकेच्छाविषयत्वं चतुर्थ्यर्थःइतिभट्टाचार्याः। सविषयकधातुसमभिव्याहारे चतुर्थ्याः विषयित्वमर्थःइतिउभयसम्मतम्। तत्सर्वं अत्र प्रतिपिपादयिषामि।

**उपोद्घातः-**

चतस्रः विद्याः भवन्ति। तासु अन्यतमेयमान्वीक्षिकी न्यायविद्या। तदेव उक्तं भाष्यकारेण "इमास्तु चतस्रो विद्याः पृथक् प्रस्थानाः प्राणभृतामनुग्रहाय उपदिश्यन्ते यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या"[1] इति।

मोहं रुणद्धि विमलीकुरुते च बुद्धिं
सूते च संस्कृतपदव्यवहारशक्तिम्।
शास्त्रान्तराभ्यसनयोग्यतया युनक्ति
तर्कश्रमो न तनुते किमिहोपकारम्[2] ।।

इत्यादिभिः बहुभिः श्लोकैः न्यायशास्त्रस्य प्राशस्त्यं प्रतिपादयन्ति बहवो ग्रन्थकाराः। सर्वशास्त्रोपकारकमिदं न्यायशास्त्रम् आन्वीक्षिकी, प्रमाणशास्त्र, तर्कशास्त्र, न्यायविद्या इत्यादिभिः बहुभिः नामभिः प्रसिद्धिं गतम्। प्रत्यक्षादीनि चत्वारि प्रमाणानि अङ्गीकुर्वन्तःनैयायिकाः तत्स्वरूपादिकं सुष्टु प्रत्यपादयन्। तेषु प्रमाणेषु शब्दप्रमाणनिरूपणे नव्यनैयायिकैः गदाधरभट्टाचार्यैः जगदीशतर्कालङ्कारैश्च यावान् प्रयासो विहितःन तावत् केनापीतिविदितमेव सर्वैरपि विद्वद्भिः। तर्कालङ्कारस्तु शब्दशक्तिप्रकाशिकायां शब्दप्रपञ्चं सम्यक् निरूपितवान्। भट्टाचार्योपि शक्तिवादे प्रकृत्यर्थं व्युत्पत्तिवादे प्रत्ययार्थं च सम्यक् प्रतिपादितवान्। तत्र चतुर्थ्यर्थनिरूपणे ऊभयोरपि यः मतभेदःदृश्यते तदत्र किञ्चित् प्रस्तौतुम् इच्छामि।

**जगदीशमते संप्रदनत्वम्**

जगदीशः सम्प्रदानमेवं निर्वक्ति –

"गत्यादिभिन्ने धात्वर्थे चतुर्थ्या विग्रहस्थया ।

यः स्वार्थो बोधनीयस्तत् सम्प्रदानत्वमीरितम्"[3]।।

एतदेव स्वयमुपपादयति– गत्यादिभिन्ने यद्धातूपस्थाप्ये यादृशार्थे विग्रहस्थचतुर्थ्या यः स्वार्थो बोधयितुं शक्यते स तद्धातूपस्थाप्यतादृशक्रियायां सम्प्रदानत्वमुच्यते इति। चैत्रः ब्राह्मणाय धनं ददातिइत्यत्र दा धातोः स्वत्वजनकस्त्यागः अर्थः। ब्राह्मणपदोत्तरचतुर्थ्याः प्रतियोगित्वं निरूपितत्वं वा अर्थः। प्रतियोत्वं यद्यर्थःतर्हि निरूपकत्वसंबन्धेन तस्य धात्वर्थैकदेशे स्वत्वे अन्वयः। निरूपितत्वमर्थश्चेत् तस्य आश्रयत्वसंबन्धेन स्वत्वे अन्वयः। तथा च ब्राह्मणप्रतियोगिकं ब्राह्मणनिरूपितं वा यत् धननिष्ठं स्वत्वं तज्जनकत्यागानुकूलकृतिमान् चैत्रः इतितत्र बोधः। केवलं स्वत्वजनकस्त्यागः धात्वर्थःइत्युच्यते चेत् पशुकामनया यत्र यागः क्रियते तत्र चैत्रः स्वात्मने पशुं ददातिइतिप्रयोगापत्तिः। तत्र चैत्रस्य पशुनिष्ठं यत् स्वनिरूपितं स्वत्वं तज्जनकत्यागानुकूलव्यापाराश्रयत्वात्। अतःस्वत्वजनकस्त्यागः धात्वर्थःइतियदुक्तं तत्र त्यागशब्दस्य स्वत्वध्वंसजनकक्रिया अर्थःइतिवक्तव्यम्। तथा सतिस्वत्वजनक-स्वत्वध्वंसजनकक्रिया ददात्यर्थःइतिसिद्ध्यति। तत्र स्वत्वध्वंसे अपि द्वितीयार्थान्वयः स्वीक्रियते। इदानीं पशुफलकयागे पशुनिष्ठस्वत्वध्वंसजनकत्वविरहात् न पूर्वोक्तप्रयोगापत्तिः।

तत्र क्रमशः दलसार्थक्यं निरूपयति। गत्यादि भिन्नेत्यनुपादाने यत्र कर्मत्वार्थे चतुर्थी प्रयुज्यते ग्रामाय गतःइत्यत्र, तत्र ग्रामस्य सम्प्रदानत्वापत्तिः। तत्र विग्रहस्थया चतुर्थ्या गम् धातूपस्थाप्ये अर्थे स्वार्थस्य बोधनात्। अतःगत्यादिभिन्नेत्युक्तम्। एवं वृक्षाय सेचकः इत्यत्र चतुर्थ्याः मुख्यसम्प्रदानत्ववारणाय विग्रहस्थयेतिनिवेशः। तत्र क्रियार्थोपपदस्य कर्मणि स्थानिनः इतिसूत्रेण गौणं सम्प्रदानत्वम्, वृक्षं संवर्धयितुं इत्यर्थे तत्र चतुर्थी विहिता वर्तते। तथा च तत्र धातूपस्थाप्ये सेके चतुर्थ्या स्वार्थः बोध्यते इत्यतः तत्र मुख्यं सम्प्रदानत्वं प्रसज्येत। तद्वारणाय विग्रहस्थयेतिविशेषणम्। तथा च तत्र विग्रहस्थया चतुर्थ्या संप्रदानत्वस्याबोधनान्न दोषः। एवं स्वत्वप्रतियोगित्वं सम्प्रदानमित्यादिप्रयोगवारणाय सम्प्रदानशब्दः स्वाश्रयगोचरत्यागजन्यस्वत्वप्रतियोगिनि शक्तः इति च स्वीकरोति आचार्यः जगदीशः।

**<u>दानपदार्थविचारः</u>**

स्वत्वजनक- स्वत्वध्वंसजनकक्रिया दानं इति पूर्वमुक्तम् । तत्र दानस्य स्वत्वजनकत्वाभावात् स्वत्वध्वंसजनकक्रियैव दानं भवतु इत्याक्षिपति। तत्र मनुस्मृतिरपि प्रमाणं , यथा –

"सप्तवित्तागमा धर्म्या दायो लाभः क्रयो जयः।

प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च"[4] ।।

अत्र श्लोके दानस्य स्वत्वहेतुत्वाकथनात् स्वत्वहेतुत्वं दानस्य नास्तीति शङ्कायां तत्रैवं समाधिः - ब्राह्मणाय त्यक्तायां सत्यां एव गवि गौरियं ब्राह्मणस्य न तु मम इतिप्रतीतिः व्यवहारश्च वर्तते न ततःपूर्वम्। तथा त्यागानन्तरं जायमाना इयं प्रतीतिरेव दानस्य स्वत्वहेतुत्वं ज्ञापयति। किञ्च 'प्रदानं स्वाम्यकारणं' इतिवचनमपि दानस्य स्वत्वहेतुत्वे प्रमाणम्। एवं

 ISSN: 2320-740X

तत्र प्रमाणान्तरमपि प्रदर्शयतियत्र यत्पात्रमुद्दिश्य दानं क्रियते, तत्पात्रस्य तद्धनस्वीकारमन्तरेणापि मरणं सञ्जातं तत्र तद्धनस्य तत्पुत्रपौत्रादिभिः अनुभोगः कर्तव्यः इतिनियमः न स्यात्। स्वीकाराभावात् स्वत्वाजनने तत्पुत्रादेरिव उदासीनानामपि तद्धनग्रहणप्रसङ्गः। किन्तु एवं दानस्यैव स्वत्वजनकत्वे किमर्थं प्रतिग्रहः इतिचेत् उच्यते – 'लब्धाचाष्ट गुणं फल'मित्यादि स्मृतिभिः प्रतिगृहीतद्रव्यदानस्य फलविशेषकीर्तनात् तत्फलसिद्ध्यर्थं प्रतिग्रहः आवश्यकः। तथा च जगदीशमते प्रतिग्रहाघटितःस्वत्वजनकस्त्यागः एव ददात्यर्थः।

<u>**गदाधराभिमतं सम्प्रदानत्वम्**</u>

भट्टाचार्यास्तु क्रियाजन्यफलशालितया कर्तुरिच्छाविषयत्वं सम्प्रदानत्वं इति स्वीकुर्वन्ति। तत्र वैय्याकरणसम्मतिमपि प्रदर्शयन्ति – "कर्मणा यमभिप्रैति स सम्प्रदानम्"[5] इतिसूत्रार्थं कर्मणा यमभिसम्बद्धुमिच्छतिइतिप्रतिपादयता वैयाकरणेनापि सैवार्थःविवक्षितः। ब्राह्मणाय गां ददातीत्यत्र क्रियाजन्यं फलं स्वत्वम्। तथा च त्यागरूपक्रियाजन्यगोनिष्ठस्वत्वभागितया दातुरिच्छाविषयः ब्राह्मणः इतितस्य सम्प्रदानत्वम्। अत्र सम्प्रदानत्वकर्मत्वयोरवैलक्षण्यप्रसङ्गमाशङ्क्य परिहरति। यथा "कर्तुरीप्सिततमं कर्म"[6] इतिसूत्रेण कर्तुः क्रियया आप्तुमिष्टस्य कर्मसंज्ञा विधीयते। क्रियया आप्तुमिष्टः नाम क्रियाजन्यफलशालितया कर्तुरिच्छाविषयः। तथा च निरुक्तसम्प्रदानत्वकर्मत्वयोरविशेषः । एवं आशङ्क्य तत्र एवं समाधीयते धात्वर्थतावच्छेदकफलाश्रयतया इच्छाविषयत्वं कर्मत्वं, धात्वर्थतावच्छेदकफलसंबन्धितया इच्छाविषयत्वं सम्प्रदानत्वम्। ब्राह्मणादिश्च न त्यागजन्यस्वत्वरूपफलाश्रयत्वेनेच्छाविषयः अपि तु स्वत्वनिरूपकतया इच्छाविषयः इतितस्य न कर्मत्वम्।

आश्रयत्वमपि सम्बन्धविशेषः, अतःधात्वर्थतावच्छेदकफलसंबन्धी गौरपि भवतीत्यतःब्राह्मणाय गां ददातीत्यत्र गोः सम्प्रदानत्वापत्तिःइत्याशङ्क्य फलाश्रयत्वेनेच्छास्थले कर्मसंज्ञया सम्प्रदानसंज्ञायाः बाधात् आश्रयत्वातिरिक्तसम्बन्धवत्तया इच्छाविषयत्वमेव सम्प्रदानत्वं इतिस्वीक्रियते। किन्तु एवं सतिवृक्षायोदकमासिञ्चति, पत्ये शेते इत्यादौ सेकजन्यजलसंयोगाश्रयस्य वृक्षस्य, शयनजन्यप्रीत्याश्रयस्य पत्युः सम्प्रदानत्वानुपपत्तिः। तद्वारणाय धात्वर्थतावच्छेदकफलाश्रयत्वभिन्नो यः फलसम्बन्धः तद्वत्तया इच्छाविषयत्वं सम्प्रदानत्वम् इतिस्वीक्रियते। तत्र भेदप्रतियोगिप्रविष्टे धात्वर्थतावच्छेदके फलत्वं नैव निवेश्यते। तथा च धात्वर्थतावच्छेदकनिरूपिताश्रयत्वभिन्नो यः फलसम्बन्धः तत्प्रकारकेच्छाविषयत्वं सम्प्रदानत्वम् इतिसिद्ध्यति। वृक्षायोदकमासिञ्चतीत्यत्र धात्वर्थतावच्छेदकं द्रवद्रव्यक्रिया तदाश्रयताभिन्नः फलसम्बन्धः सेचनजन्यजलसंबन्धः तत्प्रकारकेच्छाविषयत्वं वृक्षस्य अस्तीतितस्य सम्प्रदानत्वम्। पत्ये शेते इत्यत्र धातोः अकर्मकत्वात् धात्वर्थतावच्छेदकं शयनत्वं तन्निरूपिताश्रयत्वभिन्नः यः फलसम्बन्धः शयनजन्यप्रीत्यादिसम्बन्धः तद्वत्त्वेन इच्छाविषयः पतिः इतितस्य सम्प्रदानत्वम् । एवं ब्राह्मणाय गां ददातीत्यत्र स्वत्वजनकत्यागः दाधात्वर्थः। गोपदोत्तरद्वितीयायाः आधेयत्वमर्थः। तस्य स्वत्वे अन्वयः। निरूपितत्वप्रकारकेच्छाविषयत्वं चतुर्थ्यर्थः। निरूपितत्वे प्रकृत्यर्थस्य ब्राह्मणस्यान्वयः। ब्राह्मणनिरूपितत्वप्रकारिका या इच्छा ब्राह्मणनिरूपितं गोनिष्ठं स्वत्वं भवतु इत्याकारिका, तद्विषयत्वाश्रयः यत् गोनिष्ठस्वत्वं तज्जनकत्यागानुकूलकृतिमान् चैत्रः इतिबोधः जायते ।

**गदाधरमते चतुर्थ्यर्थः**

गदाधरः इच्छाघटितं निरूपिततत्वप्रकारकेच्छाविषयत्वं चतुर्थ्यर्थःइतिस्वीकरोति। निरूपिततत्वमात्रस्य चतुर्थ्यर्थत्वे यत्र चैत्रमुद्दिश्य धनं दत्तं तत्र तस्मिन् धने चैत्रपत्न्याः अपि स्वत्वमस्ति इतिस्वीकरणीयं, दम्पत्योर्मध्यगं धनमितिवचनात्। तथा च तत्र धननिष्ठे स्वत्वे चैत्रपत्नीनिरूपिततत्वस्यापि सत्वात् चैत्रपत्नै दत्तं इतिव्यवहारस्य प्रामाणिकत्वापत्तिः। अतःइच्छाघटितं निरूपिततत्वप्रकारकेच्छाविषयत्वं चतुर्थ्यर्थःइतिवक्तव्यम्। तथा च तत्र धननिष्ठं स्वत्वं चैत्रनिरूपितं भवतु इतिदातुः इच्छा। अतःतस्मिन् स्वत्वे चेत्रपत्नीनिरूपिततत्वप्रकारकेच्छाविषयत्वं नास्तीतिन तादृशव्यवहारस्य प्रामाणिकत्वापत्तिः।

अन्ये केचन स्वत्वनिरूपकत्वमेव संप्रदानत्वं अतःनिरूपिततत्वमात्रं चतुर्थ्यर्थःइतिवदन्ति । अत एव श्राद्धस्य पित्रपेक्षया यागत्वं ब्राह्मणापेक्षया दानत्वं च उपपद्यते। तत्र त्यज्यमाने अर्थे पितृणां स्वत्वानुत्पत्या संप्रदानत्वासम्भवात्। तेषामयमाशयः उद्देश्यत्वागर्भं स्वत्वनिरूपकत्वमेव संप्रदानत्वम्। यदि स्वत्वभागित्वेनोद्देश्यत्वं सम्प्रदानत्वं इत्युच्यते तर्हि श्राद्धे यः अन्नत्यागः क्रियते सः पितरमुद्दिश्यैवेत्यतःपितुः स्वत्वभागित्वेनोद्देश्यत्वात् यागस्य पित्रपेक्षयापि दानत्वं स्यात्। अतःउद्देश्यत्वाघटितं स्वत्वनिरूपकत्वमेव संप्रदानत्वम्। किन्तु यत्र अन्योद्देश्येन क्षिप्तस्य जलस्य दैवात् वृक्षसंयोगः अन्योद्देश्येन शयनादितश्च पत्युः फलसंबन्धः तत्र वृक्षायोदकमासिञ्चति, पत्ये शेते इतिप्रयोगवारणाय उद्देश्यत्वघटितमपि सम्प्रदानत्वं स्वीकुर्वन्ति। किन्तु तत्र संप्रदानत्वं भाक्तम्। तथा च एतन्मतानुसारेण लाघवात् उद्देश्यत्वाघटिते स्वत्वनिरूपितत्वे एव चतुर्थीविभक्तेः शक्तिः इतितदेव मुख्यं संप्रदानत्वम्। उद्देत्यत्वघटिते तु लक्षणैवेतितत्र गौणं संप्रदानत्वम्। पितृभ्यो दद्यादित्यत्रापि एतादृशं भाक्तं सम्प्रदानत्वमेव।

भट्टाचार्यास्तु पूर्वोक्तरीत्या चैत्रपत्नै दत्तम् इतिव्यवहारवारणाय इच्छाघटितमेव सम्प्रदानत्वं मुख्यं स्वीकुर्वन्ति। एवं पितृभ्यः दद्यादित्यत्रापि संप्रदानत्वं मुख्यमेवेतिस्वीकुर्वन्ति। किन्तु इच्छाघटितस्य सम्प्रदानत्वस्य मुख्यत्वे भट्टाचार्यमते श्राद्धस्य पित्रपेक्षया दानत्वं स्यात् इत्यतःतत्र पक्षान्तरं प्रतिपादयति। तद्यथा – स्वस्वत्वेच्छाधीनतत्कत्वमेव मुख्यं दानरूपक्रियासंप्रदानत्वम्। स्वं-सम्प्रदानत्वेनाभिमतः। तन्निरूपितस्वत्वेच्छाधीनं यत् स्वत्वं तन्निरूपकत्वं मुख्यं सम्प्रदानत्वम्। यत्र चैत्रोद्देश्येन धनं दत्तं तत्र चैत्रपत्न्याः स्वनिरूपितस्वत्वेच्छाधीनस्वत्वनिरूपकत्वं नास्तीतिन चैत्रपत्नै दत्तमितिव्यवहारापत्तिः। एवं श्राद्धे तावत् पितृनिरूपितस्वत्वेच्छायाः सत्वेपि तादृशेच्छाधीनस्वत्वनिरूपकत्वस्याभावात् न पितुः मुख्यं संप्रदानत्वम्। पितृभ्यो दद्यादित्यत्रापि गौणं सम्प्रदानत्वमेव। तत्र निरूपिततत्वेनेच्छाविषयत्वं लक्षणया चतुर्थ्यर्थः। ब्राह्मणाय ददातीत्यत्र तु चतुर्थ्याः निरूपिततत्वमात्रम् अर्थः।

**स्थलविशेषेषु चतुर्थ्यर्थनिरूपणम्**

शत्रवे भयं ददातीत्यत्र दा धातोः जनयतीतिभाक्तोऽर्थः। तथा च दाधातोः लक्ष्यार्थःउत्पादकव्यापारः तस्य भयं कर्म। तत्र चतुर्थ्यर्थःवृत्तित्वेनेच्छाविषयत्वम्। तथा च शत्रुनिष्ठतया इच्छाविषयीभूतभयनिष्ठोत्पत्यनुकूलव्यापारवान् इतितत्र बोधः। नारदाय रोचते कलहः इत्यत्र "रुच्यर्थानां प्रीयमाणः"[7] इतिसूत्रेण नारदस्य सम्प्रदानसंज्ञा। तत्र रुच् धातोः प्रीतिजनकत्वमर्थः। तत्र आश्रितत्वं चतुर्थ्यर्थः। आश्रितत्वं च आधेयत्वम्। तच्च धात्वर्थैकदेशे प्रीतावन्वैति।

 ISSN: 2320-740X

आख्यातार्थःआश्रयत्वम्। तत्र धात्वर्थजनकत्वस्य निरूपितत्वसम्बन्धेनान्वयः। आश्रयत्वस्य कलहे अन्वयः। एवं च नारदनिष्ठप्रीतिजनकताश्रयः कलहः इतिशाब्दबोधः तत्र जायते। जगदीशोऽपि रुच् धातुयोगे आधेयत्वं चतुर्थ्यर्थःइत्येव स्वीकरोति। मैत्राय रोचते मोदक इत्यत्र धातोः भक्ष्यत्वप्रकारकेच्छा अर्थःइतिजगदीशः। तदन्वितमाधेयत्वं चतुर्थ्यर्थः। तिङः कर्तृत्वमर्थः, तच्च विषयत्वरूपम्। तथा च मैत्रनिष्ठा या भक्ष्यत्वप्रकारकेच्छा तद्विषयत्ववान् मोदकः इतितत्र बोधः।

एवं यत्र सविषयकः पदार्थःधात्वर्थःभवतितत्र विषयित्वं चतुर्थ्यर्थः। यथा पुष्पेभ्यः स्पृहयतीत्यत्र स्पृहधात्वर्थेच्छायां चतुर्थ्यर्थस्य विषयित्वस्य आश्रयतासंबन्धेनान्वयः। विषयित्वे निरूपितत्वसंबन्धेन पुष्पस्यान्वयः। तथा च पुष्पनिरूपितविषयित्वाश्रयेच्छाश्रयः इतिबोधः। पुत्राय क्रुद्ध्यतीत्यत्रापि धात्वर्थःक्रोधः द्वेषविशेषः सविषयकः। अतःतत्र विषयित्वं चतुर्थ्यर्थः। जगदीशोऽपि चैत्राय कुप्यतिक्रुद्ध्यतिइत्यादौ धात्वर्थःउत्कटद्वेषः इतिकथयन् तत्र विषयित्वस्य चतुर्थ्यर्थत्वं स्वीकरोति।

विप्राय शतं धारयतीत्यत्र "धारेरुत्तमर्णः"[8] इतिसूत्रेण चतुर्थी विधीयते। तत्र भट्टाचार्याः धार्यर्थं सविस्तरं प्रतिपादयन्ति । ऋणग्रहणेन अधर्मणनिष्ठः परिशोधननाश्यः अदृष्टविशेषो जायते। तथा च द्रव्यान्तरदानाभ्युपगमपूर्वकपरदत्तद्रव्यादानजन्यादृष्टविशेषवत्त्वमेव तत्र धात्वर्थः। तद्घटकदानान्वयि कर्तृत्वं चतुर्थ्यर्थः। धात्वर्थघटके आदाने द्वितीयान्तार्थस्य शतकर्मकत्वस्यान्वयः। तथा च द्रव्यान्तरदानाङ्गीकारपूर्वकविप्रकर्तृकदानकर्मीभुतशतकर्मकादानजन्यादृष्टविशेषाश्रयः चैत्रः इतितत्र बोधः। जगदीशस्तु कालापमतमित्येकं मतम् अत्र प्रतिपादयति। गुरवे गां धारयतेत्यत्र धारयतेः गृहावस्थित्यनुकूलो व्यापारः अर्थः। चतुर्थ्या च धात्वर्थैकदेशगृहान्वितं संबन्धित्वमुपस्थाप्यते। तथा च तत्र गोकर्तृकगुरुसंबन्धिगृहावस्थित्यनुकूलव्यापाराश्रयः इतिबोधः जायते।

यूपाय दारुः इत्यत्र "तादर्थ्ये चतुर्थी वाच्या"[9] इतिवार्तिकेन चतुर्थी। अत्र यूपपदोत्तरचतुर्थ्याः इच्छाधीनेच्छाविषयव्यापाराश्रयत्वम् अर्थः। प्रथमेच्छायां प्रकृत्यर्थस्य यूपस्य विषयतासम्बन्धेनान्वयः। चतुर्थ्यर्थस्य स्वरूपसंबन्धेन दारुण्यन्वयः। तथा च यूपविषयकेच्छाधीनेच्छाविषयतक्षणादिव्यापाराश्रयः दारुः इतिशाब्दबोधः। एधेभ्यो व्रजतीत्यत्र "क्रियार्थोपपदस्य च कर्मणि स्थानिनः"[10] इतिसूत्रेण चतुर्थी। एधान् आहर्तुं व्रजतीत्यर्थे एधेभ्यो व्रजतीतिप्रयोगः। अत्र चतुर्थ्यर्थःकर्मतानिरूपकाहरणप्रयोजनकत्वम्। कर्मतायां आधेयत्वसम्बन्धेन प्रकृत्यर्थस्य एधस्यान्वयः। चतुर्थ्यर्थस्य व्रज् धात्वर्थे गमने अन्वयः। एवं च एधनिष्ठकर्मतानिरूपकाहरणप्रयोजनकगमनानुकूलकृतिमान् इतितत्र बोधः जायते।

मतद्वयपरिशीलनेन अस्माभिरिदमवगन्तुं शक्यते यत् चतुर्थ्यर्थनिरूपणे भट्टाचार्येण यः निष्कर्षः प्रदर्शितःन तथा केनापि प्रदर्शितःइति। निरूपितत्वमात्रस्य चतुर्थ्यर्थत्वे दोषं उद्भाव्य उद्देश्यत्वघटित एव चतुर्थ्यर्थो वक्तव्यः इतिभट्टाचार्याणां अभिप्रायः। तर्कालङ्कारास्तु उद्देश्यत्वाघटितं निरूपितत्वं प्रतियोगित्वं वा चतुर्थ्यर्थःइतिवदन्तिः तथा च तन्मते पितृभ्यो दद्यात् इत्यादिस्थलेषु का गतिरितिचिन्तनीयम्।

**REFERENCES**

1. **Goutama. Nyayasutra with Bhashya. (Ed.)**Mahesh jha.:1st Edition. Varanasi. Chawkhamba Krishnadas Academy, 2013. ISBN: 978-81-7080-410-9: Pg. 14
2. **Srimad Venkatadhvari. Viswagunadarsachampu. (Ed.)**Tukaram Javji.:1st Edition. Mumbai. Nirnaya Sagar Press, 1899. Pg. 294
3. **Jagadisha Tarkalankara. Sabdasaktiprakasika. (Ed.)**Pandit Dhundhiraj Sastri.: 5th Edition. Varanasi. Chawkhamba Prakasan, 2013. Pg. 306.
4. **Manu.Manusmriti.[Ed]**Pandit Girija Prasad Dvivedi,1st Edition. Lucknow. New Kishore Vidyalaya, 1917 : Pg. 394.
5. **Bhattojideekshita.Vaiyakaranasidhantakoumudi .[Ed]** S.Chandrasekhara Sastrikal, 1st Edition. St. Joseph's Industrial school press, 1910: Pg. 426
6. **Bhattojideekshita.Vaiyakaranasidhantakoumudi .[Ed]** S.Chandrasekhara Sastrikal, 1st Edition. St. Joseph's Industrial school press, 1910: Pg. 400.
7. **Bhattojideekshita.Vaiyakaranasidhantakoumudi .[Ed]** S.Chandrasekhara Sastrikal, 1st Edition. St. Joseph's Industrial school press, 1910: Pg. 426.
8. **Bhattojideekshita.Vaiyakaranasidhantakoumudi .[Ed]** S.Chandrasekhara Sastrikal, 1st Edition. St. Joseph's Industrial school press, 1910: Pg. 427.
9. **Bhattojideekshita.Vaiyakaranasidhantakoumudi .[Ed]** S.Chandrasekhara Sastrikal, 1st Edition. St. Joseph's Industrial school press, 1910: Pg. 430.
10. **Bhattojideekshita.Vaiyakaranasidhantakoumudi .[Ed]** S.Chandrasekhara Sastrikal, 1st Edition. St. Joseph's Industrial school press, 1910: Pg. 431.

**उपयुक्तग्रन्थसूची (Bibliography)**

1. शब्दशक्तिप्रकाशिका, चौखम्बा प्रकाशनम्, वाराणसी,2013
2. व्युत्पत्तिवादः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली,2011
3. सिद्धान्तकौमुदी, आदनूर् शं. चन्द्रशेखरशास्त्री, त्रिशिरःपुरम्, 1910
4. न्यायसूत्रम्, चौखम्बा संस्कृत सीरीज आफीस्, वाराणसी,2013
5. विश्वगुणादर्शचम्पू, तुकाराम् जावजी, मुम्बै, 1899
6. मनुस्मृति, नवलकिशोरविद्यालयः, लखनऊ, 1917

******

 ISSN: 2320-740X

# The Krishnapadi Commentary of Bhagavata Purana and the Treasure House of Manuscripts in Kerala

**Maneesha S**

Assistant Professor, School of LLS,

Chinmaya Vishwavidyapeeth

Veliyanad Kerala

**ABSTRACT :**

Manuscripts occupy a significant place among the resources available in the state of Kerala. As any part of the world, manuscripts were one of the main and important sources for writing especially in the southern region of India. Due to the absence of a proper solution for the storage of data in bulk, over the past years, thousands of manuscripts were perished even without retaining a copy or image for future use.There are a large no of rare manuscripts in many parts of Kerala lying unidentified and properly preserved.The scope of the study lies on the fact that it opens a door to the new wisdom that has been hidden over a long period of time.

**Keywords:** Manuscript, Kerala, Bhāgavata Purāṇa, Manuscript Library

## Introduction

India is believed to have the greatest collection of manuscripts in the world, numbering five million, according to National Manuscript Mission.Themes, textures, aesthetics, scripts, languages, calligraphies, illuminations, and pictures are all covered in a wide range of these. They make up India's collective "memory" of its past, culture, and ideas.Manuscripts have played a very significant part for the development, preservation & propagation of learning & literature in India.The term Manuscripts is derived from, the Latin word 'Manuscriptum' . It consists of two words ie manus + scripts. Manu means hand & Script means written. In one word manuscript is called hand written book.

In our country, we can see three collections of the manuscripts such as Government collection, Indian Museum collection & the Asiatic Society collection. A lot of manuscripts are preserved in each collection. These manuscripts contain various branches of knowledge like veda, itihasa, smrti, kavya, vyakarana, Tantra, Darsana, Ayurveda, Purana etc. All of them are considered to reveal some aspect of literature. There are still manuscripts from India that were written in a variety of languages and scripts. These are available in several languages and scripts, including Telugu, Grantha, Devanagiri, and Nandinagiri. Different sorts of manuscripts are accessible. They include numerous scripts, languages, calligraphies, illuminations, and pictures, as well as various topics, textures, and aesthetics. Indian manuscripts were written in a number of languages and using historical record scripts. The majority of the manuscripts are in Sanskrit. The Vedas are the first important work of Sanskrit literature to be found in the Sarasvati Mahal's Sanskrit Collection, which is the biggest collection of manuscripts in all of India. There are paper and palm leaf versions of these manuscripts accessible.

The history of writing in India is very old, may be it is older than the scripts. The writing materials such as the leaves of certain trees like bhūrjapatra or birch bark was used as paper over the centuries in north India, where as the people of southern as well as eastern part of the country used processed palm leaves as writing materials.

Here I have made an attempt to collect the right information of an unpublished rare manuscript on purāṇa literature.viz Krishnapadi commentary on Bhāgavatapurāṇa.

A large and varied collection of manuscripts are kept in both public and private repositories in Kerala. These manuscripts are dispersed throughout the region in state-sponsored repositories and archives, private, religious, and educational institutions, as well as family collections. They are written in languages like Malayalam, Sanskrit, and Arabic.Kerala has made a distinctive contribution to the history of intellectual thought. There is a rich heritage of writing surviving in Kerala on subjects pertaining to philosophical concepts, scientific systems, artistic traditions and architectural skills. The scientific traditions vary from mathematics, astronomy, metallurgy, varied pharmaceutical systems, agricultural methods of farming and cultivation, trade and

 ISSN: 2320-740X

commerce, statecraft and governance, the martial arts of battle and warfare. The texts and commentary on performance are part of the artistic traditions.The manuscripts tradition of kerala is unique, rich, wide & varied.Kerala can claim a great heritage in the collection, preservation & publication of manuscripts. Kerala has a wonderful collection of oral poetry including Vedas and other forms of literature as well as different knowledge systems. Vedic texts including Samhitās, Brāhmaṇās, Āraṇyakās, Upanişads and different Vedāṅgas also were preserved in Kerala first through oral tradition and later in written traditions like in manuscripts and transcripts.

Kerala rulers were the patrons of knowledge. They established some excellent centres of learning and also encouraged several scholars and poets.Cochin royal family extended the highest patronage to Sanskrit learning and had a good collections of manuscripts. Tripunithura is a place where we can see a strong and long tradition of Sanskrit learning from centuries ago. Many families in & around tripunithura had deposits of manuscripts.

The Grandha Library attached to Sree Ramavarma Govt.sanskrit College Tripunithura is a significant centre where a lot of manuscripts are kept. Most of the manuscripts here are contributed by the writers from Cochin and nearby palaces. The manuscript library houses rare literary works. Several versions of classic plays of Bhasa, Kalidasa and Kulasekhara are there in the library. Original texts of famous poems of Kalidasa like 'Kumarasambhavam', 'Raghuvamsham' and 'Rithusamhaaram' with explanations given by ancient Sanskrit scholars remain great reference books for literary enthusiasts. Astrology through drawings is a unique manuscript that is also housed in this library. Beautiful caricatures are scribbled on palm leaves in this peculiar script.The pictures are categorised according to various birth stars, and a thorough analysis of each palm leaf's birth star is placed there to forecast both the past and the future. Another priceless script is Sreedhara's commentary on Jayadeva's "Geetha Govinda," which is a work of literature. A thorough analysis of "Narayaneeyam" by Sanskrit expert Sahrudayathilakan Rama Pisharoty reveals a great deal about the significance of Melputhur Narayana Bhattathiripad's Sanskrit

literature.It serves as a window into the glory of classical Indian literature. A few library books provide insight on the effectiveness of Ayurveda.

The list of Manuscripts kept in this college has been categorized into 24 heads such as Mahābhārata, Bhāgavata, Purāṇa, Rāmāyaṇa,Bhagavat Gīta, Vedanta, Mimāmsa, Vyākaraṇa, Nyāya, Vaidya, Viṣavaidya, Jyotiṣa, Śilpa, Dharmaśāstra, Tantra, Samhitas, Gajachikitsā, Alaṅkāra(Literary Criticism), Nātakas & Kāvyas, Stotras, Saṅgīta, Arthaśāstra & Kośa. A complete list of the manuscripts and transcripts have kept in this college . The whole list is given in the website of the National Mission for Manuscripts, Indira Gandhi National Centre for the Arts (IGNCA) New Delhi. The National manuscripts mission has made all the manuscripts into microfilm which are also preserved in the Internet.

In the list of Manuscripts published in the Website of National Manuscript Mission, there are a total number of 2810 Manuscripts belonging to those of Tripunithura Manuscript Library. But in the list of Manuscripts kept at the Manuscript Library, Tripunithura, the number of manuscripts is given as 1470. There are more than one work in many bundles of Manuscripts. Such works are noted as a,b,c etc., under the number of those bundles in the list of the Library. But National Manuscript Mission has treated all such works in a bundle of Manuscripts separately. Hence there was an increase in the number of Manuscripts in the list given by National Manuscript Mission.The manuscripts are listed in Sanskrit alphabetical order in the National Manuscript Mission. No item-wise or topic-wise headings are given in the list published by the National Manuscript Mission. There is a list of Transcripts also in the Manuscript Library of Tripunithura. It shows that National Manuscript Mission has made microfilm and listed Manuscripts only, not transcripts, as the latter are copies of some of those of the former works.

The lists of Manuscripts and Transcripts available at Govt. Sanskrit College, Tripunithura are handwritten. The lists are well kept and the Manuscripts and transcripts are arranged in the library according to the list. It is clear from the records at the end of the lists that a through checking of the Manuscripts and Transcripts was done

 **ISSN: 2320-740X**

in 1961,62,63,and 1964 when Prof. T.K.Ramachandra Iyer was the Principal.Fresh copies of the Transcripts were made during those years as far as possible. No further serious work on checking, listing and copying, it seems, has been done or is seen recorded. However, the list prepared at that time and the manuscripts and transcripts in those lists almost remain intact even now. No major attempts, except a few for collecting more manuscripts/transcripts to the list have been done later. Many manuscripts of rare and important works in different branches of knowledge in Sanskrit and preserved in this Library. Some of them are unpublished, some partly published.One of such manuscripts of importance is introduced here.

**Krishnapadi commentary on Bhāgavata.**

Krishnapadi commentary of Rāghavānanda on Bhāgavatapuraṇa is the only Sanskrit commentary available for the whole text from Kerala. There are some other Sanskrit commentaries also for the text from Kerala which are available for some portions only. Krishnapadi commentary can be compared in its poetic and scholary merits to the celebrated non-keralite commentaries on Bhāgavata like those of Śrīdharasvāmin and Vallabhācharya. Moreover, Krishnapadi is important in another way also as it contains numerable variant readings of the text which proves that there was a South Indian version of the text different from that of the popular one in the North. High Vedantic ideals are dealt with by Rāghavānanda while commenting on the work synthesising Bhakti with Vedanta. Rāghavānanda lived sometime around the 14$^{th}$ century A.D.

Though Krishnapadi is available for the whole text, only some portions of the same have been published. Commentary for the Skandhas 1,2,10,11,and 12 have been published by Tripunithura Sanskrit College. Commentary for other Skandhas 3 to 9 remains in Manuscript form. Manuscripts and Transcripts of the commentary of these skandhas are preserved in Tripunithura Manuscript Library. These are awaiting the attention of scholars and researchers.

Śrīmad Bhāgavata is a great Purāṇa which appears to have exercised an enormous influence on the development of bhakti ideas in medieval times. No satisfactory theory of

its date and origin has yet been advanced, but there can be no doubt that its emergence marks a turning point in the history of the Vaiṣṇava faith. Here the centre of attraction is Krishna in his youth. It asserts the rights of the emotional and the aesthetic in human nature and appeals to the exceedingly familiar and authentic intensity of feelings and sentiments.

The Bhāgavata beautifully illustrates how a devotee fully surrenders to the Lord and lives only for the sake of him. The Book Bhāgavata is the incarnation of Krishna. All the four ultimate ends of life can be gained through it. The four Vedas declare that it is full of love. If the four Vedas are like curd the Bhāgavata is the cream.

The Śrīmad Bhāgavata of Vyāsadeva is accepted by the majority of scholars as a famous Mahāpurāṇa of India. This great Sanskrit work consists of 18000 slokas and those are divided into 12 Skandhas. The scholars opine that this work was first written in south India in the 7th century A.D. Eventually, it spread extensively throughout India, mainly with the help of the Vaiṣṇava sects under the guidance of different rulers.

Over the succeeding centuries, hundred of commentaries and annotations of this work were composed by the Indian pandits and poets not only in Sanskrit but also in various regional languages.

**Conclusion**.

From this evidence, we can say that there are numerous texts, in India & abroad, which contain valuable information and may prove to be of vital interest if only their publication were undertaken. Several foreigners visited the Manuscript Library, Tripunithura, and they were very impressed with the tradition of writing and copying on Palm-leaf manuscripts. Quite often they wrote about this in their travelogues also.

From the above, it is clear that the Indian tradition of palm leaf books was not only very old but also very widespread. It is time now to preserve such invaluable treasures of our nation.

“ Purāṇam bhāratam vāpi rāmāyaṇam tathaiva ca

 ISSN: 2320-740X

Likhitva pustakam datva mukti bhuktimavāpnuyāt".

From this sloka, it is very clear that through the writings of these holy grandhas, we can achieve merit (puṇya) in our life. But manuscript awareness of the public in our country is very poor. This has been causing great damage to the wealth of manuscripts of the country. Thus concluding with the words of Jawaharlal Nehru in his famous book, 'The Discovery of India' is that " one of our major misfortunes is that we have lost so much of the world's ancient literature."

**The description of the work.**

| | |
|---|---|
| Substance | - This work is a transcript. |
| Size | - Length 32 centimetres,width 20 centimetres. |
| Lines | - 22 lines in a page. |
| Script | - Malayalam. |
| Completed or not | - completed. |
| Appearance | - The outer cover is red in colour. |
| Pages | - Around 200 pages in one book |
| No of books | - 8 Books contain 12 skandhas. |

**References**


1. Udayakumar D, Sreekumar G V, Athvankar, U A, *Traditional writing systems in Southern India-Palm Leaf Manuscripts.*Design Thoughts.2009
2. Susmita Palit Saha, Projit Kumar Palit,*Manuscript and Indian Culture.*Kaveri Books.2017
3. Saraju Rath, *Aspects of Manuscript Culture in South India.*Brill's indological Library.Vol 40.2007
4. Rāghavānanda, *Krishnapadi commentary of Bhāgavatapuraṇa*(Manuscript)


******

# A Brief Overview of Ancient Indian Geometry

**Vijayakumari T. Chilakwad**
Associate Professor
Department of Mathematics
Government First Grade College and PG Centre
Jnanadhara Campus, Dharwad – 580005

**Abstract:** This paper depicts the origin of geometry in ancient India. *Sulba* (rope) *sutra* which contains the rules to design the altars were introduced by Baudhayana, Manava and Katyayana. Using *sulba sutra* the requirement of rituals was fulfilled. The shapes of *altars* were in the form of geometrical figures like triangles, circles, squares etc. Yantra is the physical representation of *mantra* of a particular deity. In ancient India due to connection of the sages to cosmic energy they used to prepare simple to complex geometrical figures corresponding to different deities. At the end of the paper geometry of the most important *yantra* called *shree chakra* is discussed.

**Keywords:** Geometry, altars, deity, Adishankaracharya, *Shree Chakra*, *Sandhi*, *Marma*, *Bindu.*

**Introduction :** Ancient Indian knowledge is essential for holistic development of a student. As a country India has very rich history of mathematics, *vedic* period mathematics played important role in the ancient education system with learning based on deep knowledge of science and philosophy. In India every knowledge and art leads to get freedom from endless cycle of mortal world. So geometry originated and here as a part of rituals by *vedic* period scholars and teachers.

**Ancient Indian Geometry:** Abraham Seidenberg (1916-1988), a great algebraist and historian of mathematics from America traced the origin of sophisticated mathematics to the originators of *Rugvedic* rituals.

In ancient India ritual was a very important part of religious practice. Regular as well as special rituals were performed and for both the rituals different shapes of fire

 **ISSN: 2320-740X**



altars were built, namely bird shaped, kite shaped, rhombus, chariot wheel, circle, triangle, square and tortoise etc. with accurate measurements.

Sometimes it was required to change the shape of altars preserving the area. So *Sulba* (Rope) *Sutra* rules given by Baudhayana [800 BC-740 BC), Manava (750 BC-690 BC), Apastamba (around 600BC) and Katyayana (around 200 BC) were used to design and construct beautiful altars. These rules give information about time, directions, angles between two lines, measurements, formulae for areas of plane figures, etc. In this way geometry was developed in India which was necessary for rituals. All such activities were performed only by using ancient Indian ways and it continued to develop *yantra*, a geometrical figure or instrument which represents a particular deity and which is worshipped to get one's desires fulfilled by the corresponding deity. These *yantras* were drawn on different surfaces made up of earth, copper, silver, gold or alloys etc. Every deity is having his (her) own *mantra* and *yantra*, the physical representation of mantra. So every deity is having corresponding *yantra*. As said above these contain geometrical diagrams like circles, squares, lines and triangles. Some *yantras* contain very complicated geometry such that even now a day it is difficult to draw using modern tools without errors. Shree chakra is such a special, complex significant and king of *yantras* containing a number of different *yantras* in it and also called *Shri yantra* and is very beautiful, attractive and in *Soundarya Lahari* it is described as







चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पञ्चभिरपि
प्रभिन्नाभिः शंभोर्नवभिरपि मूलप्रकृतिभिः।
चतुश्चत्वारिंशद्वसुदलकलाश्रत्रिवलयत्रिरेखाभिः
सार्धं तव शरणकोणाः परिणताः॥

by **Adishankaracharya** who was an eighth–century Indian *vedic* scholar and teacher. In his view *shree chakra* is the abod of **Shree Tripur Sundari Devi.**

In ancient era drawing of such yantras was possible only due to the deep geometrical knowledge of sages who were having superior consciousness in cosmic energy. *Shri yantra* contains parallel lines, squares, circles, triangles, intersections of triangles and a *bindu* (point) in the centre. A study by interested researcher reveal that it is according to golden ratio and is ever present in universe and is called divine proportion also. Mathematics is the sweet language of scientists and is a tool to study the physical phenomenon of the universe also can be understood by both human being and computers. Galileo said "Mathematics is the language in which God has written the universe!".



Now let us see the construction of *Shri chakra*. It consists of *nava* (nine) *aavaranas* (enclosures). The outermost part is in the form of a square drawn with three parallel layers. This is the first *avarana* called *Trailokya Mohana Chakra*. At the middle of each of four sides there is a gate projected out of square and are open in some drawings and are closed in some other.

The triad of three concentric circles is present immediately inside the square and is called *Trivalaya*.


**ISSN: 2320-740X**

Immediately inside the *trivalaya* there is a ring with sixteen petals. All petals are of equal size and no gap between petals. This is second *avarana* called *Sarva Asha Paripoorak Chakra*.

Immediately inside the second *avarana* the third *avarana* called *Samksobhana Chakra* is situated and consists of a ring of 8 petals with equal size and no gap between them.

Next structure is the innermost circle which is technically most involved drawing and most important part of *Sri chakra* and is a configuration of nine triangles four are in upward direction and five inverted, interlocking to form the main *chakra* consisting of 43 small triangles. This complex of 43 triangles is called *Tri-Chatvarimshat-Kona*. This contains outer most group of 14 triangles, fourth avarana, called *Sarva-Soubhagya-dayaka chakra*.

The immediate of inner group of 10 triangles forms the fifth *avarana* called *Sarvarth Sadhaka Chakra*.

Another group of 10 triangles which is situated inside the fifth *avarana* is the sixth *avarana* called *Sarva Rakshakara Chakra*.

Immediately inside sixth *avarana* there is a group of 8 triangles, seventh *avarana* called *Sarva-rogahara Chakra*.

The eighth *avarana* is the innermost inverted triangle called *Sarva siddhi prada chakra*.

The *bindu* inside eighth *avarana* is the ninth *avarana* called *Sarva anand-maya chakra* and *bindu* is considered as a triangle with zero size.

The inner most circle contains total of 24 points of intersection of two lines (*Sandhis*) and 18 *marmas*, points of intersection of three lines. While drawing the nine triangles in innermost circle the errors will happen due to complexity of drawing and due to human errors.

There are different hypothesis using golden ratio, using computer etc. to draw the *Shrichakra*.

This two dimensional *Shri chakra* is the projection on a horizontal plane of the original three dimensional form of *shri chakra* where all the nine *avaranas* are at different heights.

**References:**


1. Ananthapadmanabha T. V, 2020, Geometry of Srichakra, Edn. II
2. Shulba Sutras https://en.wikipedia.org/wiki/Shulba_Sutras
3. Indian Sulbasutras - MacTutor History of Mathematics Archive, https://mathshistory.standrews.ac.uk/HistTopics/Indian_sulbasutr
4. Adishankaracharya Book, Shankarstotra Muktavali In kannada 2020


******

 ISSN: 2320-740X

# शिक्षायां शैक्षिकप्रविधेः आवश्यकता

**डा. बी. नरेशकुमारनायकः**
सहायकाचार्यः, शिक्षाशास्त्रविभागः
वेदव्यासपरिसरः, बलाहरः, काङ्गडा, (हि.प्र)

**शोधसारः**

शैक्षिकप्रविधिः एकं तादृशं प्रविधिविज्ञानं, येन शिक्षायाः उद्देश्यानि प्राप्तुं शक्यन्ते। उद्देश्यनिर्धारणमात्रम् एतस्य क्षेत्रं न भवति, अपि तु उद्देश्यानि व्यावहारिकतया परिभाषितुं तत्क्षेत्रं साहाय्यं विदधाति। शैक्षिकप्रविधिः माण्टेसरी, किण्डरगार्टन्, इत्यादिशिक्षणपद्धतिवत् काचित् शिक्षणपद्धतिः न, अपि तु एषः प्रविधिः एकं तादृशं विज्ञानं, यस्याधारेण शिक्षायाः विशिष्टोद्देश्यानाम् अधिकाधिकप्राप्तये विभिन्नक्रमनिर्धारणं विकासश्च कर्तुं शक्यते।

**मुख्यशब्दाः**

एडुकेटम्, ई, डुको, शैक्षिकप्रौद्योगिकी, Technology, Technicos, Texere

**भूमिका**

शैक्षिकप्रौद्योगिक्याः अवधारणां सम्यक् अवगन्तुं प्रथमं तस्य अर्थःअवगन्तव्यः। शैक्षिकप्रौद्योगिकी शिक्षा, प्रौद्योगिकी इतिशब्दद्वयेन निर्मितं भवति। तयोः अर्थं स्पष्टतया अवगन्तुं सर्वप्रथमम् आवश्यकं यत् शिक्षा एवं प्रौद्योगिक्याः अर्थःपृथक् पृथक् भवितव्यः।

शिक्षा मानवविकासस्य मूलभूतं साधनम् अस्ति, यस्य माध्यमेन मनुष्यस्य सहजशक्तयः विकसिताः भवन्ति, ज्ञानं कलाकौशलं च वर्धते, व्यवहारे परिमार्जनं कर्तुं शक्यते। तथा च सः सभ्यः, सुसंस्कृतः, संस्कारी च नागरिकः भवति। शिक्षाशब्दःसंस्कृतभषायाः शिक्ष् धातोः अ प्रत्ययात् निष्पन्नः यस्य अर्थःअधिगमः, अध्यापनञ्च। अतःशिक्षा इत्यस्य अर्थःअधिगमः, अध्यापनप्रक्रिया अस्ति। आङ्ग्लभाषायां शिक्षा इतिशब्दस्य पर्यायः Education इतिअस्ति, यत् Educatum इतिलैटिनशब्दात् निष्पन्नम् अस्ति । एडुकेटम् अपि ई, डुको इतिशब्दद्वयेन निर्मितम् अस्ति। "ई" इत्यस्य अर्थःअन्ततःतथा "डुको" इत्यस्य अर्थःउन्नतिः, अतःशिक्षायाः अर्थःबालस्य अन्तर्निहितशक्तीनां बहिः प्रकाशनप्रक्रिया। अनेके विद्वांसाः शिक्षायाः भिन्नाः परिभाषाः दत्तवन्तः, परन्तु यदि वयं संक्षेपेण शिक्षायाः व्यापकार्थस्य विषये वदामश्चेत् तर्हि वक्तुं शक्नुमः यत् शिक्षा एका निरन्तरी उद्देश्यपूर्णा सामाजिकी प्रक्रिया अस्ति, येन मनुष्यस्य जन्मजातशक्तयः विकसिताः भवन्ति, तस्य कलाकौशलं च विकसितं भवति। एवं वर्धितं भवतियत् राष्ट्रस्य, समाजस्य, विश्वस्य च आवश्यकतानुसारं व्यक्तिः समाजः च शिक्षाद्वारा निरन्तरं विकसितःभवति। प्रौद्योगिकी इतिशब्दःआङ्ग्लभाषायाः Technology इतिशब्दस्य पर्यायः अस्ति । प्रविधि इत्यस्य अर्थःदैनन्दिनजीवने वैज्ञानिकविज्ञानस्य प्रयोगपद्धतिः, अयं शब्दःग्रीकभाषायाः Technicos

इत्यस्मात् निष्पन्नः अस्य अर्थःकला, अस्य शब्दस्य पर्यायः लैटिनशब्दःTexere इतिअस्य अर्थःबुननं निर्माणं च भवति।

**आफिस्ः**- महोदयस्य मतानुसारं तकनीकीविज्ञानस्य उपयोगः कलायां भवति।

**जैक्वेटाब्लूमरः**- महोदयस्य मतानुसारं प्रौद्योगिकी व्यावहारिकजीवने वैज्ञानिकसिद्धान्तानां प्रयोगः अस्ति।

अतःप्रौद्योगिक्याः अर्थःएवं भवतियत् दैनन्दिनजीवनस्य आवश्यकताः पूरयितुं विज्ञानज्ञानस्य उपयोगः करणीयः। अथवा वैज्ञानिकज्ञानस्य व्यावहारिकरूपं प्रौद्योगिकी उच्यते, एवंप्रकारेण शिक्षायाः प्रौद्योगिक्याः च अर्थं स्पष्टीकृत्य अधुना शैक्षिकप्रौद्योगिक्याः अर्थःसहजतया स्पष्टीकर्तुं शक्यते। सामान्यतया मन्यते यत् शिक्षाक्षेत्रे केवलं प्रविधिसाधनानाम् एवम् उपकरणानां च प्रयोगः एव शैक्षिकप्रौद्योगिकी इति, परन्तु एषः शैक्षिकप्रौद्योगिक्याः संकुचितः अर्थःअस्ति। शैक्षिकप्रौद्योगिकी एका व्यापिकी अवधारणा अस्ति या अधुना पृथक् अध्ययनक्षेत्ररूपेण विकसिता अस्ति, यस्य कार्यं शिक्षण-अध्ययनप्रक्रियाः सुलभीकरणं प्रभावीकरणं च अस्ति। एवंप्रकारेण शिक्षण-अधिगम-प्रक्रियाम् सुलभा, कुशला, सक्षमा प्रभाविनीं च कर्तुं वैज्ञानिक-सिद्धान्तानामुपरि आधारित- तकनीकी-उपकरणानाम्, एवं मनोवैज्ञानिक-सिद्धान्तानां, पद्धतीनां च समुचित-उपयोगः एव शैक्षिक-प्रौद्योगिकी इतिकथ्यते।

**शोधोद्देश्यानि**

- शिक्षोद्देश्यनिर्धारणं तथा व्यावहारिकरूपेण पारिभाषीकरणं लेखनं च।
- अधिगमविधीनां, तथा प्रविधीनां च व्यवस्थितरूपेण आधुनिकीकरणम्।
- निर्धारितोद्देश्यानां प्राप्त्यर्थम् उचिरणनीतीनां चयनम् उपयोगश्च।
- प्रयोगानन्तरं मूल्याङ्कनम्।
- पाठ-सामग्रीविश्लेषणं कृत्वा तत्त्वानां भागानां च व्यवस्थितीकरणम्।

**शोधविधिः (Research Methodology)**

एतस्मिन् शोधाध्ययने वर्णनात्मकः, सर्वेक्षणात्मकः, विश्लेषणात्मक प्रविधयः अनुकृताः सन्ति।

**शैक्षिकप्रविधेः प्रकृतिः**

1. शैक्षिकप्रौद्योगिकी शिक्षायां विज्ञानस्य प्रौद्योगिक्याः च प्रभावस्य अध्ययनं करोति।
2. शैक्षिकप्रौद्योगिक्यां व्यावहारिकपक्षस्य कृते महत्त्वं दीयते।
3. शैक्षिकप्रौद्योगिक्याः मूलविषयः विज्ञानम् अस्ति।
4. शैक्षिकप्रौद्योगिकी निरन्तरविकासशीलः विषयः अस्ति।
5. अस्य उद्देश्यं शिक्षण-अधिगम-प्रक्रियायां विकासः।
6. अस्मिन् Systematic Approaches इत्यस्य प्रधानता भवति।

 ISSN: 2320-740X

7. अस्मिन् शिक्षकः, छात्रः, तकनीकीप्रक्रियाश्च एकत्र समाविष्टाः भवन्ति।

8. शैक्षिकोद्देश्यस्य पूर्तये शिक्षणस्य परिस्थितौ आवश्यकपरिवर्तनानि आनेतुं समर्थःअस्ति।

10. शैक्षिक,आर्थिक,समाजिक,तकनीकीनाम् आवश्यकतानुसारं उपकरणानां निर्माणे शैक्षिकप्रौद्योगिकी सहायिका भवति।

11. शैक्षिकप्रौद्योगिकी शिक्षायाः प्रसारणे सहायिका भवति।

**शैक्षिकप्रौद्योगिक्याः आवश्यकता**

शैक्षिकप्रौद्योगिकी शिक्षण-अध्ययनप्रक्रियां सरलां, रोचकां, सुलभां, प्रभाविनीं च करोति। वर्तमानकाले शिक्षायाः एतादृशं किमपि क्षेत्रं नास्ति यस्मिन् शैक्षिकप्रौद्योगिक्याः उपयोगः न भवति। शैक्षिकप्रौद्योगिकी अनेकानि महत्त्वपूर्णकार्याणि करोति। एतेषां कार्याणां निर्वहणार्थम अस्य आवस्यकता भवति। निम्नलिखितकारणात् शैक्षिकप्रौद्योगिक्याः शिक्षायां तस्य आवश्यकता वर्तते। शिक्षायां शैक्षिकप्रविधेः आवश्यकता निम्नलिखिकारणैः भवति।

- ✓ शैक्षिप्रौद्योगिकी शिक्षणप्रक्रियां वैज्ञानिकरूपेण वस्तुनिष्ठां, स्पष्टां, सरलां, रोचकां प्रभाविनीञ्च करोति।
- ✓ शैक्षिकप्रौद्योगिकी शिक्षणसमस्यानां समाधानार्थं समुचितमार्गदर्शनं ददाति।
- ✓ शिक्षण-अध्ययन-प्रक्रियां प्रभाविनीं च कर्तुं समुचितं मार्गदर्शनं प्रददाति।
- ✓ शिक्षकछात्रयोर्मध्ये जायमानविचाराणाम् आदानप्रदाने सम्प्रेषणस्य एका प्रभाविनी कलारूपेण एतत् महत्त्वपूर्णं स्थानं धारयति।
- ✓ शैक्षिकप्रौद्योगिकी उद्देश्यानि प्राप्तुम् अधिगमपरिस्थितीनाम् आयोजनम् एवं तस्य नियन्त्रणं च करोति।
- ✓ शिक्षणप्रक्रियायाम् ऊर्जायाः समयस्य च अपव्ययं नियन्त्रयति।
- ✓ अयं प्रभाविशिक्षणार्थं नवीनपद्धतीनां विकासे च बलं प्रयच्छति।
- ✓ व्यवहारपरिवर्तनस्य मापनार्थं शिक्षणप्रक्रियायाः परिणामानां परीक्षणार्थं च समुचितमूल्यांकनप्रावधानानाम् विकासे एषः प्रविधिः बलं प्रददाति।
- ✓ अयं मूल्याङ्कनानन्तरं छात्राणाम् अन्तिमव्यवहारस्य परीक्षणम् एवम् अपेक्षित पुनर्बलन, पृष्ठपोषणस्य च उपरि बलं प्रयच्छति।
- ✓ प्रचारविकासाय शैक्षिकप्रविधेः ज्ञानस्य सञ्चयः आवश्यकः। अनेन नूतनज्ञानस्य आविष्कारः सम्भवति।
- ✓ शैक्षिकप्रौद्योगिकी शोधक्षेत्रे महत्त्वपूर्णसाधनरूपेण कार्यं करोति। उद्देश्यपरिचये, निर्धारणे च अस्य आवश्यकता वर्तते।
- ✓ अध्यापन्उद्देश्यानि व्यावहारिकरूपेण लेखितुम् आवश्यकः।
- ✓ प्रत्येकं छात्रं स्वस्य रुचि-क्षमता-गति-स्तरानुगुणं च पठितुं साहाय्यं करोति।

- ✓ छात्राणां शिक्षकाणां च व्यक्तिगतशैक्षिकावश्यकतानां पूर्तिं करोति।
- ✓ अधिकतमसंख्यायां छात्राणां कृते अधिकतमसूचनाः उत्तमरीत्या प्रददाति।
- ✓ विशिष्टदक्षताम् एवं कुशलतां प्रददाति।
- ✓ पाठ्यक्रमस्य निर्धारणं करोति।
- ✓ पाठ्यक्रमस्य विश्लेषणं कृत्वा क्रमबद्धरूपेण व्यवस्थितीकरणं च करोति।

तथैव बहूनि महत्त्वपूर्णकारणानि सन्ति येषां कारणात् शैक्षिकप्रौद्योगिक्याः आवश्यकता वर्तते, संक्षेपेण शिक्षण-अधिगमप्रक्रियां सुलभां, प्रभाविनीं च कर्तुं ज्ञानस्य संचयविकासाय च शैक्षिकप्रौद्योगिक्याः आवश्यकता वर्तते।

**शैक्षिकप्रविधेः परिभाषाः**

विभिन्नविद्वांसाः समयानुसारं बहुप्रकारकेपरिभाषाः प्रदत्तवन्तःसन्ति तेषु केचन।

**जैकेटब्लूमरः** महोदयस्य मतानुसारं शैक्षिकप्रौद्योगिकी व्यावहारिक्याम् अधिगमपरिस्थितौ वैज्ञानिकस्य एवं तकनीकीज्ञानस्य अनुप्रयोगः अस्ति।

**एस.के.मिश्रस्यः** मते शैक्षिकप्रौद्योगिकी माध्यमेन  शैक्षिक उद्देश्यानि प्राप्तुं शक्यते।

**ई. ई. हैडेन्ः** इत्यस्य मते शैक्षिकप्रौद्योगिकी शिक्षासिद्धान्तस्य व्यवहारस्य च सा शाखा अस्ति, या मुख्यतया शिक्षणप्रक्रियायाः नियन्त्रकरूपरेखायाः सूचनायाः च विषयः सम्बद्धा अस्ति।

**जॉनलीधमः-** इत्यस्य मते शिक्षण-अध्ययनयोः आधुनिकपद्धतीनां प्रयोगानां च व्यवस्थितप्रयोगः शैक्षिकप्रौद्योगिकी अस्ति ।

**आधुनिक शैक्षिकक्रियाकलापेषु शैक्षिकप्रविधेः भूमिका**

शैक्षिकप्रौद्योगिकी मुख्यतःनिम्नलिखितरूपेण त्रिप्रकारका भवतियथा-

1. कठोर-उपागमः। (Hardware Approach)
2. कोमल-उपागमः। (Software Approach)
3. प्रणाली-उपागमश्च। (System Analysis)

**कठोर-उपागमः** शिक्षाक्षेत्रे प्रयुक्तान् तकनीकीसाधनं निर्दिशति, एषः भौतिकशास्त्रे अभियांत्रिकीशास्त्रे च आधारितःअस्ति।

**कोमल-उपागमः-** कोमल-उपागमः विज्ञानप्रविधेः उपरि आधारिता न भवति। अपितु सामाजिकविज्ञानस्य, मनोविज्ञानस्य विशेषतया अधिगममनोविज्ञानस्य आधारे तिष्ठति। अस्मिन् उपागमे शिक्षणसिद्धान्तानां तथा अधिगममनोवैज्ञानिकसिद्धान्तानां प्रयोगः भवति, येन व्यवहारेषु वांच्छित परिवर्तनम् आनेतुं शक्यते।

 ISSN: 2320-740X

आधुनिकशैक्षिकक्रियाकलापयोः शैक्षिकोपागमानां महत्त्वपूर्णा भूमिका वर्तते। वयं निम्नलिखितबिन्दुभिः ज्ञातुं शक्नुमः।

1. सामान्यं वा कठिनं वा विषयम् अधिकग्राहकेभ्यः सरलीकर्तुम् एषः उपायः महत्त्वपूर्णां भूमिकां निर्वहति।
2. सामग्री अधिका रोचका आकर्षिका च भवति।
3. एतेषाम् उपगमानम् उपयोगः छात्रेषु रुचिं जनयितुं, तान् जिज्ञासून् कर्तुं, प्रेरयितुं च भवति।
4. छात्राः अधिकां सक्रियताम् आप्नुवन्ति ते उत्साहिताः भवन्ति।
5. यदि शिक्षायां कठिनशिल्पस्य उपयोगः भवतितर्हि शिक्षा अपूर्णा भविष्यति, अस्य कारणात् कठिनशिल्पं साधनानाम् अनिवार्यप्रयोगे बलं ददाति, शिक्षायाः यान्त्रिकीकरणेन अधिकान् छात्रान् न्यूनसमयेन न्यूनव्ययेन च शिक्षितुं शक्यते।
6. कठोरशिल्पोपागमे सङ्गणके शिक्षाक्षेत्रे अपूर्वक्रान्तिः कृता अस्ति।
7. कठोरशिल्पपद्धतेः फलस्वरूपं पत्राचारपाठ्यक्रमः मुक्तविश्वविद्यालयः च जन्म प्राप्नुवन्, यत् गणितस्य छात्राणां लाभं जनयति।
8. कठोरशिल्पदृष्टिकोणाधारेण संज्ञानात्मकं, भावात्मकम् एवं क्रियात्मकं शिक्षणोद्देश्यं प्राप्तुं शक्यते।
9. कोमलपद्धत्या शिक्षणप्रक्रियां सरला, सुलभा, रोचका च कृत्वा छात्राणां ज्ञानम् अनुभवं च वर्धयितुं शक्यते तथा च शिक्षणाधिगमप्रक्रिया रोचका, प्रयोजनपूर्णा, प्रभाविनीं च कर्तुं शक्यते।
10. लघु, बृहत्समूहेषु तथा च व्यक्तिगतस्तरस्य कोमलोपागमद्वारा शिक्षणाधिगमसम्बद्ध उत्साहप्रतिक्रियाप्रदानेन शिक्षकस्य गुणात्मकदक्षतां विकासयितुं शक्यते।
11. कक्षाकार्य्ये छात्राणां सक्रियभागित्वं कोमलपद्धतिद्वारा सुनिश्चितं कर्तुं शक्यते तथा च उत्तमपरिणामानां प्राप्त्यर्थं समुचितसंसाधनानां प्रक्रियाणां च संयोजनाय प्रयत्नाः क्रियन्ते।
12. स्वानुदेशितकार्यक्रमद्वारा Self-Instructional Programs व्यक्तिगतानुदेशनक्षेत्रे Individual Instruction विशेषं बलं प्राप्तम् अस्ति।
13. कोमलपद्धत्या शिक्षणाध्ययनयोः मनोवैज्ञानिकसिद्धान्तानां प्रयोगः भवतियेन छात्राणां व्यवहारे वांच्छितपरिवर्तनं कर्तुं शक्यते।
14. एतेषाम् उपागमानामाधारेण शिक्षकस्य कार्यदक्षता वर्धते, शिक्षणाधिगमप्रक्रियां रोचका, सरला, प्रभाविनीं च कर्तुं शक्यते। तथा च शैक्षिकक्रियाकलापानां कुशलतया प्रभावीतया च प्रबन्धयति।
16. एतेषाम् उपागमानां माध्यमेन छात्राः गृहे उपविश्य उपाधिं प्राप्तुं शक्नुवन्ति, तथैव पत्राचारस्य दूरशिक्षणस्य च आवश्यकताः पूरयितुं शक्नुवन्ति।

**शैक्षिकप्रविधेः कार्यम्**

शैक्षिकप्रविधेः कार्यम् उपयोगितकारणेन प्रतिदिनं महत्त्वपूर्णं जायमानमस्ति। शैक्षिकप्रौद्योगिकी शिक्षणाध्ययनप्रक्रियाम् सरला, सुरुचिपूर्णाम् एवं प्रभाविनी च करोति। अयं शिक्षाप्रक्रियान् आधुनिकीकरणं कृतमस्ति। शैक्षिकप्रविधेः महत्त्वपूर्णकार्याणि संक्षिप्तरूपेण अधः प्रस्तूयते।

**सर्वाङ्गीणविकासे साहाय्यम्**

शैक्षिकप्रौद्योगिकी शिक्षायाः विभिन्नक्षेत्रैः सम्बद्धानां समस्यानामन्वेषणं समाधानं च कर्तुं सहायकं भवति, शिक्षणाऽधिगमप्रक्रियायाः नियन्त्रणार्थं तस्य मूल्याङ्कनस्य सुधारार्थं च कार्यं करोति।

**शिक्षणे प्रगतिः**

शैक्षिकप्रौद्योगिकी शिक्षणप्रक्रियायाः पूर्णतया विश्लेषणं करोति। अध्यापनस्य विभिन्नस्तराणां तथा च तेषां सम्बद्धपरस्परप्रभावः, शिक्षणस्यसिद्धान्ताः, चरणाः, शिक्षणसूत्राणि इत्यादीनि अन्वेष्टुं प्रयतते। एवंरीत्या शिक्षायां गुणात्मकप्रगतिः आनयति।

**पाठ्यक्रमस्य विकासः**

शैक्षिकप्रौद्योगिक्याः निर्धारितशैक्षिकोऽद्देश्यान् मनसि निधाय अस्य अग्रिमसोपानस्य समुचितपाठ्यक्रमस्य विकासः सम्पादनीयः। केवलं समुचितःपाठ्यक्रमः एव शैक्षिकोद्देश्यानि प्राप्तुं समर्थःभवितुमर्हति। पाठ्यक्रमः शिक्षणाऽधिगमस्य पर्यावरणस्य च एतादृशं संयोजनम् अस्ति यत् नवीनतमविचाराणामनुसारं परिष्कृत्य पुनः परिचयोऽपि सम्पादनीयः भवति। पाठ्यक्रमस्य सम्यक् विकासस्य कार्यं केवलं शैक्षिकप्रौद्योगिकी एव कर्तुं शक्नोति।

**कक्षाव्यवहारस्य आवश्यकतानाम् अभिज्ञानम्**

शैक्षिकप्रौद्योगिकी कक्षाव्यवहारस्य आवश्यकताः पश्यति। अस्य उपयोगेन शिक्षायाः स्तरः विशोधयितुं शक्यते। एतत् शिक्षणाभिक्रमितानुदेशन सामग्रीणां प्रयोगेण सह सम्बद्धः भवितुमर्हति। शैक्षिकप्रौद्योगिकी छात्रान् स्वाऽधिगमार्थं प्रोत्साह्य प्रेरयित्वा च कक्षायाः व्यवहारं अधिकं प्रभाविणं कर्तुं शक्नोति।

**शिक्षकप्रशिक्षणम्**

परिवर्तनशीलवातावरणे एकस्य शिक्षकस्य कृते नूतनपाठ्यक्रमस्य, नूतनसामग्रीणां च उपयोगः अवश्यं करणीयः। पारम्परिकयोजनाभिः, शिक्षणपद्धतिभिः च सुसज्जितं शिक्षणम् अद्यतनयुगे सार्थकं नास्ति। अतःअद्यत्वे शिक्षकाणां समुचितप्रशिक्षणं प्रदातुं शैक्षिकप्रौद्योगिकी महती सहायिका भवितुमर्हति। video, अन्तर्जालम्, सङ्गणकम्, शिक्षकान् सम्यक् पाठयितुं साहाय्यं करोति।

**शिक्षणाऽधिगमप्रक्रियायाः विश्लेषणम्**

 ISSN: 2320-740X

शैक्षिकप्रौद्योगिक्याः उद्देश्यं शिक्षणाधिगमप्रक्रियायाः गहनं विश्लेषणं कर्तुं भवति। अस्य प्रयासः शिक्षणे दृश्यमानाः भेदाः, तस्य परस्परसम्बन्धाः, तेषां परस्परक्रियाणां परिणामान् च अन्वेष्टुं भवति। एषः प्रविधिः अध्यापनस्य विविधावस्थाभिः सह सम्बन्धं स्थापयति। अध्यापनस्य सिद्धान्तानां तथा सूत्राणामपि विश्लेषणम् अकरोत्। सामान्यतया अध्यापनाध्ययनयोर्मध्ये उत्तमं सम्बन्धं स्थापयितुं प्रयतते।

**श्रव्यदृश्योपकरणानां विकासः**

शिक्षणाध्ययनप्रक्रियायां श्रव्यदृश्यसाधनानाम् अतीव महत्त्वपूर्णा भूमिका सर्वदा वर्तत्येव। समयाऽनुकूलम् एतेषाम् उपकरणानाम् उपयोगः अवश्यं करणीयः। आधुनिकवातावरणस्य अध्ययनाध्यापने सॉफ्टवेयर, हार्डवेयर, सङ्गणकम् एतादृशानां उपकरणानां प्रयोगः अत्यावश्यकः अस्ति।

**समुदायस्य आवश्यकतानाम् अभिग्रहणम्**

शैक्षिकप्रौद्योगिकी समुदायस्य आवश्यकताः अन्विष्यति, निम्नवर्गजनानां, निर्धनच्छात्राणां, समाजात् वंचितक्षेत्रजनानां च समानशैक्षिकावसरप्रदाने सहायकं भवति। देशस्य प्रत्येकस्मिन् कोणे शिक्षां नेतुम् इदं सहायकं भवतिशैक्षिकप्रौद्योगिकी देशे साक्षरताम् आनेतुमपि प्रयतते।

**शिक्षणाधिगमव्यूहरचनाः**

शिक्षणधिगमः प्रत्येकस्मिन् परिस्थितौ एकस्य शिक्षकस्य कृते योजनायाः महत्त्वपूर्णा भूमिका भवति। शैक्षिकप्रौद्योगिक्या विविधानि योजनानि सुलभतया उपलभ्यन्ते, प्रत्येकस्य शिक्षकस्य कृते एतेषां योजनानां ज्ञानम् आवश्यकं भवति, तदा एव शिक्षकाः स्वकार्यस्य न्यायं कर्तुं शक्नुवन्ति।

**शिक्षोद्देश्यानां निर्धारणम्**

कालान्तरेण शिक्षायाः उद्देश्यानां परीक्षणं भवति, शैक्षिकप्रौद्योगिकी सम्यक् उद्देश्यं ज्ञातुं साहाय्यं करोति, अस्मिन् जगतिसर्वं तीव्रगत्या परिवर्तमानं भवतिएव। शैक्षिकप्रौद्योगिकी परिवर्तनशीलपरिदृश्ये समुचितलक्ष्यनिर्धारणे सहायिका भवति।

**ज्ञानसञ्चयम् एवं स्थानान्तरणे सहायकम्**

वर्तमानसमये ज्ञानस्यविस्फोटः भवति, शैक्षिकतकनीकीज्ञानस्य संचयेन प्रभावीरूपेण परस्परं स्थानान्तरणं कृत्वा, तथैव परिवर्तनं कृत्वा विकासं नूतनासु दिशासु प्रवर्तयितुं महत्त्वपूर्णां भूमिकां निर्वहति।

**ज्ञानस्य विकासे सहायकम्**

ज्ञानस्य प्रसारः शैक्षिकप्रौद्योगिक्या भवति, यस्य माध्यमेन विविधाः प्रक्रियाः, पद्धतयः, विधयः, रणनीतयः, शिक्षणस्वरूपाः इत्यादयः विकसिताः भवन्ति।

शैक्षिकप्रौद्योगिकी एतेषु प्रगतिशीलविकासे सहायका भवति, विज्ञानस्य प्रसारस्य विकासस्य च कारणात्, रेडियोदूरदर्शनं, टेपरिकार्डर इत्यादीनां असंख्यछात्राणां शिक्षाप्रदाने सहायकं भवति, तथैव पत्राचारपाठ्यक्रमस्य, मुक्तविश्वविद्यालयस्य इत्यादीनां माध्यमेन, छात्राः गृहे उपविश्य शिक्षां प्राप्नुवन्ति।

**शैक्षिकानुसन्धानस्य विकासे साहाय्यकम्**

शैक्षिकप्रौद्योगिक्या विज्ञानं सामाजिकशास्त्राणां च नूतनं रूपं प्राप्तमस्ति। यस्य फलस्वरूपं विभिन्नक्षेत्रेषु शोधपद्धतेः आधारेण विविधाः प्रारूपाः, परिकल्पनाः, प्रतिरूपाः इत्यादयः विकसिताः भवन्ति। एतेन सह शोधद्वारा विविधाः पद्धतयः, दृष्टिकोणाः, रचनाः, युक्तयः इत्यादयः विकसिताः सन्ति, एतेन आवश्यकदिशि शिक्षण-अध्ययन-प्रक्रियायाः व्यावहारिकरूपं प्रदातुं साहाय्यं कृतम् अस्ति।

एतदतिरिक्तम् अन्यानि बहूनि कार्याणि सन्ति यानि शैक्षिकप्रौद्योगिक्या क्रियन्ते, येषां वर्णनम् अधः कृतमस्ति।

- अध्यापनस्य उद्देश्यानां सूत्रीकरणस्य व्यावहारिकरूपेण लेखनस्य च दृष्ट्या एतस्य अत्यन्तम् आवश्यकता वर्तते।
- शिक्षणप्रक्रियायाः उन्नतिं कर्तुं तेषाम् उपयोगं कुर्वन्ति।
- अस्मिन् पाठस्य तस्य तत्त्वरूपविश्लेषणं कृत्वा तानि तत्त्वानि क्रमेण व्यवस्थितानि भवन्ति।
- शैक्षिकप्रौद्योगिक्यां छात्राणां गुणानाम्, क्षमतानां च विश्लेषणं भवति।
- रेडियो, दूरदर्शनं, टेपरिकॉर्डर इत्यादीनाम् उपयोगेन अपि एतत् पत्राचारपाठं प्रभाविणं कर्तुं शक्यते।
- शिक्षणक्षेत्रे कृतं शोधकार्यं शिक्षणप्रक्रियायां किमपि प्रभावं न दर्शयति, परन्तु शिक्षातकनीकी संशोधनकार्यार्थं शिक्षायां नवीनप्रयोगानां अवसरान् प्रददाति।
- व्यक्तिगतविविधतायाः समुचितावसरं प्रदातुं शिक्षणप्रशिक्षणरणनीतयः अपि विकसिताः सन्ति, येषु अभिक्रमिताधिगमप्रविधयः छात्रान् स्वगत्या शिक्षितुं शक्नुवन्ति।
- अद्यत्वे सर्वेषां पार्श्वे रेडियो, दूरदर्शनादीनां सुविधाः सन्ति, अतःतेषाम् उपयोगः शिक्षायां कर्तुं शक्यते।
- निर्धारितम् उद्देश्यं प्राप्तुं पर्याप्तशिक्षणरणनीतयः, सहायकाः, सुदृढीकरणं च चयनं कर्तुं शक्यते।
- उद्देश्यं प्राप्तुं मापदण्डपरीक्षायाः परिकल्पना भवतितथा च तेषाम् उपयोगेन शिक्षणसम्बद्धः निर्णयः क्रियते।
- तन्त्रांशानाम् उपयोगेन विद्वांसः, विशेषज्ञाः, शिक्षकाः च विचाराः मौलिकरूपेण संग्रहीतुं शक्यन्ते, येन भविष्ये पीढयः स्वस्य मौलिकविचाराणां श्रवणार्थं द्रष्टुं शक्नुवन्ति।

**शैक्षिकप्रविधेः कार्यक्षेत्रम्**

अद्य शैक्षिकप्रौद्योगिक्याः विकासः नूतनः स्वतन्त्रः अध्ययनक्षेत्ररूपेण स्थापितः, अस्य क्षेत्रम् अपि अतीव विस्तृतं व्यापकं च अभवत्। विभिन्नैः विद्वद्भिः शैक्षिकप्रौद्योगिक्याः क्षेत्रस्य विभिन्नरीत्या व्याख्याम् अकुर्वन्।

 ISSN: 2320-740X

- सम्प्रतिशैक्षिकप्रविधेः क्षेत्रम् अत्यन्तं व्यापकं जायमानं दृश्यते। अस्मिन् प्रविधौ वैयक्तिकशिक्षणं, कक्षाशिक्षणं, दूरस्थशिक्षा, जनसञ्चारशिक्षा इत्यादयः अन्तर्भवन्ति। एतेन निर्मितप्रविधिषु विद्यार्थी स्वयं स्वप्रयासेन शिक्षां प्राप्नुयात् इत्यंशे महत्त्वं कल्पितम्| अभिक्रमिताधिगमः (Programmed Learning) अपि तादृशः एव कश्चन प्रविधिः। एतत्सर्वं निरीक्षितवातावरणे वैयक्तिकाधिगमे एव महत्त्वं कल्पयति।
- कक्षाशिक्षणेऽपि येषु शैक्षिकप्रविधिषु बलं दीयमानम् अस्ति, तेऽपि प्रविधयः वैज्ञानिकदृष्ट्या प्रभाविताः वर्तन्ते। कक्षाशिक्षणे अद्य यन्त्रांशस्य प्रयोगः आधिक्येन दृश्यते। चलच्चित्रदूरदर्शनकार्यक्रमैः जटिलतमपाठेषु अपि विद्यार्थिनां रुचिः उत्पाद्यते।
- शैक्षिकप्रविधेः प्रयोगेण शिक्षणकलाः परिष्कृताः भवन्ति। दूरस्थशिक्षायां सामुदायिकशिक्षाकार्यक्रमे च इदानीं दूरदर्शनं चलच्चित्रम् इत्यादिसाधनानि महत्त्वपूर्णस्थानम् आवहन्ति। शैक्षिकप्रविधौ शिक्षायाः सर्वेऽपि स्तराः अन्तर्भवन्ति।
- प्राथमिकशिक्षातःउच्चशिक्षापर्यन्तं सर्वेषामपि स्तराणां निमित्तं प्रविधीनां विकासः क्रियमाणः अस्ति। प्रौढशिक्षायाः नूतनप्रविधयः शैक्षिकप्रविधेः एव अवदानं वर्तते। विशेषतया उच्चमाध्यमिकस्तरार्थं (+2/Inter) ये प्रविधयः निर्धारिताः भवन्ति, ते शैक्षिकप्रविधिभिः अत्यन्तं प्रभाविताः सन्ति। यद्यपि शैक्षिकप्रविधेः क्षेत्रम् अत्यन्तं व्यापकं दृश्यते, तथापि एतस्य काचित् सीमा अपि भवति।
- एतस्य कार्यं दर्शनशास्त्रे समाजशास्त्रे च सुष्ठु अवलोक्यते। शैक्षिकप्रविधौ व्यावहारिकपक्षः एव महत्त्वपूर्णः भवति। (एषः व्यक्तिं यन्त्रत्वेन एव अवगच्छति। तत् न युक्तम्। व्यक्तिः कथमपि यन्त्रं न भवति। तस्य स्वरूपं तु दैविकमेव। अतःशिक्षणदानसमये व्यक्तेः इमां धारणां वयं न विस्मरेम।
- प्रविधिरयं व्यक्तेः व्यवहारं यान्त्रिकसाधनैः अवगन्तुं चेष्टते। एतद् उचितमितिभाति। अत एव वक्तुं शक्यते यत् विज्ञानेन विना शिक्षणस्य शिक्षणकलायाश्च पक्षः अपूर्णः इति। शैक्षिकप्रविधेः प्रयोगः कक्षाशिक्षणे तु भवत्येव तदतिरिच्य विद्यार्थिनां मूल्याङ्कने अपि एतस्य उपयोगः भवति। येषु विविधेषु क्षेत्रेषु एतस्य उपयोगः भवितुमर्हति। तानि च क्षेत्राणि -
- विद्यालयस्य कार्यक्रमान् प्रस्तोतुं क्रियान्वितान् कर्तुं च एतस्य उपयोगः क्रियते।
- दूरदर्शनेन शिक्षणाय कार्यक्रमान् प्रस्तोतुं, तथा शिक्षणसम्बद्धध्वनिचित्रमुद्रिकां (Video cassette) निर्मातुं च एतस्योपयोगःभवति।
- विद्यार्थिभ्यः सङ्गणकेन शिक्षणदानार्थमपि एतस्योपयोगः क्रियते।
- एतस्य साहाय्येन शिक्षकप्रशिक्षणस्य आयोजनम् अपि क्रियते।
- विद्यालयप्रशासनं वैज्ञानिकरूपेण व्यवस्थापयितुम् अपि एतस्योपयोगः भवति। एवञ्च शैक्षणिकप्रविधेः क्षेत्रम् एतदवधारणायाः अनुरूपं वर्तते।

**उपयोगिता (Utility of Educational Technology)**

शैक्षिकप्रविधेः उपयोगः सम्प्रतिप्रतिदिनं वर्धमानो दृश्यते। विश्वे सर्वेऽपि देशाः एनम् आश्रयन्तो वर्तन्ते। कोठारी आयोगेन (1966) स्वटिप्पण्याम् उक्तमस्ति "आगतेभ्यः केभ्यश्चित् वर्षेभ्यः भारते विद्यालयेषु कक्षाध्ययनं पुनरुज्जीवयितुं बह्ववधानं दीयमानमस्ति।

मौलिकशिक्षायाः प्रथमम् उद्देश्यं प्राथमिकविद्यालयानां पूर्णजीवनं कार्यकलापेषु क्रान्तिकारिपरिवर्तनस्य आनयनं, बालकानां मानसिक शारीरिक- आत्मिक- चारित्रिकनैतिकादिविकासः आसीत्।" एतदृष्ट्या अपि शैक्षिकप्रविधेः महत्त्वं स्वतःसिद्धं भवति। अधिगमसिद्धान्तानाम् अपेक्षया शिक्षणसिद्धान्तःउत्तमः इतियत् विषयवस्तु निर्दिशति, तदेव शैक्षिकप्रविधिः भवति। एतस्य शैक्षिकप्रविधेः उपयोगिता निम्नवतरूपेण सरलतया प्रस्तोतुं शक्यते।

**अधिगमक्षेत्रे उपयोगिता (Utility in learning field)**

शैक्षिकप्रविधिः अधिगमस्य प्रभावपूर्णविधीनां सिद्धान्तानाञ्च ज्ञानं प्रददाति। एषः अधिगतविषयं स्थिरीकर्तुं विभिन्नप्रक्रियाणाम् अध्ययनं करोति। छात्रेषु अधिगमं प्रतिप्रेरणां जागरयितुं, तत्र तेषां रुचिं वर्धयितुं च साहाय्यं करोति। अधिगमक्षेत्रे छात्राणां स्वगत्यनुसारम् एव अधिगमसिद्धान्तान् पालयितुं प्रेरयति।

**समाजार्थम् उपयोगिता (Utility to society)**

समाजे अद्य सामान्यजनानां समीपे आकाशवाणीध्वनिमुद्रणयन्त्रादीनां सौविध्यं वर्तते। तेषाम् उपयोगः शैक्षिकप्रविधेः माध्यमेन शिक्षाक्षेत्रे कर्तुं शक्यते। शैक्षिकप्रविधिः शिक्षकाणां समुचितविकासं करोति। परिमितसंसाधनयुक्तदेशानां कृते शैक्षिकप्रविधिः कश्चन वरः भवति, यस्य साहाय्येन जनसञ्चारशिक्षायाः प्रचार प्रसारः विस्तारश्च सञ्जायते।

शैक्षिकप्रविधिमाध्यमेन प्रभावशालिशिक्षकाणां, नेतृणां, समाजसेवकानां ज्ञानस्य कौशलस्य च उपयोगः दूरदर्शनम्, आकाशवाणी, ध्वनिपञ्जिका, अभिभाषणम् इत्यादीनां द्वारा समाजे एकैकस्मिन् भागे प्रत्येकस्मिन् वर्गे च सारल्येन प्रापयितुं शक्यते।

शिक्षणप्रक्रियायाम् अपेक्षितक्रियाणां साधनानाञ्च व्यवस्था क्रियते, अधिगमार्थं समुचितपरिस्थितीनां शिक्षणप्रक्रियायाम् अपेक्षितक्रियाणां साधनानाञ्च व्यवस्था क्रियते, अधिगमार्थं समुचितपरिस्थितीनां रूपरेखा च निर्मीयते। सामाजिक-राजनैतिकविचारकाणां दार्शनिकानां च द्वारा समाजस्य व्यापकपक्षान् मूल्यानि च दृष्टौ संस्थाप्य शिक्षणोद्देश्यानां निर्धारणं क्रियते। शिक्षणोद्देश्यानां निर्धारणानन्तरं शैक्षिकप्रविधिः एतेषाम् उद्देश्यानां प्राप्तये समुचितक्रमं चित्वा तं प्रयुङ्क्ते। यतो हि कियत् पर्यन्तम् एतेषामुद्देश्यानां प्राप्तिः सञ्जाता इतिज्ञात्वा क्रमाणां मूल्याङ्कनं क्रियते। यदि उद्देश्यप्राप्तिः समुचिततया न सञ्जाता तर्हि कीदृशपरिवर्तनविधानेन उद्देश्यानां प्राप्तिः अधिकतया भवितुमर्हतीतिनिर्धार्यते। शैक्षिकप्रविधेः एषः कश्चन पक्षः यः अनुदेशनप्रविधिः इतिवक्तुं शक्यते। एवञ्च शैक्षिकप्रविधेः अर्थस्तावत् शिक्षायाः विभिन्नभागानां समुचिततया व्यवस्थीकरणम्। एतेषु विभिन्नेषु भागेषु तादृशः कश्चन भागः भवति, यस्मिन् भागे यन्त्राणां प्रयोगः अपि भवेत्। सम्प्रतिजनानां विभिन्नशैक्षिकसमस्यासु क्रमवद्धतया प्रयोक्तुं शैक्षिकप्रविधिः

काचित् प्रक्रिया इतियथार्थव्याख्यानेन स्पष्टं भवति। मानवाधिगमस्य सम्पूर्णप्रक्रियायाः संशोधनार्थम् एषः प्रयुज्यते। शैक्षिकप्रविधिः ज्ञानस्य तादृशी काचित् शाखा भवतिया विभिन्नप्रविधीनां यान्त्रिकं प्राकृतिकविज्ञानं व्यावहारिकविज्ञानं च प्रयुज्य शैक्षिकप्रक्रियां सुदृढां कर्तुं प्रयतते। एषः प्रविधिः न केवलं कक्षागतशिक्षणस्य प्रक्रियां व्यवस्थापयितुं सहकरोति, अपि तु विद्यालयस्य वातावरणं, प्रशासनम्, अन्यप्रक्रियां च सञ्चालयितुं महत्त्वपूर्णस्थानम् आवहति। शिक्षायां नवीनवैषयिकपद्धतीनाम् उद्भावनेन शैक्षिकप्रविधेः अर्थःपरिवर्तितः।

समयस्य गत्यनुसारम् अस्य अर्थेऽपि महान् प्रभावःदृश्यते। अतःएतेषां विषयाणां गतिशीलता एव अवलोक्यते न तु पारम्परिकता। विविधप्रणेतॄणां मतपर्यालोचनेन शैक्षिकप्रविधेः संज्ञाविषये एका स्थूलधारणा जायते। सम्प्रतिप्रगतिशीलेऽस्मिन् संसारे प्रतिदिनं नूतनपद्धतीनाम् आविर्भावःदृश्यते। प्रायः सर्वाः अपि पद्धतयः नूतनवैज्ञानिकाविष्कारैः संसृष्टाः सन्ति। अत्र विभिन्नोपकरणानां पदार्थानाञ्च प्रयोगः विस्तृतरूपेण कृतो भवति। आकाशवाणी, दूरदर्शनं, ध्वनिपञ्जिका, वर्तुलपञ्चिका, ध्वनिचित्रपञ्जिका, ध्वनिचित्रसूत्रं, सङ्गणकम् इत्यादिशैक्षिकयन्त्राणां प्रयोगेण, तत्रापि अन्तर्जालस्य उपयोगेन छात्रान् सारल्येन बोधयितुं शक्यते। उपकरणानां प्रयोगेण विशिष्टमपि छात्रसमूहम् एकः उत्तमाध्यापकः स्वकीयज्ञानकौशलेन सुष्ठ बोधयितुं शक्नोति। एवञ्च शैक्षिप्रविधिः एकं विज्ञानं, यस्याधारेण निर्धारितशैक्षिकलक्ष्यम् अल्पीयसि काले प्राप्तुं शक्यते।

प्रविधिविकासान्तर्गतशैक्षिकपद्धतयः अधिगन्तारम् अधिकं स्वतन्त्रं विदधति, तस्य अध्ययनम् इतोऽपि आत्मकेन्द्रितं कारयति। यतो हि आत्मप्रयासेन एव अधिकज्ञानप्राप्तिः सञ्जायते। किन्तु केचन अध्यापकाः प्रविधिशास्त्रस्य विरोधिनोऽपि वर्तन्ते। तेषां मतानुसारं सङ्गणकादियन्त्राणां साहाय्येन दीयमानं शिक्षणं, शिक्षां प्रतिकश्चन यन्त्रमार्गः, कृत्रिममार्गः इव भवति।

**सन्दर्भग्रन्थसूची**

1. भूषण, शैलेन्द्र, कुमार, अनिल, शैक्षिक तकनीकी, विनोदपुस्तक मन्दिर, आगरा, 1997

2. वाजपीयी, एल, व्ही., शिक्षा में नवाचार एवं तकनीकी, आलोक प्रकाशन, इलाहाबाद, लखनऊ

3. जीत, योगेन्द्र, शिक्षा में नवाचार और नवीन प्रवृत्तियां, विनोदपुस्तक मन्दिर आगरा

4. सक्सेना, एन. आर्., ओबेराय, एस.सी., शिक्षा तकनीकी के तत्त्व एवं प्रबन्धन, आर. लाल. बुक डिपो, मेरठ, 2005

5. मित्तल, सन्तोष शैक्षिक तकनीकी एवं कक्षा- कक्ष प्रबन्ध, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर आठवां संस्करण 2016

6. आर जी. मुरलीकृष्ण, अध्यापककौशलोद्दीपिका, जगदीश संस्कृतपुस्तकालयाः, जयपुरम्।

7. Agarwal, j.c., Educational Technology Management' Hindustan Mandir, Agra, 2003.

8. Green, E. J., The Learning process and programme Instruction' Holt Rinehart and Winston (III Edition preferred) New York, 1960.

9. Sharma, R.A., 'Technology of Teaching', Meerut International Publishing House, 1980.

10. Agarwal, Rashmi, 'Educational Technology and Conceptual understanding', Prabhat Prakashan, New Delhi, 2001.

11. Bhatnagar, R.K. 'Educational Technology Management', A.P.H. Publishing Corporation, New Delhi.

******

 **ISSN: 2320-740X**

# वर्षप्रश्नः

**Dr. Eswaran E. N.**
Assistant Professor and HOD
Government Sanskrit College
Tripunithura, Ernakulam, Kerala

ज्योतिश्शास्त्रम् त्रिस्कन्धभिन्नं गणितं संहिता होरा चेति। तत्र होरास्कन्धस्य विभागाः भवन्ति जातक-मुहूर्त-निमित्त-प्रश्नाः। वातावरणसम्बद्ध-विषयज्ञानायापि पूर्वकाले प्रश्नं करोतिस्म। एतस्मिन् वर्षे वृष्टिः कथं स्यात् उत्तमा मध्यमा अधमा वा? कृषिकार्यं कालावस्थया कथं भविष्यति? सस्यधान्यादि-वद्र्धनस्य अनुकूलः कालः कः ? कस्मिन् काले किं धान्यं सम्यग् भवति? वातावरणानुसारं कस्य धान्यस्य दौर्लभ्यम्? कस्य मूल्यं वद्र्धते ? इत्यादि वाणिज्यपरप्रश्नोपि भवेत्। एतत्सर्वं मनसिनिधायैव वातावरणज्ञाने प्रश्नस्य प्रसक्तिरस्ति इतिआचार्याः चिन्तितवन्तः। तत्र निमित्तानि लक्षणानि ग्रहचारः ग्रहस्थितिः नक्षत्रम् इत्याद्याधारेण ऊहापोहपटुः सिद्धमन्त्रः प्राश्निकः प्रकृतिं निरीक्ष्य प्रश्नानामुत्तरं वदेदितिआचार्यनिर्देशः। केरलीयः प्रश्नमार्गो नाम ग्रन्थः अत्र प्रामाणिकः वर्तते।

तत्र प्रथमं प्रष्टुः चेष्टातःवर्षज्ञानोपाय उच्यते आद्रं द्रव्यम् इत्यादि । तद्यथा –

"आद्रं द्रव्यं स्पृशतियदि वा वारि तत्संज्ञितं वा
तोयासन्नो भवतियदि वा तोयकार्योन्मुखो वा।
प्रष्टा वाच्यसलिलमचिरादस्ति सन्देहहीनं
पृच्छाकाले सलिलमितिवा श्रूयते चेच्च शब्दः।। [1]

1. वृष्टिमधिकृत्य यः पृच्छतिसः जलम् आद्रद्रव्यं जलसंज्ञकपदार्थान् वा स्पृशतिचेत् वर्षाकाले अचिरात् वृष्टिः भवेत् इतिवक्तव्यम्।
2. जलसमीपे तोयकार्योन्मुखो वा भवतितर्ह्यपि विनाविलम्बं वृष्टिम् वदेत्।
3. पृच्छाकाले जलमितिशब्दःश्रूयते चेदपि एवमेव वदेत्।

अपि च –

रुदिते क्षवथौ कासे निष्ठीवे नासिकास्तवे।
शीतच्छायाप्रवेशे च महतीं वृष्टिमादिशेत्।। [2]

4. पृच्छासमये रुदिते क्षवथौ कासे निष्ठीवे नासिकास्रवे च महावृंष्ट वदेत्।
5. पृच्छकः वृक्षछायां शीतस्थानं वा प्रविश्य पृच्छतिचेदपि महावृंष्ट वदेत्।
6. पृच्छासमये मद्यं नवनीतं जलपात्रं महिषः गजः ब्राह्मणः गर्भिणी इत्यादीन् पश्यतिचेत् अचिरात् वृष्टिरितिवक्तव्यम्।

सुरायां नवनीतादौ गर्भिण्यां जलभाजने।

महिषे च गजेन्द्रे च विप्रे दृष्टे जलं वदेत्।। [3]

7. पृच्छासमये प्रष्टा मुखं नेत्रं लिङ्गस्थानंम् इत्यादि स्पृशतिचेत् वृष्टिर्वाच्या। मूत्रोत्सर्गसमये पृच्छतिचेदपि महावृष्टिः वक्तव्या।

आस्ये नेत्रे मेढ्रे प्रष्टा खलु यदि स्पृशतिपृच्छायाम्।

पृच्छकमूत्रोत्सर्गे महती वृष्टिर्निदेष्टव्या।।[4]

8. कस्यां दिशि वृष्टिः स्यादित्युच्यते "अर्केन्दू.. इत्यादि। पृच्छासमये सूर्यचन्द्रयोः परिवेषे आकाशे मेघावृते च प्रष्टुः कस्मिन् भागे आद्रतास्ति तत्र दिशि वृष्टिः वाच्या।

अर्केन्दु परिवेषे च व्योम्नि मेघतिरस्कृते।

आद्रता यत्र भागे स्यात्प्रष्टुस्तत्र जलं वदेत्।। [5]

9. राशिग्रहाश्रयवृष्टिः कथमित्युच्यते मत्स्यकुलीरैः इत्यादिना।

मत्स्यकुलीरौ मकरः कुम्भो वृषतौलिवृश्चिकास्सजलाः।

भृगुचन्द्रौ सलिलमयौ गुरुशशितनयौ तु तोयराशिस्थौ।।

एतेषु पादवशेन ननु जलं स्यात्परः परः पूर्वात्।

शेषा विजला ज्ञेया ग्रहास्तथा राशयो विदुषा।। [6]

मीनः कर्किः मकरः मकरपश्चिमार्धम् कुम्भः वृषभः तुला वृश्चिकः एते राशयः जलराशयः भवन्ति। शुक्रचन्द्रौ सलिलग्रहौ स्तः। जलराशिस्थौ बुधगुरू च जलग्रहौ भवतः। उत्क्रमात् उत्तरोत्तरं न्यूनजलत्वमवगन्तव्यम्। इत्युक्ते मीनकर्किटौ अत्यन्तजलयुक्तौ मकरः तत न्यूनः कुम्भः ततो पि न्यूनः इति। ग्रहेष्वपि एवमेव। यथा शुक्रचन्द्रौ बहुजलयुक्तौ गुरुबुधौ न्यूनौ अन्ये अजलाश्चेति।

तथा च -

अर्कवक्रावनावृष्टिर्गुरुज्ञौ मन्दवृष्टिदौ।

चन्द्रशुक्रौ महावृंष्टि तत्प्रश्ने कुरुतःक्षणात्।।[7]

वर्षप्रश्ने अर्ककुजौ अनावृष्टिः गुरुबुधौ मन्दवृष्टिः चन्द्रशुक्रौ महावृष्टिः च कारयतः।

जलवत्यजलेऽधस्ताज्जलमुपरि भवतिविपरीते।

जलवद्द्वयसम्प्राप्ते प्रभूतमुदकं विनिद्र्देश्यम्।।

भूमिगतोदकविषयश्लोकोऽयं युज्यते सवर्षेपि।

तत्र गताधश्शब्दःकालवुस्यादावुपर्यन्ते।। [8]

प्रश्ने - जलराशौ अजलग्रहः आदौ वृष्टिः। अजलराशौ जलग्रहः अन्ते वृष्टिः। जलराशौ जलग्रहः काले महावृष्टिः। अजलराशौ अजलग्रहः अनावृष्टिः। भूमिगतोदकविषयश्ज्ञानायापी श्लोकोऽयं उपयुज्यते । इत्यादि फलं ज्ञेयम्।

प्रष्टुः प्रश्नवाक्यवर्णमनुसृत्य वर्षप्रवचनं यथा –

प्रश्न वचनादिवर्णे वर्गचतुर्थे स्वरे न वा दीर्घे।

 ISSN: 2320-740X

भवतिजलं न भवतितद्वर्गाद्ये पञ्च द्वितीये वा।। [9]

अपरे केचन वृष्टियोगाः उच्यन्ते -

1. शुक्लपक्षे लग्न - द्वितीय - तृतीय - चतुर्थ - सप्तम - दशम स्थानं प्राप्ताः शुभग्रहाः जलराशिगताश्च जलराशिस्थश्चन्द्रो लग्नगतश्च स्युः तदा वृष्टिः।

सौम्या जलराशिस्थास्तृतीयधनकेन्द्रगास्सिते पक्षे।
चन्द्रेऽप्युदयं याते जलराशिस्थे वदेद्वर्षम्।। [10]

2. प्रश्नकाले द्वितीयस्तृतीयो वा भावःजलराशिः जायते तर्हि विंशे दिवसे नदीपूरकं वर्षं वदेत्।

पृच्छाकाले वित्तदुश्चिक्ययोश्चेदेको राशिर्जायते तोयसंज्ञः।
तदा नदीपूरकरस्य सत्ता वर्षस्य विंशे दिवसे तु वाच्या।। [11]

3. सूर्यात् सप्तमगौ शुक्रमन्दौ वृष्टिकरौ स्याताम्।
4. चन्द्रात्सप्तमराशिगतौ च मन्दशुक्रौ वृष्टिकरौ भवेताम्।
5. तथा लग्नात् द्वितीय - तृतीय - चतुर्थ - अष्टमभावेष्वन्यतमगौ मन्दशुक्रौ वृष्टिदौ वर्तेताम्। वर्षकाले एव प्रश्नश्चेत् सपदि वृष्टिर्भवेदितिवाच्यम्।
6. वर्षप्रश्ने शुभदृष्टः चन्द्रः जलराशिलग्ने स्थितश्चेद्भूरिवर्षणं वाच्यम्। पापदृष्टश्चेत् वृष्टिः न्यूना स्यात्। प्रश्नः वर्षाकाले चेत् सपदि वृष्टिः वाच्या।
7. शुक्लपक्षे तु जलराशिगस्य चन्द्रस्य लग्नगत्वमावश्यकमितिनास्ति केन्द्रस्थितित्वं पर्याप्तमितिभेदः। एवमेव शुक्रकृतयोगोपि वृष्टिदो भवति।
8. यथा शुभदृष्टः शुक्रः जलराशिलग्नगश्चेत् भूरिवृष्टिः वाच्येति।
9. वर्षप्रश्ने चन्द्रः बुधः गुरुः शुक्रः इत्येते ग्रहाः जललग्ने तत्तद्विशेषकेन्द्रे वा शुभदृष्टियुक्ताः भवन्ति चेत् अधिकजलवृद्धिःभवेत्। अत्र विशेषकेन्द्रस्थिति-रित्युक्ते चतुर्थे चेत् भूगर्भजलवृद्धिःसप्तमे चेत् नदीजलवृद्धिःदशमे चेत् वृष्टिजलवृद्धिःइति"हिबुकेनाधः सलिलम्" इतिश्लोकेन अवगन्तव्यम्। पापदृष्टिः पापयोगो वा उपर्युक्तयोगस्य अल्पतां करोति।
10. आरूढश्छत्रो वा जलराशिः तत्र जलग्रहस्थितिश्च तदा जलवृद्धिःवाच्या।

उपर्युक्तयोगनामपवादो यथा -

1. लग्ने बुधयोगः दृष्टिर्वा यदि भवतितर्हि
2. लग्नस्फुटस्य नवांशकपतिः द्रेष्काणपतिर्वा यदि बुधः भवतितर्हि वृष्टिः पवनहता भवतीतिबोध्यम्।
3. कुजः बुधः शनिः सर्पः इत्येते केन्द्रगाः भवन्ति चेत् वातेन वृष्टिनाशः वक्तव्यः।

अन्ये केचन योगाः -

1. शुक्रचन्द्रौ जललग्नगौ जलराश्यारूढं पश्यतश्चेत् वृष्टिमादिशेत्। आरूढात् लग्नं सप्तमं स्यादित्यर्थः।

2. आरूढराशिः उदयराशिः छत्रराशिः एते पृष्ठोदयराशयः भवन्ति चेत् महद्वर्षं वदेत्। तदा चन्द्रशुक्रौ उच्चस्थौ च स्याताम् तर्हि तदहः पूर्णं वृष्टिर्भवेत्।

3. कुजशनिराहवःकेन्द्रस्थाश्चेत् महामारुतेन वृष्टिनाशः वाच्यः। सौम्यग्रहदृष्टिरस्ति चेत् स्वल्पं वा वर्षं लभते।

4. जलराशिगतौ शनिराहू सुखवृष्टिदौ भवतः। शुक्रेन्दुदृष्टौ महावृष्टिश्च भवति।

एते वर्षप्रश्ने प्रधानभूताः प्रमाणश्लोकाः प्रश्नमार्गे उक्ताः सफलाश्च भवन्ति ।।[12]

चन्द्रार्कयोस्सप्तमगौ सितार्की सुखेऽष्टमे वापि यथाविलग्नात्।

द्वितीयदुश्चिक्यगतौ तथा वा वर्षं सुवर्षं प्रवदेद्द्विपश्चित्।।

वर्षप्रश्ने सलिलनिलयं राशिमाश्रित्य चन्द्रो

लग्नं यातो भवतियदि वा केन्द्रगश्शुक्लपक्षे।

सौम्यैर्दृष्टः प्रचुरमुदकं पापदृष्टोऽल्पमम्भः

प्रावृट्काले सृजतिन चिरात् चन्द्रवद्भार्गवोऽपि।।

तोयप्रश्ने सजले तत्तद्विशेषकेन्द्रे वा।

गुरुबुधसितशशिनो यदि शुभदृष्टाः स्थिता जलम्भूरि।।

यदि ते पापैर्दृष्टा यद्वा तैरेव संयुतास्स्वल्पम्।

आरुढे वा छत्रे वा सजले साम्बुग्रहेऽपि भूरि स्यात्।।

जलविषये के के भावाश्चिन्त्याः कथमितिच उच्यते -

हिबुकेनाधस्सलिलनद्यागमनं तु सप्तमेनैव।

दशमेन वृष्टिपतनं केन्द्रविशेषास्तरयोः ह्येते।। [13]

भूमेरधः विद्यमानम् जलं चतुर्थभावेन नदीजलन्तु सप्तमेन वृष्टिजलं दशमभावेन चेतिकेन्द्रविषयाः इतिबोध्यम् ।

इत्थं सत्यपि वर्षस्य लक्ष्मणि ज्ञस्य संयुतिम्।

दृष्टिर्वा तत्त्रिभागस्य तदंशस्यापि वोदयः।।

यदि चेद्वृष्टिरारब्धपवनेन विहन्यते।।

आरार्किराहुसौम्येषुकेन्द्रस्थेष्वतिमारुतात्।

वृष्टेर्विघात आदेश्य आरब्धायास्तथोल्बणम्।।

जलराशिषु लग्नेषु शुक्रेन्दुभ्यां युतेषु च।

आरुढेषु न दृष्टेषु चिन्तको वृष्टिमादिशेत्।।

पृष्टोदये महद्वर्षमारुढादित्रिके सति।

स्वोच्चस्थयोरिन्दुभृग्वोस्तदहर्वृष्टिमादिशेत्।।

आरार्किराहुसौम्ये षुकेन्द्रस्थेष्वतिमारुतात्।

नास्ति वृष्टिश्शुभाढ्येषु स्तोका वृष्टिश्च तेष्वपि।।

 ISSN: 2320-740X

जलराशिस्थितौ चैव मन्दराहू तु वृष्टिदौ।

शुक्रेन्दुदृष्टौ यदि तौ महावृष्टिप्रदायकौ।।

मीनः कर्किमृगन्त्यर्धवृषतौल्यलियोषितः।

कुम्भश्च तोयभानि स्युग्रहेषु शशिभार्गवौ।।

तोयात्मकौ ज्ञजीवौ तु सतोयौ तोयराशिगौ।

वितोयावन्यराशिस्थौ शुष्काश्शन्यर्कभूमिजाः।।[14]

बृहत्संहितायामाचार्यवराहमिहिरः प्राणिचेष्टातःवृष्टिज्ञानाय उपायान् कथयति।यथा

"मार्जारा भृशमवनीं नखैर्लिखन्तो

लोहानांमलनिचयसविस्रगन्धः।

रथ्यायां शिशुनिचिताश्च सेतुबन्धाः

सम्प्राप्तं जलमचिरान्निवेदयन्ति"।। [15] इति।

अस्मात् श्लोकात् मार्जारचेष्टातःशिशूनां चेष्टातःच सद्यः वृष्टिः भवेत् इतिअनुमातुं शक्यते इति। पिपीलिकाः जलाग्र्याद्यपघातेन विनैव एकस्मात् अपरस्थानं प्रतिअण्डोपसङ्क्रान्तिं कुवन्ति इति, सर्पाः मैथुने व्यापृताः भवन्तीतिअथवा वृक्षारोहणं कुर्वन्तीतिविनाकारणं धेनवःधावन्तीत्यादि सद्योवृष्टिकरं भवति। तथा पशवःगृहात् बहिर्गन्तुं नेच्छन्ति कर्णौ खुरान् च धुन्वन्ति चेत् सपदि वृष्टिः भवेदितिज्ञातव्यम्। शुनकानामपि एतल्लक्षणं वृष्टिसूचकमेवेतिभावः। यदा गृहकुक्कुटाः आकाशं दृष्टवा विततं रुदन्ति तदा वृष्टिः भवितुमर्हति।

"वल्लीनां गगनतलोन्मुखाः प्रवालाः

स्नायन्ते यदि जलपांसुभिर्विहङ्गाः।

सेवन्ते यदि च सरीसृपास्तृणाग्राण्या-

सन्नो भवतितदा जलस्य पातः""।। [16]

इत्यनेन प्रवाला ऊद्ध्वाभिमुखा भवन्ति, पक्षिणो जलेन धूल्या वा स्नान्ति, सरीसृपाः तृणाग्रे उपविशन्ति इत्यादयो वृष्टिलक्षणमेव। सन्ध्यासमये मृगाः सूर्यं दृष्ट्वा उच्चैः विरुवन्तश्चेत् अशुभलक्षणमेव। तथा सन्ध्यासमये मृगसमूहे वायुसमूहे च मिश्रगे शान्तिदीप्तदिगुत्थे वर्षणम् भवतीतिच वराहः[17] वदति। किन्तु मधुरस्वरशान्तिविहङ्गमृगरुता सन्ध्या पूजिता भवतिइत्यपि अवगन्तव्यम्।

एवं वृष्टिप्रश्ने निमित्तानि लक्षणानि प्राणिचेष्टा ग्रहचारः ग्रहस्थितिः नक्षत्रम् इत्यादयो मुख्याः इतिशम् ।।

**टिप्पणी**

1. प्र.मा - 25/72
2. तत्रैव - 25/73
3. तत्रैव - 25/75
4. तत्रैव - 25/76
5. तत्रैव - 25/74
6. तत्रैव - 25/77,78
7. तत्रैव - 25/79
8. तत्रैव - 25/81,82
9. तत्रैव - 25/80
10. तत्रैव - 25/83
11. तत्रैव - 25/84
12. तत्रैव - 25/85-88

13. तत्रैव - 25/89
14. तत्रैव - 25/90-97
15. बृ.सं. - 28/5-10
16. तत्रैव - 28/11
17. तत्रैव - 30/4,7

**ग्रन्थसूची -**

प्रश्नमार्गः उत्तरार्धः – उपरत्नशिखा व्याख्या – पुन्नश्शेरि नीलकण्ठशर्मा – देवी बुक्क् स्टाल्, कोटङ्ङल्लूर् – 2021

बृहत्संहिता – आचार्यवराहमिहिरः - व्याख्याता - डॉ. सुश्कान्त झा - चौखम्बा संस्कृत सीरीज आफिस, वाराणसी – 2008

******

 ISSN: 2320-740X

# सद्यः परनिर्वृतिः - एकं विवेचनम्

**Dr. Chandrakala R. Kondi**
Associate Professor (Sahitya)
CSU, Rajiv Gandhi Campus, Sringeri-577139
Chikkamagaluru Dt., Karnataka State

1. **मुख्यशब्दाः** - काव्यप्रयोजनम्, तस्य प्रकाराः, तेषु प्राधान्यं कस्य प्रयोजनस्य?, किमर्थं तस्य प्राधान्यम्? तत्र के के अंशाः निर्णायकाः भवन्ति ? इत्यादयः चर्चिताः । अन्ते सद्यः परनिर्वृतेः सकलप्रयोजनमौलिभूतत्वप्रतिपादनं युक्तमेव इतिप्रतिपादितम् ।
2. **सारांशः** -

काव्यशास्त्रीयाचार्यैः स्वेषां ग्रन्थेषु काव्यप्रयोजनानि बहुधा प्रतिपादितानि, चतुर्वर्गफलप्राप्तिः, यशः, अर्थप्राप्तिः, व्यवहारज्ञानम्, अमङ्गलनिवारणम्, परमानन्दप्राप्तिः इत्यादिरीत्या । तेषु परमानन्दप्राप्तिरेव प्राधान्येन परिगणितम् । तच्च अन्यप्रयोजनेभ्यः विशिष्टं सत् सर्वाण्यपि प्रयोजनान्यतिक्रम्य तिष्ठति। अत एव मम्मटाचार्यः तदुद्दिश्य एवं वदति- 'सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्' इति। तदेव 'सद्यःपरनिर्वृति'पदेनोक्तं तेन कारिकायाम् । तस्य तथा प्रतिष्ठायाः हेतवःभवन्ति एतेंऽशाः-

१. सद्यः (समनन्तरमेव) प्राप्तिः
अन्यानि प्रयोजनानि काव्यरचनासमनन्तरं पठणसमनन्तरं वा न प्राप्यन्ते । काव्यं विरच्य बहुकालानन्तरमेव कवेः यशः प्राप्यते ।
२. विगलितवेद्यान्तरत्वम्
३. रसास्वादनसमुद्भूतत्वम्
४. परत्वम्
५. सकलप्रयोजनमौलिभूतत्वम्

काव्यप्रयोजनेष्वेव अन्यप्रयोजनानि यदा पश्यामस्तदा अयमंशः सुस्पष्टो भवतियत्, यशः, अर्थप्राप्तिः, अमङ्गलनाशः-इत्यादीनि काव्यविरचन-पठनादिकार्यसमनन्तरमेव न भवन्ति । किन्तु यथा पानकरसः पीयमानः सन्, षड्रसोपेतं भोजनं भुज्यमानं सत् तत्क्षणमेवानन्दं ददातितथैव काव्यरसास्वादनसमनन्तरमेव परमानन्दप्राप्तिर्भवति। अतः'सद्यः' इत्यनेन अन्यप्रयोजनविलक्षणत्वमस्य सूचितं मम्मटाचार्येण । अस्मिन् लोके वर्तमानं सुखं वेद्यान्तरविस्मारकं न भवति। किन्तु काव्यरसास्वादे तन्मयीभूतःसहृदयः, कोऽहम्? कुत्राऽस्मि? के सन्ति मया सह ? मां परितःकिमस्ति? इत्यादिविचारान् सम्पूर्णतया विस्मरति। यथा ब्रह्मानन्दे निमग्नस्य योगिनः अस्य लोकस्य स्मरणमेव न भवतितथैव काव्यानन्दमग्नस्य सहृदयस्यापि स्थितिः । ब्रह्मानन्दः यथा आत्मनैव जायते, न तु बाह्यवस्तुभिः, तेनैव अत्यन्तं श्रेष्ठत्वं तस्य , तथैव काव्यानन्दोऽपि तदात्मभूतस्य रसस्यैव कारणात् भवतीतिअन्यप्रयोजनेभ्यः श्रेष्ठं

भवति। एवमेव अनन्यलभ्यत्वम्, नैरन्तर्यम् इत्यादिविचारा अपि तत्रान्तर्भवन्ति । एते अंशाः एतत्प्रयोजनं सकलप्रयोजनमौलिभूतमकार्षुः । लोके यदविलम्बेन लभ्यते, अन्यत्र न लभ्यते, दुःखेनास्पृष्टं च भवतितादृशमेवाभिलष्यते जनैः । कीर्त्यादिभिः प्राप्यमाणानन्दः अत्यल्प एव । अतस्तस्य **सकलप्रयोजनमौलिभूतत्वम्** सङ्गच्छते ।

**'सद्यः परनिर्वृति'**रित्येतत् आलङ्कारिकैरुक्तेषु काव्यप्रयोजनेष्वन्यतमम् । लोके तावत् सर्वमपि कार्यं किमपि प्रयोजनमुद्दिश्यैवानुष्ठीयते सर्वैः । अतः'अनेन कर्मणा किं मम लभ्यते' इतिज्ञात्वैव सर्वोऽपि प्रवृत्तो भवतिकस्मिंश्चित् कार्ये । तथैव शास्त्रकाव्यादीनामध्ययनमपि नैतद्विना (प्रयोजनज्ञानं विना) कुर्वन्ति लोके । अत एवोच्यते अभियुक्तैः-

सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित् ।
यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते ॥

इति। तेन शास्त्राध्ययनस्य काव्याध्ययनस्य च प्रयोजनं तत्तद्ग्रन्थकारैः स्वग्रन्थे निबद्धव्यमेव । तस्यानिवार्यतां प्रतिपादयितुमेव प्रयोजनम् अनुबन्धचतुष्टये परिगणितम् । लोकोत्तरवर्णनानिपुणानां कवीनां काव्यानि रामायणरघुवंशादीनि वारं वारं पठन्ति जनाः इत्यनेन सम्भाव्यते यत् काव्यान्यपि सप्रयोजनानीति। तर्हि कानि तेषां प्रयोजनानीतिजिज्ञासायाम् आलङ्कारिकाः बहूनि प्रयोजनानि प्रतिपादयामासुः । तेषु कानिचन लौकिकानि, कानिचन पारमार्थिकानि कानिचन उभयसम्बद्धानि च भवन्ति । तेषु मानवःयं प्राप्तुमाजीवनं प्रयतते, यदर्थं च बहुविधकष्टानि सहते, यं च प्रतिक्षणं निरीक्षते तादृशः परमानन्दोऽन्यतमः । तदेव च प्रयोजनं 'प्रीतिः' इतिभामहाचार्येण, 'विनोदजननम्' इतिभरतमुनिना, 'परमाह्लाद' इतिरुद्रटेन, 'श्रोतृणां द्रड्महानन्दः' इतिकेशवमिश्रेण, 'सद्यः परनिर्वृतिः' इतिमम्मटाचार्येण च प्रतिपादितम् । यद्यपि समेषामेतेषां तात्पर्यं त्वेकमेव, तथापि 'सद्यः परनिर्वृति'रित्यस्मिन् मम्मटोक्ते पदसमूहे तस्य काव्यानन्दस्य स्वरूपं महत्ता च यथा सुव्यक्तमस्ति तथा अन्येषां वाक्यानां न । तेन प्रतिपादितस्य तस्य प्रयोजनस्य न्यप्रयोजनविलक्षणत्वं महत्त्वं च तदा एव ज्ञायते, यदाऽस्माभिः तेन प्रतिपादितानि सर्वाणि काव्यप्रयोजनानि ज्ञायन्ते । तेन मम्मटोक्तां काव्यप्रयोजनकारिकां प्रस्तौमि-

काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥ [1]

सद्यः, परम्, निर्वृतिः-इतिअंशत्रयमत्र विद्यते । अस्य विस्तृतिं मम्मटाचार्यः एवं करोतियत् 'सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्' इति। तेन काव्यानन्दे एते अंशा वक्तुं शक्यन्ते-

a) सद्यः (समनन्तरमेव) प्राप्तिः
b) विगलितवेद्यान्तरत्वम्

---
1 काव्यप्रकाशः-१/२

 ISSN: 2320-740X

c) रसास्वादनसमुद्भूतत्वम्

d) परत्वम्

e) सकलप्रयोजनमौलिभूतत्वम्

**सद्यः**- कारिकायां सद्यः इतिप्रयुज्य मम्मटाचार्यः वृत्तौ 'समनन्तरमेव' इत्युक्तवान् । लोके सामान्यतःकार्य-तत्फलप्राप्त्योः पौर्वापर्यभावःसंलक्ष्य एव भवति। सस्यमेकम् आरोपणानन्तरं बहुदीर्घकालानन्तरमेव वृक्षरूपेण परिणतं सत् फलं ददाति। तथैवान्यत्रापि । काव्यप्रयोजनेष्वेव अन्यप्रयोजनानि यदा पश्यामस्तदा अयमंशः सुस्पष्टो भवतियत्, यशः, अर्थप्राप्तिः, अमङ्गलनाशः-इत्यादीनि काव्यविरचन-पठनादिकार्यसमनन्तरमेव न भवन्तीति। यशस उदाहरणं भवतिकालिदासः । कविकुलगुरुरितितस्य यशः किं काव्यविरचनसमनन्तरमेव लब्धम् ? नैव । अनेकानि काव्यानि ऋतुसंहार, मालविकाग्निमित्रादीनि विरच्य, परिपक्वतां च प्राप्य यदा अन्ते अभिज्ञानशाकुन्तलनाटकं व्यरचयत्, तदा तन्नाटकं दृष्ट्वा, रसमास्वाद्य, विगलितवेद्यान्तरानन्दं चानुभूय सहृदयैः कविकुलगुरुरितिप्रशस्तिर्दत्ता कालिदासाय । तदैव,

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम् ॥ इति,
पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासा ।
अद्यापि तत्तुल्ल्यकवेरभावादनामिका सार्थवती बभूव ॥

इत्यादि च यशः लब्धं तेन कविना । एवमेवार्थप्राप्तिरपि । 'आस्थानकविः' इत्यादिपदानि लब्ध्वा कविभिः धनमार्ज्यते । किन्तु तदपि काव्यविरचनात् बहुकालानन्तरमेव लभ्यते । किन्तु काव्यानन्दः दृश्यकाव्येषु दर्शनसमनन्तरं श्रव्यकाव्येषु च पठन-श्रवणसमनन्तरं च प्राप्यते । न तत्र कोऽपि विलम्बः । यथा पानकरसः पीयमानः सन्, षड्रसोपेतं भोजनं भुज्यमानं सत् तत्क्षणमेवानन्दं ददातितथैव काव्यरसास्वादनसमनन्तरमेव परमानन्द-प्राप्तिर्भवति। अतः'सद्यः' इत्यनेन अन्यप्रयोजनविलक्षणत्वमस्य सूचितं मम्मटाचार्येण ।

**विगलितवेद्यान्तरत्वम्**-अन्यद् वेद्यं वेद्यान्तरम् । यद्यद् वेद्यते ज्ञायते अनुभूयते तत्सर्वं वेद्यम् । अस्मिन् लोके वर्तमानं सुखं वेद्यान्तरविस्मारकं न भवति। यदि षड्रसोपेतं भोजनं कुर्मः तदापि अस्मान् परितःकिं किमस्तीति, के के सन्तीति, के च परिवेशयन्तीति-एवं सर्वेषामपि वेद्यानां ज्ञानं भवति। किन्तु काव्यरसास्वादे तन्मयीभूतःसहृदयः, कोऽहम्? कुत्राऽस्मि? के सन्ति मया सह ? मां परितःकिमस्ति? इत्यादिविचारान् सम्पूर्णतया विस्मरति। यथा ब्रह्मानन्दे निमग्नस्य योगिनः अस्य लोकस्य स्मरणमेव न भवतितथैव काव्यानन्दमग्नस्य सहृदयस्यापि स्थितिः ।

**रसास्वादनसमुद्भूतत्वम्**-लोके लौकिकसुखापेक्षया आत्मानन्दः श्रेष्ठः । अर्थात् श्रेष्ठवस्तुभ्यः, बान्धवेभ्यः इत्यादिभिः प्राप्यमाणानन्दापेक्षया तादृशसुखत्यागेन आत्मनि मनः निधाय प्राप्यमाणं सुखं परमम् । अत एव एवमुच्यते-

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।

तृष्णाक्षयसुखस्यैते नार्हतःषोडशीं कलाम् ॥ [1]

इति। आत्मना विना जीवःनास्ति । अत एव स्वस्य रक्षणम् 'आत्मरक्षण'मित्युच्यते । स्वयमेव स्वदेहं यदि मारयतितदा 'आत्महत्या' इत्युच्यते, यद्यपि नित्यस्य आत्मनः मरणमेव नास्ति [2] । अनेन स्पष्टं भवतियत् जीवस्य सर्वमपि आत्मनैव सिद्ध्यतीति। अत एव सर्वोऽपि स्वात्मानं सर्वथापि रक्षितुमिच्छति। शौर्यादिगुणाः, अलङ्करणसाधनानि इत्यादीनि सर्वाण्यपि आत्मभिन्नस्थानीयानि । यद्यपि तानि प्रियाण्येव तथापि चोरः यद्यस्माननुधावतितदा अस्माभिः अस्मत्प्रियाणि आभरणादीनि तस्मै दत्त्वा आत्मन एव रक्षणं क्रियते खलु ।

एतदेव तत्त्वं यदि काव्यसम्बद्धतया विचारयामस्तदा काव्ये वर्तमानानां गुणालङ्कारवक्रोक्त्यादीनामपेक्षया रसस्य सर्वोच्चं स्थानं वर्तत इत्यंशः सुस्पष्टो भवति। यद्यपि तेषामपि विशिष्टं स्थानं काव्ये वर्तत एव तथापि रसं नातिक्रामन्ति तानि तत्त्वानि । तेषां तु रससम्बद्धतयैव वृत्तित्वं काव्ये । रसाभिव्यञ्जकतया गुणानां गुणत्वम्, रसपोषकतया अलङ्काराणामलङ्कारत्वम्, रसापकर्षकतया दोषाणां दोषत्वमितिरीत्या सर्वाणि काव्यतत्त्वानि रसपराण्येव दृश्यन्ते काव्ये । अत एव रसः काव्यस्यात्मस्थानीयः । यद्यपि कुन्तकाचार्यः वक्रोक्तिः काव्यजीवितमिति वदति, चन्द्रालोककारः जयदेवः

अङ्गीकरोतियः काव्यं शब्दार्थावनलङ्कृती ।
असौ न मन्यते कस्मादनुष्णमनलं कृती ॥ [3]

इतिअलङ्काराणामेव अत्युच्चं स्थानं कल्पयति, वामनाचार्यः 'रीतिरात्मा काव्यस्य' इतिरीतिमेव काव्ये प्रधानां मन्यते तथापि ते सिद्धान्ताः न सर्वैरङ्गीकृताः । तैः तत्त्वैः प्राप्यमाणानन्दः क्षणिकः, न तु विगलितवेद्यान्तरः । अत एव वस्तु-अलङ्कार-रसरूपेण ध्वनिं त्रिधा विभज्य 'काव्यस्यात्मा ध्वनिः' इतिप्रतिपादितवता आनन्दवर्धनाचार्येण 'रसध्वनि'रेव प्राधान्येनोक्ता । 'काव्यस्यात्मा स एवार्थः' [4] इत्यादिना तत्तु स्पष्टमेव । एवं रसस्य अबाधितं स्थानं तत् । जीवानां शरीरं सम्पूर्णं व्याप्य तिष्ठतिआत्मा । 'मम शरीरस्य अस्मिन् भागे आत्मा नास्ति' इतियः कोऽपि वक्तुं न शक्नोति। तथा शरीरं व्याप्य तिष्ठतिआत्मा । तथैव काव्यशरीरं सम्पूर्णमपि व्याप्य तिष्ठतिरसः । काव्यस्थानि कानिचन पद्यानि वाक्यानि वा नीरसानि भवन्ति चेदपि रसमयवाक्यानां पद्यानां च मध्ये पतितानि तानि रसमयत्वेनैव भासन्ते, न तु नीरसतया । बहुविधव्यञ्जनादिभिरुपेते भोजने द्वित्राणि भक्ष्याणि अरुचिकराणि भवन्ति चेदपि भोक्ता 'भोजनं स्वादिष्टम्' इत्येव यथा वदतितथैव काव्यरसविषयेऽपि । कदाचित् भोक्ता द्वित्राणां भक्ष्याणां मिश्रीकरणेन कञ्चन अन्यमेव विलक्षणं रसमास्वादयति, तथैव काव्ये सहृदयः रसेन सह गुणालङ्कारादीनां सौन्दर्यमपि आस्वादयति। किन्तु रसं विना तेषामास्वाद्यत्वं न तादृशानन्ददायि । पानकरसास्वादे तत्र वर्तमानानाम् एला-मरिच-शर्करा-जल-आम्लादीनां

1 ध्वन्यालोक-३/२६ (वृत्तौ)

2 न हन्यते हन्यमाने शरीरे । श्रीमद्भगवद्गीता-२/२०

3 चन्द्रालोकः-१/८

4 ध्वन्यालोकः-१/५

 ISSN: 2320-740X

पृथक्तया अस्वादः यथा न भवति, किन्तु अखण्डरूपेणैव पानकरस आस्वाद्यते, तथैव गुणालङ्कारादीनां विभावानुभावादीनां च पृथक्तयास्वादः काव्ये न भवति, किन्तु तैः सर्वैः सह परिपुष्टस्य अखण्डस्य रसस्यैव ।

अपि च यद्यपि काव्ये 'नव'रसाः सन्ति, न त्वेक एव, तथापि सर्वे रसाः समानतया आनन्दं ददतीतिविशेषः। विलक्षणाः एकत्रीभूय समानरूपेणानन्दं ददतीतिस्थितिः नास्त्येव लोके । एतदेव मम्मटाचार्येण ब्रह्मसृष्टिः 'षड्रसा, न च हृद्यैव तैः' इत्युक्तम् । किन्तु काव्ये 'नव'सङ्ख्याका अपि रसाः आनन्दमेव ददति। एकोऽपि रसः न दुःखदायकः । लोके करुणादयः यद्यपि दुःखमुत्पादयन्ति, तथापि काव्ये विभावादिसंयोगवशात् आनन्दमेव ददति। 'करुणादावपि रसे जायते यत्परं सुखम्'[1] इत्युक्तं विश्वनाथेन । करुणरसप्रधानानि रामायणादिकाव्यानि भूयो भूयः पठ्यन्ते सहृदयैरित्येतदेव तत्र प्रमाणम् । एतत्तु मम्मटाचार्येण कविसृष्टिः 'नवरसरुचिरा', 'ह्लादैकमयी' इत्यादिभिः शब्दैरुपपादिता । अतःकाव्यात्मनः रसस्यास्वादेनैव जायमान आनन्दः श्रेष्ठः । स च रसास्वादेन साक्षाल्लभ्यते ।

**परम्**-अत्युत्कृष्टम् । दुःखेनास्पृष्टः परमानन्दः । मर्त्यलोकेऽस्मिन् सर्वमपि सुखं किञ्चिद्वा दुःखेन मिश्रितमेव भवति। यथोक्तं भगवता श्रीकृष्णेन गीतायाम्-**'ये हि संस्पर्शजा भोगा दुःखयोनय एव ते'**[2] इति। इष्टमाहारं यदि यथेच्छं भक्षयामस्तर्हि अजीर्णादिरोगा उत्पद्यन्ते । कामाद्युपभोगा अपि अन्ते रोगादिकमेव जनयन्ति । पुत्रादिसुखमपि तेषां वाममार्गादिगमनेन, तेषां रोगादिपीडया इत्यादिना च दुःखरूपमेव । केचन जनाः पुत्रादीनां मरणं स्वयं दृष्ट्वा निरन्तरं दुःखिनो भवन्ति । 'पुत्रस्ते जातः' इत्यस्य श्रवणाल्लब्धं सुखं तदा न तिष्ठति। एवं सर्वमपि सुखं दुःखेन स्पृष्टम् । यत्सुखं दुःखेनास्पृष्टं भवतितदेव सुखं परममित्युच्यते । तादृशं सुखं ब्रह्मसाक्षात्कारपूर्वकं प्राप्तः ब्रह्मानन्द एवेतिसर्वे जानन्त्येव । तादृशब्रह्मानन्दसदृश एव काव्यानन्दोऽपि । सुखदुःखमिश्रितेऽस्मिन् जगतिदुःखेनास्पृष्ट आनन्दः काव्यानन्द एव । काव्यानन्दे निमग्नः सहृदयः तादृशानन्दमनुभवतीतिअयमानन्दः परानन्दः । 'परनिर्वृतिः' इत्यत्र परशब्देन तस्यानन्दस्य सम्पूर्णसुखरूपत्वं प्रतिपादितं मम्मटाचार्येण ।

**अनन्यलभ्यत्वम्**- यद्यप्येषोंऽशः शब्दतःनोक्तं मम्मटाचार्येण तथापि सूच्यत एव । अन्यानि प्रयोजनानि अन्यतोऽपि लभ्यानि । कीर्तिः दानादिभिरपि लभ्या । अर्थसम्पत्तिःपरिश्रमेणापि लभ्यते । प्रतिदिनं जगतिविद्यमानानि, व्यवहारादीनि च दृष्ट्वापि व्यवहारज्ञानं प्राप्नुवन्ति जनाः । मन्त्रादिपठनेन अमङ्गलनिवारणं कर्तुं शक्यम् । सज्जनानाम् अमृतमयवचनेषु कान्तासम्मितोपदेशः द्रष्टुं शक्यः । विश्वनाथादिभिः प्रतिपादितं 'चतुर्वर्गफलप्राप्ति'रूपं शास्त्रादपि लभ्यत एव । एवमन्यानि प्रयोजनानि अन्यलभ्यान्येव, न केवलं काव्यमात्रलभ्यानि । किन्तु काव्यरसास्वादजन्यः विगलितवेद्यान्तरानन्दः काव्यमात्रलभ्यः । यदन्यत्र बहुत्र वा लभ्यते तस्य मौल्यं न्यूनमेव । यदन्यत्र बहुत्र वा न लभ्यते तस्य गौरवमधिकम् । अतःअनन्यलभ्यत्वमपि तस्य श्रेष्ठतायां कारणत्वं वहति।

**नैरन्तर्यम्**-अयमपि कश्चनांशः प्राधान्यं भजते यत् एकस्य काव्यस्य पौनःपुन्येन पठनेनापि सहृदयः श्रेष्ठमेवानन्दं लभत इति। भोजनं यदि प्रतिदिनमेकप्रकारकं भवतितर्हि भोक्तृणां मनसि वैरस्यं जायते । लौकिकं सुखं

1 साहित्यदर्पणः-३/४

2 श्रीमद्भगवद्गीता-५/२२

प्रथमवारं यमानन्दं ददाति, तन्न द्वितीयवारमपि । 'पुत्रस्ते जातः' इत्यादेः प्रथमवारं श्रवणेन य आनन्दो जायते तन्नानन्तरश्रवणेनापि । भोजने अस्मदभीष्टः रसः प्रथमास्वादने यथा सुखानुभवं ददातितथा नानन्तरास्वादने । प्रथमास्वादने वर्तमानः तुष्टिगुणः तदनन्तरं नैव भवतीतिसर्वे जानन्त्येव । उदरे पूरिते सतिअभीष्टरसोऽपि नास्वादयितुं शक्यते । एवं लौकिकरसास्वादे महानेवान्तरायः । तन्न काव्यास्वादे दृश्यते । तत्र तु नैरन्तर्यमेव रसास्वादस्य । काव्यरसं पायं पायम् आनन्दमेवानुभवतिसचेताः । पुनरुक्तिदोषस्तत्र नास्ति । दृष्टं पठितं वा स्मारं स्मारमपि आनन्दमेवानुभवति। रामायणस्य राम-सीता-भरतादयः, अभिज्ञानशाकुन्तलस्य दुष्यन्तःशकुन्तला चेत्यादयः स्मरणेनापि रसास्वादं कारयन्ति सहृदयानाम् ।

उपर्युक्ता अंशाः एतत्प्रयोजनं सकलप्रयोजनमौलिभूतमकार्षुः । लोके यदविलम्बेन लभ्यते, अन्यत्र न लभ्यते, दुःखेनास्पृष्टं च भवतितादृशमेवाभिलष्यते जनैः । कीर्त्यादिभिः प्राप्यमाणानन्दः अत्यल्प एव । अतस्तस्य **सकलप्रयोजनमौलिभूतत्वम्** सङ्गच्छते इतिशम् ।

**Bibliography**


1. काव्यप्रकाशः (हैमवतीटीकासहितः) । मोतीलाल बनारसीदास, वाराणसी । प्रथमसंस्करणम्-1980
2. चन्द्रालोकः । मोतीलाल बनारसीदास, वाराणसी । 1982
3. साहित्यदर्पणः । 'शशिकला' हिन्दीव्याख्योपेतः। चौखम्बा विद्याभवन, वाराणसी ।
   दशमसंस्करण-1997
4. ध्वन्यालोकः । 'लीला' संस्कृत-हिन्दीव्याख्योपेतः। भारतीयविद्याप्रकाशन, दिल्ली । चतुर्थसंस्करण-2018 ।
   ISBN-978-81-217-0329-1
5. श्रीमद्भगवद्गीता (कन्नड) गीताप्रेस् गोरखपुरम् । अष्टादश संस्करणम्-2008
   ISBN-81-293-0485-6


******

 ISSN: 2320-740X

# ब्रह्मसूत्रे बौद्धसन्दर्भपरिशीलनम्

**Dr. Nepal Das**

Asst. Professor

Dept. of Advaita-Vedanta

CSU, Ekalavya Campus, Agartala

**मुख्यशब्दाः** - ब्रह्मसूत्रम्, बौद्धदर्शनम्, समुदायः, प्रतिसंख्या, अप्रतिसंख्या, इतरेतर-प्रत्ययत्व, पूर्वनिरोधः, क्षणिकम्, कर्म, स्वप्नः इत्यादयः।

**शोधसारः** – ब्रह्मसूत्रे चतुर्षु अध्यायेषु द्वितीयाध्याये बौद्धानां सिद्धान्तानां निराकरणं सूत्रकारैः कृतमस्ति। बौद्धानां सिद्धान्तं क्षणभङ्गुरवादं, समुदायवादं, असत्कारणवादमित्यादिनां श्रुत्यानुगुणतर्कैः खण्डयित्वा वेदोक्तं वेदान्ततत्त्वं सूत्रकाराः प्रत्यपादयन्।

**भूमिका** – भारतीयदर्शनसम्प्रदायस्य नास्तिकास्तिकभेदेन मूलतो द्विधा विभागो दृश्यते। आस्तिकेषु वेदान्तोऽन्यतमः, नास्तिकेषु च बौद्धः। बौद्धदर्शनस्य नास्तिकत्वेऽपि वेदान्ताचार्याः बौद्धसिद्धान्तस्य महत्वं भजन्ते। प्रायः सर्वे मुख्यवेदान्तसम्प्रदायाः बौद्धमतं पूर्वपक्षत्वेन उद्ध्रयन्ते। वेदान्ताचार्यैः बौद्धदर्शनस्य समालोचना कुत्रचित् प्रत्यक्षेण, कुत्रचित् परोक्षेण वा कृतम्। बौद्धदर्शनस्य प्रायः सर्वाः सम्प्रदायाः पूर्वपक्षत्वेन वेदान्तिभिः स्वीकृताः।

**ब्रह्मसूत्रस्य परिचयः** – शङ्कराचार्यैः गीताभाष्ये ब्रह्मसूत्रपदस्य निर्वचनमुक्तं - "ब्रह्मणः सूचकानि वाक्यानि ब्रह्मसूत्राणि, तैः पदैःगम्यते ज्ञायते"[1] इति। ब्रह्मसूत्रस्य नामान्तरनं वेदान्तसूत्रं शारीरकसूत्रं उत्तरमीमांसा वा कथ्यते। शारीरकसूत्रमित्यत्र शरीरे भवःशारीरो जीवः, शरीरस्थजीवस्य स्वरूपप्रतिपादकं सूत्रं शारीरकसूत्रमिति, शास्त्रञ्च शारीरकमीमांसा कथ्यते। अयं ग्रन्थः चतुर्षु अध्यायेषु प्रविभक्तः अतःचतुर्लक्षणी इतिनाम्नापि अभिधीयते। प्रचलितपरम्पराधारेण ब्रह्मसूत्रस्य रचयिता बादरायण इतिकथ्यते। इमे बादरायणाः के इत्यस्मिन्विषये विदुषां मतपार्थक्यं परिलक्ष्यते। अस्य रचनाकालविषयेऽपि नास्ति सुष्टुः निष्पत्तिः, विद्वद्वेदे अस्य रचनाकालविषयिनि मतभेदाः सन्त्येव। तथापि प्रायः ई.पू. ४००-१५० शतके इतिस्वीकर्तुं शक्यते।

**बौद्धदर्शनस्य परिचयः** - भगवान् बुद्धः अस्य दर्शनसम्प्रदायस्य प्रतिष्ठाता। भगवान् बुद्धस्य समयकालः प्रायः ई.पू. ६२० शतके इतिबौद्धाः अङ्गीकुर्वन्ति। बुद्धस्य निर्वाणानन्तरं भगवता बुद्धैः उक्तानि मतानि चतुर्षु सम्प्रदायेषु प्रविभक्ताः जाताः। भगवता बुद्धैः उपदिष्टाः त्रयो मौलिकसिद्धान्ताः – १. सर्वमनित्यम् २. सर्वमनात्मम्, ३. निर्वाणम् इति। वस्तुतःकालान्तरे बौद्धदर्शनस्य अष्टादश सम्प्रदायाः अभूवन्। तेषु प्राधानभूतो चत्वारः सम्प्रदायाः १. वैभाषिकः सर्वास्तित्ववादः, २. सौत्रान्तिकः, ३. माध्यमिकः शून्यवादः, ४. योगाचारः क्षणिकविज्ञानवाद इति।

1 गीताभाष्यम् – 13/4

ब्रह्मसूत्रस्य द्वितीयाध्यायस्य द्वितीयपादः तर्कपाद इति। अत्र सूत्रकारेण वेदान्तेतरदार्शनिकमतानां खण्डनपुरस्सरं स्वपक्षश्च संस्थापितः। येषां मतं खण्डितं ते च सांख्यः, वैशेषिकः, बौद्धः, जैनः, पाशुपतः, पञ्चरात्रश्च। तेषां क्रमः इत्थम् –

| क्रमः | सम्प्रदायः | सन्दर्भः | सूत्रसंख्या |
|---|---|---|---|
| १. | सांख्यः | द्वितीयोऽध्यायः, द्वितीयपादः, सूत्रसंख्या – १-१०, प्रधानकारणवादखण्डनम्, | १० |
| २. | वैशेषिकः | द्वितीयोऽध्यायः, द्वितीयपादः, सूत्रसंख्या – ११-१३, परमाणुकारणवादखण्डनम् | ७ |
| ३. | बौद्धः | द्वितीयोऽध्यायः, द्वितीयपादः, सूत्रसंख्या – १८-३२, समुदायाधिकरणम्, अभावाधिकरणम् | १५ |
| ४. | जैनः | द्वितीयोऽध्यायः, द्वितीयपादः, सूत्रसंख्या – ३३-३६, एकस्मिनसंभवाधिकरणम् | ४ |
| ५. | पाशुपतः | द्वितीयोऽध्यायः, द्वितीयपादः, सूत्रसंख्या –३७-४१, पत्यधिकरणम् | ५ |
| ६. | पाञ्चरात्रः | द्वितीयोऽध्यायः, द्वितीयपादः, सूत्रसंख्या – ४२-४५ | ४ |

बौद्धमतखण्डनपरकतया ब्रह्मसूत्रस्य द्वितीयाध्यायस्य द्वितीये पादे द्वे अधिकरणे स्तः । एकञ्च “समुदायाधिकरणम्”परञ्च “अभावाधिकरणम्”। “समुदायाधिकरणे” १० सूत्राणि, “अभावाधिकरणे” ५ सूत्राणि समाविष्टानि। समुदायाधिकरणे “समुदाय” इतिपदेन सम्बन्धः सर्वास्तिवादः, तत्त्वमीमांसायां कार्यकारणभावस्य प्रधानत्वात्। अपरञ्च “अभावाधिकरणे” “अभावः” “क्षणिकम्” इतिपदद्वयं दृश्यते। क्षणिकमितिविज्ञानवादसन्दर्भे प्रयुक्तम्। अपरञ्च अभाव इतिशून्यवादीनां मतमितिप्रतिपाद्यते।

सूत्रे प्रयुक्तः समुदायः, प्रतिसंख्या, अप्रतिसंख्या, इतरेतर-प्रत्ययत्वं, पूर्वनिरोधः, क्षणिकम् इत्यादयः पारिभाषिकशब्दाः यस्मिन् अर्थे सूत्रे प्रयुक्ताः तत्केवलं बौद्धदर्शने एव द्रष्टुं शक्यते। ब्रह्मसूत्रे बौद्धदर्शनस्य अधोलिखितान् सिद्धान्तान् समीक्षार्थं निर्धारितं भवति।

- समुदायवादः
- प्रतीत्यसमुत्पादः
- संस्कृतासंस्कृतधर्मः
- क्षणभङ्गवादः
- विज्ञानवादः

एतेषां संक्षिप्तविवरणं ब्रह्मसूत्राधारेण प्रस्तूयते।

**सर्वास्तिवादः –**

 **ISSN: 2320-740X**

क. समुदायः द्विविधमान्तरबाह्यभेदेन।[1]

ख. द्वादशाङ्गप्रतीत्यसमुत्पादे परस्परं कार्यकारणभावः।[2]

ग. क्षणभङ्गवादे उत्तरक्षणस्य उत्पत्तौ पूर्वक्षणस्य नाशः।[3]

घ. कार्यस्य उत्पत्तौ चत्वारः हेतवः भवन्ति।[4]

ङ. प्रतिसंख्यानिरोधः, अप्रतिसंख्यानिरोधः आकाशः एते असंस्कृतधर्माः।[5]

च. ज्ञानोत्तरं स्मरणमनुस्मृतिः।[6]

छ. क्षणभङ्गवादः, असतःसतःउत्पत्तेः सिद्धान्तः।[7]

**विज्ञानवादः**

क. विज्ञानं विहाय अर्थान्तरस्य सत्ता नास्ति।[8]

ख. स्वप्नवत् जाग्रतोऽपि मित्यात्वप्रतिपादनम्।[9]

ग. प्रत्ययभेदस्य कारणं वासना।[10]

**बौद्धसिद्धान्तस्य खण्डनपरका युक्तिः –**

उपर्युक्तमतानुक्त्वा तेषां खण्डनं च कृतम्।

**सर्वास्तिवादः –**

क. परमाणुनामचेतनत्वात् समुदायनिर्मानार्थं चेतनस्य आवश्यकता भवति, यः सर्वज्ञः, सर्वशक्तिमान् भवेत्।[11]

ख. स्वभाववादानुसारं प्रतीत्यसमुत्पादात् समुदायस्य उत्पत्ति इतिस्वीकारे सत्यपि समुदायज्ञानस्वीकरणाय चेतनस्य अपेक्षा भवत्येव।[12]

---

1 ब्रह्मसूत्रम् – 2.2.18

2 ब्रह्मसूत्रम् –2.2.19

3 ब्रह्मसूत्रम् –2.2.20-27

4 ब्रह्मसूत्रम् –2.2.21

5 ब्रह्मसूत्रम् –2.2.22-24

6 ब्रह्मसूत्रम् –2.2.25

7 ब्रह्मसूत्रम् –2.2.26-27

8 ब्रह्मसूत्रम् –2.2.28

9 ब्रह्मसूत्रम् –2.2.29

10 ब्रह्मसूत्रम् –2.2.30-31

11 ब्रह्मसूत्रम् –2.2.18

12 ब्रह्मसूत्रम् –2.2.19

ग. पूर्वकालिकपदार्थस्य सत्तायाः क्षणिकत्वात् उत्तरकालोत्पन्नसत्तायाः हेतुः पूर्वकालिकपदार्थस्य सत्ता न भवति।[1]

घ. क्षणभङ्गवादे हेतुतःपदार्थस्य उत्पत्तिःस्वयं बाधितो भवति।[2]

ङ. कार्यस्य सहेतुत्वं वा स्वीकारे सतिकार्यपर्यन्तं हेतोः स्थितिः वा स्वीकारे सतिक्षणिकत्वप्रतिज्ञायाः हानिः।

च. असतःसत उत्पत्तिःप्रत्यक्षप्रमाणविरुद्धत्वादप्रामाण्यम्।[3]

छ. असतःसतःउत्पत्ति इतिस्वीकारे सतिकर्मफलव्यवस्थायाः आनर्थक्यं आपतति।[4]

अन्तिमसूत्रे "सर्वथानुपपत्तेश्च[5]" इत्यत्र सूत्रकारैः प्रतिपाद्यते यत् बौद्धसिद्धान्ता यथायथं विचार्यन्ते चेत् साररूपं किमपि न तिष्ठति। अतःसर्वथा बौद्धसिद्धान्तस्य अनुपपत्ति इति।

**उपसंहारः** – नास्तिकदर्शनेषु अन्यतमः बौद्धः। एतेषां मतनिराकरणं ब्रह्मसूत्रकारः बादरायणः सर्वथा करोति। एवं प्रकारेण १५ सूत्रेषु परोक्षरूपेण बौद्धनामोल्लेखं विनैव बौद्धमतानां साक्षात् निराकृतम्।

## ग्रन्थसूची –


- अश्वघोषः. बुद्धचरितम्. वाराणसीः मोतीलाल बनारसीदास, 1985.
- कृष्णकुमार. वैदिक साहित्य का इतिहास. मेरठः साहित्य भण्डार, 1984.
- डा. अनामिका सिंह. वेदान्त में बौद्ध सन्दर्भ. वाराणसीः आर्य भाषा संस्थान, 2004.
- ब्रह्मसूत्र. वाराणसीः भारतीय विद्याप्रकाशन, 1998.
- वसुबन्धु. अभिधर्मकोशम्. वाराणसीः बौद्धभारती, 1983.
- शङ्कराचार्यः. आत्मबोधः. काशी : अच्युतग्रन्थमाला, 1990.
- ब्रह्मसूत्रशाङ्करभाष्यम्. बम्बईः निर्णयसागर प्रेस, 1938.


******

1 ब्रह्मसूत्रम् –2.2.20

2 ब्रह्मसूत्रम् –2.2.21

3 ब्रह्मसूत्रम् –2.2.26

4 ब्रह्मसूत्रम् –2.2.27

5 ब्रह्मसूत्रम् –2.2.32

 ISSN: 2320-740X

# कर्मणां विद्यायाम् उपयोगः उत विविदिषायाम्?

**डा. विश्वनाथ हेगडे**

सहायकाचार्यः

केन्द्रीयसंस्कृतविश्वविद्यालयः

राजीवगान्धीपरिसरः, शृङ्गेरी, कर्णाटकम्

**मुख्यशब्दाः** - विविदिषा, विद्योत्पत्तिः, ब्रह्मप्राप्तिः, भामतीपक्षः, विवरणपक्षः, प्रकृत्यर्थः, प्रत्ययार्थः, यज्ञादीनां साधनत्वम्

**सारांशः** - ब्रह्मप्राप्तौ किं साधनम् इतिविचारः वेदान्तदर्शने कृतः। ज्ञानमेकं मुक्त्वा नान्यत् ब्रह्मप्राप्तौ साक्षात् कारणमितिसिद्धान्तः। ज्ञानस्य केवलस्य कारणत्वे वेदे विहितानां कर्मणां कुत्र उपयोग इतिजिज्ञासा समुदेति। तत्र वेदान्तिष्वेव भामतीपक्षः विवरणपक्ष इतिप्रधानतया पक्षद्वयं वर्तते । तत्र भामतीकारैः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति इतिश्रुत्या 'प्रकृत्यर्थप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम्' इतिन्यायेन च कर्मणां विविदिषोत्पत्तौ कारणत्वमित्युच्यते । विवरणकारैस्तु यज्ञेन विविदिषन्तीतिवाक्ये यज्ञादीनामर्थतःप्रधाने धात्वर्थे वेदन एवान्वयः । प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्येऽपि अर्थतःविद्-धात्वर्थप्राधान्यमादाय तत्रैवान्वयः । अतःयज्ञादीनां विद्यायामेव विनियोगः इत्युक्तम् । अयं विचारः अत्र विस्तृततया प्रस्तुतः।

परमपुरुषार्थस्य मोक्षस्य प्राप्त्यर्थं ब्रह्मज्ञानमेव साधनमितिवेदान्तिनां सिद्धान्तः। वेदे तावत् कर्माणि उपासनानि च प्रतिपादितानि सन्तीत्यतःकर्मादीन्यपि ब्रह्मप्राप्तिं प्रतिसाधनानि भवितुमर्हन्ति इतिशङ्का समुत्पद्यते । तथा च श्रूयते 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा अनाशकेन'[1], स्मर्यते च 'तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामुने' इति। आभ्यां कर्मणामपि ब्रह्मप्राप्तिसाधनत्वम् अभिहितम् । अतःब्रह्मप्राप्तौ कर्मणामपि अस्ति साधनत्वम् इतिपूर्वपक्षः प्राप्यते । तत्रोच्यते - ब्रह्मप्राप्तिः न अप्राप्तस्य प्राप्तिरूपा, अपि तु प्राप्तस्यैव प्राप्तिरूपा इत्यतःनित्यसिद्धब्रह्मावाप्तौ कण्ठचामीकरन्यायेन ज्ञानमेकं विहाय अन्येषां साधनत्वं स्वीकर्तुं नैव शक्यते । तथा च 'नान्यः पन्थाः विद्यतेऽयनाय'[2], 'ब्रह्म वेद ब्रह्मैव भवति'[3], 'ब्रह्मविदाप्नोतिपरम्'[4] इत्यादीनि श्रुतिवाक्यानि अत्र प्रमाणम् । अतःकर्मणामपि साधकत्ववाचकश्रुतीनां ब्रह्मावाप्तौ कर्माणि परम्परया साधनानि इतितात्पर्यम् इत्यवगन्तव्यम् ।

यदि कर्मणां ब्रह्मप्राप्तौ साधनत्वं न स्वीक्रियते तर्हि कर्मणां कुत्र उपयोग इतिजिज्ञासा समुदेति। विषयेऽस्मिन् भामतीकाराणां पक्षः आदौ उपस्थाप्यते । तत्र **भामतीकारा** इत्थं वदन्ति 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति

1 बृ.उ४.४.२२

2श्वे. उ. ३.१

3मु. उ. ३.२.९

4तै. उ. २.१

यज्ञेन दानेन तपसा अनाशकेन'[1] इतिश्रुत्या ब्रह्मप्राप्तिः विद्यया भवति। सा च विद्या विविदिषया भवतिइति। तादृशविविदिषां प्रतिकर्मणः उपयोगः भवतिइतितेषां पक्षः । अर्थात् कर्मणा आत्मज्ञानेच्छा उत्पद्यते, तया इच्छया ज्ञानं, तेन ज्ञानेन मुक्तिः इतिक्रमः ।

ननु कर्मणां ज्ञानेच्छायाम् उपयोगः इतिकथनापेक्षया इच्छायाः विषयीभूतायां विद्यायामेव कर्म साक्षात् साधनम् इतिकुतो न वक्तव्यम् इतिचेत् उच्यते, प्रकृत्यर्थप्रत्ययार्थयोः प्रकृत्यर्थस्यैव प्राधान्यम् इतिन्यायेन वस्तुतःप्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतःगुणत्वात् इच्छायाश्च प्रत्ययार्थतया प्राधान्यात् प्रधानेन च कार्यसम्प्रत्ययात्[2] इतिसिद्धान्तितम् । तथा च विविदिषाश्रुतेः अयमाशयः यत् तमेतमात्मानं वेदानुवचनेन नित्यस्वाध्यायेन ब्राह्मणाः विविदिषन्ति- वेदितुमिच्छन्ति, न तु विदन्ति इति। यद्यपि वस्तुतःअत्र ज्ञानं प्रधानं तथापि प्रकृत्यर्थप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यात् सन् प्रत्ययार्थस्य इच्छारूपस्य प्राधान्यम् । विदर्थस्य ज्ञानरूपस्य अप्राधान्यम् । प्रधानेन च सह वाक्यान्तरगतानां पदान्तराणां सम्बन्धो भवतीतिइच्छया सह एव 'यज्ञेन' इत्यस्य सम्बन्धः, न तु विद्यया सह । तदुक्तं सर्वापेक्षाधिकरणभाष्ये - 'विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमदमादीनि, विविदिषा संयोगात्तु बाह्यतराणि यज्ञादीनि'[3] इति।

एवं विद्योत्पत्तौ ज्ञानस्य विविदिषोत्पादद्वारा कर्मापेक्षा विद्यते, 'विविदिषन्ति यज्ञेन'[4] इतिश्रुतेः । अर्थात् विद्यां प्रतिसाक्षात् साधनभूतत्वात् शमदमादयः अन्तरङ्गसाधनानि । विद्यायाः उत्पत्तिपर्यन्तमेतेषामनुष्ठानं कर्तव्यम् । ज्ञानेच्छां प्रतिसाधनभूतत्वात् यज्ञादयः बहिरङ्गसाधनानि । विविदिषोत्पत्तिपर्यन्तम् एतेषामनुष्ठानं कर्तव्यम् इतितस्य भाष्यवाक्यस्य तात्पर्यम् । 'यज्ञादीनि विविदिषायां विनियुञ्जानो विधिः'[5] इत्यादिभ्यः यज्ञादीनां विविदिषार्थत्वपक्षः भामतीकारसम्मतःइतिज्ञायते । तथा च कर्मणः विविदिषा, विविदिषायाः विद्या, विद्यायाः ब्रह्मप्राप्तिः इतिक्रमः । विविदिषा यद्यपि ब्रह्मप्राप्तेः साक्षात् कारणं न भवतीतिन तस्याः साक्षात् पुरुषार्थत्वम्, तथापि विद्याप्राप्तिं द्वारीकृत्य ब्रह्मप्राप्तेः कारणं भवतीतितस्य गौणत्वेन पुरुषार्थत्वम् ।

ननु वेदनेच्छायाः यज्ञादि फलत्वे वेदनेच्छागोचरेच्छया यज्ञाद्यनुष्ठानं वक्तव्यम् । वेदनेच्छायाः च स्वतःफलत्वाभावात् वेदनद्वारा मुक्तिफलकत्वं वाच्यम् । तथा च अयं क्रमः, प्रथमं मुक्तौ स्वतःपुरुषार्थत्वज्ञानाद् इच्छा, ततो वेदने मुक्तिसाधनत्वज्ञानाद् इच्छा, ततो वेदनेच्छायां वेदनसाधनत्वज्ञानाद् इच्छा तथा च यज्ञाद्यनुष्ठानम् इति। तथा च वेदनेच्छारूपविविदिषोद्देशेन यज्ञाद्यनुष्ठाने प्रवर्तमानस्य ब्रह्मवेदने विविदिषाफले इच्छा अस्ति न वा । यदि विविदिषाफले इच्छा अस्तीतिउच्यते तदानीं यज्ञाद्यनुष्ठानवैय्यर्थ्यं ब्रह्मवेदनविषयक इच्छावत्वे विविदिषायाः सिद्धत्वेन

---

1बृ.उ४.४.२२

2 भामती १.१.१

3उ.मी.अ.३ पा.४ अधि.६ सू.२७

4बृ. उ. ४.४.२२

5भाम.३.४.३४

 ISSN: 2320-740X

तस्य अभावे वेदनोपायविविदिषायाम् इच्छायाः असम्भवात् विविदिषार्थं यज्ञाद्यनुष्ठानं न सम्भवति। तेन यज्ञादीनां ब्रह्मविविदिषायां विनियोगः इतिमतं न साधु । यतःवेदनगोचरेच्छायाः एव विविदिषात्वात् ।

यदि विविदिषोद्देशेन यज्ञाद्यनुष्ठाने प्रवर्तमानस्य विविदिषाफले इच्छा नास्तीतिउच्यते तदानीं विविदिषायामपि इच्छायाः अभावात् विविदिषोद्देशेन यज्ञाद्यनुष्ठानं न सम्भवतिइत्यर्थःइतिचेन्न । विविदिषा तावद् द्विविधा भवति, विद्यां प्रतिउन्मुखतारूपा, विद्यायां रुचिरूपा च । तत्र विद्यायां रुचिरूपा विविदिषा एव यज्ञादि फलम् । विद्यां प्रतिउन्मुखतारूपा विविदिषा तु यज्ञाद्यनुष्ठानात् प्रागपि स्थातुं शक्नोति। तस्मात् यज्ञाद्यनुष्ठानात् प्राक् विद्यां प्रतिउन्मुखतारूपायां विविदिषायां सत्याम् अपि विद्यायां रुचिरूपविविदिषार्थं यज्ञाद्यनुष्ठानं न निष्फलम् इति। तत्र दृष्टान्तः- कस्यचन पुरुषस्य केनाऽपि दोषवशात् अन्नस्य विषये द्वेषः समुत्पद्यते । तदानीं सः कृशतां गच्छति, तादृशकृशतायाः निबारणार्थं सः अन्नं खादितुमिच्छतिचेदपि अजीर्णादिभिः यद्धातुवैशम्यम् उत्पन्नं तेन अन्नं खादितुं यावती इच्छा अपेक्ष्यते तावती इच्छा नोत्पद्यते । तदानीम् अन्ने रुच्युत्पादकम् औषधं स्वीकर्तव्यं भवति। इत्थमेव ब्रह्म निरतिशयानन्दरूपम् । तस्य प्राप्त्यर्थं विद्यैव साधनम् इत्यपि कश्चन जानाति। प्राचीनबहुजन्मानुष्ठितैः फलेच्छारहितैः नित्यनैमित्तिककर्मभिः जातया चित्तशुद्ध्या तस्मै सः विश्वासः आयाति। तस्य ब्रह्मप्राप्तौ विद्यायाञ्च औन्मुख्यलक्षणा इच्छा भवत्येव । तथापि पूर्वजन्मार्जितपापकर्मणः प्रभावेण विद्यासाधनभूतश्रवणादिषु प्रवर्तयितुं प्रतिबन्धकं जायते । तेन तस्य रुचिः नोत्पद्यते । इत्थं प्रतिबन्धकनिवारणपुरस्सरं श्रवणादिषु प्रवृत्तिजननाय यज्ञादीनाम् उपयोगः इतिभामतीकाराः वदन्ति ।

इत्थं भामतीकाराणां पक्षे यज्ञेन इतितृतीया श्रुत्या यज्ञादीनां साधनत्वम् अवगम्यते । साधनत्वेन अवगतानां तेषां साध्याकाङ्क्षायां विविदिषा एव साधनत्वेन अन्वेति, विविदिषायाः एव तत्र शब्दतःप्रधानत्वात् इतिनिरूपितम् । तथा च राजपुरुषमानय इत्यादिषु यथा शब्दतःप्रधानस्यैव पदार्थस्य समभिव्याहृतपदार्थान्तरेण अन्वयस्य व्युत्पत्तिसिद्धत्त्वात् इत्याशयेन यज्ञादीनां विविदिषायां विनियोगः उक्तः । तत्र अस्वरसं पश्यन्तःविद्यायां तेषां विनियोगः इतिविवरणाचार्याः प्रतिपादयन्ति । तथा च विवरणकारास्तु कर्मणां विद्यार्थत्वं वदन्ति । तथा च उक्तं 'सर्वाण्येव कर्माणि उत्पत्तिविधिविहितानि । ब्रह्मानुभवकामो यज्ञादीन्यनुतिष्ठेत्' इत्यधिकारान्तरविधिविधेयानि भविष्यन्तीत्याह - विविदिषन्ति यज्ञेन दानेन इत्यादिना । कथं? आत्मतत्त्वापरोक्षानुभवस्तावत् इष्यमाणतया स्वर्गादिवत् भावनासाध्योऽवगम्यते पुरुषार्थत्वात् । तत्र यज्ञादीनाम् इच्छोपसर्जनतया आख्याताभिहितभावनाकरणतया अवगतानां साध्येनैव अन्वयात् यज्ञादीनि ब्रह्मानुभवसाधनानि अवगतानि । ततश्च आत्मानुभवकामो यज्ञादीन्यनुतिष्ठेत् इतिविधिः परिणम्यते '[1] इति।

एतन्मते विधिप्रत्ययैः लिङ् तव्यदादिभिः इष्टसाधनताबोधः जायते । तथा च वेदनतदिच्छयोर्मध्ये प्रत्ययार्थस्य विविदिषालक्षणस्य शब्दतःप्राधान्यं प्रत्ययार्थत्वात् । ततश्च विविदिषाया एव यज्ञादिफलत्वेन अन्वयः इत्यत्र हेतुभूतःयः सामान्यन्यायः राजपुरुषमानय इत्यादौ प्रसिद्धः शब्दतःप्रधानस्यैव समभिव्याहृतक्रियाकारकान्वयः इत्येवं रूपः। तस्मात् न्यायात् 'इच्छाविषयतया शब्दबोध्ये एव शब्दसाधनतान्वयः' इतिस्वर्गकामादिवाक्ये क्लृप्तविशेषन्यायस्य बलवत्त्वं

1 विवरणं ३७

वर्तते । तथा च विधिप्रत्ययेन इष्टसाधनत्वेन अवगतयागादेः इष्टविशेषाकाङ्क्षायां सत्यां शब्दतःप्राधान्याभावेऽपि स्वर्गस्य फलत्वेन अन्वयः क्लृप्तः इत्यर्थः। तथा हि 'यजेत' इत्यस्य यागद्वारा इष्टसाधनं कुर्यात् इत्यर्थःलभ्यते । इष्टञ्च 'स्वर्गकामः' इत्यनेन ज्ञाप्यते । तत्र यद्यपि स्वर्गशब्दस्य अर्थतःप्राधान्यं, न तु शब्दतःप्राधान्यं, तथाऽपि स्वर्ग एव फलत्वेन कल्प्यते । इष्टसाधनतया च सः सम्बद्ध्यते । एवं च इच्छेष्यमाणयोः इष्यमाणं प्रधानं न इच्छा । इच्छेष्यमाणसमभिव्याहारे इष्यमाणस्यैव प्राधान्यं न तु इच्छायाः इतिविशेषन्यायेन सामान्यन्यायस्य बाधः भवति। तस्मात् विविदिषास्थले अपि विद्यायाः एव प्राधान्यम् इतिकर्मणा सह विद्यायाः अन्वयो युक्तः न तु विविदिषया सह ।

तथा च 'इच्छेष्यमाणसमभिव्याहारे इष्यमाणस्यैव प्रधान्यं न तु इच्छायाः' इत्ययं न्यायः विशेषन्यायः । तेन सामान्यन्यायस्य 'प्रकृत्यर्थप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यम्' इत्यस्य बाधो भवति। तथा च 'विविदिषति' इत्यत्रापि प्रत्ययार्थत्वप्रयुक्तं विविदिषायाः शाब्दप्राधान्यं त्यक्त्वा वेदनप्राधान्यमेव आदरणीयम् । किञ्च 'अश्वेन जिगमिषति' 'असिना जिघांसति' इत्यादि लौकिकप्रयोगे 'तदन्वेष्टव्यं तद्वा विविजिज्ञासितव्यं'[1] 'मन्तव्यो निदिध्यासितव्यः'[2] इत्यादिषु वैदिकप्रयोगेषु च अश्वादिरूपसाधनस्य तव्यार्थभूतविधेश्च सन्प्रत्ययाभिहिते इच्छाविषये एव गमनादौ अन्वयः व्युत्पत्तिसिद्धः । तथा च इच्छावाचि सन्प्रत्ययसमभिव्याहृतेष्वेव लौकिकवैदिकप्रयोगेषु प्रत्ययार्थतया प्रधानभूतामपि इच्छाम् उल्लङ्घ्य तद्विषयेष्वेव समभिव्याहृतपदार्थान्तरान्वयः दृश्यते । तस्मात् प्रकृत्यभिहितायां विद्यायाम् एव यज्ञादीनां विनियोगः इति।

अत्रैका शङ्का समुदेतियत् कर्मणां विद्याविनियोगपक्षे विध्यन्तरं किञ्चित् विरुध्येत इति। तथा च विधिः 'त्यजतैव हि तज्ज्ञेयम्' इत्यादि श्रुतौ उक्तस्य कर्मत्यागरूपसंन्यासस्य विद्यासाधनत्वं पीड्येत इति। किञ्च जाबालोपनिषदि उक्तेन 'अथ परिव्राट्' इत्युपक्रम्य 'ब्रह्मभूयाय कल्पते'[3] इत्यन्तेन श्रुत्यन्तरेणापि परिव्राट्शब्दोपात्तसंन्यासस्य ब्रह्मभूयशब्दितब्रह्मसाक्षात्कारहेतुत्वेन उक्तेन श्रुतिवाक्येनापि विरोधः इतिचेन्न । 'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते ।'[4] इत्यादि गीतावचनात् यावद्विविदिषारूपा प्रत्यक्प्रवणता ध्याननिष्ठा वा नोदेति, तावदेव चित्तशुद्ध्यर्थं कर्मानुष्ठेयम् । तदनन्तरं संन्यासः अवलम्बनीयः इतिएतेन ज्ञायते ।

अत्र योगशब्देन चेतश्शुद्धिविविदिषादिरूपप्रत्यक्प्रावणता इत्यर्थः। तथा च रागादिराहित्यरूपचित्तशुद्धिविविदिषा-वैराग्यगुरुदेवताभक्तिलक्षणप्रत्यक्पावण्यजन्मपर्यन्तं कर्मानुष्ठानं कर्तव्यम् इत्यर्थःप्राप्यते । नैष्कर्म्यसिद्धौ उक्तं 'प्रत्यक्प्रवणता बुद्धेः कर्माण्युत्पाद्य शुद्धितः। कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना

1छा. उ. ८-१

2ब्र. उ. २.४.५

3जा. उ. ५

4गीता ६.३

 ISSN: 2320-740X

इव'[1] इति।अर्थात् चित्तशुद्धिद्वारा बुद्धौ विविदिषावैराग्यादिप्रत्यक्प्रावण्यप्राप्त्यनन्तरं कर्मणां प्रयोजनं प्राप्तमित्यतःवर्षाकालस्यान्ते यथा मेघाः अस्तं यान्ति तद्वत् कर्मापि अस्तं गच्छतिइत्यर्थः।

विविदिषायां विनियोगपक्षे विविदिषोदयपर्यन्तमेव यज्ञाद्यनुष्ठानम् इतिस्वीकृतम् । तद्वदेव विद्यायां विनियोगपक्षेऽपि स्वीक्रियते चेत् तयोः भेदः कः इतिशङ्कायाम् उच्यते - यद्यपि उभयमतेऽपि विविदिषापर्यन्तं कर्मणाम् अनुष्ठेयत्वं इतिअनुष्ठानदृष्ट्या न भेदोऽस्ति तथापि फलदृष्ट्या तु भेदः अस्त्येव । विविदिषाविनियोगपक्षे हि यज्ञादिकर्मजनितादृष्टं श्रवणादिषु प्रवृत्तिपर्यन्तां विविदिषाशब्दितां रुचिमुत्पाद्य नश्यति। अदृष्टस्य फलैकनाश्यत्वात् । विविदिषायाः उत्पत्त्यनन्तरं श्रवणादिप्रतिबन्धकदुरिताभावे सतिविविदिषाबलादेव श्रवणादिकं सम्पाद्य विद्यां प्रप्नोति।

विद्यार्थं कर्म अनुष्ठेयम् इतिमते तु विद्यायाः या द्वारभूता विविदिषा तदुत्पत्त्यनन्तरं यद्यपि कर्मत्यागो भवतितथापि यानि श्रवणमनननिदिध्यासनरूपाणि साधनानि मुक्तिरूपफलोत्पादने पर्यवस्यन्ति तेषां साधनानां उपकारकत्वेन कर्म विद्यायाः उत्पादकं भवति। यथा औषधसामर्थ्येन अन्नभक्षणे रुच्युत्पत्तौ सत्यामपि अप्रतिबन्धेन अन्नलाभे तद्भक्षणेन कृशतानिवृतिं प्राप्नोतितदभावे तु तल्लाभाय यतते । यत्ने कृतेऽपि अन्नं न लभते । तदा न कृशतानिवृत्तिं प्राप्नोति। तद्वदत्रापि । तथा च कर्मणां विविदिषार्थत्वपक्षे संस्कारार्थत्वपक्षे च ज्ञानोत्पत्त्यनियमे समानेऽपि विविदिषार्थत्वपक्षे ज्ञानोत्पत्तिःप्रायिकी भवति। संस्कारार्थत्वपक्षे तु ब्रह्मज्ञानयोग्यतामात्रसिद्धावपि विविदिषायाः अपि अनियतत्वेन विद्योत्पत्तिःप्रायिक्यपि न भवतिइतिअनयोरुभयोरपि पक्षयोः भेदः । इत्थं विविदिषार्थं कर्म विद्योदयार्थं कर्म इतिपक्षद्वयं निरूपितम् ।

**Bibliography**:


- सिद्धान्तलेशसङ्ग्रहः, श्रीमदप्पय्यदीक्षितेन्द्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, भागः -१, प्रथमं संस्करणम्, २००५
- सिद्धान्तलेशसङ्ग्रहः, श्रीमदप्पय्यदीक्षितेन्द्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, भागः २, प्रथमं संस्करणम्, २००५
- सिद्धान्तलेशसङ्ग्रहः- श्रीमदप्पय्यदीक्षितेन्द्रः-कन्नडानुवादः-वेदान्तभारती-मैसोर्, प्रथमं संस्करणम्, २००५
- ब्रह्मसूत्रशाङ्करभाष्यम्, भाष्यरत्नप्रभाभामतीन्यायनिर्णयोपेतम्, मोतिलाल् बनार्सिदास्, २००५
- पञ्चपादिका, विवरणव्याख्यासहिता, श्रीपद्मपादाचार्याः, श्रीदक्षिणामूर्तिप्रकाशनम्, वाराणसी, द्वितीयसंस्करणम्, २००९
- उपनिषद्भाष्यम्, भागः-१, सम्पादकः-एस् सुब्रह्मण्यशास्त्री, श्रीदक्षिणामूर्तिप्रकाशनम्, वाराणसी, चतुर्थसंस्करणम्, २०१८


[1]नै. सि. १.४९

- उपनिषद्भाष्यम्, भागः-२, सम्पादकः-एस् सुब्रह्मण्यशास्त्री, श्रीदक्षिणामूर्तिप्रकाशनम्, वाराणसी, चतुर्थसंस्करणम्, २०१८
- उपनिषद्भाष्यम्, भागः-३, सम्पादकः-एस् सुब्रह्मण्यशास्त्री, श्रीदक्षिणामूर्तिप्रकाशनम्, वाराणसी, चतुर्थसंस्करणम्, २०१८
- शारीरकमीमांसाशास्त्रसङ्ग्रहः, सम्पादकः-डा. विश्वनाथ हेगडे, अकिनिक पब्लिकेशन्स्, नई दिल्ली, प्रथमसंस्करणम्, २०१९


*******

 ISSN: 2320-740X

# व्याकरणदर्शने कालशक्तिः

**डा. प्रियव्रतमिश्रः**

सहाचार्यो विभागाध्यक्षश्च स्नातकोत्तरव्याकरणविभागः

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी

**मुख्यशब्दाः –** कालशक्तिः, कर्तृत्वशक्तिः, आवरणम्,विक्षेपः,अविद्या

**सारांशः –**

व्याकरणशास्त्रस्य प्रक्रियादर्शनभेदेन द्वैविध्यम् । प्रक्रियाक्रमे यत्र साध्वसाधुशब्दविचारः प्रवर्त्तते दर्शनक्रमे तत्र शब्दस्य ब्रह्मस्वरूपं प्रतिपाद्य तत्प्राप्त्युपाय उपदिश्यते । तत्र सन्दर्भक्रमेण स्फोटादिविचारं भर्तृहरिनागेशप्रभृतय आचार्या विदेधिरे । भर्तृहरिकृतवाक्यपदीयग्रन्थे ब्रह्मणः अध्याहितकलाभेदाः कालशक्त्या विभिन्नरूपेण परिदृश्यन्ते । जायते, अस्ति, विपरिणमते, वर्धते,ह्रसति, नश्यतिइतिषड्भावविकारा अत्र विशेषरूपेण समालोच्यविषयाः । कथमनेन क्रमेण सृष्टिप्रक्रिया प्रवर्त्तत इतिशोधपत्रस्यास्य विमृश्यविषयः ।

**वाङ्मुखम् –**

साध्वसाधुविचारणाय प्रवर्त्तितमिदं व्याकरणशास्त्र न केवलमैहिकप्रयोजनार्थमृषिभिः समुपादिशि प्रत्युत तद्वारैव पारलौकिकमपि तत्त्वमुदघाटि । ततःशास्त्रस्यास्य प्रस्थानद्वयं प्रक्रियाप्रस्थानं दर्शनप्रस्थानञ्चेति। तत्र प्रक्रियाप्रस्थाने तावत् प्रकृतिप्रत्ययात्मकमन्वाख्यानं प्रावर्त्तिष्ट दर्शनेप्रस्थाने च शब्द एव ब्रह्म तदेवाक्षरं तत एव जगतःप्रक्रिया विवर्त्तरूपेण प्रवर्त्तत इतिप्रतिज्ञातं वैयाकरणशिरोमणिना भगवता भर्त्तृहरिणा वाक्यपदीये । तत्र प्रसङ्गवशात् कालशक्तिविषये विवृतमाचार्येणेत्थम् –

अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।
जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥१

यद्यपि सर्वेऽपि भावविकाराः =कार्याणि स्वस्वकारणाधीनोत्पत्तयः, तथाप्यस्ति तेषां सर्वेषामप्युत्पत्तौ कालशक्तिः सहकारिकारणम् । कालशक्तिश्चैकत्वान्नित्यत्वाच्च सर्वासु तत्तत्कारणशक्तिषु जन्मवतीषु समनुगतेतितत्तत्कारणशक्तिकृतावच्छेदेन क्रमवानिव कालशक्तेरवभासोपगमो लक्ष्यते । तत्तत्कारणशक्तिपरिच्छिन्ना च क्रमवती कालशक्तिः काञ्चित् कारणशक्तिं प्रतिबध्नाति, काञ्चिच्छक्तिं चाभ्यनुजानाति। ततश्च प्रतिभावं क्रमेण वैश्वरूप्यम्= नानारूपत्वमनुभूयते । यथैकस्मिन् वृक्षे किसलयादिवैचित्र्य; एकस्मिन् वा किसलये रक्तत्वमाद्रवादिविशेषाः । कालशक्तिकृते तत्तत्कारणशक्तिप्रतिबन्धाभ्यनुज्ञे च यथा । यथैकस्मिन् वृक्षे प्रथमं किसलयस्याभ्यनुज्ञा पल्लवस्य प्रतिबन्धः, ततःकिसलयस्य प्रतिबन्धः पल्लवस्याभ्यनुज्ञा,अत एवेदं पदार्थानां वैश्वरूप्यम् । तत्तत्कार्याणां तत्तदुपादानकारणशक्तयश्च परतन्त्रा अदृष्टादिरूपजन्मवत्कारणान्तराधीनवृत्तय इतिकालशक्तेर्नित्यत्वात् सदा सन्निधानेऽपि न सदा सर्वकार्यप्रसवःकारणान्तराणां सदाऽसन्निधानात् । इयं च कालशक्तिर्भवतःस्वातन्त्र्याख्या

कर्तृत्वशक्तिः पदार्थानां निष्पादनीयसंहारयोग्यतारूपा । पदार्थानां निष्पादनं च स्वोपादाने कारणात्मनाऽवस्थितानामाविर्भावनम् उत्पत्त्यभ्यनुज्ञारूपम्, उपसंहारश्च तत्रैवोपादाने तिरोभावनरूपःस्थित्युत्पत्त्योर्द्वयोरपि प्रतिबन्धेनेति। सा च भगवतःकालाख्या कर्तृत्वशक्तिरभिन्नापि क्रमवद्भिर्मात्रारूपैः= तत्तत्कारणशक्तिरूपैः मीयन्ते निर्मीयन्ते पदार्था आभिरितिमात्राः शक्तयः प्रविभज्यमाना विकारमात्रगतं भेदरूपं संसर्गात् स्वस्मिन्नध्यारोपितं स्वधिष्ठाने भगवत्यध्यारोपयति। यथा दण्डलेखा उन्मानेन, यः सूत्रद्वारा दण्डलेखासंयोगिनी द्रव्यान्तरस्य परिमेयद्रव्यस्य गुरुत्वप्रतिबन्धः= अधोनयनानुकूलगुरुत्वशक्तिप्रतिबन्धः तत्काले परिमेयद्रव्यगतं परिच्छेदं तत्संयोगेन स्वस्मिन्नध्यारोपितं तुलासूत्रस्थानेऽध्यारोपयति। एवञ्च कालशक्तेरेकत्वेऽपि नानात्वं स्वसंसृष्टतत्तत्कारणशक्तिनानात्वप्रयुक्तं तत्राध्यारोपितेन च नानात्वेन ब्रह्मणो नानात्वमध्यारोपितमित्यायातम् । सर्वाश्च कारणशक्तयो भगवतःस्वातन्त्र्याख्यां कर्तृत्वशक्तिकालाख्यां नातिवर्त्तन्ते,किन्तु तद्वृत्तिमनुपतन्त्येवेतिनियतकाले प्रतिबन्धजन्माभ्यनुज्ञे सर्वेषां भावानामिति। एतच्च सर्वं हर्युपज्ञटीकावृषभदेवकृततट्टीकादर्शनमूलकम् ।

एवं कालभेदे सतिस्वरूपतोऽपूर्वापरस्यापि भावस्याभूदित्यतीतकालरूपेण नाभूदितिभविष्यद्वर्त्तमानकालरूपेण पौर्वापर्यव्यवस्थाविकल्पे सतिकालकृताः सर्वेषामपि भावानां जायते, अस्ति,विपरिणमते,वर्धते,अपक्षीयते,विनश्यतीतिषड्विकाराः=परिणामा भावभेदस्य क्रियाविशेषस्य पच्यादिरूपस्य ब्रह्मरूपसत्ता विकारविशेषस्य योनयोऽतीतभविष्यद्वर्त्तमानरूपैः अपाक्षीत्-पक्ष्यति-पचतीत्यादिरूपैर्ज्ञापककारणानि उपप्लवन्ते= सम्पद्यन्ते । तत्रापक्षयविनाशाभ्यां पूर्वक्रियाया अतीतत्वमपरस्याश्च भविष्यत्वं ज्ञाप्यते । जन्मस्थितिविपरिणामविबुद्धिभिस्तु वर्त्तमानत्वमित्यूह्यम् । एते च षड्भावविकारा जातिसमुद्देशे सत्ताविभागे कात्स्न्र्येन वक्ष्यन्ते । समासार्थस्तु यस्य ब्रह्मणोऽध्याहितकलां स्वसंसर्गिततदुपादानशक्तिभेदेनाध्यारोपितभेदां कालशक्तिमुपाश्रिताः तत्तदुपादानशक्तीनां कारणान्तराधीनवृत्तिकानां सहकारिण्या कालशक्त्याऽभ्यनुज्ञाताः पच्यादिक्रियाणां जन्मादयः षड्भावविकाराः परिणामाः, भावभेदस्य क्रियाविशेषस्य पच्यादिरूपस्य ब्रह्मरूपसत्तासामान्यविकारस्य, योनयः अतीतभविष्यद्वर्त्तमानत्वादिरूपैः= अपाक्षीत्-पक्ष्यति-पचतीत्यादिरूपैः ज्ञाने हेतवो भवन्तीति। महावैयाकरणो हरिवृषभस्तु सतां भावविकाराणां योनय उपप्लवन्त इतिव्याचचक्षे । ननु “सत्ताविकाराणां योनय उपप्लवन्ते” इतिहर्युपज्ञटीकाया वृषभदेवकृतेन क्रियाविशेषाणां पचादीनामितिव्याख्यानेन विरुद्ध्यते । किञ्च कारिकायां “भावभेदस्य” इत्यस्मिन् पदे भेदग्रहणं भावविशेषार्थकं क्रियाविशेषाग्रहणे भावसामान्यग्रहणे च नोपपद्यत इत्यवधेयम् । हरिवृषभस्तु “अव्याहताः कला यस्य” इतिपाठमाश्रित्य अव्याहतास्तत्स्वरूपत्वेन नित्या अपि यस्य कलाः शक्तयः कालशक्तिमाश्रिता भावभेदस्य योनयो भवन्तीत्यन्वय इतिवदन् ब्रह्मणि कलाख्या स्वातन्त्र्यशक्तिर्जन्माद्यनुकूलाश्च शक्तयो नित्याः सन्ति, जन्मादयश्च षड्विकारास्तासां परिणामाः । ते च क्रमवन्तःजन्मादिशक्तीनां नित्यत्वेऽपि कारणान्तराणामपि कालातिरिक्तानामपक्षेपणात्,कारणान्तराणाञ्चानित्यत्वेन सदाऽसन्निधानात् । कालशक्तिश्च सहकारिकारणं जन्मादिशक्तीनाम् । विकारगतं भेदं च कालशक्तावारोप्य कालभेदः । एवं स्वरूपतःपौर्वापर्यरहितस्यापि भावस्य कालशक्त्या पौर्वापर्यव्यवस्थायां कल्पितायां जन्मादयः षड्विकाराः कारणात्मना सतामेव भावानां जातत्वादिव्यवहारे योनयो भवन्तीत्यर्थमभिप्रैति। हर्युपज्ञटीकायां तु

 **ISSN: 2320-740X**

भगवतःकालाख्या शक्तिर्नित्या,सर्वेषां भावानां स्वस्वोपादानादिकारणगताः शक्तयस्त्वनित्याः,आश्रयनित्यत्वात् । तासां सहकारिकारणं कालः । उपादानादिशक्तयश्च कालशक्तिश्च कारणान्तराधीनवृत्तय इतिन सदा जन्मादयः कारणान्तराणां सदाऽसन्निधानात् । जन्मादयश्चोपादानादिशक्तीनां परिणामाः क्रमवन्तः। अत एव परिणामिन्यः शक्तयोऽपि क्रमवत्यः । तासां क्रमरूपैः कालशक्तेरपि तत्संसृष्टायाः क्रमवानिवावभासोपगमो लक्ष्यते ।

एवं क्रमवद्भिः शक्तिरूपैः कालस्य कर्तृशक्तिः प्रविभज्यमाना स्वस्मिन्नध्यारोपितं विकारगतं भेदं स्वाधिष्ठाने ब्रह्मण्यध्यारोपयतीतिरीत्या एकस्यापि ब्रह्मणो नानात्वमितिस्थितम् । एवं सर्वतो भेदप्रतिषेधम्= स्वगतजातीयविजातीयभेदप्रतिषेधं ब्रह्मण्यभिधायाऽभिन्नस्यापि तस्य सर्वतःसर्वत्र भेदव्यवहारहेतुतामाह- एकस्येति।

एकस्यापि सर्वबीजस्य । चोप्यर्थे यस्य ब्रह्मण इयमनुभूयमाना भोक्तृभोक्तव्यरूपेण भोगरूपेण चानेकधा स्थितिविवर्त्तरूपा व्यवहारव्यवस्था इतियोजना । ननूक्तं प्राक् “प्रक्रिया जगतो यतः” इति। ततो गतार्थेयं कारिकेतिचेन्न, यतस्तत्र ब्रह्मणि सर्वोत्पत्तिहेतुता प्रदर्शिता, न तु स्थितिकाले सर्वभेदव्यवहारहेतुता । सा त्वत्र भोक्तृभोक्तव्यभोगव्यवहाररूपनिदर्शनोपन्यासमुखेन प्रदर्श्यते ।

अयं भावः- ब्रह्म यद्यपि एकमेवाम्नातं तथा तत्र भेदाभेदाभ्यां सत्त्वासत्त्वाभ्याञ्चानिर्वाच्या विरुद्धकार्यप्रसवानुमितविरोधा अप्येकस्मिन् ब्रह्मण्यधिष्ठाने यौगपद्येन वृत्तेरविरोधिन्यः शक्तयः सन्ति, “ परास्य शक्तिर्विविधैव श्रूयते” “इन्द्रो मायाभिः पुरुषरूप ईयते” इत्यादिश्रुतिशतेभ्यः । ताभिश्च शक्तिभिर्ब्रह्मणोऽसत्यो रूपप्रविभागः प्रकल्प्यते । तेषु च प्रविभक्तेषु रूपेषु जीवपदाभिधेयेषु भोक्तृभोक्तव्यभोगग्रन्थयोऽनादिभवसञ्चितानुभवजनितवासनाः स्वप्नविज्ञानपुरुषवदबर्हिस्तत्वाः । यथा स्वप्ने दृश्यमाना विज्ञानमयाः पुरुषाः प्रकृतेर्विज्ञानस्यैकत्वात् तदभिन्नाभिन्नस्य तदभिन्नत्वनियम इतिन्यायेनैकत्वमजहतोऽपि मिथो भेदेन दृश्यन्ते व्यपदिश्यन्ते च तद्वत् परस्परविलक्षणा अदृष्टवशाद् भोक्त्रादिरूपै-र्विवर्त्तन्ते । सोऽयं ब्रह्मणो विवर्त्तः तदुपाधिभूतानां तत्तद्वासनानुविद्धानां शक्तीनां तु परिणाम एव । तस्य च ब्रह्मणो ग्रन्थ्यन्तररूपसमतिक्रमेण स्थितानां ग्रन्थीनां वासनानां विवर्त्ते सतीयमनेकधा भोक्त्रादिरूपेण लोके व्यवहारव्यवस्था प्रकल्पत इति। इदं हर्युपज्ञटीकामनुसृत्य व्याख्यातम् । ननु प्राग् ब्रह्मणः परिवृत्ता अर्था इत्युक्तम्, अत्र तु अविद्याया इतिकथमुच्यत इतिचेत् श्रूयताम्- ब्रह्मणो नित्यकूटस्थत्वेनाविकारितया न ब्रह्मणो वस्तुतःपरिवृत्ता अर्थाः किन्तु ब्रह्मणि अध्यस्ताया अविद्याया इतिपरिवर्त्तमानाविद्यासन्निधानेन ब्रह्मणः परिवृत्ता इत्युक्तम् । याऽविद्या लब्धसंस्कारा लब्धप्रबोधा जीवने कृतसाक्षात्कारा स्वात्मनि स्वस्वरूपे नावतिष्ठते । यदाऽविद्यायाः शक्तयो ज्ञानवैराग्यनिरोधसंस्कारादयो लब्धपरिपाका भवन्ति तदानेन परिकल्पितेनात्मना जीवने मिथ्यात्वेन भासनात् स्वरूपप्रच्युतिरिव तस्याः जीवन्मुक्तौ तस्याः प्रारब्धभोगार्थं संस्काररूपेण सत्त्वाभ्युपगमेऽप्यसत्यरूपेणेन्द्रजालव-दवस्थानादिति।

यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः ।
संकीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥
तथेदममृतं ब्रह्म निर्विकारमविद्यया ।
कलुषत्वमिवापन्नं भेदरूपं विवर्त्तते ॥

यथा तिमिरदोषदूषितलोचनः पुरुषो विशुद्धमप्याकाशं चित्राभिर्मात्राभिर्विषयैः संकीर्णमिवाभिमन्यते । मीयन्ते= चक्षुरादिभिः प्रमीयन्ते इतिमात्रा रूपादयो विषयाः तथेदममृतं नित्यं ब्रह्म निर्विकारमप्यविद्यया कलुषत्वमापन्नमिव भेदरूपं भिन्नं विवर्त्तते प्रतीयते ।

**अज्ञानस्यावरणविक्षेपशक्तिमत्त्वम् –**

तत्राज्ञाने आवरणविक्षेपाख्ये द्वे शक्ती वर्तेते । आवरणशक्तिर्ब्रह्मस्वरूपमावृणोतिविक्षेपशक्तिश्चाखिलमिदं जगत् तत्र कल्पयति। तदुक्तं शङ्करभगवत्पादैः–

शक्तिद्वयं हि मायाया विक्षेपाऽऽवृत्तिरूपकम् ।
विक्षेपशक्तिलिङ्गादिब्रह्माण्डान्तं जगत् सृजेत् ॥
अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः ।
आवृणोत्यपरा शक्तिः सा संसारस्य कारणम् ॥२

ननु परिच्छिन्नेनाज्ञानेन कथं ब्रह्मण आवरणसम्भव इतिचेत्, सत्यम् । नह्यज्ञानस्य वस्तुतो ब्रह्मावरकत्वम्, अथापि यथा मेघोऽवलोकयितृनयनपिधायकतयाऽनेकयोजनायतमादित्यमण्डलमाच्छादयन्निव प्रतिभाति, तथाऽज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाऽऽच्छादयन्निव प्रतीयते । तथा चोदाहृता हस्तामलकोक्तिः श्रीमता सदानन्दयतिना –

घनच्छन्नदृष्टिर्घनच्छन्नमर्को यथा मन्यते निष्प्रभं चातिमूढः ।
तथा बद्धवद् भातियो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥३

**अज्ञानस्याश्रयत्वविचारः –**

अद्वैतसिद्धान्तेऽज्ञानस्याश्रयत्वविषयत्वविषये परस्परवैमत्यं दृश्यते । तत्र सर्वज्ञात्ममुनिः –

आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला ।
पूर्वसिद्धतमसो हि पश्चिमो नाऽऽश्रयो भवतिनापि गोचरः ॥४

इत्यज्ञानस्याश्रयो विषयश्च शुद्धचैतन्यमेवेतिपक्षमुपस्थापयति। अज्ञानसिद्ध्युत्तरकाले हि जीवसिद्धिः। अत उत्तरकालिके जीवे न प्राक्तनाज्ञानस्याश्रयत्वं विषयत्वं वा सम्भवतीतिमुनेस्तात्पर्यम् । एतन्मतानुसारेण "अहमज्ञः" इतिजीवे प्रतीयमानस्याज्ञानस्य नाऽहङ्कारविशिष्टं चैतन्यमाश्रयः किन्त्वहङ्कारोपहितं शुद्धचैतन्यमेवेतिविज्ञेयम् । एवं शुद्धचैतन्याश्रितमप्यज्ञानं स्वकृतसंसारबन्धनं जीव एव समुत्पादयति, उपाधेः प्रतिबिम्बपक्षपातित्वात् । तदुक्तं मुनिना –

सुकृतदुष्कृतकर्मणि कर्त्तृतां मतिगतात्मचितिप्रतिबिम्बकम् ।
व्रजतितद्वददः परमात्मनो जगतियातितमः प्रतिबिम्बकम् ॥५

 ISSN: 2320-740X

श्रीवाचस्पतिमिश्राः – “नाविद्या ब्रह्माश्रया किन्तु जीवे । सा त्वनिर्वचनीया६ विद्यास्वभावे ब्रह्मणि तदनुपपत्तेः”७ इत्यादिस्थलेष्वज्ञानस्य जीवाश्रितत्वं च प्रतिपादयामासुः । अत्राऽऽध्यासिकसम्बन्धेन ब्रह्मणि विद्यमानमप्यज्ञानमाच्छाद्यतासम्बन्धेन जीव एव वर्त्तते न तु ब्रह्मणि । “ नास्ति ब्रह्म न भातिब्रह्म” इत्यसत्त्वाऽऽपादकाऽभानाऽऽपादकयोरावरणयोर्जीव एव सम्भवाज्जीवाश्रया ब्रह्मपदा ह्यविद्या इतिकथयतां श्रीमिश्रमहाभागानामाशयः ।

**अज्ञानस्य माया-अविद्याभेदेन द्वैविध्यम् –** इदं चाज्ञानं “माया चाविद्या च स्वयमेव भवति”८ इतिश्रुत्या माया अविद्या चेतिद्विविधं भवति। तत्र रजस्तमोभ्यामनभिभूतशुद्धसत्त्वगुणप्रधानतया “माया” इतिरजस्तमोभ्यामभिभूताऽशुद्धसत्त्वगुणप्रधानतया च “अविद्या” इतिकथ्यते । इमे एव मायाऽविद्ये समष्टिज्ञानं व्यष्टिज्ञानमितिच व्यवह्रियते ।तत्र समष्टिज्ञानरूपा माया विक्षेपांशप्रधाना व्यष्टिज्ञानरूपाविद्या चावरणांशप्रधानेतिप्रतिपाद्यते । एतादृशशुद्धसत्त्वप्रधानमायोपाधिना च पूर्वोक्तब्रह्मचैतन्यमेव “ईश्वरः” इतिमलिनसत्त्वप्रधानविद्योपाधिना “जीवः” इत्याख्यायते । तत्र मायोपाधेः शुद्धत्वादीश्वरः सर्वज्ञत्वादिगुणयुक्तः अविद्योपाधेरशुद्धत्वाच्च जीवोऽल्पज्ञत्वादिगुणयुक्तः । तदुक्तं सदानन्दयतिना- “इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना । एतदुपहितं चैतन्यं सर्वज्ञत्व-सर्वेश्वरत्व-सर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्वर इतिच व्यपदिश्यते, सकलाज्ञानावभासकत्वात्....इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना । एतदुपहितं चैतन्यम् अल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ९ इत्युच्यते एकाज्ञानावभासकत्वात्१० इति।

**सन्दर्भाः –**

**1.** वा.ब्र.३ **2.** वा.सु.श्लो.१३,१५ **3.** वे.सा.पृ.१४

**4.** सं.शा.१.३१९ **5.** सं.शा. १.३२१ **6.** ब्र.सू.भा.१.१.४

**7.** ब्र.सू.भा.१.४.३ **8.** नृसिंहखडे ९ **9.** वै.सा.विद्वन्मनोरञ्जिनी

**10.** वे.सा.पृ. ९-११

**परामृष्टाः ग्रन्थाः –**

१.वाक्यपदीयम् – भर्तृहरिः - सम्पा.सूर्यनारायणशुक्ल- २००६- चौ.सं.संस्थान,वाराणसी

२. व्याकरणदर्शनस्य प्रतिमा – श्रीरामाज्ञापाण्डेयः – १९७६- सं.सं.वि.वि.वाराणसी

३.संस्कृतव्याकरणदर्शन- डा.रामसुरेशत्रिपाठी- १९७२- राजकमल प्रकाशन,दिल्ली

४. संस्कृत व्याकरण का उद्भव – श्री सत्यकामवर्मा – १९७१- स्नातकोत्तरसाध्यविकाससंस्थान,दिल्ली,वि.वि.

*******

# इदुदुपधस्य चाप्रत्ययस्य

**डा. प्रमोदभट्टः**

सहायकाचार्यः, व्याकरणविभागः

केन्द्रीयसंस्कृतविश्वविद्यालयः

राजीवगान्धीपरिसरः, शृङ्गेरी - ५७७१३९

**लेखनोपयुक्ताः मुख्यबिन्दवः-**

अनुवृत्तिः, सूत्रार्थवर्णनम्, उदाहरणे सूत्रार्थसमन्वयः, सूत्रार्थविचारः, अनुवृत्तिः, सूत्रार्थवर्णनम्, उदाहरणे सूत्रार्थसमन्वयः, केचित्तुकाराणां मतम्, अपरे काराणां मतम्, भोभोगोअघोअपूर्वस्य योऽशि इतिसूत्र भाष्यवर्णनम्, किं च पञ्चकप्रतिपादनम् –

**सारांशः -**

"इदुदुपधस्य चाप्रत्ययस्य" इतिसूत्रं कुत्र पठितम्, कतिपदात्मकम् इदं सूत्रम्, सूत्रे विद्यमानानां समासघटकपदानां समासः कः ? इतिविचारः आदौ कृतः अत्र प्रबन्धे । तदनन्तरं सूत्रघटकीभूतम् उदाहरण उक्त्वा उदाहरणे सात्र समन्वयः कृतः । सूत्रे विद्यमानानां दलकृत्यं प्रादर्शि । एतत्सूत्रविषये बहवः विप्रतिपद्यन्ते अतः तेषां मतम् अन्ये, अपरे, केचित्तु इत्येवं तेषाम् आशयः उपवर्णितः वर्तते । अत्र सूत्रे प्रौढमनोरमाव्याख्यानभूते शब्दरत्ने पञ्च वारं किञ्च इतिपदं प्रयुक्तं तस्य च नाम किञ्च पञ्चकमितिप्रसिद्धम् । अतः किञ्च पञ्चकविचारः विस्तृतेन कृतः वर्तते । अन्ते मातुः कृपा इत्यत्र षत्त्वं कुतो न भवतिइतिविचारः उपवर्णितः ।

**अनुवृत्तिः, सूत्रार्थवर्णनम्, उदाहरणे सूत्रार्थसमन्वयः, सूत्रार्थविचारः, अनुवृत्तिः, सूत्रार्थवर्णनम्, उदाहरणे सूत्रार्थसमन्वयः-**

इदुदुपधस्य चाप्रत्ययस्य इतिसूत्रमिदम् अष्टाध्याय्याम् अष्टमाध्याये तृतीयपादे एकचत्वारिंशत्तमं सूत्रम् वर्तते । त्रिपदम् इदं सूत्रम् । इदुदुपधस्य च अप्रत्ययस्य इतिपदच्छेदः । इदुदुपधस्य इतिषष्ठी-विभक्ति-एकवचनम् । इच्च उच्च इदुतौ इति"चार्थे द्वन्द्वः"[1] इतिसूत्रेण इतरेतरयोगद्वन्द्वसमासः । इदुतौउपधे यस्य सः इदुदुपधः "शेषो बहुव्रीहिः"[2] इतिसूत्रेण बहुव्रीहिसमासः । तस्य इदुदुपधस्य । च इत्यव्ययम् । अप्रत्ययस्य इतिषष्ठी-विभक्ति-एकवचनम् । न प्रत्ययः अप्रत्ययः इति"नञ्"[3] इतिसूत्रेण नञ्तत्पुरुषसमासः । "कुप्वोः कःपवौ च"[4] इतिसूत्रात् कुप्वोः इति"विसर्जनीयस्य सः"[5]

1 पा. सू-२-२-२९

2 पा. सू-२-२-२३

3 पा. सू-२-२-०५

4 पा. सू-८-३-१७

5 पा. सू-८-३-३४

 ISSN: 2320-740X

इतिसूत्रात् विसर्जनीयस्य इति"ईणः षः"[1] इतिसूत्रात् षः इतिप्रथमान्तं पदम् अनुवर्तते । इदुदुपधस्य इतिविसर्जनीयस्य इत्यस्य विशेषणम् । एवं च अस्य सूत्रस्य अर्थः इत्थं फलतिइकारोकारोपधस्य अप्रत्ययस्यविसर्गस्य षः स्यात् कुप्वोः परयोः इति। निष्प्रत्यूहम्, आविष्कृतम्, दुष्कृतम् इतिउदाहरणानि । निष्प्रत्यूहम् इत्यत्र प्रत्यूहः नाम विघ्नः, तस्याभावः निष्प्रत्यूहम् । अत्र अर्थाभावे "अव्ययं विभक्ति-समीप-समृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रति- शब्दप्रादुर्भावपश्चाययथानुपूर्व्य - यौगपद्यसादृश्य- सम्पत्तिसाकल्यान्तवचनेषु"[2] इत्यनेन समासः । निर् प्रत्यूहम् इत्यवस्थायां निरः रेफस्य "खरवसानयोर्विसर्जनीयः"[3] इतिविसर्गे "कुप्वोः कप्वौ च"[4] इत्यनेन उपध्मानीये चाद्विसर्गे च प्राप्ते "इदुदुपधस्य चाप्रत्ययस्य"[5] इतिसूत्रनिमित्तसत्त्वात् षत्वे निष्प्रत्यूहम् इतिरूपसिद्धिः । एवमेव आविष्कृतम्, दुष्कृतम् इत्यादावपि दृष्टव्यम् । सूत्रे इदुदितिपदाभावे उपधा इतिपदस्याप्यभावात् अप्रत्ययस्य इत्येव यदि सूत्रं स्यात् तदा यस्य कस्यापि शब्दस्वरूपस्य प्रत्ययविसर्गभिन्नस्य षत्त्वापत्तिर्दोषः । यथा गीः करोति, पूः करोतिइत्यादौ । गीः करोतिइत्यत्र तावत् "गॄ = निगरणे"[6] इतिधातोः "क्विप्च"[7] इतिसूत्रेण क्विपि "ॠत इद्धातोः"[8] इतिईत्त्वे रपरत्त्वे उपधादीर्घे च गीर् इतिरूपम् । अत्र श्रूयमाणः विसर्गः प्रत्ययभिनधातोः विसर्गः इतिकृत्त्वा अत्रापि षत्वापत्तिर्दोषः । तद्वारणाय इदुदिति। इदुदितिसत्त्वे उपधाग्रहणमपि कर्तव्यमेव । एवमेव "पॄ = पालनपूरणयोः"[9] धातोः निष्पन्नस्य पूः करोतिइत्यत्रापि दृष्टव्यम् ।

अत्र इदुतौ उपधे यस्य समुदायस्य तस्यावयवो यः विसर्गः इतिवैयधिकरण्येन सम्बन्धः । अप्रत्ययस्य इत्यत्र "सम्भवतिसामानाधिकरण्ये वैयधिकरण्यस्य अन्यायत्वात्" इतिन्यायेन अप्रत्ययो यः विसर्गः इतिसम्बध्यते ।

ननु विसर्गस्य प्रत्ययत्वं न प्रसिद्धमिति चेन्न, अग्निः करोति इत्यादौ विसर्गस्य स्थानिवद्भावेन विसर्गस्य स्थानिवत्त्वं सिद्ध्यति।

## केचित्तुकाराणां मतम् -

अत्र केचित् सूत्रे अप्रत्ययस्य इत्यत्र प्रत्ययस्य यः विसर्गः न भवतितस्यैव षत्त्वं कुप्वोः परयोः इत्येवार्थः आकरे स्थितः । अप्रत्ययो यः विसर्गः इतिसामानाधिकरण्येनान्वयः न युक्तः इतिवदन्ति । तेषामयमभिप्रायः "इसुसोः सामर्थ्ये"[10] इत्यस्ति षत्वविधायकम् एकं सूत्रम् । अत्र सामर्थ्यं नाम व्यपेक्षारूपं सामर्थ्यम् । तस्यायमर्थः इसुसोर्विसर्गस्य

1 पा. सू-८-३-३९

2 पा. सू-२-१-६

3 पा. सू-८-३-१५

4 पा. सू-८-३-१७

5 पा. सू-८-३-४१

6 पा. धा. पा. भ्वादिः

7 पा. सू-३-२-६८

8 पा. सू-७-१-१०३

9 पा. धा. पा. भ्वादिः

10 पा. सू-८-३-४४

षः स्याद्वा कुपोः परयोः इति। सर्पिष्करोति, सर्पिः करोतिइतितदुदाहरणम् । अत्र उदाहरणे विकल्पेन षत्त्वं सिद्ध्यतिचेदपि तिष्ठतु सर्पिः पिबत्वम् उदकम् इत्यत्र व्यपेक्षासामर्थ्याभावात् "इसुसोः सामर्थ्ये"[1] इतिवैकल्पिकषत्त्वाप्राप्ते "इदुदुपधस्य चाप्रत्ययस्य"[2] इत्यनेन नित्यं षत्त्वं प्रसज्येत । सर्पिः इत्यत्र श्रूयमाणः विसर्गः प्रत्ययस्य विसर्गः न । भाष्यमते उणादिनिष्पन्नानाम् अव्युत्पत्तिपक्षाश्रयणेन षत्त्वमिष्टमेव इतिचेत् व्युत्पत्तिपक्षाश्रयणे दोषतादवस्थ्यात् । सर्पिष्करोतिइतिउदाहरणेन व्युत्पत्तिपक्षस्यैव वार्तिककारेण स्वीकृतत्त्वानुमानात् ।अन्यथा "इदुदुपधस्य चाप्रत्ययः"[3] इत्यनेनैव व्युत्पत्त्यव्युत्पत्तिपक्षद्वयभेदेन षत्वविकल्पसिद्धौ "इसुसोः सामर्थ्ये"[4] इत्युदाहरणदानस्य अप्रसङ्गापत्तिर्दोषः स्यात् । अपि च तिष्ठतु सर्पिः पिब त्वम् उदकम् इत्यादौ "इदुदुपधस्य चाप्रत्ययस्य"[5] इतिषत्त्वस्य इष्टत्त्वे "कस्कादिषु च"[6] इतिकस्कादिगणे सर्पिष्कुण्डिकाशब्दः असमासे व्यपेक्षाविरहेऽपि षत्वार्थ इतिकौमुदीग्रन्थविरोधः स्यात् ।

## अपरे काराणां मतम्

अत्र अपरे "इदुदुपधस्य चाप्रत्ययस्य"[7] इतिसूत्रस्य स्थाने "इदुद्भ्याम् उत्तरस्य" इतिवक्तव्ये इदुदुपधस्य इतिउपधाग्रहणसामर्थ्यात् नित्यं यः इदुदुपधः तस्यैव विसर्गस्य षत्त्वं यथा स्यात् कविभिः कृतमित्यादौ षत्त्वं मा भवतु इत्येतदर्थम् । यतः भिसः विसर्गस्य नित्यम् इदुदुपधत्त्वं नास्ति । रामैः इत्यादौ ऐसा भिसः अपहारात् इतिवदन्ति ।

तन्न युज्यते कुतः इत्युक्ते अग्निः करोतिइत्यादौ षत्त्वनिषेधोदाहरणस्याप्रसङ्गतापत्तिः स्यात् । देव इत्यत्र अकारोपधः, प्रियचत्वा इत्यादौ आकारोपधत्वेन चतुष्कपालः इत्यादौ इदानीं षत्त्वं न स्यात् । अतः अत्र केचिदितिमतन्न युक्तम् ।

अन्ये तावत् "अप्रत्ययस्य यः विसर्जनीयः न भवति" इतिव्याख्याने तु उक्तोदाहरणे षत्वस्याप्रवृत्तेः उपधा इत्येतत् सुत्यजम् इतिआहुः । स्थानिवद्भानेन प्रत्ययत्वं वक्तुं शक्यते इतिचेत् न शक्यते । कुत इतिचेत् अनल्विधौ इत्यस्य स्थानिभूतः स्थान्यवयवश्च यो अल् तद्वृत्तिधर्मात्मके कर्तव्ये स्थानिवद्भावो न इत्यर्थकत्वेन स्थानिवद्भावेन सुस्थानिकरोरवयवरेफस्थानिकविसर्गस्य प्रत्ययत्वस्य वक्तुमशक्यत्वात् । अत्र "भोभगोअघोअपूर्वस्य योऽशि"[8] इतिसूत्रभाष्यं प्रमाणम् । "भोभोगोअघोअपूर्वस्य योऽशि"[9] इत्यस्य अयमर्थः एतत्पूर्वस्य रोरुयादेशः स्यात् अशि परे इति। देवा इह इत्यादि उदाहरणम् । अत्र भाष्ये तावत् अश्ग्रहणम् अनर्थकम् । किं कारणम् ? अशोऽन्यत्र खरि परे

1 पा. सू-८-३-४४

2 पा. सू-८-३-४१

3 पा. सू-८-३-४१

4 पा. सू-८-३-४४

5 पा. सू-८-३-४१

6 पा. सू-८-३-३१

7 पा. सू-८-३-४१

8 पा. सू-८-३-१७

9 पा. सू-८-३-१७

 ISSN: 2320-740X

"खरवसानयोर्विसर्जनीयः"[1] इतिविसर्गेण रोरपहारात् अशि परत एव यत्त्वप्रसङ्गः ।

**भोभोगोअघोअपूर्वस्य योऽशि इतिसूत्र भाष्यवर्णनम्**

ननु वृक्षस्तत्र प्लक्षस्तत्र इत्यत्र यत्वप्रसङ्गः इतिचेत् अत्र विसर्गस्थानिभूतरेफस्य अल्त्वेन अनल्विधावितिनिषेधात् यत्त्वं नास्ति तथा च अश्ग्रहणं व्यर्थम् । एवं तर्हि छन्दःसु, पयःसु इत्यत्र यत्त्ववारणाय अश्ग्रहणम् आवश्यकम् । तत्र हि "रोः सुपि"[2] इतिविसर्गः तत्र विसर्गस्थानिनः रोः अनल्त्वात् स्थानिवद्भावेन रुत्वात् यत्त्वं भवतिइतिचेत्, न भवतिकुतः? अयमपि अल्विधिः, तथा हि "रोः सुपि"[3] इत्यत्र "रो रि"[4] इत्यस्मात् रः इत्यनुवर्त्य रो रः विसर्गो भवतिइत्युक्त्वा चन्दःसु इत्याद्यर्थम् अश्ग्रहणं नावश्यकम् इत्युक्त्वा तर्हि अश्ग्रहणम् उत्तरार्थम् इति समाहितम् । यदि अल्मात्रवृत्तिधर्मस्य स्थानिवद्भावो न इत्युच्यते तदा रः इतिअनुवृत्तावपि रुत्वस्य अल्मात्रधर्मत्वाभावात् स्थानिवद्भावेन यत्त्वप्राप्त्या अश्ग्रहणस्यातिव्याप्तिवारणार्थम् आवश्यकत्वात् उत्तरार्थं भविष्यतीतिभाष्यमसङ्गतं स्यात् । यदि स्थानिनि अल्वृत्तिधर्माश्रयके, स्थान्यवयवाल्वृत्तिधर्माश्रयके कार्ये कर्तव्ये स्थानिवद्भावो न इत्युच्यते तदा अश्ग्रहणम् उत्तरार्थं भविष्यतीतिसङ्गच्छते । अतः प्रत्ययपदं प्रत्ययसम्बन्धिपरम् इतिवक्तव्यम् । तथा च अप्रत्ययस्य इत्यस्य प्रत्ययसम्बन्धिभिन्नस्य इत्यर्थः ।

## किं च पञ्चकप्रतिपादनम् -

किं च प्रत्ययभिन्नस्य विसर्गस्य इतिउच्यमाने अप्रत्ययस्य इतिवचनं गुरुभूतं स्यात् । यतः त्वदुक्तरीत्या प्रत्ययरूपो विसर्गश्चेत् सुस्थानिक एव न अन्यस्थानिकः । तथा च असोः इत्येव सिद्धे अप्रत्ययस्य इतिवचनं गुरुभूतं स्यात् । किं च "नित्यं समासे अनुत्तरपदस्थस्य" इतिसूत्रे अनुत्तरपदस्थस्य इतिव्यर्थं स्यात् । परमसर्पिःकुण्डिका इत्यत्र षत्त्ववारणाय तद्ग्रहणं क्रियते । यदि प्रत्ययभिन्नस्य इत्युच्यते तदा तत्रत्यविसर्गस्य प्रत्ययभिन्नत्त्वात् अनेन षत्त्वं स्यात् । यदि प्रत्ययसम्बधित्त्वं स्वीक्रियते तदा अत्रत्यविसर्गस्य प्रत्ययसम्बन्धित्वात् षत्त्वं न भवति।

किं चैवं "नित्यं समासे अनित्तरपदस्थस्य"[5] इतिसूत्रभाष्यासङ्गतिः । तत्र भाष्ये अथाव्युत्पन्नं प्रातिपदिकं सर्पिरादि ततो नित्ये प्राप्ते इसुसोः इतिविभाषा आरभ्यते इत्युक्तम् । अत्र अथ इतियद्यर्थकः । यदि सर्पिरादीनाम् अव्युत्पन्नत्त्वं स्वीक्रियते तदा प्रत्ययभिन्नत्त्वादनेन षत्त्वे प्राप्ते इसुसोः इतिविभाषा आरभ्यते इतितस्यार्थः । यदि प्रत्ययभिन्नविसर्गस्य इतिस्वीक्रियते तदा व्युत्पत्तिपक्षेऽपि प्रत्ययभिन्नत्त्वेन नित्यं षत्त्वप्राप्त्या अथाव्युत्पन्नमित्यादि असङ्गतं स्यात् । तथा च अत्र प्रत्ययपदं प्रत्ययसम्बन्धिपरम् । अत एव कविभिः कृतम् इत्यत्र षत्त्वं न भवति।

ननु अप्रत्ययस्य इत्यस्य प्रत्ययसम्बन्धिभिन्नस्य इतिव्याख्याने मातुः करोतिइत्यत्र षत्त्वापत्तिः । तथा हि - मातृ

---

1 पा. सू-८-३-१५

2 पा. सू-८-३-१६

3 पा. सू-८-३-१६

4 पा. सू-८-३-१४

5 पा. सू-८-३-४५

इत्यस्मात् ङसि प्रत्यये "ऋत उत्"[1] इतिऋकाराकारयोः स्थाने उकारे एकादेशे रपरत्त्वे "रात्सस्य"[2] इतिसलोपे रेफस्य विसर्गे मातुः इतिरूपम् । मातृ अस् इत्यवस्थायां सकारसन्निधौ अकारस्य प्रत्ययत्त्वं नास्ति, प्रत्ययत्त्वस्य अस् इतिसमुदायनिष्ठत्वात् । अकारस्य उत्त्वेन अपहारे शिष्टस्य सकारस्य प्रत्ययत्त्वमस्ति । स तु "रात्सस्य"[3] इत्यनेन अपहृतः। तथा च उरः प्रत्ययत्त्वाभावेन विसर्गस्य तत्सम्बन्धित्त्वं नास्ति ।

ननु "अन्तादिवच्च"[4] इत्यस्य पूर्वपरयोः समुदायस्य अन्तादिभ्यां वर्णाभ्यां पृथगवस्थिताभ्यां ये व्यवहाराः प्रत्ययत्वादयः ते एकादेशविशिष्टस्यापि भवन्ति इत्यर्थकत्त्वात् परादिवद्भावेन उर्स् इत्यत्र प्रत्ययत्त्वे, सलोपे, एकदेशविकृतन्यायेन उर् इत्यस्य प्रत्ययत्वम् अस्ति इतिचेत् त्रिपाद्याः असिद्धत्वात् षत्त्वस्य त्रिपादिस्थत्त्वेन "अन्तादिवच्च"[5] इत्यस्य अप्रवृत्तिः । षत्त्वे कर्तव्ये स्थानिवद्भावेन उर् इत्यस्य न प्रत्ययत्वम्,उपात्तस्थानिनो अकारस्य प्रत्ययत्वाभावात् स्थानिवद्भावेन प्रत्ययत्त्वस्य अतिदेष्टुमशक्यत्त्वात् ।

ननु उकारस्य अप्रत्ययत्वेऽपि सकारोपस्थितिकाले विद्यमानं तत्सम्बन्धित्त्वम् आदेशानन्तरमतिदेष्टुं शक्यते इतितादृशातिदेशस्य अशास्त्रीयत्त्वात् । तथा च विसर्गस्य प्रत्ययसम्बन्धित्त्वात् अनेनैव षत्त्वे प्राप्ते कस्कादिगणे भ्रातुष्पुत्रशब्दपाठः व्यर्थः सन् ज्ञापयतिएकादेशशास्त्रनिमित्तकस्य न षत्त्वम् इति।तेन भ्रातुष्पुत्रः इत्यत्र विसर्गस्य एकादेशशास्त्रनिमित्तकत्त्वात् षत्त्वं न स्यात् । अतः अत्र गणे पाठः । तेन मातुः करोतिइत्यादौ षत्त्वं न । वस्तुतः त्रिपाद्याम् "अन्तादिवच्च"[6] इत्यस्य प्रवृत्तिरस्तीतिज्ञापनम् । तथा सतिपरादिवद्भावेन उर्स् इत्यस्य प्रत्ययत्त्वे, सलोपे, उर् इत्यस्य प्रत्ययत्त्वे रेफस्थानिकविसर्गस्य तत्सम्बन्धित्त्वे षत्त्वे अप्राप्ते अत्र तस्य पाठः सार्थको भवति। तथा च मातुः कार्यम् इत्यत्र विसर्गस्य प्रत्ययसम्बन्धित्वात् षत्त्वं न भवति। त्रिपाद्याम् "अन्तादिवच्च"[7] इत्यस्य प्रवृत्तौ क्षीरपेण इत्यादौ पूर्वान्तवद्भावेन पे इत्यस्य एकाजुत्तरपदत्त्वे णत्त्वं सिद्ध्यतिइति।

**उपयुक्तग्रन्थसूची**


| | | | |
|---|---|---|---|
| १. वैयाकरणसिद्धान्तकौमुदी | भट्टोजिदीक्षितः | चौखम्बा सुरभारतिप्रकाशनम् | १९८१ |
| २. पाणिनीयाष्टाध्यायी | पाणिनिः | दीक्षितपुष्पया-आरचिता | २००८ |
| ३. पाणिनीयधातुपाठः | पाणिनिः | चौखम्बा सुरभारतिप्रकाशनम् | २०१२ |
| ४. प्रौढमनोरमा | भट्टोजिदीक्षितः | चौखम्बा सुरभारतिप्रकाशनम् | २००५ |
| ५. प्रौढमनोरमाशब्दरत्नम् | भट्टोजिदीक्षितः | चौखम्बा सुरभारतिप्रकाशनम् | २००७ |


1 पा. सू-६-१-१११

2 पा. सू-८-२-२४

3 पा. सू-८-२-२४

4 पा. सू-६-१-८५

5 पा. सू-६-१-८५

6 पा. सू-६-१-८५

7 पा. सू-६-१-८५

 ISSN: 2320-740X

६. लघुशब्देन्दुशेखरः नागेशभट्टः चौखम्बा सुरभारतिप्रकाशनम् २००३
७. भूषणसारः कौण्डभट्टः चौखम्बा सुरभारतिप्रकाशनम् २००९
८. बालमनोरमा वासुदेवदीक्षितः चौखम्बा सुरभारतिप्रकाशनम् १९९९
९. तत्त्वबोधिनी जिनेन्द्रभिक्षुः चौखम्बा सुरभारतिप्रकाशनम् २०००
१०. काशिका वामनजयादित्यौ चौखम्बा सुरभारतिप्रकाशनम् २००३

*******

# Asyavāmīya Sukta: An Overview

**Arya S Vijayan**

Assistant Professor in Sanskrit

Ayurveda College, Coimbatore

**Key words :**

Ṛgveda, Dhīrghatamaḥ, Philosophy, Natural phenomena, Chariot

**Abstract :**

Asyavāmīya sukta is a very important hymn in Ṛgveda. In it we can see the relationship b/w the individual soul and the supreme soul. There are lot of beautiful descriptions in this hymn. Most of them are symbolical and the words in them possess some indirect meanings. There are many descriptions of chariot and wheel. They represent the time. Description of natural phenomena is also there. The famous dvā suparṇa mantra is present in this mantra. This hymn shares the thought of oneness to mankind.

**Introduction :**

The Vedas are an invaluable source of information about the value of ancient Indian Culture. There are four Vedas. They are Ṛgveda, Yajurveda, Sāmaveda and Atharvaveda. There are 10 mandas and 1028 hymns in Ṛgveda. The one sixty fourth hymn of the first mandala of Ṛgveda is known as Asyavāmīya Sūkta. It is an important hymn in Ṛgveda. The first mantra in the Asyavāmīya Sūkta begins with the word 'Asyavāmasya'. Therefore, this hymn is also known as Asyavāmasya Suktam and Asyavāmīya Sūktam. The seer of this hymn is Dhīrghatamaḥ. Hence, this hymn also known as Dhīrghatamasūkta. Visvadevas are addressed in this hymn. In this hymn, Sacrifice is portrayed as a divine institution by seer Dīrghatamas. He has pointed out his ignorance in this hymn. At the same time, he also clarifies his view of the relationship b/w the soul and the supreme.

**First mantra of Asyavāmīya Sūkta**

In the first mantra of Asyavāmīya sūkta, Vāyu and Agni are depicted as three brothers. The oldest of these is Sūrya. He lives in the heaven. Agni is the youngest brother. Agni dwells on the earth. The parents of all three are Dyau and Pṛthvi. Sūrya is portrayed as the father of seven sons. These seven sons symbolize seven rays of Sūrya. They are in seven colours. According to this mantra, the Sun is the protector of the earth. Without the presence of the Sun, there would be no life on earth. Here in this mantra the Vāyu is addressed as middle brother. This is because the Sky is governed by the Vāyu. The position of the Vāyu is b/w the heaven and the earth. The Vāyu helps to produce rain. He joins the Sun and transmits the Sun's rays to the earth. They also absorb water. Vāyu is like a thread that connects various parts of the universe. Vāyu is present in everywhere. Vāyu is subtle. We cannot see the Vāyu.

Agni is depicted here as the third brother. He gives his power to the Sun during the day and receives the power of the Sun at the night. Agni is the Ghṛtapṛṣtha. Ghṛta means ghee and water. Agni carries on his back the ghee offered as an oblation. The word ghṛta can also be used to mean the shining things. Here the ghee also means the flames of Agni.

**Description of Chariot and wheel**

In Asyavāmīya Sukta, we can see many descriptions of Chariot and wheel. The seer used them as symbols to elaborate philosophy. There is a description in this hymn in which seven horses are yoked in a one-wheel chariot. A horse with seven names draws it alone. The wheel of the chariot has three axles. It is indestructible. This chariot is the chariot of the Sun. The horse with the seven names in it indicates Vāyu. Vāyu has seven forms. The horse that draws the chariot is the Vāyu. This description symbolizes the process of controlling the movements in the sky by Vāyu.

The wheel in this chariot represents the year. Chariot belongs to the Sun. The seven horses represent seven rays of the Sun. The Sun's chariot moves the time wheel. At the same time, these seven horses represent the seven seasons. Seven horses, drawing the chariot indicate how the Sun operates the seasons with his time wheel. The Sun's chariot makes the time wheel to move. The axles represent morning, noon and evening. These

three axles also symbolize the three time periods past, present and future. According to this mantra, time is deathless.

सप्त युंजंतिरथमेकचक्रमेको अश्वो वहतिसप्तनामा ।

त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ॥ (RV 1.164.2)[1]

The rotation of the time wheel is also depicted in this hymn. Sun rules the chariot with seven wheels using seven rays. This chariot is drawn by Seven horses. Seven sisters sit on it and travel. Seven forms of speech are located in this chariot. If we consider time as this chariot, we can understand that the seven rays represent the seven seasons. Seven wheels represent seven seasons. Seven horses represent all the activities of seven seasons.

In this hymn, it is said that the twelve spoked wheel of truth is spinning on Sky. It is indestructible. Agni lives in it with her seven hundred and twenty children. It gives the Sun the form of truth. Twelve spokes denote twelve months in a year. The indestructible wheel mentioned here represents the time wheel. In this mantra, the Sun is addressed as Agni. Seven hundred and twenty children symbolize three sixty days and three sixty nights in a year. The solar region is imagined as a wheel and the twelve months are depicted as the twelve spokes of that wheel.

सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहंति।

सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा ॥ (RV1.164.14)[2]

In this mantra, the indestructible wheel is described. That wheel keeps revolving again and again. At the top of it, ten people are doing their duties. It includes five lōkapālā-s and five varnas. Indra, Yama, Varuna, Soma and Brahma are known as five lōkapālā-s. Five Varnas are Brāḥmaṇa, Kṣatriya, Vaiśya, Śūdra and Niṣāda. They hold this world by performing their deeds. It is described here that the eyes of the Sun are filled with water. This description symbolizes the solar orbitory which filled with water.

**Description of Natural phenomena**

In Asyavāmīya  Sukta we can identify certain descriptions of natural phenomena. The Sun's rays spread everywhere. Those rays nourish the world. He pours rain to the world. His rays absorb water and return it to the earth as rain. The Sun resides in a

 ISSN: 2320-740X

world beyond the phenomenal world. The Sun gives light and heat to the world and returns tohis abode where he resides in his unmanifested form.

मा॒ता पितरमृत आ बभाज धीत्यग्रे मनसा सं हि जग्मे ।
सा बीभत्सुर्गर्भरसा निविद्धा नमस्वंत इदुपवाकमीयुः ॥ (RV1.164.8)[3]

Mother earth worships Father Sun for water. The Sun takes decision in his mind to pour rain on the earth. Here the seer depicts the conjugal relationship b/w the Earth and the Sun. Earth is mother. The Earth produces everything. The Earth needs water for production and worships the Sun for that. The Sun also sends rain to fulfill the Earth's desires. By rain, the Earth get irrigated, and she also became capable to produce the crops. After this, the farmers plough the land and sow the seeds to the land. Sky is depicted in this mantra as the mother of all creation. The sky protects the Earth. The Earth has the ability to fulfill its own desires. The Earth has everything it needs to sustain creation. Water is located in the cloud in an embryo state. The cloud is also depicted as a calf. When clouds, wind and rain come together a sound is made. According to another mantra, Sun is the most important of all. The Sun is portrayed as the son of three mothers and three fathers. The three mothers are earth sky and heaven. They provide rain and crops. The three fathers are Agni, Vāyu and Sūrya. They are said to protect all three worlds.

पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणं ।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितं ॥ (RV1.164.12)[4]

Scholars say that Āditya lives in the highest place on Sky. According to their view, he is a loving father with full of water. Here the Sun is described as sitting on a time wheel in the Shape of a year and looking at the whole world. That wheel has seven limbs. Those seven limbs symbolize time division of half year, season, month, fortnight, day and night and muhurta. That wheel has six spokes. Those spokes represent the season. The Sun has five feet. Those five feet represent the five seasons. Sisira and Hemanta are almost identical so they were considered as a single season. That Sun has twelve forms. That twelve forms indicate the twelve months. Six spokes of the time wheel represent six seasons. In this mantra it is described that the Sun takes many forms and looks at the universe. He looks at the earth in the form of Agni and the sky in the form of Vāyu. That

is why the seers have portrayed the Sun as the lord of the three worlds throughout the Ṛgveda.

साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति।

तेषामिष्टानि विहितानि धामशः स्थात्रे रेजंते विकृतानि रूपशः ॥ (RV1.164.15)[5]

Seven sons were born from the Sun. the seventh was born alone. Six sons are twins. The mantra states that these are being revolved for the benefit of others. Seven sons born from the Sun are seven seasons. This phenomenon is said to occur for the benefit of nature. Each of the six seasons has two months. Seventh season has only one month. According to this description, there are thirteen months in a year. The thirteenth month was considered as extra month. This season has different forms and different manifestations.

स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदंधः ।

कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पितासत् ॥ (RV1.164.16)[6]

In this mantra the rays of the Sun are depicted as female as well as male. In the form of a female, those rays carry water in their womb. They make the earth fertile by giving them water in the form of males. The rays that send water to the earth itself absorb water from the earth and collect in it. It cannot be seen with the naked eye. This is not only visible to persons with discerning eyes. Sun protects the whole world. He travels through the heaven. He comes into this world and goes back. The sunrise and the sunset are indicated here. He covers the worlds with his rays. There is another description in this the cloud is pouring rain without knowing about it. Indra who lives in the atmosphere knows about the natural phenomenon of rain. Indra sits inside the womb. That womb is space. The embryo is located inside the womb. Surrounded by several livings. Indra is surrounded by Sun's rays and Vāyu. He enters the earth with rain. The Sun's rays hide Indra.

य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् ।

स मातुर्योना परिवीतो अंतर्बहुप्रजा निर्ऋतिमा विवेश ॥ (RV1.164.32)[7]

**Description of Cow**

In Asyavāmīya Sukta we can see the descriptions of cow. A cow raises its calf down with her fore feet and up to the Sun with her hind feet. Cow represents oblation

 ISSN: 2320-740X

and at the same time, the Sun's rays. Sacrificial calf also represents Agni. The oblation offered in the sacrificial fire reaches the Sun. According to the Nirukta, the word gau also means Sunrays. Sunrays can be considered as cow and Agni as calf. If we consider the oblation as cow, then the calf is the person performing the sacrifice. The cow gives the fruit to the person performing the sacrifice. The cow in the form of Sunrays, takes the yajamāna to higher worlds.

अवःपरेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात् ।
सा कद्रीची कं स्विदर्धं परागात्क्व स्वित्सूते नहि यूथे अंतः॥ (RV1.164.17)[8]

Milch cow makes its owner happy by giving him plenty of milk. Here the cow symbolizes the cloud. Cloud and rain make every living thing the world happy. If we think of cow as cloud, milk man is Sun. The Sun creates rain with its rays. In this mantra it is said that the cow makes a noise. She has a lot of wealth. she is always thinking about her calf. The seer prays that this cow will give Aśvins plenty of milk. She makes a happy noise when she sees her calf. Here the cow also symbolizes cloud. The bellowing sound of the cow indicates thundering. Clouds protect crops. The word Aśvins is used here to represent twins. These includes earth and the sky, day and the night, sun and the moon.

गौरमीमेदनु वत्सं मिषंतं मूर्धानं हिङ्ङकृणोन्मातवा उ ।
सृक्वाणं घर्ममभि वावशाना मिमातिमायुं पयते पयोभिः ॥ (RV1.164.28)[9]

Here a cow with a bellowing sound, who approaching the calf whom waiting for her is portrayed. She licks his forehead. And nourishes that calf with her milk. Cow symbolizes the cloud here too. Calf is the world. The whole world is staring at the sky in anticipation of the rain. Cloud produces crops on earth by making thundering sound. And fills the earth with water. Calf makes a sound to express joy at seeing its mother. The cow in the cow shed responds to calf's sound by emitting another sound. The motherly affection of this cow overcomes human emotions. She reveals her appearance by shining beautifully. Gau is the Mādhyamika Vāk. When thunder is emitted by the cloud, the Mādhyamika Vāk imitates it and makes a sound corresponding to it.

**Discussion on Philosophy**

Asyvāmīya hymn is a philosophically relevant one. There we can see many deep philosophical thoughts. According to this hymn, this world is the manifestation of God. No one has ever seen him who born first. This universe is his body. The relationship b/w nature and man are discussed in this hymn.

There is a description in this hymn about a tree and two birds. We can cut the tree. It is destructible. Here the tree represents the body. There are two birds in the tree. One is eating a sweet fruit and other not. The bird that eats sweet fruit symbolizes Jīvatma. The bird that does not eat symbolizes the supreme soul. The word Suparna is used to indicate gracefully flying. Jīvatma flies to samsara. But Paramātma flies without any attachment. This mantra makes it clear that Jīvatma suffers from delusion. By saying that Paramātma is looking without eating, it can be understood that Paramātma is free from attachment. The man who attained spiritual knowledge is free from all his desires. The word Suparna also denotes senses. They grasp their respective sense objects with keen observance. Their aim is said to be amṛta.

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति॥ (RV1.164.20)[10]

In this hymn, the Sun is imagined as a tree. The rays that take the water and enter it. They spread light all over the world during the day. The fruit of that tree tastes better than all other fruits. The tree here symbolizes supreme soul. Sense organs merge with him at the end of the day. When the person wakes up, they resume their duties. The senses give us knowledge of objects. When a person is asleep his senses retreat from the sense objects. When the person wakes up, they go back to their objects. Wisdom of the Braḥman, that Ultimate realization is the sweetest fruit. He who does not have the knowledge of Braḥman does not get that fruit.

यस्मिन्वृक्षे मध्वदः सुपर्णा निविशंते सुवते चाधि विश्वे ।
तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ॥ (RV1.164.22)[11]

The body is never eternal. But jīva is eternal. Jīva is only associated with this body in this life. Only if jīva is present in the body can it be said that the body is alive. Without jīva, the body would be dead. Jīva can only move when it is in constant with the body. Otherwise, jīva remains motionless. When jīva exists in a body in the form of

 ISSN: 2320-740X

prana, the sense organs perform their functions. When jīva leaves the body and comes out, two paths will be opened for him. One of them is the path of the gods. The other is the path of the manes.

According to this hymn, the ultimate limit of the earth is the sacrificial altar. The navel of this world is sacrifice. The creative power of pouring rain is Soma juice. Braḥman is said to be the Supreme abode of divine speech. The basis of a sacrifice is the altar. Sacrifice is conceived as Braḥman in the Ṛgveda. All worlds are based on Braḥman. Therefore, the worlds can be likened to a sacrificial altar. Aditya pervades the universe. Soma is his seed. Here Braḥman stands in the form of Soma. Soma is the seed of all creation. Soma juice offered on sacrifice causes rain.

**Conclusion**

Asyavāmīya hymn is full of philosophical thoughts and it contain many mysterious descriptions in it. Here the seer gives to others the light of oneness. There are many deities like Indra, Mitra, Varuna, Agni and Garuda. It is one and the only Sat, scholars say in various ways. He is the absolute Enlightener, the Omnipresent, the Bearer of all things. The seer is showing the light of oneness to the people who are in darkness due to the worship of many deities. In this hymn, Dhīrghatamas raises the question of who knows the soul beyond the gross body, the subtle body and the minerals like blood. It is a very important hymn in the Ṛgveda.

**End notes**

1. Rigvedam Bhasha Bhashyam Vol.II p.268
2. Rigvedam Bhasha Bhashyam Vol.II p.278
3. Rigvedam Bhasha Bhashyam Vol.II p.273
4. Rigvedam Bhasha Bhashyam Vol.II p.276
5. Rigvedam Bhasha Bhashyam Vol.II p.279
6. Rigvedam Bhasha Bhashyam Vol.II Ibid
7. Rigvedam Bhasha Bhashyam Vol.II p.292
8. Rigvedam Bhasha Bhashyam Vol.II p.281
9. Rigvedam Bhasha Bhashyam Vol.II p.289

10. Rigvedam Bhasha Bhashyam Vol.II p.283

11. Rigvedam Bhasha Bhashyam Vol.II p.285

**Bibliography**


1. Aurobindo, Sri.; *The Complete Works of Sri Aurobindo Vol.XIV*, Sri Aurobindo Ashram Publication Department, Pondicherry, 2016.
2. *Rigvedam Bhasha Bhashyam Vol.II*; Nampoothirippadu, O M C Narayanan., Vadakkemathom Brahmasvam, Thrissur, February 1982.


******

 ISSN: 2320-740X

## संपन्नो व्रीहिः इत्यत्र व्रीहिपदोत्तरैकवचनार्थःगदाधरभट्टाचार्यमते


**डा अजिमोन् सि एस्**

सहायकाचार्यः,

सर्वकारीय अयुर्वेदमहाविद्यालयः

कण्णूरु



**सारांशः–** प्रबन्धे अस्मिन् संपन्नो व्रीहितरितिप्रयोगस्य साधुत्वं व्युत्पत्तिवादोक्तदिशा विचारयति।यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्यायाः अविवक्षितत्वं तत्र विशेष्यविशेषणपदयोः समानवचनकत्वनियमः इति गदाधरभट्टाचार्यः। यत्र इदम् अविवक्षितत्वं नास्ति तत्र समानवचनकत्वमपि नास्ति। यथा वेदाः प्रमाणम्। वेदाः प्रमाणम् इत्यत्र च विशेषणपदोत्तरविभक्त्या बहुत्वविरुद्धमेकत्वं विवक्षितं तच्च प्रकृत्यर्थतावच्छेदके प्रमितिकरणत्वे अन्वेति"। तथापि अत्र पदार्थःपदार्थेनैव अन्वेतिन तु पदार्थैकदेशेन इति व्युत्पत्तिविरोधः स्यादिति आशङ्का वर्तते। उक्ताशङ्कायाः समाधानत्वेन संपन्नो व्रीहिः इतिप्रयोगं प्रदर्शयतिभट्टाचार्यः। अस्य वाक्यस्य अनेकव्रीहिकणसंपन्नत्वे एव तात्पर्यं वर्तते न तु एकव्रीहिकणसंपन्नत्वे तात्पर्यं। अत्र व्रीहिपदोत्तरं एकवचनमेव प्रयुक्तम्। एकवचनार्थस्य एकत्वस्य व्रीहित्वजातावेव अन्वयः। अतःयत्र बाधकाभावःतत्र पदार्थःपदार्थेनैव अन्वेति, यत्र तु बाधकः अस्ति तत्र पदार्थैकदेशेनापि अन्वेतीतिइतिआचार्यमतम्। ननु पदार्थस्य पदार्थान्तरं प्रतिअन्वयार्थम् अन्वयितावच्छेदकरूपेण उपस्थितेः कारणत्वमस्ति। व्रीहित्वस्य अन्वयितावच्छेदकरूपेण उपस्थितिः नास्ति। अतःकथं तस्मिन् एकत्वान्वयः शक्यतेतिपूर्वपक्षः। अतःते अन्यप्रकारेण एकत्वस्य व्रीहावन्वयः प्रदर्शयन्ति। तत्तु स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्वसंबन्धेन एव।अत्र कश्चन वदति- व्रीहि पदोत्तर प्रथमाविभक्त्या न एकमेव एकत्वम् उपतिष्ठतिकिन्तु अनया विभक्त्या अनेकानि एकत्वानि उपतिष्ठन्ति। तेन अनेकानि एकत्वानि अनेकेषु व्रीहिषु प्रत्येकं अन्वीयन्ते। अतःजातौ एकत्वान्वयेन जायमानः दोषः अत्र न स्यात् इतितेषां वादः। वादः अयं गदाधरभट्टाचार्यैः निराक्रियते। संपन्नो व्रीहिरित्यत्र एकवचनस्य एकत्वमात्रं नार्थःइतिभट्टाचार्यः।अत्रत्य एकवचनस्य स्वसजातीयनिष्ठभेदप्रतियोगिता-नवच्छेदकैकत्वरूपसजातीयद्वितीयराहित्यमेव अर्थः। तदुच्यते "सजातीयनिष्ठभेदप्रतियोगिता-नवच्छेदकैकत्वरूपसजातीयद्वितीयरहितत्वमेकवचनार्थः न त्वेकत्वमात्रं तस्य वस्तुमात्रसाधारण्येनार्थत एव लाभात् अनुपयोगाच्च" इति। एवं संपन्नो व्रीहीरित्यत्र एकवचनार्थस्य व्रीहित्वजातावेव अन्वयः। पशुना यजेत इत्यत्र सजातीयद्वितीयराहित्यरूपं एकत्वं अस्ति। साजात्यं च स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकवत्वरूपेण एव।



**मुख्यशब्दाः – 1. अभेदान्वयबोधः । 2.स्वसमानविभक्तिकत्वं । 3. स्वाव्यवहितपूर्ववर्तिना पदेन उपस्थापितत्वम् । 4. पदार्थःपदार्थेनैव अन्वेतिन तु पदार्थैकदेशेन इतिव्युत्पत्तिविरोधः।5. पदार्थस्य पदार्थान्तरं प्रतिअन्वयार्थं अन्वयितावच्छेदकरूपेण उपस्थितेः कारणत्वम् । 6.**

**स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपसजातीयद्वितीयराहित्यमेव एकवचनार्थः । 7. साजात्यं च स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकवत्व-रूपेण**

**संपन्नो व्रीहिः इत्यत्र व्रीहिपदोत्तरैकवचनार्थःगदाधरभट्टाचार्यमते।**

श्रीगदाधरभट्टाचार्यः स्वकीय व्युत्पत्तिवादाख्ये ग्रन्थे प्रथमकारके अभेदान्वयबोधनिरूपणावसरे संपन्नो व्रीहिरितिप्रयोगस्य साधुत्वं निरूपयति। यत्र ययोः पदार्थयोः मध्ये अभेदाख्यः संसर्गः वर्तते तत्र तत्पदार्थविषयकान्वयबोधः अभेदान्वयबोधः इतिज्ञायते। अथवा यस्य पदार्थस्य पदार्थान्तरेण सह अभेदसंबन्धेन अन्वयः अस्ति तत्र अभेदान्वयबोधःजायते। यथा नीलो घटः इत्यत्र नीलपदार्थस्य घटपदार्थे अभेदसंबन्धेन अन्वयात् नीलाभिन्नघट इतिअभेदान्वयबोधः संभवति। प्रातिपदिकार्थे अन्यपदार्थस्य अभेदेन अन्वयार्थं स्वसमानविभक्तिकेन पदेनोपस्थापितत्वं वा स्वाव्यवहितपूर्ववर्त्तिना पदेनोपस्थापितत्त्वं वा अवश्यं स्यात्। नीलो घटः इत्यत्र घट इतिप्रातिपदिकार्थे स्व-घटसमानविभक्तिकेन प्रथमाविभक्तिकेन नीलपदेनोपस्थापितस्य नीलपदार्थस्य अभेदेनान्वयः। नीलघटः इत्यत्र तु स्वाव्यवहित- घटपदाव्यवहित, पूर्ववर्त्तिपदेन नीलपदेन उपस्थापितस्य नीलपदार्थस्य घटपदार्थे अभेदेन अन्वयः। अत्र पदार्थद्वयनिष्ठ अभेदसंसर्गः संसर्गमर्यादया- आकाङ्क्षया भासतेतिगदाधरभट्टाचार्यः। तदुच्यते- "अभेदश्च प्रातिपदिकार्थे स्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववर्त्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया भासते" इति।1 विशेष्यवाचकपदप्रकृत्युत्तरविभक्तिनिष्ठा या जातिप्रथमात्वादिः, तत्सजातीयविभक्तिकत्वं विशेषणपदे वर्तते चेत् तदेव समानविभक्तिकत्वं। अत्र समानानुपूर्वीकत्वरूपं साजात्यं नोद्दिश्यते किन्तु विभक्तिविभाजकप्रथमात्वादिना तदुद्दिश्यते।

**1.व्युत्पत्तिवादे प्रथमकारके पृ.3.**

**वेदाः प्रमाणम्-**

अत्र अभेदान्वयबोधे विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वमिव समानवचनकत्वमपि अपेक्षितम्। सतिविशेषानुशासने समानवचनकत्वाभावे न दोषः अन्यत्र सर्वत्र समानवचनकत्वम् अवश्यमेवे। किन्तु नीलो घटः इत्यादिषु समानवचनकत्वं अस्ति तथापि वेदाः प्रमाणम् इत्यादिप्रयोगेषु तत् नास्ति। अतःकथं एतेषां प्रयोगाणां साधुत्वमितिपूर्वपक्षस्य आक्षेपः। अस्य समाधानमुच्यते- यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्यायाः अविवक्षितत्वं तत्र विशेष्यविशेषणपदयोः समानवचनकत्वनियमः इतिगदाधरभट्टाचार्येण।1यथा- पीताः घटाः इत्यत्र विशेष्यवाचकघटपदोत्तरविभक्तितात्पर्यविषयसंख्या बहुत्वसंख्या तद्विपरीतसंख्यायाः अविवक्षितत्वात् पीतपदोत्तरमपि प्रथमाविभक्तिबहुवचनजस्प्रत्ययस्य प्रयोगः। अतःअत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्यायाः अविवक्षितत्वम् अस्तीत्यतःविशेष्यविशेषणपदयोः समानवचनकत्वं अस्ति। यत्र इदं अविवक्षितत्वं नास्ति तत्र समानवचनकत्वमपि न स्यात्। यथा वेदाः प्रमाणम्। अत्र विशेष्यवाचकवेदपदोत्तरविभक्तितात्पर्यविषयसंख्या

 ISSN: 2320-740X

बहुत्वसंख्या, तद्विरुद्धमेकत्वसंख्यैव विशेषणवाचकपदोत्तरविभक्त्या विवक्षितमित्यतःविशेष्यविशेषणपदयोः समानवचनकत्वं नास्ति।

**1.व्युत्पत्तिवादे प्रथमकारके पृ 5.**

अत एव प्रमाणपदोत्तरं एकत्वसंख्याबोधकैकवचनं प्रयुक्तम्। ननु वेदाः चतुर्विधाः सन्ति तेषु प्रमाणपदोत्तरैकवचनार्थस्य एकत्वस्यान्वयः कथं युज्यत इतिआशङ्का । तत्र समाधानं तु वेदाः प्रमाणं इत्यत्र प्रमाणपदोत्तरविभक्त्यर्थस्य एकत्वस्य प्रमाण इतिप्रकृत्यर्थतावच्छेदके प्रमितिकरणत्वे अन्वेतिइत्येतदेव। उच्यते- "वेदाः प्रमाणम् इत्यत्र च विशेषणपदोत्तरविभक्त्या बहुत्वविरुद्धमेकत्वं विवक्षितं तच्च प्रकृत्यर्थतावच्छेदके प्रमितिकरणत्वे अन्वेति" इति1। प्रमाणं नाम प्रमितिकरणमेव। तत्र प्रमितिकरणत्वं अवच्छेदकम् भवति। इदं प्रमितिकरणत्वं चतुर्षु वेदेषु एकमेव विवक्षितमितितस्मिन् प्रमाणपदोत्तरवृत्त्येकवचनार्थस्य एकत्वस्य अन्वयः। ननु अनेकेषु वेदेषु प्रमितिकरणत्वं एकमेवेतिकथं वक्तुं शक्यतेतिचेत् वेदाः शब्दप्रमाणात्मकं भवन्ति, तत्र शब्दप्रमाकरणत्वं तु सकलप्रमात्मकशब्देषु वर्तमानं शब्दत्वावच्छिन्नं एकमेव न तु अनेकम्। यथा अनेकेषु मनुष्येषु मनुष्यत्वं एकमेव तथैव शब्दप्रमाकरणत्वमपि अनेकेषु शब्दप्रमाणात्मकेषु वेदेषु एकमेव।

**संपन्नो व्रीहिः-**

यदुक्तं वेदाः प्रमाणम् इत्यत्र प्रमाणपदोत्तरैकवचनार्थस्य प्रकृत्यर्थतावच्छेदके प्रमितिकरणत्वे अन्वयः इति, तत्र पदार्थःपदार्थेनैव अन्वेतिन तु पदार्थैकदेशेन इतिव्युत्पत्तिविरोधः स्यादितिआशङ्का वर्तते।

**1.व्यत्पत्तिवादे प्रथमकारके पृ 6.**

उक्ताशङ्कायाः समाधानत्वेन संपन्नो व्रीहिः इतिप्रयोगं प्रदर्शयतिभट्टाचार्यः। अस्य वाक्यस्य अनेकव्रीहिकणसंपन्नत्वे एव तात्पर्यं वर्तते न तु एकव्रीहिकणसंपन्नत्वे तात्पर्यं।तथापि अत्र व्रीहिपदोत्तरं एकवचनमेव प्रयुक्तम्। एकवचनार्थस्य एकत्वस्य व्रीहित्वजातावेव अन्वयः। अतःवेदाः प्रमाणम् इत्यत्रापि व्युत्पत्तिविरोधाशङ्का मास्तु इतिभट्टाचार्यः। अतःयत्र बाधकाभावःतत्र पदार्थःपदार्थेनैव अन्वेति, यत्र तु बाधकः अस्ति तत्र पदार्थैकदेशेनापि अन्वेतीतिआचार्यमतम्। अत्र सुदर्शनाचार्यः एवं वदति- ''वस्तुतस्त्वयं नियमः संख्यातिरिक्तस्थलार्थमस्ति संख्यायास्तु पदार्थैकदेशेनाप्यन्वयो भवतिसंपन्नो व्रीहि इत्यादि प्रयोगदर्शनात् तथा च वेदाः प्रमाणम् इत्यत्राप्येकत्वस्य पदार्थैकदेशे प्रमितिकरणत्वे अन्वये न दोषः इति''1।

ननु गत्यन्तराभावे सतिव्युत्पत्तिसंकोचः स्वीकर्तुमुचितःअन्यथा व्युत्पत्तिसंकोचः अनुचितःएवेतिपूर्वपक्षः। अतःसंपन्नो व्रीहिरित्यत्र व्रीहित्व जातौ एकत्वान्वयो न युक्तः इतिपूर्वपक्षाशयः। ते एवं वदन्ति- यतःव्रीहित्वजातिः स्वरूपतःएव व्रीहिपदशक्यतावच्छेदकं भवतीतितत्र व्रीहि पदश्रवणेन स्वरूपतःएव व्रीहित्वस्य उपस्थितिः संभवति। पदार्थस्य पदार्थान्तरं प्रतिअन्वयार्थं अन्वयितावच्छेदकरूपेण उपस्थितेः कारणत्वमस्ति। यथा नीलो घटः इत्यत्र नीलपदार्थस्य घटपदार्थान्तरे अन्वयः घटपदार्थस्य अन्वयितावच्छेदकघटत्वेन रूपेण उपस्थितिसंभवादेव।

**1. व्युत्पत्तिवादादर्शे प्रथमकारके पृ 7.**

किन्तु अत्र व्रीहित्वस्य अन्वयितावच्छेदकरूपेण उपस्थितिः नास्ति। अतःकथं तस्मिन् एकत्वान्वयः शक्यतेतिपूर्वपक्षः। अतःते अन्यप्रकारेण एकत्वस्य व्रीहावन्वयः प्रदर्शयन्ति। तत्तु स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्वसंबन्धेन एव। स्वं अत्र एकत्वं, स्वाश्रयप्रकृतिः एकत्वाश्रयप्रकृतिः व्रीहि, स्वाश्रयप्रकृत्यर्थतावच्छेदकं- एकत्वाश्रयव्रीह्यात्मकप्रकृत्यर्थतावच्छेदकं व्रीहित्वं,तद्वत्वं व्रीहित्ववत्वं व्रीहौ इतिअनेन संबन्धेन व्रीहौ एव एकत्वान्यः इतितेषां मतम्। तत्र भट्टाचार्यः अनेनैव रीत्या वेदाः प्रमाणम् इत्यत्रापि प्रमाणपदोत्तरमेकत्वं वेदेषु अन्वयो भवतु इतिवदति।

अत्र कश्चन वदतिसंपन्नो व्रीहिः इत्यत्र व्रीहित्वजातौ एकत्वान्वयो न भवति यतःपदार्थःपदार्थेनैव अन्वेतिन तु पदार्थैकदेशेन इतिनियमविरोधात्। अतःअत्र एकत्वं नाना व्रीहिषु प्रत्येकं अन्वेतिइतितन्मतम्। व्रीहि पदोत्तर प्रथमाविभक्त्या न एकमेव एकत्वम् उपतिष्ठतिकिन्तु अनया विभक्त्या अनेकानि एकत्वानि उपतिष्ठन्ति। तेन अनेकानि एकत्वानि अनेकेषु व्रीहिषु प्रत्येकं अन्वीयन्ते। अतःजातौ एकत्वान्वयेन जायमानः दोषः अत्र न स्यात् इतितेषां वादः। वादः अयं गदाधरभट्टाचार्यैः निराक्रियते। संपन्नो व्रीहिरित्यत्र एकवचनस्य एकत्वमात्रं नार्थःइतिभट्टाचार्यः।संख्यारूपमेकत्वं तु वस्तुमात्रसाधारण्यात् अर्थतःएव लभ्यते। तदर्थं एकवचनप्रत्ययः न आवश्यकः। तथा अत्र संख्यारूपैकत्वमात्रस्य उपयोगः अपि प्रकृते नास्ति इतिभट्टाचार्यः। अत्रत्य एकवचनस्य स्वसजातीयनिष्ठभेदप्रतियोगितान वच्छेदकैकत्वरूपसजातीयद्वितीयराहित्यमेव अर्थः।तदुच्यते "सजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपसजातीयद्वितीयरहितत्वमेकवचनार्थःन त्वेकत्वमात्रं तस्य वस्तुमात्रसाधारण्येनार्थत एव लाभात् अनुपयोगाच्च" इति।1 व्युत्पत्तिवादस्य रामरुद्रीयव्याख्याने एकवचनार्थमधिकृत्य एवं प्रतिपादनं वर्तते- अत्र कतिघटाः सन्ति इतिप्रश्ने अत्र घटो अस्ति इत्युत्तरं हि नानाघटत्वशङ्कानिरासायैव प्रयुज्यते, न चैकत्वबोधमात्रेण तादृशशङ्कानिरासः संभवति। बहुघटसत्वेपि प्रत्येकं घटेषु एकत्वसत्वादितिहृदयम् इति।2 अतःएकवचनस्य न केवलं एकत्वं मात्रमर्थःप्रयोजनाभावात्। प्रयोजनाभावत्वं कथमितिचेत् व्रीहिपदप्रयोक्तुः तात्पर्यं अनेन एकत्वमात्रार्थेन संपादयितुं अशक्यत्वादेव। वक्तुः तात्पर्यं तु व्रीहिसजातीयोत्पन्नान्तरसंपन्नत्वव्यावृत्तिरेव। इदं तु तात्पर्यं कथं व्रीहिपदोत्तरैकवचनस्य एकत्वमात्रार्थत्वे प्रतिपादयितुं शक्यते। अतःवक्तुः तात्पर्यं न प्रकटीकरोतिइत्यतःअयमर्थःअनुपयोगः भवति।

उक्तसजातीयद्वितीयरहितत्वरूपैकत्व स्वीकारे तु व्रीहिसंपन्नत्वं सिद्ध्यतितथा व्रीहिसजातीयस्य अन्यस्य संपन्नत्वव्यावृत्तिरपि सिद्ध्यतिइतिवक्तृतात्पर्यं स्पष्टतया भासते। स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपसजातीयद्वितीयरहितत्वं एवं वर्णयितुं शक्यते- यत्र नीलपीतादि अनेकघटाः सन्ति तत्र स्वं नीलघटः तत्सजातीयः पीतघटः पीतघटे नीलघटभेदः अस्ति। नीलघटभेदस्य प्रतियोगी नीलघटः।

**1. व्युत्पत्तिवादे प्रथमकारके पृ. 8**

**2. व्युत्पत्तिवादस्य रामरुद्रीव्याख्याने पृ. 5**

 **ISSN: 2320-740X**

तत्र नीलघटे यत् एकत्वं वर्तते तत् भेदप्रतियोगितावच्छेदकमेव। अतःइदमेकत्वं न स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकं इत्यतःतस्य सजातीयद्वितीयरहितरूपत्वं नास्ति। यत्र तु एकः घटः एवास्ति तत्र सजातीस्य घटान्तरस्य अभावात् अत्रत्य घटनिष्ठमेकत्वं स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकमेव। अतःएतादृश स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकमेकत्वमेव सजातीयद्वितीयरहितत्वम्। तदेव अत्र एकवचनार्थः। एवं रीत्या संपन्नो व्रीहिः इत्यत्र यदि अन्नान्तरं संपन्नं स्याद् तर्हि तत्र स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वं न स्यात्। यदि तु तत्र व्रीहिरेव संपन्नं अन्नान्तरं न संपन्नमितिचेत् तर्हि संपन्नत्वेन रूपेण व्रीहि सजातीयस्यैव अभावात् स्वसजातीयनिष्ठभेदप्रतियोगिनवच्छेदकमेकत्वमेव व्रीहिनिष्ठमेकत्वं। तदेव सजातीयद्वितीयरहितत्वम्।

**पशुना यजेत-**

यदुक्तं सजातीयद्वितीयरहितत्वमेव एकवचनार्थःइतितत्र प्रमाणत्वेन पशुना यजेत इतिवाक्यं प्रदर्शयतिगदाधरभट्टः। पशुना इत्यत्र एकवचनस्य सजातीयद्वितीयरहितत्वरूपैकत्वार्थत्वं विवक्षितत्वात् एकपशुकरणकयागादेव अदृष्टसिद्धिःन तु अनेकपशुकरणकयागात् तत्सिद्धिः। यदि सजातीयद्वितीयराहित्यरूपं एकत्वं न स्वीकरोतितर्हि अनेकपशुकरणयागादपि अदृष्टसिद्धिःस्यात्। किन्तु तथा न विवक्षितमिततदयुक्तमेव। पशुना यजेत इत्यत्र स्वं पशुः तत्सजातीयः पश्वन्तरः, यदि तत्र पश्वन्तरमस्ति तर्हि एतद्पशुभेदः द्वितीय पशौ अस्ति। तस्मिन् द्वितीय- पशुवृत्ति एतद्पशुभेदप्रतियोगितायां एतद्पशुनिष्ठमेकत्वं अवच्छेदकमेव न तु अनवच्छेदकम्। तस्मात् अत्र सजातीयद्वितीयरहितत्वरूपमेकत्वं नास्ति। यदि तु यागे पश्वन्तरं नास्ति तर्हि एतद्पशुनिष्ठमेकत्वं सजातीयपश्वन्तरनिष्ठभेदप्रतियोगितावच्छेदकं न भवतीतितत्र सजातीयद्वितीयराहित्यरूपमेकत्वम् अस्ति।

ननु यदि यागस्थले अन्यं कार्यमुद्दिश्य पश्वन्तरमस्ति चेत् यागसंबन्धि पशौ कथं स्वसजातीयद्वितीयरहितत्वरूपमेकत्वं वक्तुं शक्यते। यतःयागस्थले वर्तमाने पश्वन्तरे एतद्पशु भेदः(यागसंबन्धिपशुभेदः) अस्ति। तत्र तन्निष्ठभेदप्रतियोगितावच्छेदकमेव एतद्पशुनिष्ठमेकत्वम्। अतःपशुना यजेत इत्यत्र पशौ वर्तमानं एकत्वं स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वं नास्ति इत्याशङ्का। अस्याः आशङ्कायाः परिहारार्थं साजात्यं नाम किमितिस्पष्टीकरोतिगदाधरभट्टाचार्यः- साजात्यं च स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकवत्वरूपेण इति।1अस्य परिष्कारस्य एवं व्याख्यानं करोतिआदर्शे-" स्वं- यजेत इत्यत्र वर्तमान तिङ्प्रत्ययः, तत्समभिव्याहृतःपदार्थःयागपदार्थः, तत्संसर्गित्वविशिष्टं –यागसंबन्धित्वसमानाधिकरणं, यत्प्रकृत्यर्थतावच्छेदकं पशुत्वं, तद्वत्वरूपेण साजात्यं ग्राह्यं तथा च कार्यान्तरार्थोक्तयागभूमिबद्धपशौ पशुत्वसत्वेपि यागसंसर्गित्वं नास्तीतिन स पशुरेतद्यागीयपशुसजातीयः" इति।2 एवं यागसंबन्धि पशौ सजातीयद्वितीयराहित्यरूपं एकत्वमस्ति इत्यतःउक्तदोषः नास्ति। साजात्यस्य एवं रूपेण व्याख्यानात् अत्र घटः अस्ति इत्यादौ घटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वस्य प्रसिद्ध्यभावे अपि दोषो न। तत्र कारणं तु अस्मिन् वाक्ये वर्तमानेन अत्र इतिपदेन एतद्देशः उपस्थाप्यते। अतःतत्सजातीयघटः एतद्देशत्वविशिष्टः घटः एव नतु घटमात्रम्। अन्यस्य घटस्य एतद्देशे अभावात् अन्यस्मिन् देशे विद्यमाने घटे घटत्वसत्वेपि एतद्देशवृत्तित्वरूपं वैशिष्ट्यं नास्ति इतिएतद्देशवृत्तिघटेन सह साजात्यं नास्ति। अतःएतद्देशे

विद्यमानघटनिष्ठमेकत्वं एतद्देशविद्यमानघटनिष्ठभेदप्रतियोगितानवच्छेदकमेवेतिअत्र घटः अस्ति इतिवाक्ये दोषः न आयाति। यदि एतस्मिन् देशे अनेकघटाः सन्ति चेत् संपन्नो व्रीहिः इत्यत्र इव तत्र एकत्वस्य घटनिष्ठघटत्वजातौ अन्वयः करणीयः इतिगदाधरभट्टाचार्यः।

**1. व्युत्पत्तिवादे प्रथमकारके पृ-9**

**2. व्युत्पत्तिवादादर्शे पृ.9**

**उपसंहारः**

एवं संपन्नो व्रीहिः इत्यत्र व्रीहिपदोत्तरैकवचनस्य स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूप-सजातीयद्वितीयरहितत्वं एवार्थः। अस्य एकत्वस्य व्रीहित्वजातौ एवान्वयः। यतःसंपत्तिःन केवलं एकस्य व्रीहिव्यक्तेः उद्दिश्यते किन्तु नाना व्रीहिव्यक्तीनामेव संपत्तिरुद्धिश्यते। अतःव्रीहिव्यक्तौ उक्तैकत्वं अन्वयितुं न शक्यते इत्यतःतस्य व्रीहित्वजातावन्वयः। केचित्तु स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्वसंबन्धेन व्रीहौ एकत्वं अन्वेतिइतिवदन्ति। अस्मिन् मते भट्टाचार्यः विरोधं न प्रकटितवान् किन्तु व्रीहिपदोत्तरैकवचनस्य एकत्वमात्रमर्थःइत्यत्र तस्य मतभेदमस्ति। केवलमेकत्वमित्यर्थःप्रकृते न उपयुज्यते इत्युक्त्वा अयं वादः आचार्येण खण्डितः।

**सहायकग्रन्थाः**


1. के.टि माधवन् – व्युत्पत्तिवादस्य बालप्रियाव्याख्या, केरल संस्कृत अकादमी, तृश्शूर्, केरल, 2018.
2. गदाधरभट्टाचार्यः – व्युत्पत्तिवादः आदर्शव्याख्यासहितःराष्ट्रियसंस्कृतसंस्थानं मानितविश्वविद्यालयः, नवदेहली 2011.
3. गदाधरभट्टाचार्यः – शक्तिवादः, श्रीवेंकटेश्वरस्टीम् यन्त्रालयः, बंबई।
4. रामानुजताताचार्यः – विद्वन्मनोरमाव्यख्या-राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपतिः।
5. रामानुजताताचार्यः - शाब्दबोधमीमांसा,ऐ. एफ् पि.


******

 ISSN: 2320-740X

# राजशेखरस्य कविसमाजायवदानम्

**डॉ. सौरभ दुबे**
सहायकाचार्यः- साहित्यविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रिय संस्कृत-
विश्वविद्यालयो, नवदेहली - 16

वैक्रमाब्दस्य संवत्सरस्य नवमदशमैकादशशताब्दानां कालः भारतीयसंस्कृतवाङ्मयस्य विविधशाखानां समीक्षणपरीक्षणविवेचनानां कालो बभूव। अस्यां शतकत्रय्याम् एकत्र आचार्यशंकर-कुमारिल-मण्डन-उद्योतकर-उदयनसदृशाः दार्शनिका विद्वांसोऽभूवन्। अपरत्र बौद्धविद्वत्सु धर्मकीर्तिकमलशीलप्रभृतयः, जैनविद्वत्सु पाल्यकीर्त्यादयः विद्वांसा उदभवन्। तत्रैव साहित्यशास्त्रस्य विद्वत्सु दण्डिवामनानन्दवर्धनादयः रसध्वन्यलङ्कारीतिप्रभृतिषु विषयेषु गम्भीरतम-मीमांसाभिः साहित्यभाण्डागारं वर्धयामासुः। एषु शताब्देषु साहित्यसम्बन्धिरचनानां केन्द्रद्वयी आसीत्- काश्मीरः कान्यकुब्जश्च काश्मीरः श्रव्यकाव्यप्रणयनार्थं प्रसिद्धः कान्यकुब्जश्च दृश्यकाव्यरचनार्थं विश्रुत आसीत्। राजशेखरः कान्यकुब्जाधिपतेः महेन्द्रपालस्य तदुत्तरं महीपालस्य चोपाध्यायपदवीमलञ्चकार। उक्तमपि-

बालकविः कविराजो निर्भयराजस्य तथोपाध्यायः।[1]
इत्यस्य परम्परया आत्मा माहात्म्यमारूढः।।
किमपरमपरैः परोपकारव्यसननिधेर्गणितैर्गुणैरमुष्य।[2]
रघुकुलतिलको महेन्द्रपालः सकलकलानिलयः स यस्य शिष्यः।।

मम्मटाभिनवगुप्तक्षेमेन्द्रादीनामाचार्याणामुद्धृतत्वात् राजशेखरः महाराष्ट्रचूडामणेः अकाल जलदस्य चतुर्थःप्रपौत्रः दुर्दुकस्य च पुत्र आसीत्। माता च शीलवती अतःराजशेखरस्य समयः दशमशताब्दस्य मध्यभागः (930-977) मन्यते। यथोक्तम्- 'तदा मुष्पायणयमहाराष्ट्रचूडामणेरकालजलदस्य चतुर्थो दौर्दुकिः शीलवतीसूनुरुपाध्यायश्रीराजशेखर इत्यपर्याप्तं बहुमानेन'[3]।

कृतीनां विषये राजशेखरस्य पञ्च रचनाः प्राप्तास्सन्ति तथाहि- कर्पूरमञ्जरी (सट्टकम्) विद्धशालभांजिका (नाटिका) बालरामायणं (नाटकम्) बालभारतं काव्यमीमांसा चेति-

बभूव वल्मीकभवःकविः पुरा
ततःप्रपेदे भुवि भर्तृमेण्ठताम्।

1 कर्पूरमंजरी 1-8

2 विद्धशालभंजिका, अंक-1

3 बालरामायण, प्रस्तावना-1

स्थितः पुनर्यो भवभूतिरेखया

स वर्तते सम्प्रतिराजशेखरः।।[1]

पातुं श्रोत्ररसायनं रचयितुं वाचः सतां सम्मताः

व्युत्पत्तिं परमामवाप्तुमवधिं लब्धुं रसस्रोतसः।

भोक्तुं स्वादु फलं च जीवितत्तरोर्यद्यस्ति ते कौतुकम्

तद्भ्रातःशृणु राजशेखरकवेः सूक्तीः सुधास्यन्दिनीः।।[2]

बालरामायणस्य प्रस्तावनोल्लेखेन राजशेखरस्य षट्-प्रबन्धाः सूचिताः। तद्यथा-

यद्यस्ति स्वस्ति तुभ्यं भव पठनरुचिर्विद्धि नः षट्प्रबन्धान्।

नैवं चेद्दीर्घमास्तां नटवटुवदने जर्जरा काव्यकन्था।।[3]

श्रूयते एवं यत् चाणक्यकृत-अर्थशास्त्रवत् अयं काव्यमीमांसाख्यो ग्रन्थः अष्टादशभिः अधिकरणैः पूर्ण आसीत्। अप्राप्तिकाराणात् प्रथमाधिकरणं कविरहस्यमितिप्राप्तम्।

कविः कः अभिधीयते-

व्याकरणशास्त्रे-जगत्प्रपञ्चशब्दयोजनाकारः कविः। तद्यथा वर्णनार्थक-गतार्थककव्धातोः इन्प्रत्ययेन कविपदमुद्भवतियस्यार्थःकवते सर्वं वर्णयति, सर्वतो गच्छतिइतिकविः यद्वा कु-शब्दे इत्यस्माद्धातोः 'अचः इः' इतिसूत्रेण इः प्रत्यये कविशब्दःसिद्धयति।[4]

वेदेषु कविपदेन सृष्टिकर्ता स्वीकृतः।

कविर्मनीषी परिभूः स्वयम्भूः[5]

पश्य देवस्य काव्यं न ममार न जीर्यति।[6]

नाम वेदे कवि शब्दःसंसाररचयितुः ब्रह्मणः कृते प्रयुक्तः। तत्स्रष्टुः अमररचनायाः नाम काव्यमस्ति। मम्मटाचार्येणापि काव्यप्रकाशे वृत्तौ लिखितम्- लोकोत्तरवर्णनानिपुणः कविस्तत्कर्म काव्यमिति[7] अमररचनारचननिपुणः कविः इति।

प्राचीनकवीनामुल्लेखे ब्रह्मैव आदि कविनाम्ना उद्घुष्टः। यथा-

एकोऽभून्नलिनात् ततश्च पुलिनात् वल्मीकतश्चापरस्त

एव प्रथिताः कवीन्द्रगुरवस्तेभ्यो नमस्कुर्महे।।[1]

---

1 विद्धशालभांजिका

2 विद्धशालभंजिका-प्रस्तावना

3 बालरामायण्

4 सिद्धान्तकौमुदी, उणादिप्रकरणम्, 4/138

5 ईशावास्योपनिषद्- 8 मन्त्रः

6 अथर्ववेदः-10-8-32

7 काव्यप्रकाश-1

 ISSN: 2320-740X

तदेव बिल्हणेनापि समर्थितम्-

चत्वारि काव्यानि चतुर्मुखस्य यस्य प्रसिद्धाः श्रुतयश्चतस्रः।[2]

कठोपनिषदि कविपदेन तत्त्वदर्शी विद्वान् अभिप्रेतो वर्तते। तद्यथा 'क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति'[3]

गीतायाम् – कविं पुराणमनुशासितारम् इत्युक्त्वा कविपदं परब्रह्मवाचकम्[4]

वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः[5] इत्यनेन वेदरहस्यविज्ञः कविपदेन उक्तः।

मनुस्मृतौ- अध्यापयामास पितृन् शिशुराङ्गिरसः कविः इत्यनेन अङ्गिरसः पुत्रः कविः।[6]

कवयः क्रान्तदर्शिनः[7] इत्यनेन अतीतानागतवर्तमानज्ञानकराः कविपदेनोक्ताः।

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः
नास्ति येषां यशःकाये जरामरणजं भयम्।।[8]

इत्यनेन येषां काव्यचर्वणया सहृदयहृदयानन्दोत्थं यत्यशः प्रसूतं तद्भाजः कवयः।

इत्यतःकाव्यकर्तृतया कविः कथितः। काव्यस्य कारणं किमित्यत्र बहूनां मतवादो वरीवर्त्ति। तन्निम्नप्रकारेण दीयते-

→ शक्तिनिपुणताभ्यासानां दण्डचक्रचीबरादिवत् काव्योदयाय समवेतकारणतेतिमम्मटः[9]

→ प्रतिभैव काव्योदयाय कारणमितिजगन्नाथः[10]

→ प्रतिभैव श्रुताभ्याससहिताकवितां प्रति
हेतुर्मृदम्बसम्बद्धबीजमालालतामिव ।।[11]

→ काव्यकर्मणि कवेः समाधिः परं व्याप्रियते इतिश्यामदेवः[12]

→ अभ्यास एव कारणमितिमङ्गलः।

---

1 अमरकोशः

2 विक्रमा-1/31½

3 कठोपनिषद् 1.3.14

4 महाभारते-विष्णुसहस्रनामस्तोत्रे

5 विष्णुसहस्रनामस्त्रोतम्- 14½

6 मनुस्मृतौ 2.151

7 ऋग्वेद-10/124/9

8 नीतिशतक-21

9 काव्यप्रकाश 1/3

10 रसगङ्गाधर

11 जयदेव कृत चन्द्रालोकः

12 काव्यमीमांसा

→ सा केवलं काव्ये हेतुः "इतियायावरीयः"

शक्तिरेव काव्यकारणं, प्रतिभाव्युत्पत्तिजनिका, शक्तिसम्पन्नस्यैव प्रतिभा व्युत्पत्तिरुत्पद्येते प्रतिभा नाम या शब्दग्राममर्थसार्थमलंकारतन्त्रमुक्तिमार्गमन्यदपि तथाविषयमधिहृदयं प्रतिभासयतिसा प्रतिभा। अप्रतिभस्य पदार्थसमूहः परोक्ष इव प्रतिभावतःपुनरपश्यतोऽपि प्रत्यक्ष इव। यतःमेधाविरुधकुमारदासादयः जात्यन्धाः कवयः श्रूयन्ते। कविभावकसम्बन्धात् सा कारायित्री भावायित्रीतिद्विप्रकारा प्रतिभा भवति। काव्यस्य कर्ता, कविः, काव्यस्य च कारणं प्रतिभेतिराजशेखरमताभिप्रायः। तर्हि काव्यस्य निर्माणे यन्मूलाधारकारणं प्रतिभेति। सा केन 'विधिना कया चर्यया कया शिक्षया उपदेशेन वा उपपद्यते।' येन काव्यरत्नं रच्यते। एतादृशविषये आत्मानं कविं कर्तुं काव्योदयं च प्रकाशयितुं कविभवनार्थं केचन उपदेशाः कविशिक्षामाध्यमेन राजशेखरेण निर्दिष्टाः। तदत्र उपस्थापयामि-

1) गृहीतविद्योपविद्यः काव्यक्रियायै प्रयतेत। काव्यविद्यायाः शिक्षार्थी व्याकरणम्, कोशग्रन्थः, छन्दःशास्त्रम्, अलङ्कारशास्त्रञ्च इतिविद्याम् अभ्यस्येत्।

   उपविद्यासु- चतुष्षष्टिकलाः, कविसन्निधिः, देशवार्ता, विदग्धवादः, लोकयात्रा विद्वद्गोष्ठ्यः, पुरातनकविनिबन्धाः काव्यमातरश्च इत्यभ्यस्येत्।

2) कवित्वस्य अष्टौ मातरः, तत्राहंता सम्पाद्या कविना

   स्वास्थ्यं प्रतिभाभ्यासो भक्तिर्विद्वत्कथा बहुश्रुतता।

   स्मृतिदार्ढ्यमनिर्वेदश्च मातरोष्टौ कवित्वस्य।।

3) शुचिमान् भवेत्।

   शौचं त्रिविधम् – वाक्शौचं मनःशौचं कायशौचम्

   वाङ्मनश्शुचिस्तु शास्त्रजा भवति।

   कायशौचमित्थं विधेयम्

   सनखच्छेदौ पादौ, सताम्बूलं मुखम्

   सविलेपनमात्रं वपुः

   महार्हमनुल्वणं च वस्त्रम्

   सुकुसुमं शिरः। तथाविधायां पवित्रतायां सरस्वत्याः शीलनं हि संवननं कथ्यते।

   एकः प्रायो वादोऽस्ति-

   यादृशाकाराश्चित्रकरस्तादृशाकारमस्य चित्रमितिअतःयत्स्वभावःकविस्तदनुरूपं काव्यमिति। यादृशी प्रकृतिः कवेः तादृशी प्रकृतिः कवितायाः।

4) कविना सम्पाद्या लोकयात्रा-

   i. स्मितभाषी - सना सस्मितं भाषणं कुर्यात्

   ii. सर्वत्र वक्रोक्तिगर्भाभिधायी - सर्वत्र वक्रोक्तिपूर्णकथनं कुर्यात्।

   iii. सर्वतो रहस्यान्वेषी – परितःरहस्योत्पादननैपुण्यं सम्पादयेत्

 ISSN: 2320-740X

iv. परकाव्यदूषणवैमुख्यमनभिहितस्य – अपृष्टेन कविना परकाव्यदोषदर्शनं न करणीयम्।

v. अभिहितस्य यथार्थमभिधायी – पृष्टेन कविना यथार्थविवेचनं क्रियेत।

5) कवेः पार्श्वस्थवातावरणम्-

कवेः भवनं सुसंस्कृतं, ऋतुषट्कोचित्विविधस्थानयुक्तम्, तत्रैव गृहवाटिका एका अनेक वृक्षैः लतागृहैश्च समृद्धा स्यात्। सा कृत्रिमक्रीडापर्वतेनभरिता सदीर्घिकासरित्समुद्रावर्तसहिता कुल्यप्रवाहपूर्णा च स्यात् तत्र मयूरहरिणसारसचक्रवाकहंसचकोरकुररशुकसारिकादिपक्षिभिः व्याप्ता स्यात् तत्र वाटिकायां घर्मक्लान्तिहरं धारागृहयन्त्रालतामण्डपं स्थानं भवेत्।

काव्याभिनिवेशखिन्नेन कविना व्यवहार्यम्-

तेन खिन्नेन मनोरञ्जनं ग्राह्यम्, आज्ञामूकपरिजनो भवतु, कविस्थानं विजनं भवतु तस्य परिचारकवर्गः अपभ्रंशभाषणप्रवणः, परिचारिकाः मागधभाषाभाषिण्यः गृहस्त्रियः- प्राकृतसंस्कृतविदः मित्राणि सर्वभाषाभाषीणि स्युः।

6) कविद्वारा लेखकचयनं सभासंस्कारशुद्ध्यर्थम्-

सर्वभाषाकुशलः, शीघ्रवाक् चार्वक्षरः, इङ्गिताकारवेदी, नानालिपिज्ञः, कविः सुलक्षणसुरूपश्च लेखकः

7) भाषानियमः

पुराकाले नृपतिः स्वभवने भाषानियमं स्वैरं करोतियथा- मगधेषु शिशुनागः दुरुच्चारान् टकारादीन् ऊष्माणत्रयवर्णान् अपास्यत्। सूरसेनेषु कुविन्दो नाम राजा परुषसंयोगाक्षरवर्जमकरोत्। कुन्तलेषु सातवाहनः प्राकृतभाषात्मकमन्तःपुरं चकार उज्जयिन्यां साहसांको नृपतिः संस्कृतभाषात्मकमन्तपुरं व्यधात्।

काव्यविद्यासहायकानि-

सम्पुटिका सुधाखण्डः समुद्गकः सलेखनीकमषीभाजनानि ताडिपत्राणि भूर्जत्वचो वा सलोहकण्टकानि तालदलानि सुसम्मृष्टा भित्तयः- तद्धि काव्यविद्यायाः परिकरः–इत्याचार्याः, प्रतिभैव परिकरः- इतियायावरीयः।

सर्वादौ काव्यविद्याशिक्षार्थिना कविभवनाय आत्मदर्शनं विधेयम्- ममाध्ययनं कियन्मात्रकम् कां भाषामधिकरोमि। अधुना प्रजानां राज्ञां च रुचिः कस्मिन् विषये। किम्विधायां गोष्ठ्यां मम संरक्षकः रुचिकरो भवति। कस्मिन् विषये शिक्षितः, कुत्र मना रमते इतिविचार्य कयाचिदपि अनुकूलभाषया काव्यं कुर्यात्। राजशेखरः कथयतिपूर्वोक्तं सर्वमपि एकदेशकवये उक्तं नहि स्वतन्त्रकवये, स्वतन्त्रकवये एकभाषावत्सर्वामपि भाषां जानातिस्वतन्त्रः।

देशविशेषवशेनापि भाषाश्रयणं दृश्यते।

तदुक्तम्-गौडाद्याः संस्कृतस्थाः परिचितरुचयः प्राकृते लाटदेश्याः

सापभ्रंशप्रयोगाः सकलमरुभुवष्टक्कभादानकाश्च।

आवन्त्याः पारियात्राः सह दशपुरजैर्भूतभाषां भजन्ते

यो मध्येमध्यदेशं निवसतिस कविः सर्वभाषानिषण्णः।।[1]

गौडादिदेशानां कवयः संस्कृतप्रेमिणः, लाटदेशस्थाः प्राकृतप्रयोगपराः, राजस्थानसिन्धुदेशवासिनः अपभ्रंशपरायणाः अवन्तिकायाः पारियात्राणां दशपुराणां च निवासिनः कवयः पैशाचीभाषाप्रणयपराः मध्यदेशस्थाः कवयः सर्वभाषाविदो भवन्तिस्म।

कवये ध्यातव्याः शिक्षाः-

→ कविः जनरुचेः ध्यानमवश्यं विदधीत यथा- जानीयाल्लोकसाम्मत्यं कविः कुत्रममेतिच। लोकनिन्दाभयेन आत्मानमपि न तिरस्कुर्वीत- जनापवादमात्रेण न जुगुप्सेत चात्मनि। कविरचनाया महत्त्वं तदा प्रस्फुरतितदा लोकोऽत्र न विद्येत कवौ लोके स्थिते तत् रचना न प्रशंसा प्राप्नोति।

प्रत्यक्षकविकविता, कुलीनानां रूपं, गृहवैद्यस्य उपचारः कस्मैचिदेव रोचते न सर्वत्र। यथोक्तमपि-

प्रत्यक्षकविकाव्यं च रूपं च कुलयोषितः।

गृहवैद्यस्य विद्या च कस्मैचिद्यदि रोचते।।

→ काव्यगुणशून्यम् अल्पमनोज्ञं काव्यमपि सहजं श्रुतिसुखावहञ्चेत् रसिका नूनम् आनन्दन्ति ईदृशं काव्यं कौतूहलात् बालस्त्रीहीनजातीनां मुखे तिष्ठति। -

वचः स्वादु सतां लेह्यं लेशस्वादपि कौतुकात्

बालस्त्रीहीनजातीनां काव्यं यातिमुखान्मुखम्।।

→ कदाचिदवसरे आशुकविकृतं सन्न्यासिकृतं नृपकृतं काव्यं तत्काल एव परिप्रचरति।

काव्यविद्याशिक्षार्थिना अवधेयम्-

1. अर्द्धकृतं काव्यं न श्रावयेत् तत्पूर्णता कठिना भवत्यन्यथा – तथा किञ्च न अर्द्धकृतं पठेदसमाप्तिस्तस्य फलमितिकविरहस्यम्।
2. न नवीनमेकाकिनः पुरतः। स हि स्वयं ब्रुवाणः कतरेण साक्षिणा जीयते।
3. न च स्वकृतिं बहु मन्येत। पक्षपातो हि गुणदोषौ विपर्यासयति।
4. न च दृप्येत्। दर्पलवोऽपि सर्वसंस्कारानुच्छिनत्ति।
5. परैश्च परीक्षयेत्। यदुदासीनः पश्यतिन तदनुष्ठातेतिप्रायोवादः।
6. कविमानिनं तु छन्दोनुवर्तनेन रञ्जयेत्।

<u>कविचर्या</u>

नियमिते काले अकृताः प्रवृत्तयः अफलदा भवन्ति। यथा- 'अनियतकालाः प्रवृत्तयो विप्लवन्ते[2] इति' तस्मात् कविना कथं दिनचर्या रचनीया तत्कथ्यते- दिवसं निशां च यामक्रमेण चतुर्धा विभजेत। तदनु दिनस्य प्रथमप्रहरे-

---

1 का.मी. 31-10

2 काव्यमीमांसा, दशमः अध्यायः

 ISSN: 2320-740X

प्रभाते कृतसन्ध्योपासनः सारस्वतसूक्तमधीयीत। ततो विद्याभवने ससुखमासीनः काव्यस्य विद्योपविद्या अनुशीलयेत् आप्रहरम् अभ्यासेन संस्कारम् उद्बोदधुं प्रातिभसंवर्धने नान्यः कश्चन हेतुः।

न ह्येवम्विधमन्यत्प्रतिभाहेतुर्यथा प्रत्यग्रसंस्कारः।[1]

दिनस्य द्वितीयप्रहरे तृतीयप्रहरे च

1. काव्यक्रियां कुर्यात्।
2. उपमध्याह्नं स्नायाद् अविरुद्धं भुञ्जीत च।
3. भोजनान्ते काव्यगोष्ठीं प्रवर्त्तयेत् कदचिच्च प्रश्नोन्तराणि भिन्दीत।
4. काव्यसमस्याधारणा।
5. मातृकाभ्यासः।
6. चित्रकाव्यरचनाभ्यासः।

चतुर्थप्रहरे

1. पूर्वाह्नविहितकाव्यस्य परीक्षा।
2. रसावेशतःकाव्यं विरचयतो न च विवेक्त्री दृष्टिस्तस्मादनुपरीक्षेत।
3. निष्प्रयोजनानाम् अधिकपदानां त्यागः।
4. न्यूनस्य पूरणम्।
5. अन्यथास्थितस्य परिवर्त्तनम्।
6. विस्मृतस्य अनुसन्धानम्।

सायंकालस्य प्रथमप्रहरे-

1. कृतसायंसन्ध्योपसनः सरस्वतीं भजेत्।
2. दिवा विहितपरीक्षितस्याभिलेखनम्।
3. स्त्रीरमणम् श्रमनिवृत्तिपर्यन्तम्।

द्वितीये तृतीयप्रहरे च

1. साधु शयीत, सम्यक्स्वापो वपुषः वरमारोग्याय।

चतुर्थप्रहरे

1. नूनं प्रतिबुध्येत

   ब्राह्मे मुहूर्त्ते मनः प्रसीदत्तांस्तानर्थान् अध्यक्षयतिइतिआहोरात्रिकम्

- रचनाकालवशेन राजशेखरेण कविश्रेण्यः प्रोक्ताः-

  प्रथमः असूर्यम्पश्यः, द्वितीयः निषण्णः, तृतीयस्तावत् दत्तावसरः चतुर्थश्च प्रायोजनिकः।

---

1 का.मी.10/129

1) यः गिरिकन्दरासु भूगर्भगृहासु स्थिरचित्तस्सन् कवयतिकाव्यं सः असूर्यम्पश्यः तस्य सर्वे कालाः कवनाय।
2) काव्यस्य उत्कटया चिकीर्षया कवनं करोति, स निषण्णः तस्य सर्वे कालाः।
3) यः अध्यापनादिक्रियाकलापं ससमयं सम्पादयन् कवते स दत्तावसरः तस्य रचनाकालः-
    1. रात्रेः चतुर्थप्रहरस्य अर्द्धभागः सारस्वतमुर्हूर्त्तः
    2. भोजनान्ते
    3. रमणान्ते
    4. अयानयात्रा
4) प्रसङ्गवशात् प्रस्तुतं कञ्चनविषयमुद्दिश्य कवयतिस प्रायोजनिकः तस्य प्रयोजनवशात् रचनाकालव्यवस्था।
5) पुरुषवत् योषितोऽपि कवीभवेयुः।

प्रबन्धविनाशकारणानि

पुनः समापपिष्यामि पुनः संस्कारिष्यामि, सुहृद्भिः सह विवेचयिष्यामीतिकर्तुराकुलता राष्ट्रोप्लवश्च प्रबन्धविनाशकारणानि। यतोहि यः उक्तसमयमनुपाल्य काव्यकरणाय यतते। तस्य कृतिः समाजे आदृता भवति।

अहर्निशाविभागेन य इत्थं कवते कृती
एकावलीव तत्काव्यं सतां कष्ठेषु लम्बते
पूर्वोक्तकालं विभज्य यः काव्यरचनां कुरुते तत्काव्यं
मौक्तिकमालेव विदुषां कष्ठे तिष्ठति। तदेव बिल्हण आह-
मद्भारतीसूत्रनिवेशितानामेकावली कण्ठविभूषणं वः।।[1]

प्रकीर्णकविताकारिणः अगण्याः, सविषयकाव्यकारिणः शतं भवेयुः महाकाव्यकारिणस्तु अत्यल्पाः त्रयस्तत्रदुर्लभाः- तदेवोक्तम्-

मुक्तके कवयोऽनन्ताः संघाते कवयःशतम्।
महाप्रबन्धे तु कविरेकौ द्वौ दुर्लभास्त्रयः।।

कविना काव्यलेखने किं किमभिनिवेशनीयम्-

काव्यरचनाविरचनात् पूर्वं रचनाकारेण वैदर्भ्यादिरीतीनां सविचारं प्रयोगः कार्यः, सहैव माधुर्यादीनां प्रयोगः, शब्दार्थयोः सोद्देश्यं प्रयोगो विधेयः। तदैव प्रबन्धरचना विधेया। सामुद्रिकयानेन विना यात्रिणः समुद्रं न पारयन्तीति। तदेव आह-

रीतिं विचिन्त्य विगणय्य गुणान्विगाह्य
शब्दार्थसार्थमनुसृत्य च सूक्तिमुद्राः।

1 विक्रमांकदेवचरितम्-30

 ISSN: 2320-740X

कार्यो निबन्धविषये विदुषा प्रयत्नः

के पोतयन्त्ररहिता जलधौ प्लवन्ते।।[1]

तदेव बिल्हणेनोक्तम्-

सहस्रशः सन्तु विशारदानां वैदर्भलीलानिधयः प्रबन्धाः ।[2]

इत्यनन्यमनोवृत्तेर्निःशेषस्य कियाक्रमे

एकपत्नीव्रतं धत्ते कवेर्देवी सरस्वती।।[3]

एवम् अनन्यमनोवृत्त्या काव्यम् अभ्यस्यतःसमस्ते क्रियाक्रमे। सरस्वती देवी एकपत्नीव्रतं धारयतिअर्थात् सर्वथा वशीभूता भवति।

**सहायकग्रन्थसूची**


1. काव्यमीमांसा
2. सिद्धान्त कौमुदी(उणादिप्रकरणम्)
3. विद्धशालभंजिका
4. कर्पूरमञ्जरी
5. बालरामायणम्
6. ईशावास्योपनिषद्
7. अमरकोशः
8. विक्रमांकदेवचरितम्
9. श्रीमद्भगवद्गीता
10. विष्णुसहस्रनामस्तोत्रम्
11. मनुस्मृतिः
12. नीतिशतक
13. काव्यप्रकाशः


*******

1 का.मी. 10/133

2 विक्रमादिदेवचरितम् 1-73

3 काव्यमीमांसा, 10

# प्रथमलक्षणार्थविचारः

**डा. श्रीराम ए.एस्.**

सहायकाचार्याः

Department of Dharmashastra - Mimamsa

Faculty of Sanskrit-Vidya Dharma-Vijnan

Banaras Hindu University Varanasi

Uttar Pradesh, 221005

**शोधसारः**

भगवता जैमिनिना धर्माधर्मयोः विवेकाय मीमांसा व्यरचि । तस्यां मीमांसायां सन्ति द्वादश अध्यायाः । अध्यायेषु धर्मप्रमाणादिविचाराः चर्चिताः । प्रथमे अध्याये धर्मस्य लक्षणम्, तस्य च अष्टौ प्रमाणानि निरूपितानि । यागादिरूपःधर्मः वेदप्रतिपाद्यः, स्वर्गादिप्रयोजनसाधकः, अर्थश्च भवति। अर्थःनाम अनर्थभिन्नः इति। नरकाद्यनर्थकारकाः अनर्थाः । तद्भिन्नाः अर्थाः । यागदानहोमद्रव्यगुणभावनादौ लक्षणसमन्वयः । तद्बोधकानि च प्रमाणानि विध्यर्थवादमन्त्रस्मृत्याचारनामधेयवाक्यशेषसामर्थ्यानि । इमानि सर्वाण्यपि प्रमाणानि धर्मज्ञानरूपप्रमाकरणानि भवन्ति इतिहेतोः धर्मप्रमाणानि इतिउच्यन्ते । धर्मस्वरूपस्य धर्मप्रमाणानां च निरूपणेन आद्यः अध्यायः चरितार्थो भवति। एषां प्रमाणानां निरूपणमत्र क्रियते ।

**शोधपत्रम्**

वेदवाक्यानां तात्पर्यनिर्णयार्थं मीमांसायाः प्रवृत्तिः। विंशतिलक्षणी मीमांसा इतिकेचित् भणन्ति । तन्न चारु । यतःप्रतिपाद्यविषयभेदात्, ग्रन्थप्रणेतुः भेदात्, उपक्रमोपसंहारगतविषयभेदात् च द्वादशलक्षणी मीमांसा इतिपक्षः एव अभ्युपेयः । उपक्रमे अथातो धर्मजिज्ञासा इतिप्रतिज्ञाय उपक्रमे धर्मं व्याख्याय उपसंहारे च ब्रह्मप्रतिपादने उपक्रमोपसंहारयोः ऐक्यं न स्यात् । उपक्रमोपसंहारयोः एकविषयकत्वं शास्त्रसम्मतम् । यदि विंशतिलक्षणी मीमांसा इतिउच्येत तदा अशास्त्रीयत्वापत्तिः। अथातो धर्मजिज्ञासा इत्यनेन प्रतिज्ञाता मीमांसा चोदनालक्षणोर्थो धर्मः इतिसूत्रेण समारब्धा अन्वाहार्ये च दर्शनात् इतिसूत्रान्ता बोभवीति। अस्यां द्वादशलक्षण्यां प्रत्येकमपि अध्यायः प्रायः एकैकविषयप्रतिपादनपरः । तत्र प्रथमः अध्यायः प्रमाणनिरूपणपरः । इदं च शास्त्रं धर्मनिरूपणपरमितिहेतोः अध्यायेस्मिन् एतच्छास्त्रविचार्यविषयीभूतधर्मस्यैव प्रमाणानि प्राधान्येन निरूपितानि । यद्यपि आनुषङ्गिकतया प्रत्यक्षादीन्यपि प्रमाणानि निरूप्यन्ते, तथापि न तेषां प्राधान्यम् । तद्रीत्यैव पत्रेस्मिन् धर्मप्रमाणान्येव निरूप्यन्ते ।

मीमांसायां तच्छास्त्राभिज्ञैः लक्षणप्रमाणाभ्यां वस्तुसिद्धिःइतिधर्मस्य लक्षणमादावुक्त्वा तस्य प्रमाणानि क्रमशः निरूपितानि । चोदनालक्षणोर्थो धर्मः इत्यनेन सूत्रेण वेदप्रतिपाद्येष्टसाधनताकः इतियागादेः धर्मस्य लक्षणमुक्तम् । यः वेदेन कथितः, स्वर्गादिः इष्टस्य साधकः सः धर्मः । वेदबोधितःइतिकथनादेव धर्मे वेदः परमं प्रमाणमितिज्ञायते । वेदस्यास्य प्राधान्येन चत्वारः विभागाः भवन्ति । यथा विधिः, मन्त्रः, नामधेयम्, अर्थवादः इति। निषधस्य तु

 **ISSN: 2320-740X**

नञ्घटितविधिवाक्यत्वमितिहेतोः पृथक्सङ्कीर्तनं न कृतम् । वेदे अन्तर्निहितानि इमानि चत्वारि प्रमाणानि, पुनश्च वेदमूलकयोः स्मृत्याचारयोः च निरूपणमत्र भवति। तदन्ते च वाक्यशेषसामर्थ्ययोः च निरूपणमुखेन धर्मप्रमाणानि निरूप्यन्ते ।

प्रथमे चत्वारः पादाः सन्ति । प्रत्येकस्मिन् अपि पादे प्राधान्येन एकैकः विषयः समचर्चि । प्रथमपादः विधिपादः । द्वितीयः अर्थवादपादः । तृतीयः स्मृतिपादः । चतुर्थःनामधेयपादः इति। तदुक्तं –

विध्यर्थवादस्मृतयोः नाम चेतिचतुर्विधम् ।
प्रथमाध्यायगैः पादैःचतुर्भिः मानमीरितम् ।।

प्रथमे विधिः, द्वितीये अर्थवादमन्त्रौ, तृतीये स्मृत्याचारौ, चतुर्थे नामधेयवाक्यशेषसामर्थ्यानि निरूपितानि ।

**प्रथमपादार्थविचारः**

प्रथमे पादे अनधिगताबाधितार्थानुष्ठापकरूपाणां विधीनां प्रामाण्यं प्रतिपादितम् । विधिः इतरनिरपेक्षः इतिहेतोः तस्य सर्वादौ निरूपणम् । तदङ्गतया शब्दनित्यत्वापौरुषेयत्वयोश्च निरूपणं विहितम् ।

**विधिः**

विधिः अज्ञातार्थज्ञापको वेदभागः । सः विधिः मानान्तरेण अप्राप्तं स्वर्गादिप्रयोजनवन्तं यागादिरूपं धर्मं विधत्ते । वेदेन धर्मः ज्योतिष्टोमादिः कर्तव्यतया विधीयते । एवमेव अधर्मः सुरापानादिः अकर्तव्यतया उपदिश्यते । विधेः एकम् उदाहरणं भवति“स्वाध्यायोऽध्येतव्यः” इति। “स्वाध्यायोऽध्येतव्यः” इतिविधिः अर्थज्ञानोद्देशेन स्वाध्यायाध्ययनं विधत्ते । अध्ययनं नाम गुरुमुखोच्चारणपूर्वकानूच्चारणम् । स्वाध्यायो नाम स्वकुलपरम्परागता वेदशाखा । अर्थज्ञानं तु विचारं विना नोपपद्यत इत्यतःविचारोपि कर्तव्यः इतिअध्ययनविधिनैव विधीयते । विचारो नाम वाक्यतात्पर्यनिर्णयानुकूलं युक्त्यनुसन्धानम् । अयं विचार एव मीमांसा । गुरुमुखोच्चारणपूर्वकशिष्योच्चारणानन्तरं वेदस्य अर्थज्ञानं तात्पर्यविचारं विना न सम्भवतिइतिहेतोः तात्पर्यविचारः कर्तव्यः इतिविचारार्थम् अपेक्षितं मीमांसाध्ययनम् अध्ययविधिरेव विधत्ते । तेन मीमांसाशास्त्रमपि वैधम् । धर्मविषयकप्रमाजनकवेदवाक्यं विधिः, अधर्मविषयकप्रमाजनकवेदवाक्यं निषेधः इतिच उच्यते ।

प्रत्यक्षादिना यत् ज्ञातुं न शक्यते तत् वेदेन कथं ज्ञातुं शक्यते इतिकदाचित् प्रश्नः मनसि उदियात् । यतःवेदो नाम शब्दराशिः । शब्दश्च अर्थं बुद्ध्वा शब्दरचना इतिन्यायानुसारं मानान्तरेण अर्थमवगत्य पुरुषेण विरचितः। एवं पुरुषसंस्पर्शस्य विद्यमानत्वात् तत्र भ्रमादीनां सम्भवात् धर्मप्रतीतिः वेदेन न स्यादिति। तन्न, वेदः अपौरुषेयः इतिमीमांसकसमयः ।

वैदिकशब्दानां स्वार्थेन सह सम्बन्धः येन केनापि पुरुषेण प्रकल्पितो न, किन्तु सः शब्दार्थयोः सम्बन्धः नित्यः । तदुपरि प्रश्नः, सम्बन्धस्य नित्यत्वम्, सम्बन्धिनोः नित्यत्वं विना न सम्भवति। द्वौ च सम्बन्धिनौ । एकः शब्दः, अपरः अर्थः।

तयोः तु अनित्यत्वं तावत् अनुभववेद्यम् । उत्पन्नो गकारः, नष्टो गकार इत्यनुभवात् शब्दःअनित्यः इति। तन्न, सोयं गकार इत्येवं प्रत्यभिज्ञायमानत्वात् शब्दःनित्यः । अनुभवस्तु भ्रमात्मकः ।

तदुपरि कदाचित् संशयः स्यात् अर्थस्य अनित्यत्वात् कथं शब्दार्थयोः सम्बन्धः नित्यः इति। जातिरूपेण अर्थस्य स्वीकारात्, तस्याः नित्यत्वात् अर्थनित्यत्वम् । एवं च तयोः सम्बन्धोपि नित्यः इतिकथने न कापि अनुपपत्तिः। एवं धर्मः वैदिकशब्दप्रमाणवेद्यः ।

प्रत्यक्षादीनि लौककिकविषयबोधकानि । धर्मस्तु अलौकिकः इतिप्रत्यक्षगोचरत्वं धर्मस्य न सम्भवति। प्रत्यक्षमूलकत्वात् अनुमानादीनामपि न धर्मप्रतिपादकत्वम् ।

**द्वितीयपादार्थः**

द्वितीये विधिवाक्यसमभिव्याहृतानामर्थवादरूपाणां वेदवाक्यानां प्रामाण्यमादौ प्रतिपाद्य तदनु तदसमभिव्याहृतानां मन्त्ररूपाणां वेदवाक्यानां प्रामाण्यं प्रतिपाद्यते ।

**अर्थवादः**

विधिनिषेधयोः साध्यसाधनेतिकर्तव्यतेतित्रयः अंशाः भवन्ति । तत्र प्राशस्त्यज्ञानम्, एवम् अप्राशस्त्यज्ञानं वा इतिकर्तव्यता । तच्च प्राशस्त्यादिज्ञानम् अर्थवादजन्यम् । अर्थवादः च विधिसन्निधौ पठितःविधेयप्राशस्त्यसमर्पकः, निषेधसन्निधौ पठितःनिषेध्यनिन्दको वा भवति। अस्य वाक्यस्य स्वातन्त्र्येण सप्रयोजनशाब्दबोधजनकत्वं न सम्भवति। किन्तु लक्षणया पदार्थमुपस्थाप्य, विधिवाक्येन सह पदैकवाक्यतां प्रापय्य धर्मज्ञानम् उत्पादयन्ति अर्थवादाः । तद्यथा "वायव्यं श्वेतम् आलभेत भूतिकामः" इतिविधिः । "वायुर्वै क्षेपिष्ठा देवता" इत्यर्थवादः । प्रशस्तेन वायुदेवताकेन श्वेतपशुद्रव्यकेन यागेन ऐश्वर्यं भावयेत् इतिअखण्डो बोधः । विधेयादौ रुच्यादिकमुत्पाद्य प्रवृत्त्यादिकमुत्पादयतीतिअस्य सार्थक्यम् । विध्यैकवाक्यतया अर्थवादानां प्रामाण्यम् । न तु स्वातन्त्र्येण ।

**मन्त्रः**

प्रयोगसमवेतार्थप्रकाशकः मन्त्रः । तद्द्वारा अस्य प्रयोजनवत्वम् ।

मन्त्राणां प्रामाण्यं मन्त्रविनियोजकविधिवाक्योपस्थाप्यमानपदार्थविधया सम्भवति। "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इतिइन्द्रदेवताप्रकाशकमन्त्रविनियोजकः विधिः । अस्मिन् विधौ घटकीभूतं पदम् ऐन्द्र्या इतिपदम्। तत्पदबोध्यः भवति"कदाचनस्तरीरसि" इतिमन्त्रः । एवं मन्त्रः पदार्थविधया उपस्थितः। पदार्थेभ्यः वाक्यार्थप्रमा जायते । एवं च मन्त्राणामपि धर्मप्रमाप्रयोजकत्वं सम्भवति।

**तृतीयपादार्थः**

तृतीये पादे वेदातिरिक्तानि स्मृत्यादीनि धर्मप्रमोत्पादकानि विचारितानि । यथा - स्मृतिः, आचारः इति। वेदमूलकत्वेनैव तयोः प्रामाण्यम् । न तु स्वातन्त्र्येण । यदि स्मृत्याचारयोः स्वातन्त्र्यं तदा तत्र भ्रमसंशयादीनां सम्भवात् प्रामाण्यं न स्यात् ।

 ISSN: 2320-740X

**स्मृतिः**

सर्वैः अयं वेदः अधिगन्तुं न शक्यः इतिहेतोः वेदार्थविद्भिः ऋषिभिः मन्वादिभिः स्मृतयः रचिताः । पुरुषप्रणीतत्वात् वेदमूलकत्वेनैव स्मृतेः प्रामाण्यम्, न तु स्वातन्त्र्येण । तत्रापि श्रुत्यविरुद्धा स्मृतिः स्वमूलभूतश्रुतिकल्पनद्वारा अनुष्ठापिका भवति। अष्टकाः कर्तव्याः इत्यादिस्मृतयः मूलभूतश्रुतिकल्पनाद्वारा प्रमाणम् । औदुम्बरी सर्वा वेष्टयितव्या इत्यादिश्रुतिविरुद्धा स्मृतिः तु स्वमूलभूतश्रुतिं कल्पयितुमसमर्था इतिहेतोः अननुष्ठापिका भविष्यति। क्वचित् वेदं कृत्वा वेदिं करोतिइत्यादौ क्षुते आचामेत् इत्यादिस्मृतिरपि वेदविरुद्धा प्रमेयबलानुसारं श्रुतिमेव बाधते । एवं च वेदाविरुद्धा स्मृतिः वेदमूलकतया धर्मज्ञानं जनयति।

व्याकरणादिस्मृतिरपि धर्मप्रमां जनयतिइतिहेतोः प्रमाणम् ।

बौद्धादिस्मृतिः वेदमूला न भवतीतितया धर्मप्रमा न जायते । यद्यपि अहिंसादिविषये बौद्धस्मृतेः श्रुतेश्च एकरूपता विद्यते तथापि तन्मूलत्वाभावात् बौद्धस्मृतेः प्रामाण्यं नाङ्गीक्रियते ।

**आचारः**

शिष्टैः धर्मबुद्ध्या क्रियमाणाः आचाराश्च धर्मज्ञानं जनयन्ति । शिष्टाचारस्य तु वाक्यरूपत्वाभावात् मूलभूतस्मृतिकल्पनद्वारा धर्मप्रमाप्रयोजकत्वम् । तत्रापि अयमाचारः सार्वत्रिकं प्रमाणम् ।

साधुशब्दप्रयोगरूपाचारश्च धर्मे प्रमाणम् इतिसाधुशब्दाः एव प्रयोक्तव्याः ।

**चतुर्थपादार्थविचारः**

चतुर्थे पादे वाक्यघटकीभूतानां पदानां प्रामाण्यं प्रतिपाद्यते । यथा नामधेयवाक्यशेषसामर्थ्यानि इति।

**नामधेयम्**

विधेयार्थपरिच्छेदकः शब्दःनामधेयम् । विधिविधेययागादेः नाम इतियावत् । विधिवाक्यस्यैव एकदेशो भवति नामधेयम् । विधिवाक्ये त्रिप्रकारकाणि पदानि भवन्ति । फलपदमेकम्, विधायकप्रत्ययघटिततिङन्तमन्यत्, सुबन्तपदमितिअपरम् । यथा “उद्भिदा यजेत पशुकामः” इति। अत्र उद्भित् इतिपदं नामधेयम् ।

**नामधेयनिर्णायकानि**

नामधेयमित्यङ्गीकर्तुं चत्वारि प्रमाणानि । मत्वर्थलक्षणाभयम्, वाक्यभेदः, तत्प्रख्यशास्त्रम्, तद्व्यपदेशः इति। मत्वर्थलक्षणाभयात् नामधेयम् इतिनिर्णीयते । यथा - उद्भिदा यजेत पशुकामः । वाक्यभेदभयात् नामधेयम् । यथा - चित्रया यजेत पशुकामः । तत्प्रख्यशास्त्रात् नामधेयम् । यथा - अग्निहोत्रं जुहोति । तद्व्यपदेशात् नामधेयं भवति। यथा - श्येनेन अभिचरन् यजेत ।

१. मत्वर्थलक्षणाभयम्

उद्भिदा यजेत पशुकाम इत्यत्र उद्भित् इतिशब्दस्य गुणवाचकत्वपक्षे पशुरूपफलोद्देशेन यागो विधीयते, यागं प्रतिच उद्भिद्गुणो विधीयत इतिवक्तुं न शक्यते । एकस्य विधेः अनेकव्यापारपरत्वे वाक्यभेदो भवति।

अतःउद्भिद्गुणविशिष्टयागस्य विधानं फलोद्देशेन कार्यम् । तेन च मत्वर्थलक्षणा अपेक्षिता । यदि उद्भित् शब्दो गुणं न बोधयित्वा यागस्य नाम समर्पयतितदा उद्भिन्नामको यागः फलोद्देशेन विधीयत इतिन मत्वर्थलक्षणा। अतःउद्भित् इतियागस्य नामधेयम् ।

२. वाक्यभेदभयम्

चित्रया यजेत पशुकाम इत्यनेन विधिना चित्रत्वाद्यनेकशिष्टयागस्य विधानं कर्तुं न शक्यते । दधि मधु पयो घृतं धाना उदकं तण्डुलाः तत्संसृष्टं प्राजापत्यम् इतिचित्रायागस्य उत्पत्तिवाक्यम् । अनेन दध्यादिद्रव्यरूपस्य गुणस्य विहितत्वात्, उत्पत्तिशिष्टदध्याद्यवरोधात्, तस्मिन् एव यागे द्रव्यान्तरविधानं न सम्भवति। चित्रत्वस्त्रीत्वविशिष्टयागान्तरस्य वा विधानं कर्तुं न शक्यते । यागस्य चित्रत्वस्त्रीत्वेतिगुणेन साकम्, अपि च पशुकाम इतिफलसमर्पकस्य पदस्य विद्यमानत्वात् फलेन साकं सम्बन्धे स्वीक्रियमाणे वाक्यभेदो भवति।

अतःचित्राशब्दो नामधेयं यागस्य इतिस्वीकार्यम् । तेन च चित्रानामकेन यागेन पशुं भावयेत् इतिसामानाधिकरण्येन अन्वयः चित्रायागयोः । दध्याद्यनेकद्रव्येण साध्यत इतिअस्य यागस्य नाम चित्रा इतिसङ्गच्छते ।

३. तत्प्रख्यशास्त्रम्

तस्य - गुणस्य, प्रख्यापकस्य - प्रापकस्य, बोधकस्य, शास्त्रं - शास्त्रान्तरम्, प्रमाणान्तरं वा इत्यर्थः। विधित्सिताग्न्यादिरूपगुणप्रापकं यदाहवनीये जुहोतिइत्यादिशास्त्रान्तरं वा यदग्नये च प्रजापतये च सायं जुहोतिइत्यादिशास्त्रान्तरं वा विद्यते । प्राप्तस्य अग्नेः पुनः विधानं व्यर्थमितिअग्निहोत्रं जुहोतिइत्यत्र अग्निहोत्रपदं नामधेयं भवति।

४. तद्व्यपदेशः

तेन व्यपदेशः । तेन विधित्सितेन गुणेन श्येनेन व्यपदेशः, उपमानत्वेन कथनम् । यद्विधेयं तस्यैव स्तुतिः कार्या । यदि श्येनेन अभिचरन् यजेत इत्यत्र श्येनो विधेयः स्यात् तर्हि यथा वै श्येनो निपत्य आदत्ते एवमयं भ्रातृव्यं निपत्य आदत्ते इत्यनेन अर्थवादेन श्येनस्यैव स्तुतिः कार्या । परमर्थवादेन श्येनोपमानेन अर्थान्तरस्यैव स्तुतिः क्रियते । उपमानत्वोपमेयत्वयोः भिन्ननिष्ठत्वात्, श्येनोपमानेन श्येनस्यैव तुलना कर्तुं न शक्यते । यदि श्येनेन अभिचरन् यजेत इत्यनेन श्येनसंज्ञको यागो विधीयते तदा अर्थवादेन श्येनोपमानेन यागस्यैव स्तुतिः कर्तुं शक्यते । अतःश्येनशब्दःकर्मनामधेयम् ।

**वाक्यशेषः**

अर्थवादत्वेन रूपेण अर्थवादानां स्तावकत्वेन धर्मप्रमाप्रयोजकत्वम् । वाक्यशेषत्वेन रूपेण तस्यैव अर्थवादस्य विधीयमानद्रव्यादिसन्देहनिवारकतया धर्मप्रमाजनकत्वम् । तत्र द्रव्यसन्देहनिवारकतया धर्मप्रमाजनकत्वे उदाहरणं भवतितेजो वै घृतम् इति। अयम् अर्थवादः घृतं स्तौति। यद्विधेयं तस्य स्तुतिः इतिन्यायेन घृतस्य स्तुत्या घृतस्य विधानमितिज्ञायते । तत्प्रकरणे विधिः श्रूयते अक्ताः शर्कराः उपदधातिइति। अञ्जनकर्मीभूतशर्कराणामुपधानं विहितम् । परमत्र अञ्जनसाधनीभूतं द्रव्यं किमितिनोक्तम् । तथापि नष्टाश्वदग्धरथन्यायेन घृतेनैव अञ्जनमितिनिर्णीयते ।

 ISSN: 2320-740X

विधिनाञ्जनसाधनीभूतद्रव्यसामान्यस्य बोधितत्वात्, सामान्यस्य अविधेयत्वात्, विशेषाकाङ्क्षायाम्, अर्थवादेन अञ्जनसाधनीभूतघृतरूपद्रव्यविशेषसमर्पणात्, अर्थवादवशेन घृतद्रव्यग्रहणे न कोपि विरोधः । अर्थवादेन घृतद्रव्यं समर्पितमिति, अञ्जनसाधनीभूत- द्रव्याकाङ्क्षायाः शान्तौ, घृतातिरिक्तद्रव्यान्तरस्य आक्षेपो न सम्भवति। उपक्रमोपसंहारयोः विरोधे एव प्राबल्यदौर्बल्यचिन्तावसरः । प्रकृते तु उपक्रमोपसंहारयोः अञ्जनसाधनरूपद्रव्यसमर्पणरूपैकविषयकत्वात् विरोध एव नास्तीति, न उपक्रमाधिकरणावसरः । विधिना यदि द्रव्यसामान्यं बोध्यते, तदा अर्थवादस्थेन घृतपदेन घृताघृतं बोधनीयमितिलक्षणाप्रसङ्गः । प्रकृते उपक्रमोपसंहारयोः विरोधाभावादेव लक्षणाग्रहणे न प्रमाणसद्भावः। अर्थवादाधिकरणोक्तरीत्या अर्थवादविध्योः एकवाक्यत्वं सम्पादनीयम् । तच्च उभयोः एकार्थकत्वे एव सम्भवति। तथा च विधिनापि घृतमेव बोधनीयम् । अतःअर्थवादस्य सन्दिग्धार्थनिर्णायकत्वेनापि प्रामाण्यं सम्भवति। तेन शर्कराणामञ्जनं घृतेनैव कार्यम् । एवं सन्देहनिवारकतयार्थवादानां क्वचित् प्रामाण्यं सम्भवति।

**सामर्थ्यम्**

एवं सामर्थ्यम् अपि धर्मे प्रमाणम् ।

"स्रुवेणावद्यति, स्वधितिनावद्यति, हस्तेनावद्यति" इत्यादौ विधेरवदेयद्रव्यविषये सन्दिग्धस्य सामर्थ्यान्निर्णयः । सः च स्रुवेण द्रवद्रव्यमेवाज्यादि, स्वधितिना मांसादि, हस्तेन संहतं पुरोडाशादीति।

एवम् "अञ्जलिना सक्तून्जुहोति" इत्यादावपि न सम्पुटाकारोऽञ्जलिः, अपि तु व्याकोशात्मक एव सामर्थ्यात् ।

तदेवं विध्यर्थवादमन्त्रस्मृत्याचारनामधेयवाक्यशेषसामर्थ्यरूपाण्यष्टौ प्रमाणानि धर्माधर्मयोर्निरूपितानि ।

एवं च अर्थवादादिप्रमाणाष्टकबोध्यो धर्मः श्रेयसः साधनम् इतिशम् ।

**वाक्योद्धारः**

| | |
|---|---|
| स्वाध्यायोऽध्येतव्यः | - तैत्तिरीयारण्यकम्-2-15 |
| अथातो धर्मजिज्ञासा | - जैमिनीयसूत्रम्-1-1-1-1 |
| ऐन्द्र्या गार्हपत्यमुपतिष्ठते | - मैत्रायणीयसंहिता-1. |
| कदाचनस्तरीरसि | - तैत्तिरीयसंहिता-1-4-22 |
| चोदनालक्षणोर्थो धर्मः | - जैमिनीयसूत्रम्-1-1-1-2 |
| अन्वाहार्ये च दर्शनात् | - जैमिनीयन्यायमाला -12-4 |
| लक्षणप्रमाणाभ्यां वस्तुसिद्धिः | - जैमिनीयन्यायमाला -1-1-2 |

विध्यर्थवादस्मृतयोः नाम चेतिचतुर्विधम् । प्रथमाध्यायगैः पादैःचतुर्भिः मानमीरितम् ।।

| | |
|---|---|
| जैमिनीयन्यायमाला | – उपोद्घातः |
| अर्थं बुद्ध्वा शब्दरचना | - मीमांसान्यायप्रकाशः - आख्यातार्थनिरूपणम् |
| वायव्यं श्वेतम् आलभेत भूतिकामः | – तै.सं.2.1.1.1 |

वायुर्वै क्षेपिष्ठा देवता - तै.सं.2.1.1.1

अष्टकाः कर्तव्याः - आश्वलायनगृह्यसूत्रम् – 2.4.1

औदुम्बरी सर्वा वेष्टयितव्या – जैमिनीयन्यायमाला – 1-3-2

वेदं कृत्वा वेदिं करोति - आप.7.3.10

क्षुते आचामेत् - गौभिलगृह्यसूत्रम्1.2.32

चित्रया यजेत पशुकामः – तै.सं.2.4.6

दधि मधु पयो घृतं धाना उदकं तण्डुलाः तत्संसृष्टं प्राजापत्यम् – काठकसंहिता – 11.2

यदाहवनीये जुहोति - तै.ब्रा.1.1.10

यदग्नये च प्रजापतये च सायं जुहोति – मै.सं.1-8-7

तेजो वै घृतम् - ऐ. 8.20

स्रुवेणावद्यति – मै.सं.3.10.4

स्वधितिनावद्यति - मै.सं.3.10.4

हस्तेनावद्यति - मै.सं.3.10.4

अग्निहोत्रं जुहोति- तैत्तिरीयसंहिता-1.5.9.1

उद्भिदा यजेत पशुकामः - ताण्ड्यब्राह्मणम्-19-7-3

श्येनेनाभिचरन् यजेत - षड्विंशब्राह्मणम्-3.8.2

**परिशीलितग्रन्थाः**

1. भाट्टदीपिका – खण्डदेवः– सद्गुरुप्रकाशनम्-देहली-1987

2. जैमिनीयन्यायमाला – माधवाचार्यः – चौखम्बा संस्कृत संस्थान-वाराणसी-1991

3. मीमासान्यायप्रकाशः – आपदेवः- चौखम्बा संस्कृत संस्थान-वाराणसी – 2016

******

 ISSN: 2320-740X

# दिनकरी-प्रभा-मञ्जूषामतदिशा सिद्धान्तमुक्तावलीग्रथितद्रव्यत्रयसमीक्षणम्

**सुव्रत-गायेनः**

सहायकाचार्यः, संस्कृतविभागस्य,

चन्दननगर-महाविद्यालयस्य,चन्दननगरस्थस्य,

हुँगली-मण्डलस्थस्य, पश्चिमवङ्गस्य, 712136.

**शोधसारः** – साक्षाण्मणिग्रन्थस्य तट्टीकादिसहितस्य बालानां पठनं सुदुष्करमितिकाणादाक्षपादमतयोस्सङ्क्षेपरूपो भाषापरिच्छेदाख्यो ग्रन्थो ग्रथितःश्रीविश्वनाथन्यायपञ्चाननैः। सत्स्वपि प्रकरणग्रन्थान्तरेषु तर्कभाषा-तर्कसंग्रह-तर्ककौमुदी-तार्किकरक्षादिषु कारिकावलीकीर्त्तिगरिमा ग्रन्थान्तरोपयोगितामतिशेते। तद्भाषापरिच्छेदनिगूढतत्त्वप्रकाशार्थं नैकैर्विद्वद्भिर्नैकाः टीकाः प्रणीताः। तासु महादेवदिनकरभट्टयोः दिनकरीयं, रायनृसिंहशास्त्रिणः प्रभा, तच्छिष्यस्य श्रीपट्टाभिरामस्य मञ्जूषा च सर्वा हि टीका अतिशय्य विद्योतन्तेतमाम्। विस्तृते अपि विविधविबुधव्याख्याने यद्यपि एकमेव समानं मौलं विषयमाश्रित्य व्याख्यातारः तत्तद्ग्रन्थेषु तत्तत्सिद्धान्तानुगुणं मूलग्रन्थव्याख्यानपराः तथापि व्याख्यातृबुद्धिवैभिन्न्यान्मिथो वैमत्यं सुलभम्। तेषां परस्परसमीक्षणेन विना तादृशव्याख्यातृकर्कशतरगीर्वारिपिच्छिले अध्वनि न प्रवर्तते मतिमतां सतां मतिरितिपृथिव्यप्तेजआश्रितं दिनकरी-प्रभा-मञ्जूषा-मतसमीक्षणं संक्षेपतो यथामतिअस्मद्ग्रन्थे निबद्धम्।

**मुख्यशब्दाः** – मुक्तावली, गन्धहेतुत्वं, जलत्वजातिसिद्धिः, उष्णत्वं, तादात्म्यसम्बन्धावच्छिन्न, समवायसम्बन्धावच्छिन्न इत्येते।

**उपोद्घातः– मानाधीना मेयसिद्धि**रितिनयेन प्रमेयप्रतिपिपादयिषामात्रस्यैव प्रमाणायत्तसिद्धिकतया तथा उपजीव्यतया प्रमाणबुभुत्साया एवौत्सर्गिकतया प्रमाणमार्गमात्रमाश्रित्य तत्त्वचिन्तामणिग्रन्थो निखिलशास्त्रकृदादरणीयतमः निरतिशयवाङ्माधुरीगुम्फितो निसर्गसुन्दरातिसंक्षिप्तपदसङ्घटनैर्विनिर्मितोऽपि बह्वर्थगर्भितःविप्रतिपन्नोपपत्तिनिराकृतिविजृम्भणेन व्यरचि श्रीमद्गङ्गेशोपाध्यायैः यस्य नव्यन्याय इतिलोकोत्तरमर्यादा। किन्तु साक्षाण्मणिग्रन्थस्य तट्टीकादिसहितस्य बालानां पठनं सुदुष्करमितिकाणादाक्षपादमतयोस्सङ्क्षेपरूपो भाषापरिच्छेदाख्यो ग्रन्थो ग्रथितःश्रीविश्वनाथन्यायपञ्चाननैः। सत्स्वपि प्रकरणग्रन्थान्तरेषु तर्कभाषा-तर्कसंग्रह-तर्ककौमुदी-तार्किकरक्षादिषु कारिकावलीकीर्त्तिगरिमा ग्रन्थान्तरोपयोगितामतिशेते। तद्भाषापरिच्छेदनिगूढतत्त्व-प्रकाशार्थं नैकैर्विद्वद्भिर्नैकाः टीकाः प्रणीताः। तासु महादेवदिनकरभट्टयोः दिनकरीयं, रायनृसिंहशास्त्रिणः प्रभा, तच्छिष्यस्य श्रीपट्टाभिरामस्य मञ्जूषा च सर्वा हि टीका अतिशय्य विद्योतन्तेतमाम्। विस्तृते अपि विविधविबुधव्याख्याने यद्यपि एकमेव समानं मौलं विषयमाश्रित्य व्याख्यातारः तत्तद्ग्रन्थेषु तत्तत्सिद्धान्तानुगुणं मूलग्रन्थव्याख्यानपराः तथापि व्याख्यातृबुद्धिवैभिन्न्यान्मिथो वैमत्यं सुलभम्। तेषां परस्परसमीक्षणेन विना तादृशव्याख्यातृकर्कशतरगीर्वारिपिच्छिले

अध्वनि न प्रवर्तते मतिमतां सतां मतिरितिपृथिव्यप्तेजआश्रितं दिनकरी-प्रभा-मञ्जूषा-मतसमीक्षणं संक्षेपतो यथामतिअस्मद्ग्रन्थे निबद्धम्।

- **न्यायसिद्धान्तमुक्तावल्याः पृथिवीप्रकरणे दिनकरीप्रभामञ्जूषाणां मतसमीक्षणम्**

साधर्म्यवैधर्म्यनिरूपणानन्तरं विश्वनाथेन पृथिव्यादिद्रव्याणां निरूपणं कृतम्। तत्र पृथिवीं निरूपयता विश्वनाथेन उक्तम् –

**तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता।**[1] इति।

कारिकामिमां व्याख्यातुं विश्वनाथेन निरुक्तम् –

**साधर्म्यवैधर्म्ये निरूप्य सम्प्रतिप्रत्येकं पृथिव्यादिकं निरूपयति– तत्र क्षितीत्यादिना। गन्धहेतुरिति। गन्धसमवायिकारणमित्यर्थः।**[2] इति।

न्यायसिद्धान्तमुक्तावल्याः पङ्क्तिमिमां व्याख्यायता दिनकरभट्टेन न्यगादि – **गन्धहेतुत्वं कालादौ गतमतो व्याचष्टे गन्धेति।**[3] इति। दिनकरीकारस्यायमस्ति आशयः, तत्र क्षितिः गन्धहेतुः इतिकारिकास्थस्य गन्धहेतुः इतिपदस्य गन्धसमवायिकारणमितिमुक्तावल्यां व्याख्यातम्। तत्र यथाश्रुतस्य गन्धकारणमित्यर्थस्य परित्यागे बीजमाह दिनकरीकारः – गन्धहेतुत्वमित्यादि। तथाहि यथाश्रुतार्थस्वीकारे गन्धकारणत्वमितिपृथिव्या लक्षणं स्यात्। तच्च पृथिवीलक्षणं कालादावतिव्याप्तम्। कार्यसामान्यं प्रतिकालादीनां साधारणकारणत्वाद् गन्धकारणत्वस्यापि काले सत्त्वात् पृथिवीलक्षणस्य काले अतिव्याप्तिर्दुर्वारा। तामतिव्याप्तिं वारयितुं गन्धहेतुरित्यस्य गन्धसमवायिकारणत्वमित्यर्थमङ्गीकृत्य समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धाव-च्छिन्नकारणत्वरूपं गन्धसमवायिकारणत्वं पृथिव्या लक्षणमित्युच्यते। तल्लक्षणं नास्ति कालादावितिनातिव्याप्तिरितिदिनकरीकारमतम्।

दिनकरीकारस्येदं व्याख्यानं प्रभाकाराय न रोचते। तन्नये गन्धहेतुरिति। गन्धसमवायिकारणमितिमुक्तावल्या यथार्थव्याख्यानं न कृतं दिनकरीकारेण महादेवेन। तथाहि दिनकरीमपाकुर्वता प्रभाकृता भणितेयं पङ्क्तिः –

**केचित्तु कालादावतिव्याप्तेरत आह गन्धसमवायीतीत्यवतरणिकामाहुः तदसत् गन्धहेतुरितिमूले गन्धपदस्य गन्धत्वविशिष्टशक्ततया गन्धपदसमभिव्याहृतहेतुपदाद् गन्धत्वविशिष्ट-निरूपितहेतुताविशिष्टस्यैव लाभात् कालादेरतादृशतया तत्रातिव्याप्तेरप्रसक्तेः।**[4] इति।

---

1. भा. प., सम्पा. पञ्चाननभट्टाचार्यः, पृ- 135
2. तत्रैव
3. का. व., सम्पा. शङ्कररामशास्त्री, पृ-249
4. तदेव, पृ- 259

 ISSN: 2320-740X

प्रभाकारनये गन्धहेतुरित्युच्यमाने अपि पृथिवीलक्षणस्य न कालादौ अतिव्याप्त्यापत्तिः। तथाहि गन्धहेतुरित्यत्र गन्धपदस्य गन्धत्वविशिष्टरूपःअर्थः। तादृशगन्धत्वविशिष्टगन्धपदसमभिव्याहृतहेतुपदस्य न कारणमात्ररूपःअर्थः, अपि तु असाधारणकारणरूप एव अर्थः। तेन च समवायेन गन्धस्यासाधारणकारणत्वं पृथिव्या लक्षणं पर्यवसितम्। किञ्च, कालस्य कार्यमात्रसाधारणकारणत्वात् न तत्र गन्धासाधारणकारणत्वरूपं पृथिवीलक्षणमव्याप्तम् इतिदिनकरीव्याख्यानं न युक्तम्।

- **न्यायसिद्धान्तमुक्तावल्यामब्निरूपणे दिनकरीप्रभामञ्जूषाणां मतसमीक्षणम्**

अब्निरूपणप्रकरणे अपि न्यायसिद्धान्तमुक्तावलीपङ्क्तिव्याख्यानावसरे दिनकरी-प्रभामञ्जूषाणां मतवैमत्यं स्फुटं दृश्यते। अधस्तदालोच्यते –

कारिकावल्यां जलनिरूपणार्थमाह –

**वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ।**[1] इति।

कारिकामिमां व्याख्यातुकामेन विश्वनाथेन न्यगादि –

**जलं निरूपयति, वर्णः शुक्लः इति। स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिसिद्धिः। यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं तथापि जन्यस्नेहत्वं तथा बोध्यम्। अथ परमाणौ जलत्वं न स्यात्, तत्र जन्यस्नेहाभावात्, तस्य च नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भावनियमादितिचेत्, न, जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धिः**[2] इति।

दिनकर्यामपि अयं विषयः व्याख्यातः। तत्र व्याख्याया आशयः हि समवायसम्बन्धावच्छिन्नस्नेहत्वावच्छिन्नस्नेहनिष्ठकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्ना जलनिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणत्वात्, घटगतकार्यतानिरूपितकपालनिष्ठकारणतावद् इत्यनुमानेन विश्वनाथेन स्नेहस्य समवायिकारणतावच्छेदकतयार्थात् स्नेहरूपगुणस्य समवायिकारणं जलं, तस्यावच्छेदकरूपेण जलत्वजातिः साधिता। अस्यानुमानस्याशयस्तावत् जलनिष्ठसमवायिकारणताया अवच्छेदकीभूतो यो धर्मः स जलत्वजातिरिति।

अत्रायं प्रश्नो नूनं स्वाभाविकः, इत्यनुमानेन यत्स्नेहगुणस्य समवायिकारणतावच्छेदकरूपेण जलत्वं सिद्धम् इतिसत्यं परं तेन तु जलत्वं जातिरितिन सिद्ध्यति। एतादृशः कश्चन नियमो नास्ति यत्, यदेव समवायिकारणतावच्छेदकं तदवश्यमेव जातिर्भवेदिति। अत्र कारणं शब्दसमवायिकारणमाकाशम्,

---

1. भा. प., सम्पा. पञ्चाननभट्टाचार्यः, पृ - 164

2. तदेव, पृ- 165-166

तदवच्छेदकमाकाशत्वं तु न जातिः, अपि तूपाधिरेव। एवं हि स्नेहसमवायिकारणतावच्छेदकरूपेण जलत्वस्य सिद्धावपि कथं तस्य जातित्वम्?

अत्रोच्यते यद्, यद्यपि शब्दसमवायिकारणतावच्छेदकरूपेण सिद्धमाकाशत्वं न जातिः, उपाधिरेकमात्रवृत्तित्वात् तथापि प्रकृते स्नेहसमवायिकारणतावच्छेदकरूपेण सिद्धं जलत्वं जातिरेव, नोपाधिः, व्यक्त्यभेदादिबाधकाभावात्।

ननु तथाप्ययमत्र समायातिप्रश्नः यत् स्नेहसमवायिकारणतावच्छेदकरूपेण जलत्वस्य निरूपणानन्तरं कार्य्यतावच्छेदकरूपेण स्नेहत्वं निरूपितम्। ननु किं नाम कार्यतावच्छेदकम्? कार्यतावच्छेदकं हि कार्यमात्रवृत्तिधर्मः। किन्तु स्नेहत्वं यथा नित्यजलपरमाणुनिष्ठस्नेहे वर्त्तते तथा कार्यरूपे अवयविजलनिष्ठस्नेहे च वर्त्तते। अतःस्नेहत्वं न कार्यस्नेहमात्रवृत्ति इतिन कार्य्यतावच्छेदकम्। तेन स्नेहत्वावच्छिन्नकार्यताया अप्रसिद्ध्या तदवच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया जलत्वजातिर्न सिद्ध्यति। अस्योत्तररूपेणोच्यते यत् जन्यत्वविशिष्टस्नेहत्वं कार्य्यतावच्छेदकम् इति। तथा च, समवायसम्बन्धावच्छिन्नजन्यस्नेहमात्रवृत्तिवैजात्यावच्छिन्नजन्यस्नेहनिष्ठकार्यतानिरूपित-तादात्म्यसम्बन्धावच्छिन्नजन्यजलनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानं बोध्यम्। तेन च जन्यजलत्वं सिद्धम्।

अत्र दिनकरीकृता स्वकीयं मतं प्रतिपादयताकूतं –

**नित्यवृत्तिवधर्मस्य कार्यतावच्छेदकत्वाभावेन स्नेहत्वस्य कार्यतावच्छेदककत्वं न सम्भवतीतिशङ्कते। वस्तुतस्तु नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावात् जन्यपदं न देयमेव।**[1] इति।

अर्थाद्दिनकरीकारनये अत्र कार्य्यतावच्छेदकरूपेण स्नेहत्वमित्येव वक्तव्यम्, न तु जन्यस्नेहत्वम्। इति। तथाहि नित्यानित्योभयवृत्तिधर्मस्य कार्यतावच्छेदकत्वे दोषाभावात् स्नेहत्वमपि कार्यतावच्छेदकं भवेत्। तेन च जन्यपदं न देयम्। न च कार्यताशून्यनित्यवृत्तिधर्मस्य कथं कार्यतावच्छेदकम्, अतिप्रसक्तत्वात्, कार्यतानतिप्रसक्तधर्मस्यैव कार्यतावच्छेदकत्वादितिवाच्यम्, जलत्वावच्छिन्न-कारणतानिरूपितकार्यतायाः प्रकृते स्नेहवद्वृत्यन्ताभावप्रतियोगितानवच्छेदक-जलत्वकत्वरूपाया जलपरमाणुस्नेहे अपि वर्तमानतया स्नेहत्वस्य उक्तकार्यतानतिप्रसक्तत्वात्तदवच्छेदकत्वं सम्भवत्येव इत्याशयात्।

अत्र प्रभाकारो महादेवमतं न सहते। तथाहि नित्यनित्योभयवृत्तिधर्मस्य कार्यतावच्छेदकतास्वीकारे द्रव्यत्वजातिसाधनवेलायां कार्यसमवायिकारणतावच्छेदतया द्रव्यत्वसाधनं निष्कारणम्। अपि तु, तत्रापि पदार्थमात्रसमवायिकारणतावच्छेदकतयैव द्रव्यत्वसाधनमुचितमासीत्। किञ्च, अनित्यसंयोगविभागादीनां समवायिकारणतावच्छेदकताय द्रव्यत्वसाधनमप्यनुचितम्। किन्तु तदापि संख्यापरिमाणसमवायिकारणतावच्छेदकतयैव

1. का. व., सम्पा. शङ्कररामशास्त्री, पृ- 318

 ISSN: 2320-740X

द्रव्यत्वसाधनमुचितम्। तथा तु न कृतमितिअत्र नित्यानित्योभयवृत्तिधर्मस्य कार्यतावच्छेदकाङ्गीकृत्य व्याख्यानं वालिशमतमितिप्रभावादः। तथाहि नृसिहदेवशास्त्रिणा अगादि –

**केचित्तु नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावाज्जन्यपदं न देयमित्याहुः तदसत् तादृशधर्मस्यापि कार्यतावच्छेदकत्वे पदार्थसमवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिमनुक्त्वा कार्यसमवायिकारणता-वच्छेदकतया द्रव्यत्वजातिसाधनस्य निर्बीजत्वापत्तेः संख्यापरिमाणसमवायिकारणतावच्छेदकतया तत्सिद्धिमुपेक्ष्य संयोगादिसमवायिकारणतावच्छेदकतया तत्सिद्धिप्रतिपादकमूलविरोधापत्तेः जलनिष्ठतादात्म्यसम्बन्धावच्छिन्न-कारणतानिरूपितसमवाय-सम्बन्धावच्छिन्नजलनिष्ठकार्यतावच्छेदकतया सिद्धजलत्वजातेः परमाणुसाधारण्य-सम्भवेनैतादृशप्रयासवैफल्यापत्तेश्च, किञ्च घटत्वस्येव पृथिवीत्वजातेरपि दण्डकार्यतावच्छेदकत्वापत्तेरिति।**[1]

- <u>न्यायसिद्धान्तमुक्तावल्यास्तेजःप्रकरणे दिनकरीप्रभामञ्जूषाणां मतसमीक्षणम्</u>

तेजोग्रन्थेऽपि दिनकरीप्रभामञ्जूषाणां मतवैमत्यं दृश्यते। इदानीमस्माभिः तेजस्त्वजातिसिद्धिविषये टीकाकृतां मतमालोच्यते। तथाहि तेजस्त्वसिद्धिविषये विश्वनाथेन न्यायसिद्धान्तमुक्तावल्याम् उक्तम् –

**तेजो निरूपयति– उष्ण इति। उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः। इत्थं च जन्योष्णसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः। तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसन्धेयम्। न च उष्णस्पर्शवत्त्वं चन्द्रकिरणादौ अव्याप्तमितिवाच्यम्। तत्रापि उष्णस्य सत्त्वात्। किन्तु तदन्तःपातिजलस्पर्शेनाभिभवादग्रहः। एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवात्, चक्षुरादौ चानुद्भूतत्वादग्रहः।**[2] इति।

विश्वनाथनये उष्णत्वं हि उष्णस्पर्शसमवेतःअसाधारणधर्मः। स च उष्णत्वधर्मः वह्निरुष्ण इतिप्रत्यक्षविषयतया सिद्धः। ततश्च समवायसम्बन्धावच्छिन्नजन्योष्णस्पर्शत्वावच्छिन्नजन्योष्ण-स्पर्शनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धा-वच्छिन्नजन्यतेजोनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणत्वात् इतिअनुमानेन जन्यः अनित्यो य उष्णस्पर्शः, तस्य समवायिकाराणं यदनित्यं तेजस्तदवच्छेदकं तेजस्त्वं जातिरितिसिद्ध्यति। ननु अनित्यतेजोवृत्तितेजस्त्वस्य सिद्धौ अपि नित्यतेजोवृत्तितेजस्त्वं कथमितिचेदुच्यते यथा जलत्वस्य नित्यानित्योभयविधजलवृत्तित्वं तथात्रापि बोध्यम्। वस्तुतस्तु समवायसम्बन्धावच्छिन्नजन्यतेजस्त्वावच्छिन्नजन्यतेजोनिष्ठकार्यतानिरूपित-तादात्म्यसम्बन्धावच्छिन्न-तेजोनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कार्यत्वादितिअनुमानेन नित्यानित्यतेजोवृत्तितेजस्त्वस्य सिद्धिर्बोध्या। अत्र एतदुल्लेख्यं यत् विश्वनाथनये जन्योष्णस्पर्शसमवायिकारणतावच्छेदकरूपेण तेजस्त्वस्य सिद्धिः।

1. तदेव, पृ- 318-319

2. तदेव, पृ- 174-175

मुक्तावलीव्याख्यातुकामेन दिनकरीकारेण महादेवेन विश्वनाथमतमुल्लिख्य इदमुपलक्षणम् इत्युक्तम्। अर्थात् न केवलं जन्योष्णस्पर्शसमवायिकारणतावच्छेदकरूपेण तेजस्त्वसिद्धिः। अन्यथापि तेजस्त्वस्य सिद्धिर्भवतीतितन्मतम्। तथाहि तदुक्तिः –

**इत्थं च इति। उष्णत्वजातिसिद्धौ चेत्यर्थः। ननु कथं तर्हि जन्योष्णस्पर्शसमवायि-कारणभिन्नेषु परमाणुषु तेजस्त्वजातिसिद्धिःइति, अत आह – तस्य इति। तेजस्त्वस्य इत्यर्थः। जलत्वस्येव इति। यथा च जन्यजलत्वावच्छिन्नजनकतावच्छेदकतया जलपरमाणौ जलत्वजातिसिद्धिः, तथा जन्यतेजस्त्वावच्छिन्नजनकतावच्छेदकतया तेजःपरमाणौ अपि तेजस्त्वरूपजातिसिद्धिःइत्यर्थः। इदमुपलक्षणम्। समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रतिसमवायेन तेजःसंयोगत्वेन हेतुत्वात् तेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यम्।**[1] इति।

अस्यायमाशयः, पृथिव्यां तेजस्संयोगाद्धि पूर्वरूपनाशस्तथा विलक्षणनीलादिरूपं जायते। अतो वक्तुं शक्यते यत् समवायसम्बन्धेन विलक्षणनीलरूपं प्रतिसमवायसम्बन्धेन तेजस्संयोगः कारणम् इतिकार्यकारणभावो बोध्यः। तेन कारणतावच्छेदकमत्र तेजस्संयोगत्वम्। तदवच्छेदकप्रविष्टतया तेजस्त्वजातिः सिद्धा भवति।

प्रभाकारः नृसिंहदेवशास्त्री तु दिनकरीमतं न सहते। तन्नये समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रतिसमवायेन तेजःसंयोगत्वेन हेतुत्वे अपि तेजस्त्वजातेर्न सिद्धिःभवति। तथाहि उक्तम् नृसिंहशास्त्रिणा –

**केचित्तु समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रतिसमवायेन तेजःसंयोगत्वेन हेतुत्वात् तेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यम्। तदसत् अवयवनीलजन्यनीलं प्रतितेजस्संयोगस्य न तेजस्संयोगत्वेन हेतुता सूर्यादितेजस्संयोगसत्त्वे नीलानुत्पत्तेः किन्तु वैजात्यपुरस्कारेण। तथा च वैजात्यावच्छिन्नस्य हेतुत्वात् तादृशकारणतावच्छेदककोटौ तेजस्त्वस्याप्रविष्टत्वेन कारणतावच्छेदकघटकतया तेजस्त्वजातिसिद्ध्यभावात्। वस्तुतस्तु इदमुपलक्षणं तेजःपदशक्यतावच्छेदकतया तेजस्त्वजातिसिद्धिःअसतिबाधके शक्यतावच्छेदकतया जातिसिद्धेस्सर्वसम्मतत्वादित्यपि द्रष्टव्यम्।**[2] इति।

प्रभाकृन्नये अवयवनीलजन्यनीलं प्रतिन तेजस्संयोगः कारणं, अपि तु विजातीयतेजस्संयोगः कारणम् अर्थात् वैजात्यावच्छिन्नतेजस्संयोगः कारणम्। यदि तेजस्संयोगमात्रस्यैव कारणत्वं स्वीक्रियते तर्हि सूर्यादितेजस्संयोगे सत्यपि अवयवनीलजन्यनीलस्योत्पत्तिःस्वीकार्या। तथा तु न भवति। तस्मात् अवयवनीलजन्यनीलोत्पत्तौ विजातीयतेजस्संयोगस्यैव हेतुत्वम् अङ्गीकरणीयम्। अवयवनीलजन्यनीलोत्पत्तौ विजीतीयतेजस्संयोगस्य अर्थात् वैजात्यावच्छिन्नसंयोगस्य हेतुत्वे हेतुतावच्छेदकं कारणतावच्छेदकं वा न तेजस्त्वं, अपि तु वैजात्यमेव। तस्मात् समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रतिसमवायेन तेजःसंयोगत्वेन हेतुत्वात् कारणतावच्छेदकतया न

---

1 . तदेव, पृ-336

2 . तत्रैव

 ISSN: 2320-740X

तेजस्त्वजातिसिद्धिः। अपि तु, प्रभाकृन्नये असतिबाधके शक्यतावच्छेदकतया जातिसिद्धेः सर्वसम्मतत्वात् तेजःपदशक्यतावच्छेदकतया तेजस्त्वजातिसिद्धिः।

अस्मिन् विषये मञ्जूषायां न मतसमर्थनं न वा मतविमर्दनं कृतम्। मञ्जूषायां केवलं मतद्वयमुद्धृतम् –

**समवायेन विलक्षणनीलरूपं प्रतिसमवायेन तेजस्संयोगस्य हेतुतया तदवच्छेदकघटकतयापि तेजस्त्वजातिसिद्धिःनीलकण्ठेनोक्ता। तेजस्संयोगस्य वैजात्यपुरस्कारेणैव हेतुतया न तत्र तेजस्त्वप्रवेश इत्यन्ये**[1] इति।

<u>**उपसंहारः**</u> – प्रकृतप्रबन्धे मया न्यायसिद्धान्तमुक्तावल्यां प्रतिपादितानां पृथिव्यप्तेजसां त्रयाणां द्रव्याणां दिनकरी-प्रभा-मञ्जूषादिशा समीक्षणं कृतम्। तत्र पृथिवीव्याख्यानवेलायां मुक्तावलीस्थं गन्धहेतुपदं यथा व्याख्यातं दिनकरीकारेण तथा न स्वीकृतं प्रभाकारेण। दिनकरीकारेण पृथिवीलक्षणस्य कालादावतिव्याप्तिमाशङ्क्य मुक्तालवीस्थं गन्धहेतुपदं गन्धसमवायिकारणतया व्याख्यातम्। परं प्रभाकरेण गन्धहेतुपदं गन्धासाधारणकारणत्वेन व्याख्याय अतिव्याप्तिस्तिरस्कृता। उभयोर्मतमालोच्य एतद्वक्तुं शक्यते यद् दिनकरीकारेण हेतुपदं समवायिकारणबोधकतया गृहीतं, प्रभाकारेण तु हेतुपदमसाधारणकारणबोधकतया गृहीतम्। अनयोः प्रभाकाराणां मतमेव युक्तमितिमे मतिः। अत्र कारणम् अन्यत्र बुद्ध्यादिलक्षणे हेतुपदम् असाधारणकारणबोधकतया गृहीतम्। तथात्रापि स्वीकारे दोषनिवृत्तिर्भवतीतियुक्तम्।

एवं तेजोव्याख्यानवेलायां दिनकरीकारेण सह प्रभाकारस्य मतवैमत्यं दृश्यते। परं मञ्जूषाकारेण अत्र मौनता एवाङ्गीकृता। वस्तुतस्तु प्रकाशापरनामधेयो दिनकरीयः ग्रन्थो ग्रन्थग्रन्थिजालजटिलोऽपि अनायासतयाकरग्रन्थनिगूढार्थनिरूपणेन न्यायनयनिपुणमनआवर्जनकर इतिनिर्विवादविषयो विदुषाम्। प्रभा मञ्जूषा चानितरसाधारण्यौ ग्रन्थान्तरापेक्षया विचारगाम्भीर्यमुद्वहन्त्यौ ग्रन्थकारतात्पर्यपरिप्रकाशके तथा तादृशेतरदुरूहग्रन्थग्रन्थिमोचनेन स्वप्रतिभया बन्धेतरमतमर्दनेन च नर्त्तयन्ति शास्त्रानुशीलनपरिशीलितधिषणानां सतां चेतांसि इतिशम्।

**सहायकग्रन्थाः**


- न्यायपञ्चाननः, विश्वनाथः। कारिकावली (प्रभा-मञ्जूषा-दिनकरीय-रामरुद्रीय-गङ्गारामीय-सहिता)। सम्पा. शङ्कररामशास्त्री, वाराणसीः चौखम्बा-संस्कृत-प्रतिष्ठानम्, 2016.
- न्यायपञ्चाननः, विश्वनाथः। कारिकावली (मुक्तावली-दिनकरी-रामरुद्रीसनाथिता)। सम्पा. आत्मारामशर्मा, वाराणसीः चौखम्बा-संस्कृत-सिरिज्-अफिस्, 2012.
- न्यायपञ्चाननः, विश्वनाथः। कारिकावली (मुक्तावली-दिनकरी-रामरुद्रीसनाथिता)। सम्पा. आत्माराम-नारायण-जेरे, नवदेहलीः राष्ट्रिय-संस्कृत-संस्थानम्, 2002.


1 . तत्रैव

- न्यायपञ्चाननः, विश्वनाथः। कारिकावली (प्रत्यक्षखण्डान्ता) (सिद्धान्तमुक्तावली-सूर्यनारायणशुक्लकृतमयूख-प्रकाशव्याख्योपेता)। सम्पा. रामगोविन्दशुक्लः, वाराणसीः चौखम्बा-संस्कृत-सिरिज्-आफिस, 2008.
- न्यायपञ्चाननः, विश्वनाथः। कारिकावली (सिद्धान्तमुक्तावलीसहिता)। सम्पा. जीवरामशास्त्री, मुम्बइः गुजराती-प्रिन्टिंग्-प्रेस्, 1923 (प्रथमप्रकाशः)।
- न्यायपञ्चाननः, विश्वनाथः। न्यायसिद्धान्तमुक्तावली (दिनकरी-रामरुद्री-हिन्दीव्याख्या-समेता)। सम्पा. हरिरामशुक्लशास्त्री, वाराणसीः चौखम्बाप्रकाशनम्, 2011.
- न्यायपञ्चाननः, विश्वनाथः। न्यायसिद्धान्तमुक्तावली (दिनकरी-हिन्दीव्याख्यासमेता)। सम्पा. राजारामशुक्लः, शिमलाः इन्डियान्-इन्स्टिटिउट्-अव्-आड्भान्स्ड्-स्टाडिज्, 2015 (प्रथम-प्रकाशः)।
- न्यायपञ्चाननः, विश्वनाथः। न्यायसिद्धान्तमुक्तावली (प्रत्यक्षखण्डात्मिका) (बालप्रिया-व्याख्योपेता)। सम्पा. गजाननशास्त्रि-मुसलगाँवकरः, वाराणसीः चौखम्बा-सुरभारती-प्रकाशनम्, 2014 (प्रथमप्रकाशः)।
- न्यायपञ्चाननः, विश्वनाथः। न्यायसिद्धान्तमुक्तावली (मुक्तावलीसंग्रहसहिता)। सम्पा. पञ्चाननशास्त्री, कलिकाताः महाबोधि-बुक्-एजेन्सिः, 2016 (पुनर्मुद्रणम्)।
- न्यायपञ्चाननः, विश्वनाथः। न्यायसिद्धान्तमुक्तावली। सम्पा. श्रीकृष्णवल्लभाचार्यः, वाराणसीः चौखम्बा-संस्कृत-प्रतिष्ठानम्, 2014 (द्वितीयप्रकाशः)।
- न्यायपञ्चाननः, विश्वनाथः। भाषापरिच्छेदः (ज्वालाप्रसादगौडकृत-विलासिनीसमाख्य-व्याख्यासमेतः)। सम्पा. ढुण्ढीराजशास्त्री, दिल्लीः चौखम्बा-संस्कृत-प्रतिष्ठानम्, 2003.

******

 **ISSN: 2320-740X**

# YOGIC CONCEPTS IN TAITTIRĪYOPANIṢAD WITH COMPILATION OF OTHER YOGIC CONTEXTS

**Gopalakrishna Hangari,**

Prof. Dr. K Krishna Sharma,

Dr. Sriharisukesh N

Gopalakrishna Hangari

Guest Lecture

Department of Human Consciousness & Yogic Sciences,

Mangalore University, Mangalagangothri 574199

**Prof. Dr. K Krishna Sharma**

Professor & Chairman

Department of Human Consciousness & Yogic Sciences,

Mangalore University, Mangalagangothri 574199

Dr. Sriharisukesh N

Guest Lecturer

Department of Human Consciousness & Yogic Sciences,

Mangalore University, Mangalagangothri 574199

**KEYWORDS**: Yoga, Panchakosha, Karma, Mitahara, Brahma, Ishwara.

**ABSTRACT:**

Upanishads are the source of all tatvaśāstras. The meaning of word Upaniṣhat is (उप नि पूर्वक षद्लृ विशरणे) उपनिषद्यते प्राप्यते ब्रह्मविद्या. The Upanishads provide knowledge regarding the self and the supreme. Even though there are hundreds of Upanishads, nine of them are known as important Upanishads. Among them, Taittirīyopaniṣad is the most well-

known and is still in use. Many mantras in use today are derived from Taittirīyopaniṣad. But very little effort has been made to understand the real tatva that is hidden in them.

With respect to the yogic approach, mainly three types of Yogic schools can be seen in this Upaniṣad

- Mantrayōga
- Jñānayōga
- Kriyāyōga.

In this Upanishat there are plenty of yogic concepts but the only thing is there is no usage of well-known yogic terms which are commonly used now a days. This Upanishat emphasizes on the requirement of Physical health (Kayaswasthya) and mental health (Manasa swasthya). This research paper is an attempt to point out the yogic approaches which are hidden in Taittirīyopaniṣad with yogic perspective.

**INTRODUCTION :**

Taittirīyopaniṣat belongs to the Taittirīya school of Yajurveda, it is divided into three branches called शाख respectively **शिक्षावल्ली, आनन्दवल्ली, भृगुवल्ली**

- शिक्षावल्ली deals with contemplation.
- In आनन्दवल्ली Brhmavidya expounded.
- In भृगुवल्ली Brugu Investigates about Brahman with Varuna.

Tattiriyopanishat is the science of phonetics and pronunciations. It deals with the contemplation of various mantras to attain the knowledge of Brahman. It explains elaborately regarding Brahman, his qualities and means to attain higher state of concentration.

**PRAYER FOR THE KNOWLEDGE.**

**शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्शं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः । (T.U)**

In this **mantra** the practitioner prays the supreme for the best knowledge. Mitra, the deity who identifies himself (आत्मज्ञ), he is the self of the function of **exhaling** and which

 ISSN: 2320-740X

self is responsible for the **day**. Similarly, **Varuna** is the deity who identifies himself. He is the self of the function of **inhalation** and he is the responsible for the **night.** May Aryama, the deity who identifies himself with the eye and sun. Indra with strength, Bruhaspathi with speech and intellect. Urukrama (Vishnu) identifies himself with the feet. These are the deities in the context of the body. May all be blissful to us. Namaskaram to Brahman and Vayu, for being proximate and without any intervention who are contrasted with the outer organs. That is why he is called **Pratyaksham Bhrahma**. Which give the knowledge about you that only I will tell, I will tell the truth which is perceived as brahman. अवतु माम् । May brahman Protect me. Protect my teacher.

**PRAYERS FOR HEALTH**

In Taittirīyopaniṣad importance is given to the health, because body and mind are the only instruments through which the purusha realizes the true nature or the reality. That is said in the mantra like

**शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय । (S.V. A. I 4)**

It means, My Body should support to know the supreme, may my tongue be sweetest, (Uttering which food is most agreeable), with ears much may I hear – Indriyas should work properly, my koshas be competent to acquire the knowledge of the self, I pray for medha (retentive knowledge of Brahman).

**ABOUT FOOD**

**अन्नं ब्रह्मेतिव्यजानात् । (B.A.V. II 1 )**

Inner meaning of this mantra is one should have the food which supports the person to get the knowledge of the supreme.

In Hathapradipika swami Swatmarama tells about the food system yogi should follow. That food system should support the path of gaining the ultimate knowledge.

**सुस्निग्ध मधुराहार चतुर्थांश विवर्जितः।**
**भुज्यते शिवसंप्रीत्यै मिताहारः स उच्यते** ॥58॥ (I H.P)

In this shloka Swatmarama uses the word **"भुज्यते शिवसम्प्रीत्यै"** here the word shiva refers to the supreme. To please him, yogi should follow the mitahara concept.

**QUALITIES OF UPASAKA OR ADHIKARI**

**ऋतं च स्वाध्यायप्रवचने च । सत्यम् च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । दमश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्यायप्रवचने च । ( S.V. IX 1)**

The right, Truth, Tapas, Shatka sampat these are all for self-studying and to teach.
In Vedantasara

**अधिकारी तु विधिवदधीत वेदवेदङ्गत्वेनापाततो अधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तःसाधन चतुष्टयसम्पन्नः प्रमाता ॥6॥ (V.S.)**

Aspirant who studied all the vedas and vedangas, should have studies general meaning of it, and being absolved by all the sins in this life or previous life by avoiding the of actions like **काम्य** (actions like jyotistoma etc. This action is to get the desired object like svarga.) and **निषिद्ध** (actions like brahmanahanana wchich is banned in the scriptures) and by performing the actions like **नित्य** (Actions like sadhyavandana daily obligatory action) and **नैमित्तिक** (actions like jatesthi which are compulsorily to be done) as well as by the devotion, has to become pure in mind, and who has adapted the 4 sadhanas.

**सत्यं वद । धर्मं चर । (S.V.A. 10. 2)**

Tell true. Follow Dharma. One should speak the truth. (How it should be? Vakprayoga should be with proper evidence and it is worthy of utterance how the thing is perceived as it is. ) This indicates that Yama Niyamas are strictly told to follow. One cannot neglect it.

**स्वाध्यायान्मा प्रमदः | स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् । (S.V.A. 10. 3)**

While studying and teaching about the self, one should not get back from Karma.

**EVOLUTION THEORY**

**तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः । वायोरग्निः । अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः ओषदीभ्योऽन्नम् । अन्नात्पुरुषः । स वा एष पुरुषोन्नमयः। (B.A.V. A. 1. 1)**

 **ISSN: 2320-740X**

According to Upanishad According to Yoga



According to the upanishat from the Brahman space was produced, from space air emerged, from air fire was born, from fire water was created, from water earth sprang up, from earth herbs were born. From the herb food was produced, from the food men was evolved.

**विशेषाविशेष लिङ्गमात्रालिङ्गानि गुणपर्वाणि ॥ 2.19 ॥** (PYS)

In Yoga, Purusha and Prkrti are mutually connected. From prkrti mahat has evolved, from mahat ahankara and 5 tanmatras evolved from tanmatras panchamaabhutas evolved. On the other side of Ahankara Manas, 5 Sensory Organs and 5 Motor Organs are evolved.

## PAÑCAKŌŚĀḤ

- **annamayakōśaḥ**

**स वा एष पुरुषोन्नमयः । (S.V.A. 4)**

Human is a vikara of food- essence. annam is needed in forming the śukra, - the essence of all parts of the body, generates thought- impress of human form.

**तस्यमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा इदं पुच्छम्। प्रतिष्ठिता । (S.V.A 5)**

Having a form of physical body, Annamaya kosha is represented by the shruti as a bird, as having wings and a tail, in order that the pranamaya kosha and other koshas. Also be represented in the form of a bird.

- **prāṇamayakōśaḥ**

**तस्माद्वा एतस्मादन्नरसमयात् । अन्योन्तरात्मा प्राणमयः । तेनैष पूर्णः। (S.V.A. 2.2)**

There is a self within formed of prana. The prana fills the self which is formed of food essence, Pranamaya kosha is a distinct nature of annamaya kosha. It is there in annamaya kosha as its basic substance. It is pervading every part of the body.

**प्राणो हि भूतानां आयुः । (S.V.A. 3. 1)**

One's life time is depending on prana.

In Hathapradipika Swami Swatmarama says about the prana and lifespan

**यावद्वायुः स्थितोदेहे तावत् जीवनमुच्यते ।**
**मरणं तस्यनिश्क्रान्तिस्ततोवायुं निरोधयेत् ॥3॥ (H.P. II)**

 ISSN: 2320-740X

If the vital force is there in the body then only that person is considered as living being. Life of all the creatures depends the vital force.

❖ **manōmayakōśaḥ**

**तस्माद्वा एतस्मात् प्राणमयात् । अन्योन्तरात्मा मनोमयः । तेनैष पूर्णः। (S.V.A. 3. 3)**

Manas is the antah karana. The internal organ, consisting of saṅkalpa and vikalpa. This is the inner self of prāṇamayakōśaḥ, Manomaya is made-up of vedas.

❖ **vijñānamayakōśaḥ**

**तस्माद्वा एतस्मान्मनोमयात् । अन्योन्तरात्मा विज्ञानमयः । तेनैष पूर्णः । (S.V.A. 4.3)**

The inner self of the manomaya is vijñānamayakōśaḥ. Vijñāna is is the knowledge what is told in vedas. Vedas ares determinative knowledge. What we call it as, nishcaya and adhyavasaya are the dharma of antah karana. That fills the manomayaosha.

❖ **ānandamayakōśaḥ**

**तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तरात्माऽऽनन्दमयः । तेनैष पूर्णः ।। (S.V.A. 5.3)**

ānandamayakōśaḥ is the consciousness of pratyagatma or the true self, conditioned by upadhi of the antah-karana manifested as bliss, it is a fruit of knowledge and action. Bliss is the essential nature of supreme as declared by the shruti.

**Brahma (The Supreme) is -**

- ❖ वाचामगोचरह् । - Verbally he cannot be described.
- ❖ वर्ण्यः । - He is having the colors or he can be posturized verbally.
- ❖ अवर्ण्यः । - He is having no colors or he cannot be posturized verbally.
- ❖ सगुणः । - With quality.
- ❖ निर्गुणः । - Beyond all qualities.

In Yoga Supreme is called Ishwara

**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥1.24॥ (PYS)**

**तत्र निरतिशयं सर्वज्ञत्वबीजम् ॥1.25॥ (PYS)**

**स पूर्वेषामपि गुरुः कालेनानवच्छेदात् ॥1.26॥ (PYS)**

Ishwara is special purusha, untouched by misery, actions, results of actions and desire. In him unlimited knowledge is there. He is the teacher of ancient teachers, being not limited by time.

**CONCLUSION**

Taittirīyōpaniṣat is a great inspiration and guideline for those who wish to progress in the spiritual path. By adopting the yogic concepts like yogic food, yama and niyama, knowing the koshas and intensive curiosity towards evolution theory, practitioner gradually develops concentration. Higher state of concentration leads to the knowledge of real purusha. In this way we can find number of yogic concepts in Taittirīyōpaniṣat. If the meanings of mantras are known, application of the concept will become easier. By chanting the mantras as well as the application of mantras gives spiritual benefits and higher stats of concertation.

**REFERENCE**


- N. H. Ramaswamy : 1985, Tattiriyopanishad, Bharatiya Vidya Bhavan, Bombay.
- Swami Vishnu-Devananda:1999, Hatha Yoga Pradipika, Motilal Banarsidas, Delhi.
- Digambarji, S. (2018). Hathapradipika of Svatmarama. Shir O. P. Tiwari, Secretary, for the Kaivalyadhama, S.M.Y.M. Samiti, Lonavla (Maharashtra) Lonavla, Dist. Pune-410 403, (M.S.) INDIA.
- Vivekananda, S. (2017). Rajayoga (K. Adhyaksha, Advaita Ashrama Mayavati, Champawat, Uttarakhand, Himalayas from its Publication Department (ed.); Thrird). Swami Muktidananda.


**ABBREVIATION :**

| | |
|---|---|
| (T.U) - Taittiriyopaniṣad | (S.V.) – Shikshavalli |
| (B.A.V) – Bruguvalli | (V.S.) -Vedantasara |
| (P.Y.S.) – Patanjalayogasutrani | (H.P) – Hathapradipika |

******

 ISSN: 2320-740X

# शब्दोपादानखण्डनम्

**डा. कोम्पेल्लि विनयकुमारः**
सहायकाचार्यः साहित्यविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः
राजीवगान्धीपरिसरः, शृङ्गेरी

**मुख्यशब्दाः -**
ध्वनिलक्षणम्, ध्वनिलक्षणे दश दोषाः, शब्दप्रयोगः, शब्दे व्यञ्जकत्वाभावः, अनुकरणशब्दः, सार्थकः, निरर्थकः, सार्थकानुकरणे उपसर्जनीकृतार्थत्वम्, अनुकार्यशब्दः, अनुकार्यात् अर्थबोधः, अनुकार्यस्य, उपसर्जनीकृतार्थत्वासम्भवः, निष्कर्षः

**शोधसारः -**

आनन्दवर्धनस्य ध्वनिलक्षणे **'शब्दः'** इतिपदम् अनुचितं वर्तते। शब्दस्य व्यञ्जकोक्तिरपि नोपपद्यते। शब्दस्य अभिधाख्यः एक एव व्यापारः। अन्यः सर्वोऽपि व्यापारः अर्थस्यैव। शब्दात् वाच्यार्थातिरिक्तस्य कस्यापि अर्थस्य प्रतीतिः न भवति। अतःशब्दे व्यञ्जना नास्ति। तस्मात् ध्वनिलक्षणे शब्दस्य व्यञ्जकत्वेन समुल्लेखः नोचितः। किञ्च ध्वनिलक्षणे शब्दस्य यत् विशेषणम् उपसर्जनीकृतस्वार्थम् इतिसन्निवेशितं वर्तते, तदपि असमीचीनम्। शब्दस्य स्वार्थाभिधानमेव व्यापारः अर्थप्रतीत्यर्थम्, शब्दस्तु उपायमात्रम्, अर्थस्तु उपेयः। अथ अर्थस्य प्राधान्यम् उपेयत्वात्, शब्दस्य च अप्राधान्यम् उपायत्वात्। अतःशब्दस्य गुणीकृतार्थत्वं न सम्भवति, केवलम् अनुकरणे एव सम्भवति। अर्थात् यत्र अन्यस्य उक्तेः अनुकरणम् अथवा उक्तिस्वरूपरचनानुकरणं तत्रैव शब्दस्य गुणीकृतार्थत्वं सम्भवति। यतःतत्र अनुक्रियमाणोक्तेः अर्थःन विवक्षितः, तत्र केवलं शब्द एव प्रतिपाद्यः न तु अर्थः। आदौ शब्दस्य द्वौ भेदौ भवतः– अनुकरणशब्दःअनुकार्यशब्दःइति। तावुभावपि सार्थक-निरर्थकभेदेन द्विविधौ भवतः। तत्र सार्थकः अनुकरणशब्द एव स्ववाच्यं गुणीकरोति, अनुकार्यं स्वरूपं च बोधयति। सार्थकानुकरणस्थले लोकप्रसिद्धस्य अर्थस्य बोधः अनुकार्यशब्दात् भवति। यथा – **'रामे श्रीः न्यस्यताम्'** इत्यनुकरणशब्दः**'रामे श्रीः न्यस्यताम्'** इतिअनुकार्यं शब्दं बोधयति। तेन अनुकार्यशब्देन रामे राजलक्ष्मीस्थापनरूपस्य अर्थस्य बोधो भवति। अनुकार्यशब्दःकदापि स्वार्थं गुणीकर्तुं न शक्नोति। अपि तु स एव साधनत्वेन गौणो भवति। अनुकार्यशब्दे सार्थकस्य गुणीकरणं न सम्भवति। अतःध्वनिलक्षणे गुणीकृतार्थत्वम् इतिशब्दस्य विशेषणम् असङ्गतं वर्तते। एवं शब्दे व्यञ्जनाया अभावेन शब्दे गुणीकृतार्थत्वस्य असम्भवेन च ध्वनिलक्षणे असम्भवदोषो भवति।

**ध्वनिलक्षणम्**

**"यत्रार्थःशब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**

**व्यङ्क्तः काव्यविशेषः स ध्वनिरितिसूरिभिः कथितः"**[1]।।

इत्येवं ध्वन्यालोके आनन्दवर्धनेन ध्वनिरेवमलक्षि। यस्मिन् काव्ये वाच्यार्थःआत्मानं शब्दश्च स्वार्थं गुणीकृत्य प्रतीयमानमर्थं व्यञ्जनया प्रतिपादयतः, सः काव्यविशेषः ध्वनिशब्देन व्यपदिश्यते इतिनिगदितध्वनिकारिकायाः सारभूतःअर्थः।

**ध्वनिलक्षणे दश दोषाः**

व्यक्तिविवेककृन्महिमभट्टः पूर्वोक्त आनन्दवर्धनध्वनिलक्षणे दश दोषान् प्रादर्शयत् ध्वनिं खण्डयित्वा काव्यानुमानं प्रत्यस्थापयच्च। ध्वनिलक्षणे दर्शितानां दशानां दोषाणां सारः आभ्यां कारिकाभ्यामुक्तः यत् -

**अर्थस्य विशिष्टत्वं शब्दःसविशेषणस्तदः पुंस्त्वम्।**

**द्विवचनवाशब्दौ च व्यक्तिर्ध्वनिनाम काव्यवैशिष्ट्यम्**[2]।।

**वचनं च कथनकर्तुः कथिता ध्वनलक्ष्मणीतिदश दोषाः।**

**ये त्वन्ये तद्भेदप्रभेदलक्षणगता न ते गणिताः**[3]।। इति।।

अर्थात् 1. 'अर्थः' इतिपदस्य उपसर्जनीकृतात्मत्वम् इतिविशेषणं न सङ्गच्छते।

2. 'शब्दः' इतिपदस्य प्रयोगः नापेक्ष्यते।

3. 'शब्दः' इतिपदस्य उपसर्जनीकृतात्मत्वम् इतिविशेषणम् अनुपादेयम् एव।

4. 'तमर्थम्' इत्यत्र तच्छब्दस्य पुंलिङ्गः भवितुं नार्हति।

5. 'व्यङ्क्तः' इत्यत्र द्विवचनम् अनुपपन्नम्।

6. 'वा शब्दः' विकल्पार्थकः अतः तत्प्रयोगः दुष्टः।

7. 'व्यक्तिः' इतिशब्दस्य आनन्दवर्धनमतानुसारम् अर्थःउच्यते चेत्
अव्याप्त्यतिव्याप्त्यसम्भवदोषत्रयं सम्भवति।

8. 'ध्वनिः' इतिकाव्यस्य नाम व्यर्थम् (प्रयोजनशून्यम्)।

9. 'काव्यविशेषः' इतिपदम् अनुपादेयमेव।

10. 'सूरिभिः' इतिपदस्य अनावश्यकता।

इत्येतेषु दशसु दोषेषु **'शब्दः'** इतिपदस्य, तस्य **'उपसर्जनीकृतात्मत्वम्'** इतिविशेषणं च न सङ्गच्छेते इतिद्वितीय-तृतीयदोषौ विविच्येतेऽत्र।

काव्ये शब्दस्य अभिधा-लक्षणा-व्यञ्जनारूपाः व्यापाराः अङ्गीकृताः आनन्दवर्धनप्रभृतिभिः। किन्तु महिमभट्टमते शब्दस्य अभिधा एका एव व्यापारः, लक्षणाव्यञ्जने न स्तः। अतःअभिधा सङ्केतितार्थमेव अभिधत्ते,

1 ध्वन्यालोकः -1-13

2 व्यक्तिविवेकः – 1-23 (राजानकरुय्यककृतसंस्कृतव्याख्यासंवलितः)

3 व्यक्तिविवेकः – 1-24 (राजानकरुय्यककृतसंस्कृतव्याख्यासंवलितः)

 ISSN: 2320-740X

इतिसङ्केतितार्थम् अप्रधानं कृत्वा शब्दःव्यञ्जनाव्यापारेण व्यङ्ग्यार्थम् अभिव्यनक्ति इत्यस्य आनन्दवर्धनाभिप्रायस्य नावकाशः। अतःप्रतीयमानार्थं प्रतिशब्दस्य योगदानं किमपि नास्ति। तर्हि शब्दःइतिपदं न वक्तव्यं ध्वनिलक्षणे। ध्वनिलक्षणे उक्तः शब्दःइतिशब्दःअनुपादेयः एव इतिमहिमभट्टः कथयतियत् – "**शब्दस्य स्वार्थाभिधेयम् अन्तरेण व्यापारान्तरानुपपत्तेः उपपादयिष्यमाणत्वात्**"[1] इति।

**शब्दप्रयोगः**

ध्वनलक्षणे **'शब्दो वा'** इत्यत्र शब्द-शब्दस्य प्रयोगो वर्तते। शब्दस्य विशेषणं गुणीकृतवाच्यत्वं विद्यते। एवं शब्दशब्दस्य प्रयोगेण तस्य विशेषणेन च आनन्दवर्धनः प्रतिपादयतियत् यत्र शब्दःस्वकीयं वाच्यार्थं गुणीकृत्य व्यञ्जनया प्रधानं प्रतीयमानं बोधयतितत्र ध्वनिर्भवतिइति। महिमभट्टः खण्डयतियत् अत्र शब्दशब्दस्य प्रयोगः, शब्देन स्वबोध्यस्य वाच्यार्थस्य गुणीकरणस्य कथनं च अनुचितं विद्यते इति। तस्य द्वे कारणे स्तः – शब्दे व्यञ्जनाया अभावः, शब्देन स्ववाच्यार्थस्य गुणीकरणस्य असम्भवश्च विद्यते इति।

**शब्दे व्यञ्जकत्वाभावः**

व्यञ्जकत्वं व्यञ्जना इतिकथ्यते। शब्दे केवल एक एव अभिधानामकः व्यापारो भवति। शब्दे न लक्षणा, नापि च व्यञ्जना। यदि शब्दे अभिधा, लक्षणा, व्यञ्जना इतितिस्रः शक्तयो भवेयुः, तदा एकस्मिन्नेव काले वाच्यस्य लक्ष्यस्य व्यङ्ग्यस्य च अर्थस्य बोधः स्यात्। किन्तु एवं न भवति। **'गङ्गायां घोषः'** इत्यादौ क्रमेणैव वाच्यादीनां बोधः भवति। पूर्वं प्रवाहविशेषरूपस्य वाच्यस्य बोधो भवति। ततःलक्ष्यस्य तटस्य ज्ञानं भवति, तत्पश्चाच्च शैत्यपावनत्वरूपस्य व्यङ्ग्यस्य बोधो भवति। एतेन स्फुटं भवतियत् शब्दे लक्षणावत् व्यञ्जनाया अपि अभावो विद्यते। यस्मिन् पदार्थे अनेकाः शक्तयो भवन्ति स एकदैव अनेकानि कार्याणि करोति। यथा अग्नौ दहन-प्रकाशन-प्रसरणशक्तयः सन्ति । अतःअग्निः एकस्मिन्नेव समये दहति, प्रकाशयति, प्रसरतिच। शब्दस्तु तथा न करोति। अनेन प्रतीयते यत् लक्षणाव्यञ्जने शब्दे न स्तः, अपि तु तयोः आश्रयः वाच्यार्थो भवति। शब्दःवाच्यार्थबोधं विना व्यञ्जनया बोधयितुं न शक्नोति। वाच्यार्थज्ञानं विना शब्दात् व्यङ्ग्यस्य ज्ञानं न सम्भवति। अभिधाशक्तिं विना लक्षणाव्यञ्जने स्वकार्यं न कुरुतः। अतःशब्दे व्यञ्जना नास्ति । उच्यते यत् महिमभट्टेन –

**यत् पुनः अस्य अनेकशक्तिसमाश्रयत्वात् व्यापारान्तरपरिकल्पनं तदर्थस्य एव उपपद्यते, न शब्दस्य, तस्य अनेकशक्तिसमाश्रयत्वासिद्धेः। तथाहि – एकाश्रयाः शक्तयः अन्योन्यानपेक्षवृत्त्योः अप्राकृतपौर्वापर्यनियमा युगपदेव स्वकार्यकारिण्यो दृष्टाः, यथा दाहकत्वप्रकाशकत्वादयः वह्नेः। तस्माद्भिन्नाश्रया एव ताः, न शब्दैकसमाश्रया इत्यवसेयम्**[2] इति।

शब्दे अभिधायाः सत्तायां समयः (सङ्केतः) प्रमाणं विद्यते। **'अनेन शब्देन अयमर्थो ज्ञातव्यः'** इतिसङ्केतेन ज्ञायते यत् शब्दे अभिधाशक्तिरस्ति। किन्तु शब्दे व्यञ्जनायाः सत्तायां किमपि प्रमाणं नास्ति। शब्दस्य व्यञ्जकत्वं सङ्केतेन

1 व्यक्तिविवेकः – 1-पृ.सं - 11 (राजानकरुय्यककृतसंस्कृतव्याख्यासंवलितः)

2 व्यक्तिविवेकः – 1-पृ.सं - 11 (रेवाप्रसादद्विवेदिकृतहिन्दीभाष्यसहितः, चौखाम्बासंसकृतसंस्थान्)

कृतम् इतिवक्तुं न शक्यते। स्वयम् आनन्दवर्धनोऽपि शब्दे व्यञ्जनां प्रकरणादिसामग्रीभिः स्वीकरोति, न तु सर्वत्र। आनन्दवर्धनमतेऽपि शब्दे व्यञ्जकत्वम् औपाधिकं विद्यते। यथा जले बह्निसम्बन्धेन उष्णता आगच्छति, अतःजलस्य उष्णता औपाधिको धर्मो विद्यते। सा शब्दे प्रकरणादिवशेन आगच्छतिइतिआनन्दवर्धनस्य मतम्। अतःआनन्दवर्धनमते व्यञ्जना सङ्केतेन सिद्धा नास्ति। प्रकरणादीनि अनन्तानि सन्ति। तैः शब्दे व्यञ्जनाया निर्णयः कर्तुं न शक्यते। प्रकरणभेदेन एक एव शब्दःअनेकान् अर्थान् ध्वनिकारमते बोधयति। महिमभट्टेन उच्यते यत् -

**नापि समयकृतः, व्यञ्जकत्वस्य औपाधिकत्वात्। उपाधीनां च अर्थप्रकरणादिसामग्रीरूपाणाम् आनन्त्यात् अनियतत्वाच्च प्रतिपदमिव शब्दानुशासनस्य समयस्य कर्तुम् अशक्यत्वात्**[1] इति।

एवं शब्दे व्यञ्जनायाः अभावःसाधितः। एवं शब्दे व्यञ्जकत्वं व्यञ्जना वा न विद्यते। अतःध्वनिलक्षणे असम्भवदोषो भवति। शब्दःक्वापि व्यञ्जनया बोधयितुं न शक्नोति। यतःतत्र व्यञ्जना नास्ति। उच्यते यत् महिमभट्टेन –

**उक्तं वृथैव शब्दस्योपादानं लक्षणे ध्वनेः।**
**नहि तच्छक्तिमूलेष्टा काचितर्थान्तरे गतिः**[2]।।इति।।

ध्वनिलक्षणे **'शब्द'**पदोपादानस्य नैरर्थक्यं प्रतिपाद्य, महिमभट्टः अत्र तस्य (शब्दस्य) उपसर्जनीकृतत्वस्य विशेषणस्यापि अनुपादेयतां प्रदर्शयति। ध्वनिकाव्ये शब्देन स्वार्थ उपसर्जनीक्रयते इतिएतद्विरुद्ध्य महिमभट्टः शब्दस्य स्वार्थोपसर्जनकरणस्य स्थलं दर्शयति। केवलम् **'अनुकरण'**स्थले एव शब्दस्य उपसर्जनीकृतार्थत्वं सम्भवति। शब्दःकदापि स्वस्य अर्थं न उपसर्जनीकरोति। सर्वत्रापि अर्थ एव प्रधानभूतःशब्दःगौण एव। किन्तु शब्दस्य प्राधान्यम् अर्थस्य गौणत्वं च तत्रैव सम्भवति, यत्र अनुकरणशब्दःविद्यते।

शब्दस्य उक्तं गुणीकृतार्थत्वं विशेषणं खण्डयितुं महिमभट्टेन इत्थं कथ्यते यत् **"न च तस्य अनुकरणव्यतिरेकेण उपसर्जनीकृतार्थत्वं सम्भवति"**[3] इति। अर्थात् शब्दस्य अनुकरणस्थलं विहाय अन्यत्र कुत्रापि अर्थस्य उपसर्जनीकरणं न सम्भवति। महिमभट्टः सर्वप्रथमं शब्दस्य द्वौ भेदौ कुरुते। तत्र प्रथमो भेदः अनुकरणशब्दो विद्यते। द्वितीयस्तु अनुकार्यशब्दो वर्तते।

**अनुकरणशब्दः**

अनुकरणशब्दविषये – वसन्तर्तौ कोकिलः कूजति। तस्य कूजनरूपःयः शब्दो वर्तते तस्य अनुकरणं **'कुहू-कुहू'** इतिवर्तते। मक्षिका कमपि शब्दं करोति। तस्याः शब्दस्य अनुकरणं **'भिन-भिन'** इतिक्रियते। नटः यदा रामस्य अभिनयं करोति, तदा रामेण यत् वाक्यं कथितं तस्य अनुकरणं करोति। अर्थात् अन्येन यः शब्दःयथा उच्चारितः, सः केनचित् अन्येन तथैव उच्चार्यमाणः अनुकरणशब्दःइतिकथ्यते। नाम अनुक्रियमाणः शब्दःअनुकरणशब्दःइति। अस्य द्वौ भेदौ स्तः – सार्थकः निरर्थकस्च।

---

1व्यक्तिविवेकः – 1-पृ.सं - 113 (रेवाप्रसादद्विवेदिकृतहिन्दीभाष्यसहितः, चौखाम्बासंसकृतसंस्थान्)

2 व्यक्तिविवेकः – 1-का.सं - 28

3 व्यक्तिविवेकः – 1-पृ.सं - 11 (राजानकरुय्यककृतसंस्कृतव्याख्यासंवलितः)

 ISSN: 2320-740X

**सार्थकः**

यस्य शब्दस्य व्यवहारे कश्चिदर्थःभवतितस्य अनुकरणशब्दःसार्थकः कथ्यते। यथा **'रामः'** इतिशब्दःसार्थको वर्तते। अतःतस्य अनुकरणं **'रामः'** इतिसार्थकं भवति। एवं कस्यचित् वाक्यस्य श्लोकस्य वा अनुकरणशब्दःसार्थको भवति।

**निरर्थकः**

यस्य शब्दस्य व्यवहारे कोऽप्यर्थो नास्ति, तस्य अनुकरणशब्दःनिरर्थको भवति। यथा कोकिलकूजनस्य व्यवहारे नास्ति कोऽप्यर्थः, कोकिलशब्दे वर्णविशेषस्य ज्ञानं न भवति, तस्य कोकिलकूजनस्य अनुकरणं **'कुहू'** इतिनिरर्थकं वर्तते। एवं वंशीप्रभृतीनां वाद्यानां काकादीनां च निरर्थकानां शब्दानाम् अनुकरणं निरर्थकं भवति।

एवं स्पष्टं भवतियत् यदि अनुकरणीयः शब्दःसार्थको भवति, तदा तस्य अनुकरणं सार्थकं भवति, यदि स निरर्थको भवतितदा तस्य अनुकरणं निरर्थकं भवति।

इत्थं सार्थक-निरर्थकभेदात् अनुकरणशब्दो द्विविधो भवति। शब्दस्य अनुकरणतां बोधयितुं संस्कृते प्रायः अनुकरणशब्दात् पश्चात् **'इति'** शब्दःप्रयुक्तो भवति। क्वचित् **'इति'** शब्दोऽपि न प्रयुज्यते।

**सार्थकानुकरणे उपसर्जनीकृतार्थत्वम्**

यः सार्थकः अनुकरणशब्दो भवति, तस्य वाच्यार्थो गौणो भवति। यतो हि तस्य स्वरूपमेवात्र प्रधानं भवति। अनुकरणशब्दःस्वकीयं वाच्यार्थं स्वरूपभूतम् अर्थं प्रतिगुणीकरोति। सार्थकानुकरणशब्दस्य उदाहरणं महाकवेः कालिदासस्य रघुवंशे यथा -

**तं कर्णमूलमागत्य पलितछद्मना जरा।**
**कैकेयी शङ्कयेवाह रामे श्रीर्न्यस्यतामिति**[1]।।

**'कैकेयी दशरथकर्णसमीपम् आगत्य तव मरणानन्तरं रामाय राज्यं न दद्यात्'** इतिकथयेत्, इतिसन्देहेन जरा (वृद्धावस्था) (जरा वृद्धावस्था कथ्यते। सा दशरथस्य कर्णसमीपे गतवती। कर्णसमीपे ये श्वेताः केशाः आसन् ते जरायाः सूचकाः सन्ति। अतःकविः कथयतियज्जरा श्वेतकेशव्याजेन दशरथस्य कर्णमूले आगत्य) पलितकेशदर्शनं कारयित्वा दशरथं प्रति अवदत् – **"त्वं वृद्धः सञ्जातः। कदा इहलोकं त्यजसि इतिन ज्ञायते। इदानीमेव राज्यं रामहस्तगतं कुरु"** इति। अत्र **'रामे श्रीः न्यस्यताम्'** इत्येष **अनुकरणशब्दः**। **जराऽत्र अनुकार्या**। तस्या वचनं वाल्मीकिमहर्षिणा अनुकृतम्। एतादृशानुकरणसन्दर्भे अर्थापेक्षया शब्दस्यैव प्राधान्यं भवति। यतो हि अनुकर्ता अनुकार्योक्तस्य अर्थं जानातिन वा, अनुकार्येण यदुक्तं तदेव यथावत् अनुकर्त्रा वक्तव्यं भवति। पुरातनकाले राज्ञः दूताः यथा कुर्वन्ति स्म तथा। अत एव तत्र अर्थापेक्षया शब्दस्य प्राधान्यम्। एतादृशस्थलं विहाय अन्यत्र कुत्रापि शब्दापेक्षया अर्थस्य उपसर्जनीकरणं नास्त्येव।

---

1 रघुवंशमहाकाव्यम् – 12 स-श्लो.सं - 02

**अनुकार्यशब्दः**

अनुकार्यवचनमपि सार्थक-निरर्थकभेदेन द्विविधम्। अनुकरणवचनस्य सार्थकता-निरर्थकतयोः अनुकार्यवचनस्यैव कारणत्वमितितत्रैव द्वैविध्यं कल्प्यते न तु अनुकरणवचने। अनुकरणवचनं तु अनुकार्यवचनस्य स्वरूपमात्रनिवेदनेन समाप्यते। यः अनुकर्तुं योग्यो भवति, यस्य अनुकरणं वा भवतिसः अनुकार्यः शब्दो विद्यते। अयमेव सार्थकानुकरणस्थले लोकप्रसिद्धार्थं बोधयति, कदापि स्वार्थं गुणीकर्तुं न प्रभवति।

**अनुकार्यात् अर्थबोधः**

**कुतःतर्हि तदर्थावगतिः ? अनुकार्यादितिब्रूमः। तस्य सार्थकनिरर्थकत्वभेदेन द्वैविध्यतः। न तु अनुकरणात्, तस्य इतिना व्यवच्छिन्नस्य स्वरूपमात्रेऽवस्थानात्**[1] **।**

अर्थात् अनुकरणस्थले यदि शब्दस्य उपसर्जनीकृतस्वार्थत्वं भवति, तर्हि तस्य शब्दस्य अर्थस्य (**श्रीन्यसनरूपार्थस्य**) ज्ञानं कथं भवति? अनुकार्यवचनात् इति(जरासम्बद्धात् वचनात् इति) कथयामः, तर्हि तस्य अनुकार्यवचनस्य सार्थकनिरर्थकत्वभेदेन द्वैविध्यात्। अनुकरणवचनात् तदर्थावगतिः न भवति, तस्य अनुकरणशब्दस्य **'इति'** इत्यनेन पदेन नियमितस्य अनुकार्यवचनस्वरूपस्य अपरिवर्तनात्। यदि अनुकरणशब्दात् अनुकार्योक्तशब्दस्यैव ज्ञानं भवति, तर्हि तस्य अर्थज्ञानं श्रोतुः कृते कथं भवतीतिप्रश्नः। अनुकार्यशब्दात् भवतिइत्युत्तरम्। उपरितनश्लोके **'रामे श्रीः न्यस्यताम्'** इति**अनुकरणशब्दःकवेः**। **जरा** अत्र **अनुकार्या**। कविना जराया वचनम् अनुकृतम्। दशरथेन करणीयं कार्यं रामे राज्यश्रियः स्थापनम्। सोऽर्थःश्रोत्रा कथमवगम्यते ? **'रामे श्रीः न्यस्यताम्'** इत्याकारक-अनुकार्यवचनद्वारा।

| **बोधकशब्दः** | **बोध्यः अर्थः** |
|---|---|
| 'रामे श्रीः न्यस्यताम्' | 'रामे श्रीः न्यस्यताम्' इतिअनुकार्यशब्दः। |
| 'रामे श्रीः न्यस्यताम्' | रामे श्रियः न्यासः (स्थापनम्) इतिअनुकार्यरूपः |

एवं सार्थकानुकरणस्थले लोकप्रसिद्धस्य अर्थस्य बोधः अनुकार्यात् भवति। अनुकार्यशब्दःकदापि स्वार्थं न गुणीकरोति।

**अनुकार्यस्य उपसर्जनीकृतार्थत्वासम्भवः**

अनुकार्यशब्दस्य प्रयोगः वाच्यार्थस्य बोधाय भवति। अतःअनुकार्यशब्दःवाच्यार्थबोधस्य साधनं विद्यते, वाच्यार्थबोधः साध्यो भवति। साधनं साध्यं प्रतिसदैव गौणो भवति। साध्यं तु सर्वदा प्रधानं भवति। साधनं कदापि साध्यं गुणीकर्तुं न शक्नोति। यो हि यस्य कृते प्रयुज्यते स तमर्थं प्रतिगौण एव भवति, यस्य कृते च साधनस्य प्रयोगः स पदार्थःप्रधानमेव भवति, न तु कदाचिदपि साधनं प्रतिगौणः। तदेवोच्यते यत् -

**अन्यस्य तु उपसर्जनीभावव्यभिचार एव, तस्य तदर्थमुपादानतः, यो हि यदर्थम् उपादीयते, नासौ तमेव उपसर्जनीकरोतियुक्तं वक्तुम्। यथा उदकाद्युपादानार्थम् उपात्तः घटादिः तदेव उदकादि। अन्यथा**

---

1 व्यक्तिविवेकः – 1-पृ.सं - 11 (राजानकरुय्यककृतसंस्कृतव्याख्यासंवलितः)

 ISSN: 2320-740X

**प्रधानेतरव्यवस्था निर्निबन्धनैव स्यात्। अत एव घटादिरेव प्रतिनिधीयते नोदकादि इत्यसम्भवो लक्षणदोषः**[1]इति।

अर्थात् अनुकरणशब्दं विहाय अन्यशब्दस्य तावत् निश्चयेन अर्थं प्रतिशब्दस्य उपसर्जनभाव एव इत्यस्य कुत्रापि न व्यभिचारः, तस्य शब्दस्य अर्थलाभार्थमेव उपादानम् इत्यतः। यतःशब्दःनिर्दिष्टम् अर्थं प्रतिपादयितुं प्रयुज्यते, स शब्दःस्वाभीप्सितम् अर्थं न उपसर्जनीकरोतिइतिवक्तुम् उचितम्। यथा जलानयनोद्देश्येन गृहीतःसाधनभूतःघटादिः तेन उपानीतम् उदकादि न उपसर्जनीकरोति। अन्यथा एतदनङ्गीकारे प्रधानाप्रधानव्यवस्था एव निराधारा स्यात्। अत एव घटादिरेव प्रतिनिधिरिव आचरति। ये येषां प्रतिनिधयः , ते तेषामपेक्षया अप्रधाना एव भवन्ति। उदकादीनां नोपसर्जनत्वम् इत्यसम्भवो लक्षणदोषो वर्तते।

किञ्च -

**'सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्।**
**न शैत्येन न चोष्णेन वह्निः क्वापि विशिष्यते'**[2]।।

इतिकुमारिलभट्टस्य वचनानुसारेण विशेषणपदस्य उपादानं तदैव सार्थकं भवतियदा इदं व्यभिचारि सम्भवञ्च सद् व्यावर्तकं भवति। अर्थात् सम्भवव्यभिचाराभ्यामेव विशेषणविशेष्यभावःभवति। तयोः उभयोरप्यभावे अन्यतरस्य अभावे वा तत् न भवतिइत्यर्थः।

यथा –

1. **सम्भवः– 'उष्णः अग्निः'** इत्यत्र अग्नौ उष्णत्वस्य सम्भवः। किन्तु उष्णत्वम् अग्निं विहाय अन्यत्र कुत्रापि न भवतिइतितस्य व्यभिचारः नास्ति। यत्र यत्र औष्ण्यम् अनुभूयते तत्र सर्वत्रापि अग्नेः अंशः एव भवति। अतःव्यभिचारः न। तेन केवलसम्भवसत्त्वात्, व्यभिचारस्य असत्त्वात् उष्णत्वम् अग्नेः विशेषणं न भवति।

2. **असम्भवः**- असम्भवेऽपि तत् (विशेषणत्वम्) न सम्भवति। **'कृष्णं दुग्धम्'** इत्यत्र दुग्धे कृष्णवर्णस्य असम्भवात्, कृष्णत्वं दुग्धस्य विशेषणं न भवति।

3. **व्यभिचारः – 'शीतःअग्निः'** – इत्यत्र शीतत्वम् अग्नौ असम्भवम्। अतःसम्भवःनास्ति, किन्तु शीतत्वस्य अग्नेः अन्यस्मिन् जले वर्तमानत्वात् व्यभिचारः। केवलव्यभिचारसत्त्वात् सम्भवस्य असत्त्वात् शीतत्वम् अग्नेः विशेषणं न भवति।

4. **उभयम् – 'नीलोत्पलम्'** इत्यत्र नीलस्य सम्भवः, रक्तोत्पलादिषु नीलस्य अभावःइतिसम्भवव्यभिचारयोः द्वयोः अपि सत्त्वात् **'नीलम्'** उत्पलस्य विशेषणं भवति।

---

1 व्यक्तिविवेकः – 1-पृ.सं - 12 (राजानकरुय्यककृतसंस्कृतव्याख्यासंवलितः)

2 कुमारिलभट्टस्य श्लोकवार्तिकम् – -पृ.सं -

अतःअर्थापेक्षया शब्दस्य प्राधान्यस्य, शब्दापेक्षया अर्थस्य उपसर्जनत्वस्य च असम्भवात् सम्भवेन तस्य अर्थवत्त्वं नास्ति, गुणीभूतव्यङ्ग्यस्यापि चारुमयत्वात्, तत्र ध्वनिलक्षणस्य व्यभिचारनिवारणस्य अनावश्यकत्वात् व्यभिचारेणापि नार्थवत्त्वम्। उभयरीत्यापि उपसर्जनीकृतस्वत्त्वस्य विशेषणस्य वैयर्थ्यम्।

अनुकरणस्थलं विहाय अन्यत्र कुत्रापि, 'अर्थस्य प्राधान्यं शब्दस्य उपसर्जनभावः' – इत्यस्य नियमस्य न व्यभिचारः। यतःतदर्थबोधनाय एव स शब्दःप्रयुज्यते। उद्देश्यम् अर्थप्रतिपादनस्य इतितस्यैव (अर्थस्य) प्राधान्यम्। कश्चिदर्थविवक्षां विना शब्दप्रयोगं न करोति। अतःअर्थःसाध्यः, शब्दःसाधनम् इतिशब्दस्य उपसर्जनत्वमेव सम्भवतिसर्वत्र। घटादिभिः जलादि उपादीयते। तत्र जलानयनोद्देश्येन घटादिः आश्रीयते, न अन्यथा। जलाद्यानयनोद्देश्यं विना घटाद्युपादानं केनापि न क्रियते इतिघटः जलानयनस्य साधनं, जलं साध्यमितिघटः जलस्य प्रतिनिधिरेव। जलानयनरूपं कार्यं घटेन इव अन्यपात्रेभ्योऽपि कर्तुं शक्यते। अप्रधानभूतानां घटादीनां परिवर्तनं कर्तुं शक्यते, किन्तु उद्दिष्टं जलानयनं परिवर्तयितुं न शक्यते। (पिपासानिवारणार्थं जलानयनं विहाय सिकताद्यानयनं न सम्भवति।) अतःघटादयः स्वयमेव उपसर्जनानि भवन्ति, न तु जलादीनि उपसर्जीनीकुर्वन्ति यथा, तथैव शब्दोऽपि यस्य अर्थस्य प्रतिपादनोद्देश्येन स्वस्य प्रयोगः कृत इतिज्ञात्वैव तमर्थम् अभिधाय तस्य साधनरूपेणैव तिष्ठति, न तु तस्य अर्थापेक्षया स्वं प्रधानं मन्यते।

अतःगौणं गौणमेव भवति, प्रधानं प्रधानमेव। यथा घटादि कदापि जलं न गुणीकर्तुं शक्नोति, तथा अनुकार्यशब्दोऽपि स्ववाच्यम् अर्थं गुणीकर्तुं न शक्नोति। शब्दःवाच्यार्थं प्रतिगणीभाव एव विद्यते, न तस्य क्वापि व्यभिचारो नास्ति। अतःगुणीकृतार्थत्वविशेषणस्य असम्भवो वर्तते। अतःअसम्भवनामकः लक्षणदोषो वर्तते। यदि कथञ्चित् व्यङ्ग्यार्थापेक्षया वाच्यस्य गुणीभावःमन्यते तदापि शब्दस्य तत् विशेषणं न वाच्यम्। अर्थस्य गुणीभावस्य कथनेनैव सिद्धे शब्दस्य उपसर्जनीकृतार्थत्वरूपस्य विशेषणस्य कथनं पुनरुक्तिर्भवति। एवं कथमपि शब्दस्य उपसर्जनीकृतत्वस्य अव्यभिचारात् ध्वनिलक्षणे न निवेश्यम्।

**निष्कर्षः**

**वाचो गुणीकृतार्थत्वं न सम्भवतिजातुचित्।**
**तदर्थं तदुपादानादुदकार्थं दृतेरिव**[1]।।

एवं महिमभट्टमते आनन्दवर्धनस्य ध्वनिलक्षणे **'शब्दः'** इतिपदस्य, तस्य विशेषणस्य उपसर्जनीकृतत्वस्य च प्रयोगः अनुचितो वर्तते। यतःशब्दार्थयोः मध्ये अर्थस्य साध्यत्वात् शब्दस्य च साधनत्वात् शब्दादपि अर्थस्य प्राधान्यं वर्तत एव। कदापि सः शब्दःस्वस्य अर्थम् अप्रधानीकृत्य स्वयं प्रधानभूतःन भवति। साधनभूताः घटाः साध्यभूतानि जलादीनि यथा न अप्रधानीकुर्वन्ति तथा। केवलम् अनुकरणस्थल एव अर्थापेक्षया शब्दस्य प्राधान्यम्, अन्यत्र सर्वत्रापि शब्दस्य अर्थं प्रतिउपसर्जनीभावस्य अव्यभिचार एव।

---

1 व्यक्तिविवेकः – 1-पृ.सं – 61 सङ्ग्रहश्लोकः (राजानकरुय्यककृतसंस्कृतव्याख्यासंवलितः)

 ISSN: 2320-740X

**"सम्भव-व्यभिचाराभ्यां स्याद्विशेषणमर्थवत्"** इतिन्यायानुसारम् अर्थं प्रतिशब्दस्य प्राधान्यस्य सम्भवाभावात्, अर्थं प्रतिशब्दस्य उपसर्जनीकृतत्वस्य व्यभिचाराभावाच्च, उभयरीत्यापि तद्विशेषणं व्यर्थम्। अनेन ध्वनिलक्षणे असम्भवदोषः सञ्जातः।

**Bibliography**

1. ध्वन्यालोकः – आन्ध्रव्याख्यानम् – व्याखाता – आचार्यः पुल्लेल श्रीरामचन्द्रः

2. व्यक्तिविवेकः - राजानकरुय्यककृतसंस्कृतव्याख्यासंवलितः

3. व्यक्तिविवेकः - (रेवाप्रसादद्विवेदिकृतहिन्दीभाष्यसहितः, चौखाम्बासंसकृतसंस्थान्)

4. रघुवंशमहाकाव्यम् - मल्लिनाथसूरिव्याख्यानम्

5. आन्ध्रव्यक्तिविवेकः – आन्ध्रव्याख्याता की.शे. श्री भागवतुल कुटुम्बरावुगारु

6. व्यक्तिविवेकः - वैखरी हिन्दीव्याख्योपेतः

7. श्लोकवार्तिकम् – कुमारिलभट्टः

8. व्यक्तिविवेकः - शारदाव्याख्यानम्

******

# श्रीमच्छङ्कररामानुजाचार्यमतयोः मोक्षस्वरूपं मोक्षोपायनिरूपणञ्च

**शान्तिघोषः**

सहायकाचार्यः (अतिथिः)

केन्द्रीयसंस्कृतविश्वविद्यालयः, राजीवगान्धीपरिसरः

मेणसे, शृङ्गेरी - ५७७१३९

## शोधसारः

पुरुषार्थचतुष्टये मोक्षो हि परमपुमर्थः। मोक्षविषये प्रमाणभूतं हि शास्त्रं हि वेदान्तशास्त्रम्। वेदान्तशब्देन प्रस्थानत्रयी गृह्यते। श्रुतिस्मृतिसूत्राणां व्याख्यातारो बहव आचार्या भारतभुवम् अवतीर्णाः। तेषु भगवान् शङ्कराचार्यः श्रीरामानुजाचार्यश्च स्वमहिम्ना देदीप्येते। श्रुतिस्मृतिसूत्राणाम् अद्वैतपरकं भाष्यं ररच भगवच्छङ्कराचार्यः। विशिष्टाद्वैतसम्मतं भाष्यं प्रणिनाय श्रीरामानुजाचार्यः। उभयोराचार्ययोः दार्शनिकदृष्टयः लोके ख्यातिं जग्मुः। प्रकृतशोधप्रबन्धे अनयोः युगाचार्ययोः मते मोक्षस्य स्वरूपं मोक्षोपायश्च क इत्ययं विषयः निरूप्यते। प्रसङ्गानुसारम् अनयोः दर्शनयोः प्रमेयपदार्थानां वर्णनम् अपि च दर्शनान्तरसिद्धान्तानाम् ईषदवलोकनमपि क्रियते। तथाहि मोक्षविषये शाङ्कराद्वैतराद्धान्तःज्ञानमेव मोक्षसाधनम् इति। कर्मसमुच्चिताद् ज्ञानान्मोक्ष इतीदं मतं श्रीरामानुजाचार्याणाम्। तयोः सिद्धान्तयोः प्रपञ्चनं प्रकृतशोधप्रबन्धस्य कृत्यम्।

## शोधपद्धतिः

प्रस्तुते लघुशोधप्रबन्धे विमर्शात्मिका शोधपद्धतिः आश्रिता। तथाहि विविधदर्शनानां विशिष्य अद्वैतविशिष्टाद्वैतदर्शनयोः सिद्धान्ता एकत्र संकलिताः सन्ति। भाष्यादीनाम् अध्ययनमनु विचारपूर्वकं विषयोऽयम् विचारितःसज्जीकृतश्च।

## मुख्यशब्दाः

शास्त्रम्, ब्रह्म, मोक्षः, भक्तिः, प्रपत्तिः, उपासनम्, अष्टाङ्गानि, जीवन्मुक्तिः, सत्त्वशुद्धिःइत्यादयः शब्दाः।

## उपोद्घातः

पुरुषार्थचतुष्टये मोक्षलाभो हि चरमः। आत्यन्तिकदुःखोच्छेदः परमानन्दावाप्तिश्च मोक्षः। स्वस्वरूपानुभवो हि परमानन्दानुभवः। अयमेव मोक्षः परमपुमर्थः। "आत्मनस्तु कामाय सर्वं प्रियं भवति"[1], "यो वै भूमा तत्सुखम्"[2] इत्यादिश्रुतयोऽत्र मानम्। सर्वोऽपि जन्तुः सुखं मे भवतु दुःखञ्च किञ्चिदपि मा भूदितिधिया प्रवर्तमानो लक्ष्यते। इयञ्च नैसर्गिकी प्रवृत्तिःप्राणिनामशेषाणां यत्सुखप्राप्त्यै सकलायाससहनम्। अविद्यामहोदधौ अत्यन्तं निमग्नोऽपि जनस्ततो

---

1 बृहदारण्यकोपनिषत् ४-५-६

2 छान्दोग्योपनिषत् ७-२३-१

 ISSN: 2320-740X

मुक्त्यै नित्यसुखप्राप्त्यै च यतमानो दरीदृश्यते। का कथा प्राणिनां सततम् आवर्तसहस्रसंकुलसंसारगत्यागतिदर्शनेन निर्विण्णस्य मुमुक्षोः जनस्य विषये। यत्स्वःपदास्पदं स्वर्गसुखं "यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्" इतितदपि सुखमन्तवदेवास्ति सांसारिकसुखसहस्रस्य विषये किमु वक्तव्यम्। अशेषकर्मफलस्य विनाशित्वमेव प्रतिपादयन्ती "जानाम्यहं शेवधिरित्यनित्यम्"[1] इतिकाठकश्रुतिरत्रार्थे अनुसन्धेया। तस्मादात्यन्तिदुःखनिवृत्तिरूपा निरतिशयसुखप्राप्तिलक्षणा मुक्तिरेवाखिलजनकाम्यास्ति। सर्वाण्यपि आस्तिकदर्शनशास्त्राणि मोक्षमेव परमपुरुषार्थत्वेन प्रतिपादयन्ति विजयन्ते। "शास्त्रत्वं हितशासनात्" इतिभामतीकारोक्तदिशा यद्धितं शाश्वतं शिवं शास्त्राणि तदेव वस्तु अस्मभ्यमुपदिशन्ति। प्राणिनामत्यन्तं कल्याणं भगवत्प्राप्त्यैव भवति, शास्त्राणि भगवत्स्वरूपं तत्प्राप्त्युपायञ्च याथात्म्येन प्रदर्शयन्ति। तस्मादेव उपनिषच्छास्त्रं श्रुतिर्वा "मातृपितृसहस्रेभ्योऽपि हितैषिणी"[2] इत्युच्यते। ईश्वरोपलब्धिरेव मनुष्यजीवनस्य उद्देश्यम् इतियुगावतारैः श्रीरामकृष्णभगवच्चरणैरसकृदुपदिष्टं तच्छिष्येभ्यः।[3] "यद्गत्वा न निवर्तन्ते तद्धाम परमं मम" इतिभगवद्गीतावचनं भगवत्प्राप्तिरूपस्य मोक्षस्य नित्यत्वमेव प्रतिपादयति। एवञ्च, मोक्ष एव परमपुरुषार्थःइतिएतावता अस्माभिः निरूपितम्। अधुना मोक्षप्राप्तिः कथं भवतिइतितत्प्राप्त्युपायविषये चिन्तनं प्रस्तूयते सामान्यतः। मोक्षश्चेद् उपेयः स्यात् तस्य उपायोऽपि भवेदेव। स च उपायः नाना भवितुम् अर्हतिएव मतभेदेन दर्शनभेदेन वा। पयसाम् अर्णव इवाखिलप्राणिनां लक्ष्यभूतो भगवान् एकश्चेदपि भगवत्प्राप्त्युपायस्तु रुचिभेदेन साधनभेदेन वा भिद्यते। अत यथार्थमुक्तं पुष्पदन्तेन शिवमहिम्नस्तोत्रे "रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव"[4] इति। भगवान् श्रीरामकृष्णदेवःएतद्विषये एकं दृष्टान्तं प्रस्तौतियत् पुष्करिणीजलं सर्वैः ग्राह्यम् इतिलक्ष्यभूता जलप्राप्तिः समाना चेदपि कदाचिद्घट्टभेदस्तु ग्राह्य एव। एवं दर्शनभेदेन नैके मार्गाः तदीयदर्शनप्रवर्तकैः मोक्षोपायत्वेन निर्दिष्टाः सन्ति। तेषु च दर्शनेषु मोक्षः मोक्षोपायश्च कारुणिकैः आचार्यैः लोकोपकाराय याथात्म्येन उपदिष्टोऽस्ति। अद्वैत-द्वैत-विशिष्टाद्वैत-शिवाद्वैत-शुद्धाद्वैत-अचिन्त्यभेदादीनि प्रमुखदर्शनानि भगवच्छङ्करप्रभृतिभिः आचार्यैः प्रवर्तितानि सन्ति। तेषु च दर्शनेषु प्रमेयरूपब्रह्मजिज्ञासैव प्रामुख्येन भवति। तत्सहकारितया साधनजिज्ञासापि सुतरां प्रवर्तते।

एवं भारतीयसनातनज्ञानपरम्परायां प्रमाणप्रमेयप्रमित्यादिविचाराय आस्तिकदर्शनशास्त्राणां सुमहद् अवदानमस्ति। विविधदर्शनेषु सस्त्वपि प्रमेयभूतं ब्रह्म तत्प्राप्तिसाधनानि च प्रतिपादयद् अद्वैतं विशिष्टाद्वैतञ्च दर्शनं रविरिव देदीप्येते। श्रीशङ्कररामानुजमतयोः मोक्षस्वरूपं मोक्षोपायनिरूपणम् इत्यस्मिन् विषये समासतःप्रस्तुतोऽयं लघुप्रबन्धात्मकः लेखः। तस्य च अयम् उपोद्घातः।

---

1 काठकोपनिषत् १-२-१०

2 कठोपनिषच्छाङ्करभाष्यम्, मन्त्रसंख्या २-१-१५

3 श्रीश्रीरामकृष्णकथामृतम् १-१०-६

4 शिवमहिम्नस्तोत्रम् ७

## १. अद्वैत-विशिष्टाद्वैतवेदान्तयोः सामान्यस्वरूपम्

### १.१. अद्वैतराद्धान्तः

"एकमेवाद्वितीयम्"[1] इत्यादिश्रुतौ निष्प्रपञ्चं निर्विशेषं ब्रह्मतत्त्वम् अद्वितीयमितिप्रोक्तम्। अद्वितीयं ब्रह्मैव सत्यं ततोऽन्यद् अनृतम्। कारणमात्रं सत्यम्। कार्यञ्च कारणाव्यतिरिक्तं सत्यम्। कार्यात्मना मिथ्यैव। श्रुतिः- "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"[2] इति। अद्वितीयं ब्रह्म सर्वत्रानुस्यूतं कूटस्थम् अविकारि च। ब्रह्मैव अस्माकम् आत्मा। "आत्मा च ब्रह्म" इतिशारीरकसूत्रभाष्यप्रामाण्यात्। एवञ्च, ब्रह्मात्मैक्यमेव अद्वैतवेदान्तस्य विषयः। प्रयोजनं च स्वस्वरूपावबोधः निरतिशयानन्दावाप्तिश्च। अनादिकालतःप्राणिनां बुद्धिगुहायां स्थितं पुराणं तत्त्वं शङ्करभगवत्पादैःअद्वैतवेदान्तनाम्ना सर्वजनानां पुरस्ताद् बोधितम्। स्वतःजीवःब्रह्मस्वरूपोऽपि अज्ञानव्यवधानात् संसारिणं परिच्छिन्नम् आत्मानं मन्यते। आत्मज्ञानमेव अज्ञानोच्छेदकम्। श्रुतिप्रमाणं- "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः"[3] इति।

### १.२. विशिष्टाद्वैतराद्धान्तः

विशिष्टाद्वैतवेदान्तप्रवर्तकः श्रीरामानुजाचार्यः। भगवान् रामानुजाचार्यः भगवता नारायणेन समुपदिष्टं श्रीदेव्या प्रवर्तितैः दशदिव्यसूरिभिः संरक्षितं नाथमुनियामुनाचार्यप्रभृतिभिः प्रवर्धितं दार्शनिकं श्रीविशिष्टाद्वैतसम्प्रदायपरिपोषकं सिद्धान्तं स्वीये श्रीभाष्ये व्याख्यातवान्। विशिष्टाद्वैतवेदान्ते चित्-अचित्-चिदचिदित्याख्यानि त्रीणि तत्त्वानि आदृतानि। चिद् जीवः, अचित् चैतन्यानाश्रयद्रव्यम् प्रकृतिकालशुद्धसत्त्वभेदेन तत् त्रिविधम्, अशेषचिदचित्प्रकारकम् एकं तत्त्वमेव ब्रह्म। ईश्वरभिन्नश्चिज्जीवः, शेषः, ज्ञानवान्, अणुः आनन्दस्वरूपः, अनेकः, नित्यश्च। जीवःत्रिविधः बद्धः मुक्तः नित्यश्चेति। ब्रह्मविषये रामानुजीयं मतं भवतिविष्णवाख्यः परवासुदेवःनारायण एवैकं चिदचिद्विशिष्टं ब्रह्मशब्दाभिधं तत्त्वमिति। स च नारायणः परमात्मा शेषी, ज्ञानवान्, विभुः, एकः, नित्यः, निखिलहेयप्रत्यनीकः, अनन्तकल्याणगुणनिधिरिति। कालभेदेन च ब्रह्मणः अवस्थाः भिद्यन्ते। प्रलयकाले सूक्ष्मचिदचिद्विशिष्टं, सृष्टिकाले च स्थूलचिदचिद्विशिष्टमिति। एते द्वे अवस्थे विशिष्टशब्देन अभिधीयेते। सूक्ष्मचिदचिदितिस्थूलचिदचिदितिविशेषणद्वयं परित्यज्य विशिष्टं च विशिष्टं च विशिष्टे इतिद्वन्द्वसमासः। तयोः विशिष्टयोः अद्वैतं विशिष्टाद्वैतम्। द्वयोर्भावो द्वितैव द्वैतम्। न द्वैतमद्वैतम्। अद्वैतम् अभेदः विशिष्टयोः अद्वैतं विशिष्टाद्वैतमिति। अत्र सूक्ष्मं कारणं स्थूलञ्च कार्यम् इत्युच्यते। तयोः स्थूलसूक्ष्मयोः ऐक्ये एव शास्त्रस्य तात्पर्यम्। इदमेव चिदचिद्विशिष्टं ब्रह्मतत्त्वं श्रीमन्नारायण इतिविशिष्टाद्वैतिनामाघोषः।

एवञ्च, श्रीभगवान् एव जगतःआत्मा। श्रुतिः- "ऐतदात्म्यमिदं सर्वम्"[4] इति। जीवात्मापि परमात्मनः शरीरम्।[1] चेतनाचेतनात्मकं जगत् भगवतःतनुः।[2] अपरापि श्रुतिराह "य आत्मानम् अन्तरा यमयतिस त आत्मा अन्तर्याम्यमृतः"[3]

---

1 छान्दोग्योपनिषत् ६-२-१

2 छान्दोग्योपनिषत् ६-१-१

3 मुण्डकोपनिषत् २-२-९

4 छान्दोग्योपनिषत् ६-८-७

 ISSN: 2320-740X

इति। स च भगवान् शास्त्रैकसमधिगम्यः। शास्त्रैणैव प्रमाणेन अवगन्तव्यं जगत् परमात्मनः शरीरम्, परब्रह्म जगत आत्मा इति।

## २. दर्शनान्तरेषु मोक्षविषयकविवेकः

सर्वाण्यपि आस्तिकदर्शनानि मोक्षमेव परमपुरुषार्थत्वेन मत्वा अभिधेयत्वेन परब्रह्म एव प्रतिपादयन्ति। तत्र मोक्षविषये कानिचन मतानि उच्यन्ते। श्रीमच्छङ्करभगवत्पादमतं तु एकमेवाद्वितीयं ब्रह्मैव सत्यम्। सदितरत् परिदृश्यमानं जगन्मायाविकार एव, अतस्तन्मायिकं मायामयत्वाच्च मिथ्यैवेतिसिद्धान्तः। मुक्तिविषये अद्वैतिनाम् आशयो हि जीवब्रह्मैक्यज्ञानमेव मोक्षः। अहं ब्रह्मास्मीतिअपरोक्षानुभवोदयकाले एव मूलाविद्यानाशो भवति। तदा जीवस्य स्वस्वरूपावस्थितिर्भवति। त्रिष्वपि कालेषु अकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि इतिइयमेव मोक्षावस्था। मोक्षविषये द्वैतिनाम् आनन्दतीर्थानां मतं तु परमात्मविषयकापरोक्षज्ञानेन प्रमादात्मकबन्धनिवृत्तिःस्वस्वरूपावस्थितिश्च मोक्ष इति। अचिन्त्यभेदाभेदवादिनः बलदेवविद्याभूषणस्य मतं तु ब्रह्मलोकगमनेन श्रीकृष्णप्राप्तिरेव मोक्ष इति। तच्च प्रारब्धकर्मक्षये सत्येव भवति। द्वैताद्वैतमतप्रतिष्ठापकस्य आचार्यस्य निम्बार्कस्य मोक्षविषये मतं भवतिस्वाभाविकचिद्रूपावस्थानमेव मोक्ष इति। इत्थं दिङ्मात्रं केषाञ्चन दर्शनानां मोक्षविषयकमतम् अत्रोपन्यस्तम्। परन्तु विशिष्टाद्वैतिभिरुच्यते श्रीमन्नारायणोपासनया वैकुण्ठलोकं गताः मुक्ताः। नित्यविभूतिर्वैकुण्ठलोकः। एवं सायुज्यमुक्तिरेव मुक्तिः। एतेषां मते जीवब्रह्मात्मैक्यं न मोक्षः अपि तु जीवात्मनः ब्रह्मस्वरूपप्राप्तिः ब्रह्मगुणप्राप्तिरेव वा। मुक्तस्य जीवस्य सर्वज्ञत्वेऽपि न सर्वकर्तृत्वम्, जगज्जन्मस्थितिलयकारणत्वं च ब्रह्मण एव। तेषां मते बद्धमुक्तनित्यभेदेन जीवःत्रिविधः। एतैः जीवन्मुक्तिः नाङ्गीक्रियते। प्राणेन्द्रियशरीराद्यत्यन्तविश्लेषरूपायाः मुक्तेः तत्सम्बन्धरूपजीवभावेन विरोधात् तयोरेकदा समावेशो न निर्वोढुं शक्यः। अतःअग्निर्माणवकः, यजमानः प्रस्तरः इतिवत् केनचिदाकारेण मुक्तसाम्यात् गौणार्थोऽयं विषय इतितत्त्वमुक्ताकलापकाराणां नयः।

अद्वैतिनः मोक्षविषये भिन्नमेव मतं प्रतिष्ठापयन्ति। जीवःअज्ञानदशायां बद्धः स्वतस्तु मुक्त एव। यथा- अज्ञः घनच्छन्नदृष्टिर्वा आकाशे तलमलिनतादि अध्यस्यति, सर्वभासकं सूर्यञ्च निष्प्रभं मन्यते तथैव जीवःस्वतःब्रह्मस्वरूपोऽपि कर्तृत्वादिधर्मवन्तं संसारिणं बद्धमात्मानं मन्यते। अत एव औपाधिकः जीवव्यवहारः। जीवो नाम परमात्मनः आभासमात्रमितिभगवन्तो भाष्यकाराः। जीवस्य अज्ञानविमोचनेन स्वस्वरूपावस्थितिः मोक्षो भवति। अत एव नष्टाज्ञानः मुक्तः जीवन्मुक्त इतिवा उच्यते। प्रमाणभूतश्रुतिवाक्यानि तावत् “न तस्य प्राणा उत्क्रामन्ति”[4], “अत्रैव समवनीयन्ते”[5],

1 “यस्य आत्मा शरीरम्” इति। बृहदारण्यकोपनिषत् ३-७-७

2 “तत्सर्वं वै हरेस्तनुः” इति। वेदान्तसारः, पृष्ठसंख्या १८

3 बृहदारण्यकोपनिषत् ३-७-२२

4 बृहदारण्यकोपनिषत् ४-४-६

5 बृहदारण्यकोपनिषत् ३-२-११

"विमुक्तश्च विमुच्यते"[1] इत्यादीनि।

## ३. श्रीमच्छङ्कररामानुजमतयोः मोक्षस्वरूपनिरूपणम्

तत्रादौ भगवतःशङ्कराचार्यस्य मोक्षविषयकमतम् उच्यते। मोक्षो नाम परा शान्तिः, सर्वबन्धविमोचनं स्वस्वरूपवेदनं वा। मोक्षो नाम अतिमृत्यु आत्यन्तिकसंसारोपरमः। तच्च ज्ञानेनैव भवति। "तरतिशोकम् आत्मवित्"[2], "अभयं वै जनक प्राप्तोऽसि"[3] इत्यादिश्रुतयोऽत्र मानम्। श्रीमद्रामानुजाचार्यमते चिदचिच्छरीरकः परमात्मा श्रीपतिरेव शारीरकशास्त्रस्य प्रतिपाद्यः। श्रीमन्नारायण एव चिदचिद्विशिष्टम् अद्वैतं तत्त्वम्। अत एवोच्यते-

"तत्त्वं जिज्ञासमानानां हेतुभिः सर्वतोमुखैः।
तत्त्वमेको महायोगी हरिर्नारायणः प्रभुः॥"[4] इति।

श्रीमन्नारायणोपासनेन तन्न्यासेन वा देशविशेषप्राप्तिपूर्वकं तत्साम्यं प्राप्तस्य कैङ्कर्यपर्यन्तपरिपूर्णब्रह्मानुभवःमोक्षो भगवल्लाभः। इत्थं मोक्षः प्रतिपादितः। अज्ञानस्य ज्ञाननिवर्त्त्यत्वम् अद्वैतिभिरुच्यते। रामानुजमते तु बन्धनस्य पारमार्थिकत्वान्न तज्ज्ञाननिवर्त्त्यम्। भक्त्या उपासनेन च यदा भगवान् प्रसीदतितदैव बन्धननिवृत्तिःभवति। सायुज्यमुक्तिरेव मुक्तिशब्दवाच्य इत्युक्तम्। तदर्थस्तु भोगसाम्यम् इति। ब्रह्मणः याथात्म्यानुभवरूपभोगमात्रेणैव मुक्तपुरुषाः ब्रह्मसमानतां प्राप्नुवन्ति। मुक्तानां च भवाम्भोनिधौ पुनरावृत्तिर्नास्ति। मुक्तः प्रकृतिबन्धविनिर्मुक्तः सन् विलक्षणदेशविशेषविशिष्टतया परदेवतां परमप्रसादेन साक्षात्करोति। श्रीवैकुण्ठाधिवासी अप्राकृतदेशविशिष्टः वैकुण्ठलोकः। तत्र निवासी भगवान् जीवानां परा गतिः। सूत्रप्रमाणं "मुक्तोपसृप्यव्यपदेशात्"[5] इति। मुक्तजीवानां भगवान् एव गतिः।

## ४. मोक्षोपायविषये श्रीमच्छङ्कररामानुजमतयोः वैलक्षण्यम्

उपायशब्दस्य साधनम् इत्यर्थः। मोक्षोपायविषये तत्रभवतःश्रीमच्छङ्कराचार्यस्य मतं हि ज्ञानमेव हि साक्षान्मोक्षसाधनम् इति। तथा च गीतं शिवगीतायां-

"न कर्मणामनुष्ठानैर्न दानैस्तपसापि वा।
कैवल्यं लभते मर्त्यः किन्तु ज्ञानेन केवलम्॥"[6] इति।

जीवब्रह्मात्मैक्यज्ञानमेव मोक्षसाधनम्। तत्त्वमस्यादिवाक्यजन्यज्ञानस्य मोक्षसाधनत्वमितिभगवत्पूज्यपादाः श्रीमच्छङ्कराचार्या अभिप्रयन्ति। यद्यपि ज्ञानं स्वतःसर्वजन्तुषु वर्तते एव तथापि अनाद्यविद्यया तिरोहितं तत्। तस्माद्

1 काठकोपनिषत् ५-१

2 छान्दोग्योपनिषत् ७-१-३

3 बृहदारण्यकोपनिषत् ४-२-४

4 महाभारतम्, शान्तिपर्व, श्लोकसंख्या ९०-९१

5 ब्रह्मसूत्रम् १-३-२

6 शिवगीता १-२


ISSN: 2320-740X

ज्ञानमेव अनर्थहेतोः अज्ञानस्य निवर्तकं भवति। कर्मणा एवायं लोको बद्धः। उच्यते च- "कर्मणा बध्यते जन्तुः विद्यया च विमुच्यते"[1] इति। नैष्कर्म्यसिद्धिःज्ञानेनैव भवति। गीतञ्च गीतायां भगवता "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा"[2] इति। एवं ज्ञानमेव मोक्षोपाय इतिभगवत्पूज्यपादानाम् आशयः।

श्रीमद्रामानुजाचार्यमतेऽपि बन्धहेतुः अविद्यैव परन्तु ज्ञानेन न बन्धनिवृत्तिः। कर्मसमुच्चितादेव ज्ञानात् मोक्षः इतितेषां मतम्। ज्ञानमत्र ध्यानम् उपासनं वा। अहं ब्रह्मास्मीतिअहंग्रहोपासनम्, परमात्मनि भक्तिरूपं निदिध्यासनम् इत्यादि मोक्षसाधनम्। शरीरसम्बन्धाद् आत्मा चेतनशरीरः इन्द्रियैः बद्धो भवति। चैतन्यरूपं देहमेव जीव आत्मत्वेन मन्यते। अयमेव बन्धः, बद्धावस्थायां पूर्णानन्दप्राप्तिः नास्ति। अतःबद्धस्य मुक्त्यै ब्रह्मोपासनं कर्त्तव्यत्वेन उपदिष्टम्। ब्रह्मोपासनमेव ईश्वरभक्तिः। विद्यया मुक्तिः इत्यनेन भक्तिरूपतापन्नं ज्ञानं ध्यानमुच्यते।

तत्त्वमस्यादिवाक्यजन्यज्ञानस्य मोक्षसाधनत्वं नास्तीतिवदति"**भक्त्या लभ्यः**" इति। न हि कश्चित् तत्त्वमस्यादिवाक्यजन्यज्ञानमात्रेण निवृत्तसंसारो दृष्टचरः। तदिदम् अभिप्रेत्य उक्तम् आपस्तम्बेनापि- "बुद्धे क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धं बुद्धे चेत् क्षेमप्रापणम् इहैव नः दुःखमुपलभ्यते" इति। जीवब्रह्मणोः याथात्म्यज्ञानं यथार्थज्ञानं व्यावर्तकधर्मवत्त्वेन ज्ञानम्। जीवपरयाथात्म्यज्ञानपदेन तत्त्वमसीतिवाक्यस्य सूक्ष्मचिदचिद्विशिष्ट-स्थूलचिदचिद्विशिष्टब्रह्मणोः अभेदप्रतिपादकत्वम्, न तु निर्विशेषचिन्मात्रबोधकत्वम्। एवं मोक्षसाधनविषये उभयोः मतवैलक्षण्यम् अस्ति।

## ५. रामानुजाचार्यमते मोक्षोपायत्वेन भक्तिप्रपत्त्योः उपयोगः

श्रीमद्रामानुजाचार्यमते भगवत्प्राप्त्युपायभूते भक्तिः प्रपत्तिश्च। भक्तिप्रपत्तिभ्यां प्रसन्नः ईश्वरः मोक्षं ददाति। भक्तिः प्रपत्तिश्च ज्ञानप्रकारविशेषौ। किन्तु भगवदनुग्रहं विना सः कथं प्राप्येत। भगवान् यस्मिन् प्रसीदतितेनैव लभ्यः सः। श्रुतिः- "यमेवैष वृणुते तेन लभ्यः"[3] इति। भगवत्प्रसादप्राप्तये साधनद्वयमेव भक्तिः प्रपत्तिश्च। ध्रुवानुस्मृतिरेव भक्तिशब्देन अभिधीयते। आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः इतिध्रुवानुस्मृतेरेव मोक्षफलकत्वश्रवणात्। सैव ध्रुवानुस्मृतिः विशदा दृष्टिः इति। "यमेवैष वृणुते तेन लभ्यः" इतिश्रुत्यभिप्रेतां प्रीतिरूपतापन्नां ध्रुवानुस्मृतिमेव गीतायां श्रीभगवान् आह "भक्त्या त्वनन्यया शक्योऽहमेवंविधोऽर्जुन"[4] इति।

### ५.१. भक्तिः

श्रुतिशतविहितःमुक्तेरुपायो भक्तिः। अत्र प्रश्नः ब्रह्मविद्याया एव मुक्तिसाधनत्वं खलु, भक्तिशब्दस्तु अन्यार्थः। "भज सेवायाम्" इतिधातोः भक्तिशब्दःनिष्पन्नः। सा च धीरेव। एवं ब्रह्मविद्यात्वाविरोधस्थापनम्। महनीयविषये प्रीतिः

1 महाभारतम्, शान्तिपर्व २४३-७

2 श्रीमद्भगवद्गीता ४-३७

3 कठोपनिषत् १-२-२३

4 श्रीमद्भगवद्गीता ११-५४

भक्तिः। प्रीत्यादयश्च ज्ञानविषयाः। स्नेहपूर्वकम् अनुध्यानं भक्तिः इतिच उपायो विशिष्यते। प्रीतिरूपविशदस्मरणमेव भक्तिः। भक्तेः ज्ञानहेतुता कथम् इत्युच्यते भक्तिसाध्यं प्रापकज्ञानमपि भक्तिलक्षणोपेतम्। तदैव "यस्य देवे परा भक्तिः यथा देवे तथा गुरौ"[1] इत्यादिश्लोकार्थ उपपद्यते। भक्तिसाध्यज्ञानसाध्यपर्वद्वयविशेषविशिष्टं भक्तिरूपज्ञानमेव ज्ञानशब्देनात्र विवक्षितम्। अत्र विषये सञ्जय उवाच "शुद्धभावं गतो भक्त्या शास्त्राद् वेद्मि जनार्दनम्"[2] इति। श्रुतिशतविहितःमुक्त्युपायः भक्तिः इत्युक्तम्। श्रुतिप्रमाणं "यः पुनरेतं परं पुरुषम् अभिध्यायीत" इति। स्मृतिप्रमाणानि हि "भक्त्या त्वनन्यया शक्यः", "भक्त्या माम् अभिजानाति" इत्यादीनि।

### ५.२. प्रपत्तिः

न्यासविद्या प्रपत्तिः। उपनिषत्सु द्वात्रिंशद्ब्रह्मविद्याः वर्णिताः सन्ति। तासु न्यासविद्या अन्यतमा। न्यासविद्याविषयकवर्णनं शारीरकमीमांसायां तृतीयाध्याये तृतीये पादे शब्दादिभेदाधिकरणे उपलभ्यते। सूत्रप्रमाणं हि "नानाशब्दादिभेदात्"[3] इति। इयं न्यासविद्या प्रपत्तिर्वा भक्तिविद्यासु विलक्षणा अस्ति। न्यासविद्या एव शरणागतिशब्देन अभिधीयते। शरणागतेः स्वरूपं वदतिश्रीवात्स्यवरदाचार्यः प्रपन्नपारिजातकग्रन्थस्य स्वरूपपद्धतौ-

"अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम्।
तदेकोपायता याच्ञा प्रपत्तिःशरणागतिः॥"[4] इति।

श्रीभगवत्प्राप्तये प्रपत्त्यतिरिक्तं साधनं नैवास्ति। प्रपत्तेः पञ्च अङ्गानि हि आनुकूल्यसंकल्पः, प्रातिकूल्यवर्जनम्, कार्पण्यम्, महाविश्वासः, गोप्तृत्ववरणम् इति। एतेषु सत्स्वेव शरणागतिलाभो भवति। इयं शरणागतिः भक्तेः अतिरिक्ता। भक्तिः दर्शनसमानाकारा अन्तिमप्रत्ययावधिः नास्ति। प्रपन्नस्य वर्तमानशरीरपातकाले एव मोक्षो भवति। भक्तिः आजीवनम् अनुष्ठेया, प्रपत्तिःसकृदेव भवति। एवं भेदे सत्यपि उभे ज्ञानविशेषे स्तः। उभयत्र विनियोगभेदेन फलभेदः। प्रपत्तेः अङ्गभूता महाविश्वासः अतीव दुर्लभः। तस्मात् प्रपत्तिमार्गो न सुकरः।

## ६. भक्तिस्वरूपविषये दर्शनान्तरमतम्

आत्मतत्त्वानुसन्धानं स्वस्वरूपानुसन्धानं वा भक्तिरितिभगवन्तो भाष्यकाराः।[5] आत्मैव अस्माकं प्रियतमः। भक्तिः स्वात्मनि प्रीतिरेव। आत्मभिन्ने वस्तुनि कस्यापि प्रीतिः चिरस्थायिनी न भवति। परब्रह्मैव मम आत्मा इतिश्रद्धैव भक्तिः। श्रद्धा नाम अपूर्वविश्वासः। स च आत्मभिन्ने वस्तुनि न भवतीतिअद्वैतमतस्वारस्येन भक्तिस्वरूपवर्णनं कृतम्।

भक्तिविषये श्रीरामानुजमतं हि भक्तिः ज्ञानस्यैव विशेषरूपम्। ज्ञानभक्त्योः साम्यं वदन्ति इमे आचार्याः। समीचीनं ज्ञानं भक्तिरूपम्, समीचीना भक्तिः ज्ञानरूपा। ब्रह्मविषयकं बौद्धिकं प्रेम एव भक्तिः। भक्तिश्च ध्रुवानुस्मृतिरेव।

---

1 श्वेताश्वतरोपनिषत् ६-२३

2 महाभारतम्, उद्योगपर्व ६८

3 ब्रह्मसूत्रम् ३-३-५६

4 प्रपन्नपारिजातकम्, स्वरूपपद्धतिः २

5 "स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते" इति। विवेकचूडामणिः ३२

 ISSN: 2320-740X

एतद्विषये ब्रह्मसूत्रस्य रामानुजभाष्यं प्रमाणं भवति। तथाहि ध्यानं तैलधारावद् अविच्छिन्नस्मृतिसन्तानरूपा ध्रुवा स्मृतिः। "स्मृत्युपलम्भे सर्वग्रन्थीनां विप्रमोक्षः'" इतिध्रुवायाः स्मृतेः अपवर्गोपायश्रवणात्। सा च स्मृतिः दर्शनसमानाकारा। सेयं स्मृतिः दर्शनरूपा प्रतिपादिता दर्शनरूपा च प्रत्यक्षतापत्तिःइति। प्रत्यक्षतापन्नाम् अपवर्गसाधनभूतां स्मृतिं विशिनष्टि- "उपासनं स्याद् ध्रुवानुस्मृतिदर्शनान्निर्वचनाच्चेति" इतितस्यैव वेदनस्य उपासनरूपस्य असकृदावृत्तस्य ध्रुवानुस्मृतित्वम् उपवर्णितम्। "नायमात्मा प्रवचनेन लभ्य" इत्यनेन केवलश्रवणमनननिदिध्यासनानाम् आत्मप्राप्त्यनुपायताम् उक्त्वा "यमेवैष वृणुते तेन लभ्यः" इत्युक्तम्। प्रियतमो हि वरणीयो भवति। गीतञ्च गीतायां भगवता "तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्", "प्रियो हि ज्ञानिनोऽत्यर्थम्" चेति। एवं ध्रुवानुस्मृतिरेव भक्तिशब्देन अभिधीयते। प्रमाणानि हि "सा त्वस्मिन् परमप्रेमरूपा"[1] इतिनारदीयभक्तिसूत्रम्, "ओं सा तु कर्मज्ञानयोगेभ्योऽपि अधिकतरा"[2] इतिनारदसूत्रम्, "सा परानुरक्तिरीश्वरे"[3] इतिशाण्डिल्यसूत्रम्।

"ईश्वरप्रणीधानाद्वा"[4] इतियोगसूत्रस्य व्यासभाष्ये प्रणिधानशब्दार्थःप्रणिधानाद् भक्तिविशेषात् आवर्जितःईश्वरः तम् अनुगृह्णातिअभिध्यानमात्रेण इति। प्रणिधानं तत्र भक्तिविशेषः विशिष्टम् उपासनं सर्वक्रियाणामपि ईश्वरार्पणम्। विषयसुखादिकम् अनिच्छन् सर्वाः क्रियाः तस्मिन् परमगुरौ अर्पयतिइत्यर्थः।

## ७. भक्तेः प्रकाराः

श्रीरामानुजाचार्यमते भक्तेः नव प्रकाराः त्रीणि च चरणानि। नव प्रकाराः भवन्ति स्तुतिः, स्मृतिः, नमस्कृतिः, वन्दना, याचना, कीर्तनम्, गुणश्रवणम्, वचनध्यानम्, अर्चनं-प्रणामः चेति। त्रीणि चरणानि हि ध्रुवानुस्मृतिः, असकृदावृत्तम्, दर्शनसमानाकारता चेति।

## ८. विद्याभेदात् भक्तिभेदाः

ध्यानशब्दवाच्या भक्तिः। इयं भक्तिः विद्याभेदात् बहुविधा भवति। ताश्च विद्याः द्विविधाः ऐहिकफला मुक्तिफलाश्चेति। तयोः ऐहिकफलाः उद्गीथविद्यादयः। मुक्तिफलास्तु विद्याः अन्तरिक्षविद्या, अन्तरादित्यविद्या, दहरविद्या, भूमविद्या, सद्विद्या, मधुविद्या, उपकोसलविद्या, शाण्डिल्यविद्या, पुरुषविद्या, प्रतर्दनविद्या, वैश्वानरविद्या, पञ्चाग्निविद्या इत्यादिद्वात्रिंशद्विद्याः।

## ९. रामानुजाचार्यमते भक्तियोगस्य साक्षान्मोक्षोपायत्वम्

मोक्षोपायविषये श्रीरामानुजीयं मतं हि कर्मसाहाय्येन उपलब्धा ज्ञानरूपा भक्तिः आत्मनः मोक्षसाधनम्। यथार्थज्ञानम् अपरोक्षज्ञानम्, तद्धि ध्रुवानुस्मृतिरेव। ध्यानम् उपासनं वा प्रेमपूर्णं चेत्सैव भक्तिः। प्रीतिश्च प्रियस्य वस्तुनः ज्ञानमेव, न तु

1 नारदीयभक्तिसूत्रम् १-२

2 नारदसूत्रम् २-१

3 शाण्डिल्यसूत्रम् १-२

4 पातञ्जलयोगसूत्रम् १-२३

प्रियवस्तुज्ञानेन उत्पन्नम्। निरन्तरम् आवर्त्यमानो भक्तियोगः प्रीतिरूपो निरतिशयानन्दसाक्षात्काररूपो भवति। कर्मानुगृहीतस्य निरुक्तभक्तिरूपस्य ध्यानस्यैव मोक्षोपायत्वे प्रमाणम्-

"वर्णाश्रमाचारवता पुरुषेण परः पुमान्।
विष्णुराराध्यते पन्थाः नान्यस्तत्तोषकारकः॥" इति।

भक्तिरेव योगः भक्तियोगः। "भक्तियोगो नाम यमनियमासनप्राणायामप्रत्याहारधारणध्यानसमाधिरूपाष्टाङ्गयुक्तस्तैलधारावद् अविच्छिन्नस्मृतिसन्तानरूपः"[1] इति। अष्टाङ्गयोगसम्पन्नः अधिकारी यदा भगवत्स्वरूपं ध्यायतितदा ध्येयवस्तुविषये अपरोक्षं ज्ञानं भवति। स एव भक्तियोगः तैलधारावद् अविच्छिन्नस्मृतिसन्तानरूपा भक्तिरेव। सैव पराभक्तिरित्युच्यते। अस्यां प्रपत्तिःअङ्गभूता स्वतन्त्रा प्रपत्तिरन्या। भक्तियोगः साधनसप्तकजन्यः। साधनानि विवेक-विमोक-अभ्यास-क्रिया-कल्याण-अनवसाद-अनुद्धर्षरूपाणि।

**विवेकः**- जातिदोषः, आश्रयदोषः, निमित्तदोषः इतित्रिविधदोषात् यदन्नं न दूषितं तादृशान्नभोजनात् शरीरस्य शुद्धिकरणमेव विवेकः। भक्तौ विवेकस्य महान् उपयोगः अस्तीत्यत्र श्रुतिप्रमाणम् "आहारशुद्धौ सत्त्वशुद्धिःसत्त्वशुद्धौ ध्रुवानुस्मृतिः"[2] इति। ध्रुवानुस्मृतिरेव भक्तियोगः।

**विमोकः**- कामानभिष्वङ्गः। कामनासु अनासक्तता। अत्र विषये श्रुतिप्रमाणं "शान्त उपासीत"[3] इति।

**अभ्यासः**- पुनः पुनः आलम्बनसंशीलनम्। स्मृतिप्रमाणं "सदा तद्भावभावितः"[4] इति।

**क्रिया**- शक्तितःसामर्थ्यानुसारं वा पञ्चमहायज्ञाद्यनुष्ठानम्। पञ्चविधयज्ञास्तावत् ब्रह्मयज्ञः, पितृयज्ञः, देवयज्ञः, भूतयज्ञः, मनुष्ययज्ञश्चेति। तथा चोक्तं मनुना-

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौती नृयज्ञोऽतिथिपूजनम्॥"[5] इति।

मुमुक्षूणां कृते पञ्चमहायज्ञानुष्ठानविधानं श्रुतौ वर्तते। तथा च श्रुतिः "क्रियावान् एष ब्रह्मविदां वरिष्ठः"[6] इति। "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा अनाशकेन"[7] चेति।

**कल्याणानि**- सत्यार्जवदयादानाहिंसादीनि कल्याणानि। अत्रार्थे श्रुतिः "सत्येन लभ्यस्तपसा ह्येष आत्मा"[8] इति।

---

1 यतीन्द्रमतदीपिका, सप्तमोऽवतारः, भक्तियोगस्वरूपनिरूपणम्, पृष्ठसंख्या १३८

2 छान्दोग्योपनिषत् ७-२-६

3 छान्दोग्योपनिषत् ३-१४-१

4 श्रीमद्भगवद्गीता ८-६

5 मनुस्मृतिः ३-७०

6 मुण्डकोपनिषत् ३-१-४

7 बृहदारण्यकोपनिषत् ६-४-२२

8 मुण्डकोपनिषत् ३-१-५

 ISSN: 2320-740X

**अनवसादः**- दैन्याभावःअनवसादः। श्रुतिप्रमाणं अत्र "नायमात्मा बलहीनेन लभ्यः"[1] इति।

**अनुद्धर्षः**- तुष्ट्यभावःअनुद्धर्षः। अतिसन्तोषोऽपि भक्तेः विरोधी एव भवति।

एवं साधनसप्तकानुगृहीता भक्तिः ध्येयसाक्षात्कारसमानाकारा अन्तिमप्रत्ययावधिका च भवति। स च अन्तिमप्रत्ययः एतच्छरीरावसाने शरीरान्तरावसाने वा भवति। भक्तिरेव वेदन-ध्यान-उपासनादिशब्दवाच्या। परमभक्तिः परज्ञानम् इतिभक्तेः पर्वत्रयमस्ति। क्रमत्रयवती भक्तिः प्रपत्तेः अङ्गभूता।

भक्तेः भेदत्रयं साधनभक्तिः फलभक्तिश्चेति। तत्र साधनभक्तिः उक्तसाधनसप्तकजन्या। फलभक्तिश्च ईश्वरकृपाजन्या। श्रीशठकोपसूरि-श्रीनाथमुनिनिष्ठा इयं भक्तिरितिविशिष्टाद्वैतपरम्परा। मद्भक्तजनवात्सल्यम् अर्थात् भक्तजनेषु वात्सल्यप्रदर्शनं भक्तिः इत्यादिवाक्ये स्तुतिनमस्कारादिषु च भक्तिप्रयोगः गौणः। कर्मयोगज्ञानयोगप्रभृतीनां भक्तिद्वारैव साधनत्वम् अधिकारिदृष्ट्या साधनभेदः इतिवचनस्वारस्येन। कथं कर्मयोगप्रभृतीनां भक्तिद्वारा मोक्षसाधनत्वं तदत्रोच्यते।

## १०. श्रीरामानुजाचार्यमते कर्मयोगज्ञानयोगयोः भक्त्युपयोगित्वम्

तत्रादौ कर्मयोगस्य भक्त्युपयोगित्वम् उच्यते। "कर्मयोगो नाम उपदेशात् जीवपरयाथार्थ्यज्ञानवता शक्त्यनुसारेण फलसङ्गरहितानिषिद्धकाम्यनित्यनैमित्तिकरूपपरिगृहीतकर्मविशेषः"[2] इति। कर्मयोगः देवार्चनतपस्तीर्थयात्रादानयज्ञादि-भेदभिन्नः। अयं कर्मयोगः जीवगतकल्मषापनयनद्वारा ज्ञानयोगम् उत्पाद्य तद्द्वारा अथवा साक्षात् भक्त्युत्पादको भवति। कर्मयोगत्वेन वर्णाश्रमधर्मः आचरणीयत्वेन उपदिश्यते। क्रमश्चात्र निष्कामकर्माचरणं-चित्तशुद्धिः-ज्ञानप्राप्तिः-बाधकसंस्कारनिवृत्तिरिति। भक्तेः पूर्वावस्था साधनावस्था। यथा साधनावस्थायां कर्म करणीयं तथैव भक्तियोगात् परमपि कर्म कर्त्तव्यम्। अद्वैतमते कर्मसन्न्यासः मुमुक्षोः कृते उपदिष्टः तदत्र नाङ्गीक्रियते। श्रुत्युपदिष्टं नित्यं कर्म आचरणीयमेव अन्यथा प्रत्यवायो भवति। परन्तु निष्कामकर्म आचरणीयम् इत्यत्रैव तात्पर्यम्।

### १०.१. कर्मयोगप्रक्रिया

आदौ अध्ययनविधिः। "अष्टवर्षं ब्राह्मणम् उपानयीत तमध्यापयेत्" इति। वेदाध्ययनकालविषये मनुना उक्तं-

"श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि।
युक्तश्चन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान्॥"[3] इति।

अध्ययनं कथं भवतीतिचेदुच्यते "आचार्योच्चारणानुच्चारणरूपम् अक्षरराशिग्रहणफलम् अध्ययनम्"[4] इति। अध्ययनेन आपाततःअर्थग्रहणं भवति। अर्थनिर्णयार्थं तदा श्रवणे प्रवृत्तिः। सद्गुरुं प्रपन्नः मुमुक्षुः प्रयोजनभूतमर्थं युक्तितःनिर्णयति। तदा पुनः मनने प्रवृत्तिः। एवम् आचार्यमुखात् जीवात्मपरमात्मनोः स्वरूपं यथायथमवधाय यदा

1 मुण्डकोपनिषत् ३-२-४

2 यतीन्द्रमतदीपिका, पृष्ठसंख्या १३६

3 मनुस्मृतिः ४-९५

4 श्रीभाष्यम् १-१-१

वेदविहितं कर्म भगवत्प्रसादार्थं फलाभिसन्धिवर्जिततया अनुष्ठीयते तदा सः कर्मयोगः। निषिद्धं वेदविहितं कर्म नानुष्ठेयम्। काम्यं कर्मापि भगवत्प्रसादार्थम् एवानुष्ठातव्यम्। सन्ध्यावन्दनादिकं नित्यं कर्म जातकर्मेष्ट्यादिकं नैमित्तिकं कर्मापि अनुष्ठेयम्। देवतार्चनादिकं सर्वमपि कर्मयोगान्तर्भूतम्। कर्मयोगेन पापप्रणाशो भवति। तदा अधिकारिहृदये ज्ञानयोगोदयो भवति। अनन्तरं साधकचेतसि भक्तियोगः उदेति। ज्ञानयोगो नाम कर्मयोगात् निर्मलान्तःकरणस्य ईश्वरशेषत्वेन प्रकृतिवियुक्तस्वात्मचिन्ताविशेषः इति। तस्य साक्षाद् भक्त्युपयोगः। परमात्मशेषत्वम् जीवात्मनः स्वरूपम्। कर्मणि कर्तृत्वाभिमानत्यागः ज्ञानिनः। कर्मफलस्य ब्रह्मार्पणं भक्तस्यैव। विवेकज्ञानं च आत्मनः शरीरात्मभिन्नत्वम्। लक्ष्यं न आत्मज्ञानमपि तु ब्रह्मज्ञानमेव।

## ११. श्रीमच्छङ्कराचार्यमते ज्ञानमेव मोक्षसाधनम्

अज्ञानम् अनर्थहेतुः। अनर्थःकर्तृत्वभोक्तृत्वप्रमुखोऽयं प्रपञ्चः। जीवब्रह्मात्मैक्यज्ञानेन सर्वानर्थप्रहाणं नाम मोक्षो भवति। तस्माद् आत्मज्ञानमेव मोक्षप्रवर्तकम्। ज्ञाननिष्ठाप्राप्तिरेव साध्यभूता। उपायौ चात्र कर्मयोगभक्तियोगौ। तत्र कर्मयोगः कर्मसु अनासक्तिरेव। फलाभिसन्धिवर्जिततया क्रियमाणं कर्मैव कर्मयोगः। "योगः कर्मसु कौशलम्" इत्युक्तं भगवता। ईश्वरार्पणबुद्धिर्हि ईश्वर एव क्रियमाणस्य कर्मणः तत्फलस्य च भोक्ता इति। भक्तियोगोऽपि सरलः पन्थाः। भक्त्या तुष्टः जनार्दनः। भक्त्या माम् अभिजानातिइत्युक्तं भगवता। अनन्यसमाधिर्हि भक्तिः। बाह्यविषयासक्तचेतसः आत्माभिमुखीकरणमेव समाधानं समाधिः। अनेन ज्ञानप्राप्तिः, क्रममुक्तिश्च फलम्।

## उपसंहृतिः

भगवत्तत्त्वसाक्षात्कार एव मोक्षः। स च साधनसापेक्षः। भक्तिः प्रपत्तिश्च मोक्षोपाय इतिरामानुजमतम्। मुक्तौ भक्तेः प्रपत्तेश्च कथमुपयोगः तद्विषये आलोचितम् अस्मिन् प्रबन्धे। शाङ्कराद्वैततत्त्वमपि सिद्धान्तवद् अवलोकितम्। एवञ्च, नित्यनिरतिशयानन्दप्रदं भगवत्तत्त्वसाक्षात्कारलक्षणं परमतत्त्वं सर्वजन्तुभिः सततं काम्यते। तदभिलषिततत्त्वतत्प्राप्त्युपायभूतसाधनानि निरूपयन् निखिलभक्तमानसे स्थितस्य बन्धकारणीभूताज्ञानस्य समूलोत्पाटने पटव इमे सनातनवैदिकधर्मप्रतिष्ठापकाः युगाचार्या इतिशिवम्।

## अवलोकितग्रन्थतालिका[1]

१. आचार्यः, शङ्करः, "ब्रह्मसूत्रशाङ्करभाष्यम्", आचार्य, शास्त्री, जगदीश, (सम्पादकः), मोतीलाल बनारसीदास, दिल्ली, २०१८।

२. आचार्यः, शङ्करः, "विवेकचूडामणिः", गीताप्रेस, गोरखपुर।

३. महादेशिकः, श्रीनिवासपाट्टरार्यः, "श्रीरामानुजमतसंग्रहः", वलयपट्टै, नावल्पाक्कं, (सम्पादकः), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, वि.सं. २०५०।

---

1 आश्रितग्रन्थावलौ एम्. एल्. ए पद्धतिः आश्रिता। तद्यथा- (आचार्यः, शङ्करः, "ब्रह्मसूत्रशाङ्करभाष्यम्", आचार्य, शास्त्री, जगदीश, (सम्पादकः), मोतीलाल बनारसीदास, दिल्ली, २०१८।) तत्रायं क्रमः ग्रन्थकृन्नाम, ग्रन्थनाम, भागः, सम्पादकनाम, संस्करणम्, प्रकाशनवर्षम्।

 ISSN: 2320-740X

४. आचार्यः, रामानुजः, "वेदार्थसंग्रहः", पण्डितः, शुक्लः, श्रीरामवदनः, (सम्पादकः), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९१।

५. आचार्यः, श्रीनिवासः, "यतीन्द्रमतदीपिका", आचार्य, द्विवेदी, शिवप्रसाद, (सम्पादकः), चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००९।

६. आचार्यः, सायणः, "सर्वदर्शनसंग्रहः", Mainkar, T.G, (प्रकाशकः), भाण्डारकरप्राच्यविद्यासंशोधनमन्दिराधिकारी, १९७६।

७. अयाचितः, शन्तनुः, "ब्रह्मसूत्रसमीक्षा", (चतुःसूत्र्यन्तभागस्य) , आचार्यः, वरखेडी, श्रीनिवासः, (सम्पादकः), कविकुलगुरु कालिदास संस्कृतविश्वविद्यालयः, रामटेकम्, जि नागपुरम् तथा न्यू भारतीय बुक कार्पोरेशन, नव देहली, २०२०।

८. "श्रीमद्भगवद्गीता" (शाङ्करभाष्याद्येकादशटीकोपेता, द्वितीयो भागः), शास्त्री, गजानन शम्भु साधले, (प्रकाशकः), परिमल पब्लिकेशन्स, दिल्ली २०१०।

९. श्रीमान्, देशिकः, वेङ्कटनाथः, "तत्त्वमुक्ताकलापः" (व्याख्यात्रयोपेतः), आचार्यः, डा. ना. रा., श्रीकृष्णवल्लभः, (सम्पादकः), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९०।

१०.आचार्यः, रामानुजः, "श्रीभाष्यम्", चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २००२।

११."संस्कृत वाङ्मय का बृहद् इतिहास" (दशमः खण्डः), पद्मभूषणः, आचार्यः, श्री बलदेवः, उपाध्यायः, (सम्पादकः), उत्तरप्रदेश संस्कृत संस्थान, लखनऊ, वि.सं. २०५२।

१२."मन्त्रपुष्पम्", स्वामी सर्वलोकानन्दः, (प्रकाशकः), रामकृष्ण मठ, खार, मुम्बई, २०१४।

*******

# न्यायनये संशयस्वरूपविमर्शः

**श्रीशशांकशेखरपात्रः**
सहायकाध्यापकः, संस्कृतविभागः,
विद्यासागरविश्वविद्यालयस्य दूरशिक्षाविभागः

**शोधसारः** - दर्शनशास्त्रस्य मूललक्ष्यं खलु मोक्षप्राप्तिः। न्यायदर्शनेऽपि तस्य व्यत्ययो न भवति। मोक्षलाभार्थंमात्मादीनां द्वादशप्रमेयानामुपादेयत्वं प्रतिपादितम्। परन्तु द्वादशविधेषु प्रमेयेष्वात्मज्ञानं मोक्षसाधनत्वेन सुव्यवस्थितम्। यद्यपि वेदोपनिषदादिषु शास्त्रेषु परमपुरुषार्थरूपमोक्षलाभार्थंमात्मसाक्षात्कारः परमकर्तव्यतया सम्यगुपदिष्टस्तथापि तदपेक्षायाः न्यायशास्त्रे आत्मविद्याप्रतिपादितत्वादपि संशयादिभिः पृथक्प्रस्थानैः तस्य केवला अध्यात्मविद्या इत्याख्या निरस्ता जाता। न्यायदर्शने न्यायशब्दविवेचनं महत्वपूर्णं भवति। नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेतिन्यायः। प्रमाणैः प्रत्यक्षानुमानोपमानशब्दप्रमाणैः वस्तुनः यथार्थतत्त्वं परीक्ष्यणं खलु न्यायः। न्यायेन वस्तुनः यथार्थतत्त्वनिर्णयार्थं विचारकार्यं संघटते। वस्तुतस्तु सन्दिग्धविषये एव स्वमतप्रतिपादनाय दार्शनिकाः परस्परयोः मध्ये विचारकार्यं संघटते। प्रयोजनवशतःसन्दिग्धविषये तत्त्वनिर्णयार्थं न्यायः प्रवर्त्तते। अतःसंशयः खलु विचारस्य जननी इतिकथ्यते। अपि च संशयः खलु न्यायप्रवृत्तेः पूर्वाङ्गो भवति। महर्षिगौतमेन प्रणीते न्यायसूत्रस्यादिमसूत्रे षोडशपदार्थानां नामोद्देशे संशयः खलु तृतीयपदार्थः। कस्मिंश्चिद्वस्तुनि किं स्विदित्याकारकं निश्चयाभावरूपज्ञानं खलु संशयः। निश्चयज्ञानाभावात्संशयो यथार्थज्ञानं न भवति। समानधर्म-अनेकधर्म-विप्रतिपत्ति-उपलब्ध्यव्यवस्था-अनुपलब्धव्यवस्थादिभिः पञ्चभिः कारणैः संशयः समुत्पद्यते। संशयः खलु यथा आलोकनिरपेक्षे पुरोवर्तिनि कस्मिञ्चिद्धर्मिण्ययं स्थाणुः पुरुषो वेतिज्ञाने स्थानुपुरुषसाधारणोर्द्धतादिदर्शनात्तद्विशेषस्य धर्मिणि वा वक्रकोटरशिरःपाण्यादीनां धर्माणां साधनप्रमाणाभावात्स्थानुत्वपुरुषत्वोभयकोटिकद्वयं ज्ञानं खलु संशयः। निबन्धेऽस्मिन्सूत्रकारादारभ्य उदयनाचार्यानां नैयायिकानां संशयविषये मतं विश्लिष्य **न्यायनये संशयस्वरूपविमर्शः** इतिशीर्षको यथामतिः समुपस्थाप्यते।

***मूलपदानि*** *पदार्थः, संशयः,विमर्शः, समानधर्मः, उपपत्तिः, अनेकधर्मः, विप्रतिपत्तिःइत्यादीनि*

**उपोद्घातः**'दृशिर्-प्रेक्षणे'(भ्वा.१०५७) इतिप्रेक्षणार्थक-दृश्-धातोः दृश्यतेऽनेनेति'करणाधिकरणयोश्च'(पा.सू.३.३.११७) इतिसूत्रेण करणवाच्ये 'ल्युट् च' (३.३.११५) इतिसूत्रेण ल्युटि दर्शनशब्दो निष्पद्यते। यथार्थरूपेण वस्तुनः तत्त्वज्ञानं येन दृश्यते ज्ञायते वा तद्दर्शनम्। भारतीयदर्शनं द्विविधमास्तिकदर्शनं नास्तिकदर्शनञ्चेति। पाणिनीयसूत्रानुसारं "अस्ति

 ISSN: 2320-740X

नास्ति दृष्टं मति(पा.सू.४.४.६०)"इत्यनेन अस्तीतिशब्दात्ठकि आस्तिकः, नास्तीतिशब्दात्ठकि नास्तिकः।[1] स्मृतिकारमनुमते

"योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः।
स साधुभिर्वहिष्कार्यो नास्तिको वेदनिन्दकः॥[2]

एतेन स्पष्टं भवतियद्वेदप्रामाण्यमस्तीतिमतिर्यस्य स आस्तिकः, वेदप्रामाण्यं नास्तीतिमतिर्यस्य स नास्तिकः। अर्थाद्यानि दर्शनानि वेदप्रामाण्यं स्वीकुर्वन्ति तान्यास्तिकदर्शनानि, यानि न स्वीकुर्वन्ति तानि नास्तिकदर्शनानि। आस्तिकदर्शनं खलु न्यायवैशेषिकसांख्ययोगपूर्वमीमांसोत्तरमीमांसाभेदेन षड्विधं भवन्ति। नास्तिकदर्शनं चार्वाकबौद्धजैनभेदेन त्रिविधम्। षडास्तिकदर्शनेषु न्यायदर्शनमन्यतमम्।

न्यायदर्शने सूत्रकारेण षोडशपदार्थाः कथिताः। तेषु प्रमाणप्रमेययोः अनन्तरं संशयः कथितः।[3] न्यायनये संशयस्य समधिकं महत्वं वर्त्तते। भाष्यकारेण एका शङ्का प्रस्तुता यत् षोडशपदार्थेषु प्रमाणप्रमेये विना संशयादिनां चतुर्दशपदार्थानां यदि स्वरूपं विचार्यते तर्हि तेषां प्रमाणप्रमेययोः मध्येऽन्तर्भावत्वं परिलक्ष्यते तथापि तेषां कथं पृथक् विवेचनं कृतमित्याकाङ्क्षायां समाधानं यज्जगतःकल्याणार्थं एते पृथग्भावेन विविच्यन्ते। जगतिचतस्रः विद्याः वर्तन्ते त्रयीविद्या, वार्त्ताविद्या, दण्डनीतिविद्या, आन्वीक्षिकी न्यायविद्या वा। एतासु विद्यासु न्यायविद्यायाः अध्यात्मविद्यानिरसने पृथक्प्रस्थानत्वेन व्यापारत्वेन वा संशयादयः पदार्थाः स्वतन्त्रभावेन कथिताः। संशयादिषु पदार्थेषु संशयस्य लक्षणस्वरूपविभागाः इत्येते विषयाः **न्यायनये संशयस्वरूपविमर्शः** इतिशीर्षको यथामतिः समुपस्थाप्यते।

न्यायनये संशयस्त्वयथार्थज्ञानम्। ज्ञानकारणात्तस्य यद्यपि बुद्धिनामप्रमेयेऽन्तभावत्वं जातं तथापि तस्य विशेषो वर्तते।[4] विशेषः खलु संशयमधिकृत्य न्यायः प्रवर्तते।[5] प्रत्यक्षानुमानोपमानशब्दप्रमाणैः वस्तुनः यथार्थतत्त्वं परीक्षणं खलु न्यायः।[6] वार्त्तिककारेण 'प्रमाणैः' इतिपदेन प्रतिज्ञादय अवयवाः स्वीकृताः। प्रतिज्ञादिपञ्चावयववाक्यैः तत्त्वं विचार्यतेऽतो न्यायवाक्यं परमन्यायः।[7] अनेन दार्शनिकाः कथायां प्रवृत्ताः भवन्ति, तत्त्वनिरूपणं कुर्वन्ति च। यथा कश्चिद्वह्न्यर्थी वह्निः कुत्र भवितुमर्हतिन जानातितदर्थं विचारे प्रवृत्तो भवतिपर्वते महानसे वा कुत्र भविष्यति। तत्र पर्वते

---

1 Although grammatically and popularly the two words nāstika and āstika have different meanings of their own, with reference to the most wellknown and widely accepted ciassification in the system of Indian Philosophy. Gangopadhyaya, M.K, Philosophy in India, vol.3, Bangalore, 1990, pp. 13-17.

2 म.स. २.११।

3 प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः। न्या.सू.१.१.१।

4 स चायं किंस्विदिति वस्तुविमर्शमात्रमनवधारणं ज्ञानं संशयः, प्रमेयेऽन्तर्भवन्नेवमर्थं पृथगुच्यते।

5 तत्र नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते। किं तर्हि संशयितर्थे।

6 कः पुनरयं न्यायः ? प्रमाणैरर्थपरीक्षणं न्यायः"। न्या.भा.१.१.१।

7 सोऽयं विप्रतिपन्नपुरुषप्रतिपादकत्वात्परमो न्यायः। न्या.वा.१.१.१।

धूमं दृष्ट्वा धूमस्य वह्निव्याप्यत्वात्वह्न्यनुमितिर्भवति। यदि वह्न्यर्थिनः पर्वतो वह्निमानित्येतादृशं ज्ञानं पूर्वं वर्तते तर्ह्यनुमानस्य नास्ति किमपि प्रयोजनम्। अपि चानुपलब्धिबिषयेऽपि प्रवृत्त्यभावो वर्तते। यथा शशशृङ्गं कोमलं कठिनं वा तस्य दर्शनाभावात्। इत्थं संशयेन एकाधिककोटी वर्तते। तैः प्रवर्तिते विचारेऽन्तिमे तत्त्वनिर्णयो भवत्यतःसंशयः खलु न्यायप्रवृत्तेः पूर्वाङ्गो भवति।

'लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति' नियमात्सूत्रकारः संशयस्य लक्षणकारणविभागबोधकं सूत्रं वदति'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशोपेक्षो विमर्शः संशयः।'[1] सूत्रे संशयस्तु लक्ष्यपदम्, विशेषापेक्षो विमर्शः चेतिपदद्वयं लक्षणबोधम्, अवशिष्टानि पदानि संशयकारणानि। विमर्श इतिपदे वि इत्युपसर्गः विरोधः, यथा संवादं यथार्थज्ञानम्, विसंवादमयथार्थज्ञानम्। मृश्-धातोः निष्पन्नस्य मर्शशब्दार्थःज्ञानम्। विमर्शः खलु विरुद्धज्ञानम्। द्वयोः धर्मयोः मध्ये विरोधो भवति। अत्र एकस्मिन् धर्मिणि इतिपदं योजनीयम्। एकस्मिन् धर्मिणि विशेष्ये विरुद्धनानाधर्मसम्बन्धयुक्तविषयाणां ज्ञानं खलु संशयः। यथा आलोकनिरपेक्षे पुरोवर्तिनि कस्मिञ्चिद्धर्मिण्ययं स्थाणुः पुरुषो वेतिज्ञाने स्थाणुपुरुषसाधारणोर्द्धतादिदर्शनात्तद्विशेषस्य धर्मिणि वा वक्रकोटरशिरःपाण्यादीनां धर्माणां साधनप्रमाणाभावात्स्थानुत्वपुरुषत्वोभयकोटिकद्वयं ज्ञानं खलु संशयः।

संशयज्ञानोत्पत्त्यां विशेषापेक्षो वर्तते। अर्थात्संशयजनने ज्ञातुः यौ उभे कोटिधर्मौ भासमानौ भवतस्तयोः विशेषधर्मस्य स्मरणमावश्यकं न तु प्रत्यक्षम्। यथा स्थानुरूपधर्मिणः वक्रकोटरशिरःपाण्यादयः विशेषधर्माः। पुरुषस्य करचरणादयः विशेषधर्माः। संशयकर्तुः संशयकाले विशेषधर्माणां प्रत्यक्षाभावे स्मरणज्ञानेन संशयो जायते नोचेत्प्रत्यक्षेण नास्ति कोऽपि संशयावसरः।

सूत्रकारमते समानधर्म-अनेकधर्म-विप्रतिपत्ति-उपलब्ध्यव्यवस्था-अनुपलब्धव्यवस्थादिभिः पञ्चभिः कारणैः संशयः समुत्पद्यते। अतःखलु संशयस्तु पञ्चविधाः। सूत्रे समानानेकधर्मोपपत्तेः इतिपदे समानधर्मश्चानेकधर्मश्चेतिविग्रहे इतरेतरद्वन्द्वे समानानेकधर्मौ, तयोः उपपत्तिःइतिविग्रहे षष्ठीतत्पुरुषे समानानेकधर्मोपपत्तिः, तस्मात् पञ्चमीतत्पुरुषे समानानेकधर्मोपपत्तेः। उपपत्तिःशब्दार्थःज्ञानम्। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते नियमात् समानधर्मोपपत्तेः अनेकधर्मोपपत्तेश्च। सूत्रे उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च इतिपदे उपलब्धिश्चानुपलब्धिश्चेतिविग्रहे इतरेतरद्वन्द्वे उपलब्ध्यनुपलब्धी, तयोः अववस्था इतिविग्रहे षष्ठीतत्पुरुषे उपलब्ध्यनुपलब्ध्यव्यवस्था। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते नियमादुपलब्ध्यव्यवस्था अनुपलब्ध्यव्यवस्था च।

प्रथमतःसमानधर्मोपपत्तिजन्यः संशयः। भाष्यकारमते समानः धर्मः इतिविग्रहे कर्मधारये समानधर्मः, तस्य उपपत्तिःइतिविग्रहे षष्ठीतत्पुरुषे समानधर्मोपपत्तिः। तस्य 'स्थानुपुरुषयोः समानं धर्ममारोहपरिणाहौ पश्यन्' इतिवचनेन परपदार्थप्रधानः कर्मधारयः बोध्यः। उद्द्योतकरमते समानः धर्मः यस्य स इतिविग्रहे बहुव्रीहौ समानधर्मः। अर्थात्समानधर्मविशिष्टस्य धर्मिण्यः ज्ञानाज्जन्यः संशयः। प्रमाणं साधारणधर्मबद्धर्मिज्ञानजन्यः इतिपदम्। कर्मधारये

1 न्या.सू.१.१.२३।

साधारणधर्मज्ञानजन्यः इतिव्यवहारभावात्। संशयोऽयं यथा आलोकाभावे पुरोवर्तिनि कस्मिंश्चिद्धर्मिणि स्थाणुपुरुषसाधारणोर्द्धतादिदर्शनात्स्थानुपुरुषयोर्मध्ये भेदाग्रहाभावे समानमनयोधर्ममुपलभे विशेषमन्यतरस्य इत्याकारकबुद्ध्या अयं स्थाणुर्वा पुरुषो वेतिज्ञानम्।

द्वितीयतःअनेकधर्मोपपत्तिजन्यः संशयः । अनेकधर्मस्य नामान्तरमसाधारणधर्मः। केचन वदन्ति अनेकस्य अनेकश्च धर्म अनेकधर्मः। अनेकस्य धर्म इत्युक्ते एकस्य अनेकवृत्तित्वमर्थाद्द्रव्यगुणकर्मणां संयोगजन्यत्वरूपधर्मः। अनेकश्च धर्म इत्युक्तेऽनेकधर्मस्य एकवृत्तित्वमर्थाच्छब्दस्य संयोगजन्यत्वधर्मः, विभागजन्यधर्मः, शब्दजजन्यधर्मः। समानधर्मोपपत्तिजन्येन संशयेन अनेकधर्मजन्यः संशय इत्यर्थ ज्ञायते। अत उद्द्योतकरमते द्वितीयव्याख्यानं समीचीनम्।[1] यतो ह्यनेकधर्मः अनेकस्माद्विशेषो विशेषको धर्म इतिकारणादसाधारणधर्मः।[2] अपि च तात्पर्यटीकायां एकानेकयोः उभययोः हेतुभूतधर्मः अनेकधर्मः। एकः शब्दार्थःअभिन्नः। अनेकशब्दार्थःभिन्नः। भेदाभेदयोः प्रत्ययहेतुरप्यनेकधर्मः। विभागजन्यत्वधर्मः शब्दसमूहानामभेदप्रत्ययहेतुः, शब्देतरेभ्यः भेदप्रत्ययहेतुश्च वर्तते।[3] यथा शब्दस्यासाधारणधर्मः खलु विभागजन्यत्वम्। यथा एकस्य वंशदण्डस्य भेदेन विभागेन जन्यः शब्दःविभागजो भवति। धर्मोऽयं शब्दं विना शब्देतरे नास्त्यतःविभागजन्यत्वमसाधारणधर्मः शब्दस्य। अपि च शब्दःएकः गुणः। अपि च शब्दरूपद्रव्यं शब्दरूपकर्म विभागजन्यं भवितुमर्हतीत्याकाङ्क्षायां शब्दो द्रव्यं वा गुणो वा कर्म वेतिसंशये विभागजन्यत्वरूपधर्मः सजातीयेभ्यः विजातीयेभ्यः शब्दं न व्यावर्त्तयति। यतो हि धर्मोऽयं केवलं शब्दे वर्तते न तु तद्भिन्ने।

तृतीयतःविप्रतिपत्तिजन्यः संशयः। एकस्मिन् पदार्थे विरुद्धज्ञानाज्जन्यः संशयः। विरुद्धा प्रतिपत्तिःज्ञानं यस्माद्विप्रतिपत्तिरितिबहुव्रीहिः। तस्मात् पञ्चमीतत्पुरुषे विप्रतिपत्तेः विरुद्धज्ञानजनकशब्दादित्यर्थः। परस्परविरुद्धज्ञानादपि संशयो जायते।[4] यथा केचन वदन्ति आत्मा अस्ति, केचन वदन्ति आत्मा नास्ति। अत्र आत्माविषये एतादृशास्तित्वनास्तित्वविरुद्धज्ञानात्संशयो जायते। विरुद्धज्ञानप्रतिपादकं संशयवाक्यमेकं भवतिन तु द्विविधम्। यथा आत्मा नित्यो न वेति।

चतुर्थतःउपलब्ध्यव्यवस्थाजन्यः संशयः। उपलब्धिशब्दार्थःज्ञानम्। अव्यवस्थाशब्दार्थःअनियमः। प्रत्यक्षेणानियमवशतःस्शयोऽयं जायते। जलह्रदे जलं सद्रूपेण प्रत्यक्षं भवति। मरीचिकायां जलाभावःप्रत्यक्षं भवति।

---

1 अनेकस्यानेकधर्मश्च धर्म इति केचित्,..तदयुक्तम्, समानधर्मोपपत्तेरित्यत्र चरितार्थत्वात्। समानधर्मोपपत्तेरित्यनेनैव यश्चैकोऽनेकवृत्तिः यश्चानेक एकवृत्तिः स लभ्यत इति चरितार्थत्वात्। न पुनरनेकधर्माभिधानेन प्रयोजनमस्तीति। न्या.वा.१.२.२३।

2 समानासमानजातीयविशेषकत्वात् समानजातीयमसमानजातीयं चानेकं तस्माद्विशेषो विशेषको धर्म अनेकस्माद्विशेषोनेकधर्म इति। तदेव

3 प्रकारान्तरेणानेकधर्मपदं व्याचष्टे एकानेकेति। एकं चानेकञ्च तदुभयमनेकं तदेतस्यानेकस्य प्रत्ययहेतुर्धर्मोऽनेकधर्मः भेदाभेदप्रत्ययहेतुरित्यर्थः। न्या.वा.१.२.२३।

4 व्याहतमेकार्थदर्शनं विप्रतिपत्तिः। व्याघातो विरोधोऽसहभाव इति। अस्त्यात्मेत्येकं दर्शनम्, नास्त्यात्मेत्यपरम्। न च सद्भावासद्भावौ सहैकत्र सम्भवतः। न चान्यतरसाधको हेतुरूपलभ्यते। तत्र तत्त्वानवधारणं संशय इति। न्या.भा

भावाभावयोः ज्ञानवशतःअन्यत्र जलं दृष्ट्वा पुरो दृश्यमानं सलिलमिदं सदुत असदितिसंशयो भवति।[1] अनेन संशयेन प्रामाण्यसंशयो बोध्यते।

पञ्चमतःअनुपलब्ध्यव्यवस्थाजन्यः संशयः। यस्य सतःकदापि उपलब्धिः न भवति। यथा भूगर्भस्थस्य मूलकीलकादयः। अपि च विनष्टस्यापि उपलब्धिर्न भवति।[2] अनेन संशयेन भ्रमज्ञानं बोध्यम्।

न्यायमते आलोकाभावे एकस्मिन् स्थाणौ स्थाणुपुरुषयोः उच्चतादिसमानधर्मत्वादयं स्थाणुर्वा संशयो जायते। पूर्वपक्षिणा वक्तव्यं यत्समानधर्मत्वादयं संशयः न जायते। यावत्तस्य धर्मस्य निश्चयज्ञानं न भवतितावत्पर्यन्तं संशयो न जायते। यतो हि स्थाणुपुरुषयोः समानधर्माणां विद्यमाने सतिसदैव संशयो न जायते। यदा पथिकः धर्ममिमं पश्यतितदा संशयो भवति।

द्वितीयतःयः स्थाणुपुरुषयोः समानधर्मं पश्यतिस धर्मिणमपि पश्यति। यतो हि धर्मिणः प्रत्यक्षाभावे धर्मस्य प्रत्यक्षं न भवति। एतर्हि यदि स्थाणुपुरुषौ धर्मिणौ पश्यतस्तर्हि तयोः समानधर्मस्य प्रत्यक्षात्संशयो न जायते।

तृतीयतःस्थानुपुरुषयोः समानधर्मः भिन्नो भवति। समानधर्मस्य निश्चयो भवतिपरन्तु स्थाणुपुरुषयोः संशयो भवतीतिकथनमसङ्गतम्। अर्थादेकस्य पदार्थस्य निश्चयः अपरस्य पदार्थस्य संशयः इतिवक्तव्यस्याप्रामाण्यात्स्थाणुपुरुषयोः समानधर्मस्य निश्चयाद्धर्मिण्योः स्थाणुपुरुषयोः संशयो न भवति।

चतुर्थतःसमानधर्मस्य निश्चयात्संशयो न जायते। यतो हि संशयः खल्वनिश्चयात्मकज्ञानम्। निश्चयात्मकज्ञानं तस्य कारणं न भवितुमर्हति। कार्यं सदैव कारणानुरूपं भवति। अतःनिश्चयस्य कार्यमनिश्चयं न भवति।

पञ्चमतःसंशये विषयः धर्मी भवति। तेषु कस्यचिदेकस्य धर्मस्य निश्चयः संशयं जनयतीत्यपि वक्तुं न शक्यते। यतो ह्येकतरस्य धर्मिणः धर्मनिश्चयेन तस्मिन् धर्मिणि संशयो न जायते। कारणं निश्चयः खलु संशयप्रतिबन्धकः। अतःनास्ति कोऽपि संशयावसरः।

उपर्युपरि कथिताः शङ्काः यद्यपि समानधर्मोपपत्तिजन्यसंशये परिलक्षितास्तथापि अनेकधर्मोपपत्तिजन्यसंशयेऽपि समभावेन प्रयुक्ताः भवन्ति।

प्रथमतःअसाधारणधर्मस्य निश्चयाभावात्तस्य विद्यमाने सतिसंशयो न जायते।

द्वितीयतःअसाधारणधर्मस्य निश्चयेन संशयो न जायते। धर्मस्य निश्चयेन धर्मिणः निश्चयो भवति। एतर्हि धर्मिणि नास्ति कोऽपि संशयावसरः।

---

1 सच्चोदकमुपलभ्यते तडागादिषु मरीचिषु चाविद्यमानमुदकमिति। अतः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यते, अथासदिति संशयो भवति। न्या.भा

2 सच्च नोपलभ्यते मूलकीलकोदकादि असच्चानुत्पन्नं निरुद्धं वा, ततः क्वचिदनुपलभ्यमाने किं सन्नोपलभ्यत उतासदिति संशयो भवति। न्या.भा

 ISSN: 2320-740X

तृतीयतःअसाधारणधर्मस्य निश्चयात्तेन धर्मेण भिन्ने धर्मिणि संशयो न जायते। एकस्य पदार्थस्य निश्चयादन्यस्य पदार्थस्य संशयो न भवति।

चतुर्थतःअसाधारणधर्मस्य निश्चयज्ञानादनिश्चयात्मकज्ञानरूपसंशयो नोत्पद्यते। कार्यं कारणानुरूपं भवति। अतःअनिश्चयात्मकं ज्ञानं कदापि निश्चयात्मकज्ञानस्य कार्यं न भवति।

विप्रतिपत्तिजन्यसंशये पूर्वपक्षिणः वदन्ति विप्रतिवाक्यं कदापि संशयकारणं न भवति। एकस्मिन् पदार्थे परस्परं विरुद्धवचनं हि विप्रतिपत्तिः। यथा वादी वदतिआत्मा अस्ति, प्रतिवादी वदतिआत्मा नास्ति। मध्यस्थस्य द्वयोर्मध्ये एकतरस्य निश्चयाभावात्संशयो भवतिआत्मास्ति नास्ति वेति। यस्य विप्रतिपत्तिवाक्यस्य ज्ञानं नास्ति तस्य संशयो न भवति। यदि विप्रतिपत्तिवाक्यं संशयकारणं भवेत्तर्हि अज्ञस्यापि संशयो भवितुमर्हति। परन्तु तन्न भवति।

उपलब्ध्यव्यवस्थातःजाते संशये अनुपलब्ध्यव्यवस्थातःजाते संशये च यः अज्ञः न जानातिएतादृशीमवस्थां स सन्दिहानो न भवतिपरन्तु यो जानातिस वस्तुनः अस्तित्वनास्तित्वे सन्दिहानो भवति। अव्यवस्थेयं ज्ञातसत्कारणं न तु स्वरूपसत्कारणम्। परन्तु सूत्रकारः स्वरूपसत्कारण वदतितन्न समीचीनम्।

यदि सिद्धान्तिनो वदन्ति यद्वाक्यार्थबोधे तात्पर्यकारणं न तु शब्दव्यवहारः। यथा सैन्धवशब्दार्थःलवणमश्वश्च। भोजने सैन्धवमानय इत्यनेन लवणं बोध्यम्, युद्धे सैन्धवमानय इत्यनेन अश्वो बोध्यः। इत्थमव्यवस्था संशयकारणमितिवक्तव्यस्याशयः सामान्यतया अव्यवस्था यद्यपि स्वरूपसत्कारणं तथापि ज्ञातसत्कारणरूपेण विवक्षितम्। अतो न दोषोऽत्र।

पूर्वपक्षिणः वदन्ति तात्पर्यज्ञानेन यदि वाक्यबोधो भवतितर्हि विप्रतिपत्तिवाक्यार्थज्ञानं संशयकारणं भवितुं नार्हति। आत्मास्तीतिकथनेन आत्मनः अस्तित्वं प्रतिपन्नम्, आत्मा नास्तीतिकथनेन तस्य नास्तित्वं द्योतितम्। परन्त्वस्तित्वनास्तित्वयोः कथं संशयो  जायते? यथा आकाशशब्दश्रवणे श्रोता आकाशद्रव्यं जानातिन तु तस्य विभूत्वम्। अस्तीतिश्रवणे अस्तित्वम्, नास्तीतिश्रवणे नास्तित्वं बोध्यते न तु द्वयोः एकाधिकरण्यवृत्तित्वम्। अतःसंशयो न भवति।

अपि च पूर्वपक्षिणः वदन्ति समानधर्मोपपत्तिजन्यसंशये कदापि संशयस्य निवृत्तिर्न भवति। यतो हि धर्मिणि यदि समानधर्मः सदैव वर्तते चेत्तर्हि तेन धर्मेण कार्यं संशयोऽपि वर्तते। अतःसंशयस्य निवृत्तिःन भवति। प्रश्न उदेतिस्थाणुपुरुषयोः समानधर्माणामुच्चतादीनां निश्चयात्परं तेषां विद्यमानेऽपि संशयो कथं न भवतीत्याकाङ्क्षायामुच्यते यद्धर्मी सन्देहमानो भूत्वा ज्ञायते। अर्थात्तदा धर्मी समानधर्मशून्यो न भवतिपरन्तु समानधर्मविशिष्टोऽपि न भवति। धर्मी सदैव धर्मेण सह वर्ततेऽतःसंशयस्यास्यानिवृत्तिर्भवति।

नैयायिकमते समानधर्मस्य निश्चयः संशयकारणं न तु समानधर्मः। पूर्वपक्षिणां मतमेतत्सूत्रकारेण न ज्ञापितम्। तेन सूत्रे समानधर्मोपपत्तेः इतिपदं प्रयुक्तं न तु समानधर्मनिश्चयात्। उत्तरं यत्सूत्रे विशेषापेक्षो विमर्शः संशय इतिकथितः। विशेषापेक्षः खलु विशेषधर्मस्य जिज्ञासा। विशेषधर्मस्य निश्चयाभावाज्जिज्ञासा जाता। विशेषधर्मस्य ज्ञानात्परं जिज्ञासा न

वर्तते। अतःअर्थःखलु संशयोत्पत्तेः प्राक् विशेषधर्मोपलब्धिः न वर्तते परन्तु स्मृतिः वर्तते। अपि च विशेषधर्मोपलब्ध्यभावो वर्तते न तु सामान्यधर्मोपलब्ध्यभाव इतिसूत्राशयः। अतःसूत्रे विशेषधर्मापेक्ष उच्यते न तु समानधर्मापेक्षः।

**उपसंहृतिः** न्यायदर्शने विचारस्य जननी खलु संशयः। संशयनिरूपणे नैयायिकानां पूर्वपक्षिणामालोचनायां सुस्पष्टं यत्संशयस्य गुरुत्वं महत्वञ्च न्यायदर्शने समधिकं प्रशस्यते। संशयाभावे विचाराभावः, विचाराभावे तत्त्वनिर्णयाभावः, तत्त्वनिर्णयाभावे दर्शनस्य लक्ष्यसिद्धिर्न भवति।

**सहायकग्रन्थाः**

१. न्यायदर्शनम्, भाष्य-वार्त्तिक-तात्पर्यटीका-वृत्तिसहितञ्च; सम्पा. तारानाथतर्कतीर्थः, अमरेन्द्रमोहनतर्कतीर्थश्च, नवदेहली, मुन्सीराममनोहरलालपाब्लिशार्स्-प्राइभेट्-लिमिटेड्, २००३।

२. न्यायदर्शनम्, विश्वनाथवृत्तिसहितम्; सम्पा. चित्तनारायणपाठकः, वाराणसी, चौखम्बाविद्याभवनम्, २०२१ (प्रथमसंस्करणम्)।

५. न्यायदर्शनम्, न्यायभाष्यसहितमेवञ्च खद्योतभाष्यचन्द्रटीकाभ्यां सहितम्; सम्पा. महेशझा, वाराणसी, चौखम्बासंस्कृतसीरीजआफिस, २०१३ (प्रथमसंस्करणम्)।

६. न्यायदर्शनम्, न्यायभाष्यसहितमेवञ्च प्रसन्नपदव्याख्यासहितम्; सम्पा. द्वारिकादासशास्त्री, वाराणसी, बौद्धभारती, १९९८ (प्रथमसंस्करणम्)।

७. उदयनः, न्यायवार्त्तिकतात्पर्यपरिशुद्धिः; सम्पा. अनन्तलालठाकुरः, नवदेहली, भारतीयदार्शनिकानुसंधानपरिषत्प्रकाशिता, १९९६ (प्रथमसंस्करणम्)।

*******

 ISSN: 2320-740X

# फलविमर्शदृष्ट्या ज्योतिष-सामुद्रिकशास्त्रयोः सम्बन्धनिरूपणम्

**डॉ. उमाकान्ततिवारी**

सहायकाचार्यः (संविदा), मु.स्वा.पी., ज्योतिषम्,

केन्द्रीयसंस्कृतविश्वविद्यालयः, राजीवगान्धीपरिसरः, शृङ्गेरी

**मुख्यशब्दाः** - होरास्कन्धः, जातकस्कन्धः, सामुद्रिकशास्त्रम्, महापुरुषयोगः ताराग्रहः

**सारांशः -**

**कस्यचित् जातकस्य भाविफलविमर्शनस्य अनेके प्रकाराः विद्यन्ते । तेषु अन्यतमौ प्रसिद्ध-प्रकारौ जातक-सामुद्रिकौ वर्तेते । एतयोः फलविमर्शप्रकारयोः परस्परं कश्चन विशिष्टः सम्बन्धः वर्तते यथा - कस्यचित् जातकस्य जन्मकुण्डल्यां यादृशाः शुभाशुभाः ग्रहयोगाः भवन्ति तद्वदेव सम्बद्धानि एव सामुद्रिकचिह्नानि अपि उपलक्ष्यन्ते । कस्यचित् जनस्य सामुद्रिकचिह्नानि अवलोक्य जन्मकुण्डल्यां सम्बद्धग्रहयोगानां स्थितिरपि अवगन्तुं शक्यते । होराग्रन्थेषु विशेषरूपेण राजयोगानां महापुरुषयोगानां च वर्णनसन्दर्भे ग्रहयोगैः सह सम्बद्ध-सामुद्रिकलक्षणानां निर्देशः प्राप्यत एव ।**

**प्रस्तावना -**

मानवस्य स्वभावःअस्ति यत् सः स्वस्य भावि शुभाशुभं ज्ञातुम् इच्छत्येव । तदर्थं सः दैवज्ञप्रवराणाम् अन्वेषणं कुर्वन् तत्समीपं गच्छति। दैवज्ञस्तु ग्रहगणनानुगुणम् अथवा सामुद्रिकचिह्नानुगुणं फलं निर्दिशति। कदाचित् अशुभभाविनां निवारणार्थं शुभफलानां वर्धनार्थं च यथायोग्यम् उपायानपि निर्दिशति। ग्रहगणनाकुशलः दैवज्ञस्तु जातकस्य जन्मकुण्डल्यां ग्रहाणां स्थितिम् एवञ्च ग्रहदशाऽन्तर्दशाद्यवलोक्य जातकस्य भावि शुभाशुभं निर्दिशति। सामुद्रिकशास्त्री तु शारीरिकलक्षणानि दृष्ट्वा तस्य शुभाशुभं फलं निर्दिशति। फलकथनस्य यद्यपि अन्येऽपि बहवःप्रकाराः विद्यन्ते यथा प्रश्नकुण्डलीमाध्यमेन अभीष्टप्रश्नस्य समाधानं, रमलज्योतिषमाध्यमेन फलकथनं, स्वप्न-शकुनादीनाम् आधारेण फलविवेचनम्, टैरो-पत्राणाम् आधारेण फलकथनम् इत्याद्याः फलविमर्शनविधयः अद्यत्वे प्रचलिताः सन्ति । परन्तु विशेषरूपेण ज्योतिष-सामुद्रिकयोः आधारेण फलकथनस्य प्रकारः भारते पारम्परिकरूपेण सर्वत्र प्रसिद्धः ।

फलकथनस्य एतयोः द्वयोः प्रकारयोः (जातक-सामुद्रिकशास्त्रयोः) परस्परं कश्चन सम्बन्धोऽपि दृश्यते । तस्मादेव प्रायेण अधिकांशेषु होराग्रन्थेषु यथावसरं सामुद्रिकलक्षणानां विवेचनम् अपि प्राप्यते । अतःअस्मिन् प्रसङ्गे वयं ज्योतिषशास्त्रस्य होरास्कन्धे सामुद्रिकशास्त्रे च परस्परं कीदृशः सम्बन्धः दृश्यते इत्यस्मिन् विषये उपस्थापनं क्रियते ।

**निरूपणम् -**

ज्योतिषशास्त्रस्य होरास्कन्धः जातकानां शुभाशुभफलस्य निदर्शने साहाय्यं करोति। होरास्कन्धस्य प्रसिद्धे ग्रन्थे सारावल्यां होरास्कन्धस्य विषये निर्दिष्टं वर्तते यत् –

**विधात्रा लिखिता यासौ ललाटेऽक्षरमालिका ।**

**दैवज्ञस्तां पठेद्व्यक्तं होरानिर्मलचक्षुषा ।।**[1]

वराहमिहिरोऽपि निर्दिशति–

**होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात् ।**

**कर्मार्जितं पूर्वभवे सदादिः यत्तस्य पक्तिं समभिव्यनक्ति ।।**[2]

होरास्कन्धस्य अपरं नाम जातकस्कन्धः अपि अस्ति, यतो हि स्कन्धेऽस्मिन् कस्यचित् जातकस्य जन्मकालिकानां ग्रह-राश्यादीनां स्थितेः आधारेण तस्य जीवने सम्भाविनां शुभाशुभघटनानां ज्ञानं क्रियते ।

सामुद्रिकशास्त्रं वस्तुतःशारीरिकलक्षणविषयं शास्त्रं वर्तते । समुद्रेण ऋषिणा प्रोक्तत्वादेवेदं 'सामुद्रिकशास्त्रम्' इतिसंज्ञया प्रसिद्धम् । अस्य शास्त्रस्य आधारेण कस्यचिद् जनस्य शुभत्वाशुभत्वस्य ज्ञानार्थं तस्य शारीरिक-लक्षणानां परीक्षणं क्रियते । आचार्यः वराहमिहिरः बृहत्संहितायां निरूपयतियत् कस्यचित् जनस्य उन्मानादीनां त्रयोदश-शारीरिकलक्षणानां परीक्षणेन तस्य सर्वं यातमनागतञ्च फलं कथयितुं शक्यते इति-

**उन्मानमानगतिसंहतिसारवर्ण-**

**स्नेहस्वरप्रकृतिसत्त्वमनूकमादौ ।**

**क्षेत्रं मृजां च विधिवत् कुशलोऽवलोक्य**

**सामुद्रविद्वदतियातमनागतं च ।।**[3]

अर्थात् कस्यचित् जनस्य औन्नत्यम्, भारप्रमाणम्, गमनप्रकारम्, शारीरिकीं संहतिम्, सारम्, वर्णम्, शरीरावयवानां स्निग्धताम्, वाक्स्वरम्, शारीरिकृप्रकृतिम्, मानसिकप्रकृतिम् (सत्त्वम्), अनूकम् (मुखाकृतिं), हस्त-पादादीन् शारीरिकानवयवान्, भौतिकीं छायां च ज्ञात्वा तस्य भूतं भावि चावगन्तुं शक्यते ।

वयं चिन्तयामः यत् यदि कस्यचित् जनस्य शारीरिकं लक्षणं सामुद्रिकशास्त्रदृष्ट्या शुभं स्यात्तर्हि तस्य शुभं फलं भवति। एवञ्चेत्तस्य जन्मकुण्डल्यामपि ग्रह-राशिजन्याः शुभा योगाः स्युरेव, नो चेत् ज्योतिष-सामुद्रिकशास्त्रयोः कतमस्य अफलत्वं जायेत । परं न स्यादेवं द्वयोः आर्षप्रमाणत्वात् । अतःयदि कस्यचिज्जनस्य सामुद्रिकलक्षणानि शुभानि तर्हि तस्य जन्मकुण्डल्यां सम्बद्ध-ग्रहयोगाः दशादयोऽपि शुभा एव भवेयुः तथैव यदि कस्यचिज्जातकस्य जन्मकुण्डल्यां शुभफलद्योतकाः ग्रहयोगाः दशादिष्वपि शुभफलदायकाः स्युस्तर्हि तस्मिन् काले सम्बद्धानि शारीरिकलक्षणान्यपि शुभानि दृश्येयुरिति। एवमेव ग्रहयोगानामशुभत्वे अशुभानि शारीरिकलक्षणानि ज्ञातव्यानि । भावकुतूहलकारोऽपि विशेषरूपेण राजयोगोत्पन्नानां जातकानां सामुद्रिकचिह्नसन्दर्भे निर्दिशति–

1. सारावली, २/१

2. बृहज्जातकम्, १/३

3. बृहत्संहिता, ६७/१

 ISSN: 2320-740X

**जनने प्रबलो यस्य राजयोगो भवेद्यदि ।**

**करे वा चरणेऽवश्यं राजचिह्नं प्रजायते ।।**[1]

जातकाभरणेऽपि समानं मतं निर्दिष्टं वर्तते, तदेवम् –

**प्रसूतिकाले प्रबला यदा स्युर्नृपालयोगाः पुरुषस्य यस्य ।**

**सद्राजचिह्नानि पदे तदीये भवन्ति वा पाणितलेऽमलानि ।।**[2]

वस्तुतःहोराशास्त्रदृष्ट्या राशीनां स्वरूपमपि तद्राशिप्रभावितानां जातकानां स्वरूपस्य ज्ञानार्थमेव निर्दिष्टम्, तेन राश्याधारेण कालपुरुषस्य विभागः -

**शीर्षमुखबाहुहृदयोदराणि कटिबस्तिगुह्यसञ्ज्ञानि ।**

**ऊरू जानू जङ्घे चरणावितिराशयोऽजाद्याः ।।**[3]

इत्येतदपि शारीरिकलक्षणानां निर्देशने साहायकं भवति। एवञ्चेत् यदि जन्मकुण्डल्यां राशीनां तद्राशिगानां ग्रहाणां च स्थितिम् अवलोक्य तस्य शारीरिकस्थितीनां ज्ञानं कर्तुं शक्यते तर्हि शारीरिकं लक्षणं दृष्ट्वा जातकस्य ग्रह-राश्यादीनां स्थितेः विषयेऽपि अनुमानं कर्तुं शक्यते ।

सामुद्रिकशास्त्रिष्वन्यतमो हस्तरेखाविद् आचार्यः मेघविजयः स्वकीये हस्तसञ्जीवननामके ग्रन्थे निरूपयतियत् **'करतलं तु विधात्रा रचितं जन्मपत्रम् अस्ति'** इति। तद्यथा –

**अक्षया जन्मपत्री या ब्रह्मणा निर्मिता स्वयम् ।**

**ग्रहा रेखाप्रदा यस्यां यावज्जीवं व्यवस्थिता ॥**

**नास्ति हस्तात्परं ज्ञानं त्रैलोक्ये सचराचरे ।**

**यद्ब्राह्मं पुस्तकं हस्ते धृतबोधाय जन्मिनाम् ॥**[4]

हस्तसञ्जीवनाख्यस्य ग्रन्थस्य अष्टमेऽध्याये तु करतलावलोकनेन जातकस्य जन्मराशेः ज्ञानविधिरपि निर्दिष्टो वर्तते । तद्वदेव डॉ. सुरकान्तझावर्येण विरचितस्य अभिनवसामुद्रविज्ञान-नामधेयस्य ग्रन्थस्य चतुर्थेऽध्याये जन्मलक्षणाध्याये तु कस्यचित् जनस्य सामुद्रिकचिह्नानि अवलोक्य तस्य जन्मकालस्य निर्णयार्थं विस्तृताः विषयाः निरूपिताः वर्तन्ते ।

होराग्रन्थेषु अथवा संहिताग्रन्थेषु यत्र ज्योतिषदृष्ट्या पञ्चमहापुरुषाणां विवेचनं लभ्यते तत्र तु तेषां महापुरुषाणां ज्योतिषीययोगाः सामुद्रिकयोगाश्च युगपदेवोल्लिखिताः दृश्यन्ते । यथा बृहत्संहितायाः अष्टषष्टितमेऽध्याये -

**ताराग्रहैर्बलयुतैः स्वक्षेत्रस्वोच्चगैश्चतुष्टयगैः ।**

**पञ्च पुरुषाः प्रशस्ताः जायन्ते तानहं वक्ष्ये ॥**

---

1. भावकुतूहलम्, ८/१

2. जातकाभरणम्, राजयोगसङ्गतिसामुद्रिकाध्यायः / १

3. लघुजातकम्, १/ ४

4. हस्तसञ्जीवनम्, १ / १३-१४

**जीवेन भवतिहंसः सौरेण शशः कुजेन रुचकश्च ।**

**भद्रो बुधेन बलिना मालव्यो दैत्यपूज्येन ॥**[1]

अर्थात् यदि भौमादीनां पञ्चताराग्रहाणां मध्ये कश्चन ग्रह स्वक्षेत्रे स्वोच्चे च गतःसन् केन्द्रवर्ती स्यात्तर्हि क्रमशः भौमात् रुचकः, बुधात् भद्रः, गुरोः हंसः, शुक्रात् मालव्यः, शनेः शशः इतिएते पञ्चमहापुरुषयोगाः जायन्ते । बृहत्संहितायामेव हंसादीनां महापुरुषाणां शरीरोन्मानानि निर्दिष्टानि वर्तन्ते, तद्यथा -

**षण्णवतिरङ्गुलानां व्यायामो दीर्घता च हंसस्य ।**

**शशरुचकभद्रमालव्यसंज्ञितास्त्र्यङ्गुलविवृद्ध्या ॥**[2]

अर्थात् हंस-महापुरुषयोगोत्पन्नानाम् शरीरोन्मानं षण्णवत्यङ्गुलात्मकं (९६), शशयोगोत्पन्नानां शरीरोन्मानं नवनवत्यङ्गुलात्मकं (९९), रुचकयोगोत्पन्नानां शरीरोन्मानं द्व्युत्तरशताङ्गुलात्मकं (१०२), भद्रयोगोत्पन्नानां शरीरोन्मानं पञ्चोत्तरशताङ्गुलात्मकं (१०५), तथा मालव्ययोगोत्पन्नानां शरीरोन्मानम् अष्टोत्तरशताङ्गुलात्मकं (१०८) भवति।

ततोऽग्रे बृहत्संहितायाः अष्टषष्टितमे अध्याये एव एतेषां पञ्चमहापुरुषाणां सामुद्रिकलक्षणानि अपि निर्दिष्टानि वर्तन्ते ।

होरास्कन्धस्य आर्षग्रन्थे बृहत्पाराशरहोराशास्त्रेऽपि पञ्चसप्ततितमेऽध्याये रुचकादीनां महापुरुषाणां शारीरिकलक्षणानि निरूपितानि वर्तन्ते । तत्र -

**दीर्घाननो महोत्साहो स्वच्छकान्तिर्महाबलः ।**

**चारुभ्रूर्नीलकेशश्च सुरुचिश्च रणप्रियः ॥**

**रक्तश्यामोऽरिहन्ता च मन्त्रविच्चोरनायकः ।**

**क्रूरोभर्ता मनुष्याणां क्षामाङ्घ्रिर्द्विजपूजकः ॥**

**वीणावज्रधनुःपाशवृषचक्राङ्कितःकरे ।**

**मन्त्राभिचारकुशली दैर्घ्ये चैव शतांगुलः ॥**

**मुखदैर्घ्यसमं मध्यं तस्य विज्ञैः प्रकीर्तितम् ।**

**तुल्यस्तुलासहस्रेण रुचको द्विजपुङ्गव ॥**[3]

अर्थात् रुचकमहापुरुषयोगे उत्पन्नस्य जातकस्य दीर्घाकारम् मुखं, उत्साहाधिक्यं, स्वच्छकान्तिः, बलाधिक्यं, भ्रुवोः सौन्दर्यं, नीलकेशः रक्तश्यामवर्णः, क्रूरस्वभावः, पादयोः कृशत्वं, करतले वीणा-वज्र-धनुः-पाश-वृष-चक्राणाम् एकाधिकानि चिह्नानि च भवन्ति, तस्य शरीरोन्मानं प्रायेण शताङ्गुलात्मकं तथा च भारप्रमाणं प्रायेण तुलासहस्रात्मकं भवतिइति।

1. बृहत्संहिता, ६८ / १-२

2. (बृहत्संहिता, ६८ / ७

3. बृहत्पाराशरहोराशास्त्रम्, ७५/३-

 ISSN: 2320-740X

एवमेव पञ्चमहापुरुषाणां शारीरिकलक्षणानि बृहत्संहितायाम् एवञ्च बृहत्पाराशरादिषु होराग्रन्थेषु अपि निरूपितानि वर्तन्ते ।

**उपसंहारः -**

अनेन प्रकारेण राश्याधारेण कालपुरुषस्य अङ्गविभाजनक्रमं, होराग्रन्थेषु राजयोग-महापुरुषयोगादीनां सन्दर्भे ग्रहयोगैः सह सामुद्रिकचिह्नानाम् अपि वर्णनम्, हस्तसञ्जीवन-अभिनवसामुद्रविज्ञानादिषु ग्रन्थेषु सामुद्रिकचिह्नाधारेण जन्मकाल-राशिज्ञानस्य निर्देशं इत्येतादृशान् विषयान् दृष्ट्वा एषः निश्चयः जायते एव यत् फलविमर्शसन्दर्भे ज्योतिषशास्त्र-सामुद्रिकशास्त्रयोः मध्ये अन्योऽन्यसम्बन्धः वर्तत एव । यदि कस्यचित् जातकस्य ज्योतिषीयाः ग्रहयोगाः शुभाः तर्हि तस्य सम्बद्धानि शारीरिकलक्षणानि शुभानि तथैव यदि शारीरिकलक्षणानि शुभानि तर्हि सम्बद्धाः ज्योतिषीययोगा अपि शुभा एव, विपर्यये विपर्ययत्वम् इतिनिश्चेतुं शक्यते ।

**सन्दर्भग्रन्थसूची -**


- डॉ. झा सुरकान्तः, अभिनवसामुद्रविज्ञान, चौखम्भाकृष्णदास अकादमी वाराणसी, प्रथमसंस्करणम् (२००७) ।
- श्रीढुण्ढिराजः, जातकाभरणम्, पण्डितश्यामलालकृता भाषाटीका, श्रीवेङ्कटेश्वरः स्टीम् प्रेस मुम्बई (१९९३ वि.सं.) ।
- आचार्यः वराहमिहिरः, बृहज्जातकम्, (भट्टोत्पलसंस्कृतव्याख्यायुक्तं केदारदत्तकृतहिन्दीव्याख्योपेतम्), मोतीलाल बनारसीदास प्रकाशनम्, (केन्द्रीयसंस्कृतविश्वविद्यालयस्य ई.ग्रन्थालये आरोपितम् पीडीएफ.) ।
- बृहत्पाराशरहोराशास्त्रम्, हिन्दीव्याख्या - डा. मिश्रः सुरेशचन्द्रः, रञ्जनपब्लिकेशन दरियागंज नवदेहली, (२०१०)।
- आचार्यः वराहमिहिरः, बृहत्संहिता, (भट्टोत्पलविवृतिसहिता), सम्पादनम् - डॉ. द्विवेदी कृष्णचन्द्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयप्रकाशनम्, वाराणसी (१९९६) ।
- श्री जीवनाथः, भावकुतूहलम्, सम्पादनम् - मिश्रः श्रीरामोत्साहशर्मा, ठाकुर प्रसाद पुस्तक भण्डार, कचौडी गली वाराणसी
- आचार्यः वराहमिहिरः, लघुजातकम् (भट्टोत्पलटीकासहितम्), ठाकुरप्रसाद पुस्तकमन्दिर हडहा सराय वाराणसी (केन्द्रीयसंस्कृतविश्वविद्यालयस्य ई.ग्रन्थालये आरोपितम् पीडीएफ.) ।
- कल्याणवर्मा, सारावली, सम्पादकः - शास्त्री वेङ्कटेशसुब्रह्मण्यः, निर्णयसागर प्रेस मुम्बई - १९०७ (पीडीएफ)
- श्रीमेघविजयगणिः, हस्तसञ्जीवनम्, सम्पादकः - झा सुरकान्तः, चौखम्भासुरभारतीप्रकाशनम्, वाराणसी (२०१२)


*******

# भूगोलः

**डा. प्रसाद भट्टः**

सहायकाचार्यः [संविदा]

केन्द्रीयसंस्कृतविश्वविद्यालयः

श्री रणवीरपरिसरः जम्मू

आचार्यः भास्करः- **भूमेः पिण्डः शशाङ्कज्ञ..**[1] इत्यादिश्लोके पाञ्चभौतिकः भूपिण्डः चन्द्रादिनक्षत्रान्त-कक्ष्यावृत्तैः[2] संवृतःविशिष्य अन्याधारं विना स्वशक्त्या एव आकाशे तिष्ठति[3] इतिइमां भूमिकां पौराणिकादिमत-निराकरणपूर्वकस्वानुभवसिद्धदृक्प्रतीतिविषयनिरूपणाय प्रास्तौत्। पुराणादीनां मतानि यथा –

पुराणेषु इतिहासे[4] च क्वचित् आदिशेषः स्वशिरसि भूमिं बिभर्ति इतिउल्लेखः वर्तते। यदि आदिशेषः भूमिं धरतितर्हि आदिशेषस्य धर्ता कः? तद्धर्तुः धर्ता च कः? इत्येवम् आधारपरम्परा ऊहनीया भवति, तथा च अन्तिमः आधारः यः भवतितस्य स्वशक्तिः एव कल्पनीया। तदपेक्षया कल्पनालाघवेन भूमिः एव स्वशक्त्या आकाशे नियतं तिष्ठतिइतिनिरूपणमेव प्रशस्तम् इतिआचार्यास्य मतम्[5]। अस्मिन्नेव प्रसङ्गे आचार्यः वेदेषु[6] आर्षसिद्धान्तग्रन्थेषु[7] च नामान्तरेण व्यवहृतां भुवःआकर्षणशक्तिम् **आकृष्टिशक्तिश्च मही**[8] इतिनिरूपयति।

बौद्धाः तावत् एवं मन्वते[9] – भुवं परितःयत् भपञ्जरं दृश्यते तत् सर्वदा चलम्, यतःआकाशे यत् किमपि वस्तु अचलं न तिष्ठतिअतःआधाररहिता भूः अपि आकाशे प्रतिक्षणम् अधोऽधः पततिइति। यद्येवं तर्हि आकाशे यत् पाषाणखण्डादि गुरुमद् वस्तु क्षिप्यते तत् भुवं न प्रत्यागच्छेत्, यतःयावता कालेन आकाशे क्षिप्तं वस्तु अधः भूमिं प्रतिआगच्छेत् तावता भूमिः तदपेक्षया क्षिप्रगत्या अधः पतेत् । कदापि नैवं सम्भवतीतिहेतोः बौद्धानां वादः युक्तिशून्यः इतिअभिप्रायः[10]।

---

1 सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.२

2 द्रष्टव्यम्- सूर्यसिद्धान्तः-अ-१२-श्लो.३१

3 द्रष्टव्यम्- सूर्यसिद्धान्तः-अ-१२-श्लो.३२

4 इमां महीं शैलवनोपपन्नां ससागरग्रामविहारपत्तनाम्। त्वं शेष सम्यक् चलितां यथावत् संगृह्य तिष्ठस्व यथाऽचला स्यात्॥ (म.भा/आदिपर्व-अ.३६ इति शब्दार्थकौस्तुभः_पृ.सं.२६१०) 'शेषः सदैवाहितभूमिभारः' इति कालिदासः अपि अमुमेवार्थं शाकुन्तले(५-४) द्रढयति।

5 सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.४-५

6 द्रष्टव्यम् – ऋग्वेदः-१-६-५/ १-३५-९/ १-१०३-२/ १-१६४-१३/ ८-१२-२८/ ८-१२-३० / १०-१४९-१

7 द्रष्टव्यम्- सूर्यसिद्धान्तः-अ-१२-श्लो.३२

8 सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.६

9 सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.७

10 सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.९

 ISSN: 2320-740X

जैनास्तु एवमभिप्रयन्ति[1] – द्वौ सूर्यौ, द्वौ चन्द्रौ, द्वे नक्षत्रमण्डले चेति। यतःतेषां सिद्धान्ते दर्पणोदरवत् समतला भूः, तन्मध्ये चतुर्भुजाकारकः मेरुपर्वतःस्थितःवर्तते। एवं सतिमेरोः एकस्मिन् कोणे यदा रविचन्द्रतारकाः, न तदा अन्यस्मिन् कोणे भवितुमर्हन्ति, अतःसूर्यादीनां द्वित्वमितितेषां मतम्। तद्यथा-

**मेरुः**



**मेरुः**



यद्येवं मन्यते तर्हि ध्रुवमत्स्यनक्षत्रपुञ्जस्य[2] परिभ्रमणम् असङ्गतं स्यात्। यतःभरणीनक्षत्रस्थस्य रवेः अस्तमनकाले उदयकाले च ध्रुवमत्स्यपुच्छभागे एव तस्य दर्शनात्[3] । यदि द्वौ सूर्यौ भवतःतर्हि एकः ध्रुवमत्स्यस्य पुच्छभागे अस्तमितःचेत् अपरः मुखभागे उदितःभवेत्, तथा अदर्शनात् जैनानां मतमपि युक्तिरहितमितिसिद्धम्।

**भूगोले पुरनिवेशः –**

भूगोले प्राधान्येन भूमध्यरेखायां चत्वारि, ध्रुवप्रदेशयोः एकैकं चेतिआहत्य षट् पुराणि प्राचीनैः प्रोक्तानि। तत्रादौ लङ्का, ततःपूर्वस्यां 90° अन्तराले यमकोटिः, लङ्कातःपश्चिमायां 90° अन्तराले रोमकम्, अस्मात् अपि पश्चिमायां 90° अन्तराले सिद्धपरं चेतिएतानि चत्वारि नगराणि भूमध्यरेखायां स्थितानि सन्ति। एतेभ्यः चतुर्भ्यः अपि पुरेभ्यः उत्तरस्यां 90° अन्तराले सुमेरुः, दक्षिणस्यां 90° अन्तराले कुमेरुः च भवति।[4] एतेभ्यः भूमध्यरेखादेशेभ्यः स्वदेशः कियदन्तरितःइतिस्वदेशसम्बद्धनिरक्षदेशस्य ज्ञानम् अनेन सिद्ध्यतीतिकेवलम् एतानि एव पुराणि प्राचीनैः उदाहृतानि।

**द्वीपानां समुद्राणां च स्थानानि –**

---

1 सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.८

2 ध्रुवनक्षत्रस्य समीपे विद्यमानं मत्स्याकारकं नक्षत्रपुञ्जम्। द्रष्टव्यम् - https://hi.wikipedia.org/wiki/ध्रुवमत्स्य_तारामंडल

3द्रष्टव्यम्- https://docs.google.com/document/d/1hc3ES9WbkRiDnHx2TmmlW8Geyv8nAW8_/edit

4 सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.१७-२०

भूगोलः उत्तरगोलार्धं दक्षिणगोलार्धं चेतिद्विधा विभक्तः। तत्र उत्तरगोलार्धे एकः महाद्वीपः, दक्षिणगोलार्धे च अवशिष्टाः षट् लघुद्वीपाः सन्ति। तत्र तावत् उत्तरगोलार्धे भूभागः, दक्षिणगोलार्धे जलभागः च अधिकतया दृश्यते इत्यतःदक्षिणगोलार्धे लघुरूपाणि षट् द्वीपानि व्यवस्थितानि।

आदौ उत्तरगोलार्धम् अवलोकयामः। उत्तरगोलार्धभागः एव जम्बूद्वीपम्[1] इत्युच्यते। अस्मिन् जम्बूद्वीपे नव खण्डानि सन्ति। अस्य जम्बूद्वीपस्य क्षारसमुद्रस्य च सन्धिः एव निरक्षदेशः, तन्निरक्षदेशे एव पूर्वोक्तानि चत्वारि नगराणि स्थितानि। तेभ्यः चतुर्भ्यः नगरेभ्यः उपर्युपरि विभागेन नव खण्डानि सम्भवन्ति। तानि यथा[2] – १.भारतवर्षम् २.किन्नरवर्षम् ३.हरिवर्षम् ४.इलावृतवर्षम् ५.कुरुवर्षम् ६.हिरण्मयवर्षम् ७.रम्यकवर्षम् ८.भद्राश्ववर्षम् ९.केतुमालवर्षं च। तत्र द्वयोः द्वयोः वर्षयोः मध्ये एकैकः महापर्वतःअपि व्यवस्थितः। यथा – १.हिमगिरिः २.हेमकूटः ३.निषदः ४.शृङ्गवान् ५.शुक्लः ६.नीलः ७.माल्यवान् ८.गन्धमादनः ९.मेरुः चेति।

तत्र लङ्कायाः उत्तरभागे भारतवर्षं तदुत्तरभागे हिमगिरिः, ततःउत्तरदिशि किन्नरवर्षं, तदुपरि हेमकूटपर्वतः, तस्याप्युत्तरदिशि हरिवर्षं, ततःउपरि निषधपर्वतःइतिव्यवस्था। एवमेव लङ्कातःपूर्वस्यां विद्यमानात् यमकोटिपत्तनात् उत्तरभागे भद्राश्ववर्षं, तदुत्तरदिशि माल्यवान् गिरिः च वर्तते। यमकोटितःपूर्वस्यां यत् सिद्धपुरं विद्यते ततःउत्तरदिग्भागे कुरुवर्षं, तस्मात् उपरि शृङ्गवान् पर्वतः, ततःअग्रे हिरण्मयवर्षं, तत ऊर्ध्वं शुक्लपर्वतः, ततोऽप्युत्तरदिशि रम्यकवर्षं, तदग्रे नीलपर्वतःच स्थितः। सिद्धपुरात् पूर्वभागे अथवा लङ्कातःपश्चिमभागे वर्तमानात् रोमकात् उत्तरस्यां दिशि केतुमालवर्षं, तदुत्तरभागे गन्धमादनपर्वतःच भवति। क्रमशः एतेषां स्थितिः यथा -




1 "सुगन्धशैलमस्तके केतुवृक्षः जम्बूः, येनेदं जम्बूद्वीपमुच्यते" _सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.३२-वासनाभाष्यम्।

2 सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.२१, २६-३०

 ISSN: 2320-740X

निषध-गन्धमादन-नील-माल्यवत्पर्वतानाम् उपरिष्टात् इलावृतवर्षं तन्मध्ये मेरुपर्वतःच भवति। [मेरोः उपरिभागे ब्रह्मादीनां निवासस्थानानि, इन्द्रादिलोकपालानां पुराणि, मेरुमभितःचतसृषु दिक्षु चत्वारः आधारपर्वताः, तेषु पृथक् पृथक् चत्वारः केतुवृक्षाः वनानि नद्यः, देवगङ्गायाः चतस्रः धाराः चेत्यादयः पुराणाश्रिताः विशेषविचाराः आचार्येण वर्णिताः सन्ति [1]।]

जम्बूद्वीपस्य भारतवर्षे अपि नव खण्डानि विद्यन्ते, सप्त कुलाचलाश्च सन्ति[2]। तत्र खण्डानि यथा – १.ऐन्द्रखण्डम् २.कशेरुशकलखण्डम् ३.ताम्रपर्णखण्डम् ४.गभस्तिमत्खण्डम् ५.कुमारिकाखण्डम् ६.नागखण्डम् ७.सौम्यखण्डम् ८.वारुणखण्डम् ९.गान्धर्वखण्डं चेति। कुलाचलाश्च यथा – १.माहेन्द्रः २.शुक्तिः ३. मलयः ४.ऋक्षः ५.पारियात्रः ६.सह्यः ७.विन्ध्यः चेति।

सम्प्रतिदक्षिणगोलार्धम् अवलोकयामः। अत्र तावत् निरक्षात् (दक्षिणभागे) अधोऽधः क्रमेण सप्त सागराः सन्ति[3]। ते यथा – १.क्षारसमुद्रः २.क्षीरसमुद्रः ३.दधिसमुद्रः ४.घृतसमुद्रः ५.इक्षुरससमुद्रः ६.मद्यसमुद्रः ७.स्वादूदकसमुद्रः चेति। अत्र द्वयोः द्वयोः समुद्रयोः मध्ये एकैकं द्वीपं व्यवस्थितम्, यथा – १.शाकद्वीपम् २.शाल्मलद्वीपम् ३.कुशद्वीपम् ४.क्रौञ्चद्वीपम् ५.गोमेदकद्वीपम् ६.पुष्करद्वीपं[4] चेति। उभयोः दक्षिणोत्तरगोलयोः

द्वीपसमुद्रपर्वतानां स्थानानि एवं दर्शयितुं शक्यन्ते –




1 सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.३१-४०

2 सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.४१-४२

3 सिद्धान्तशिरोमणिः-भुवनकोशः-श्लो.२२-२५

4 एतेषां षण्णां मध्ये पञ्चसु द्वीपेषु पृथक् पृथक् सप्त कुलाचलाः, पुष्करद्वीपे च एकः कुलपर्वतः इति विष्णुपुराणे उल्लेखः वर्तते इति शब्दार्थकौस्तुभे (पृ.सं.७५७) उल्लेखः वर्तते।




इत्थम् आचार्येण भास्करेण भूगोलस्वरूपम् उपवर्णितम्। एते सर्वे अपि विषयाः वराहपुराणे[1] विस्तरशः उपलभ्यन्ते। ते एव विचाराः आचार्येण सङ्गृह्य सिद्धान्तशिरोमणौ निबद्धाः सन्ति। अस्मद्भारतीयानां प्राचीनाचार्याणां भौगोलिकं ज्ञानं कियत् निस्सन्दिग्धम् आसीत् इत्यत्र एतदेकं लघु निदर्शनम् ।

**<u>अनुशीलितग्रन्थाः</u>**

१. **ऋग्वेदसंहिता** - स्वाध्याय मण्डल, पारडी, 1954

२. **महाभारतम्** - स्वाध्याय मण्डल, पारडी, 1968

३. **वराहपुराणम्** - चौखम्बा कृष्णदास अकादमी-2014

४. **शब्दार्थकौस्तुभः** - Bappco Publication, Bangalore, 2007

५. **सिद्धान्तशिरोमणिः** - चौखम्बा संस्कृत संस्थान, वाराणसी, 2005

६. **सूर्यसिद्धान्तः** - चौखम्बा संस्कृत भवन, वाराणसी, 2006

७. **स्कन्दपुराणम्** - गीताप्रेस गोरखपुर, 1951

**Indian sky map** _ Android Application (Version 2.0)

https://theskylive.com/planetarium _ **Astronomy software**

******

1 वराहपुराणम्-अ.७५-८०

# गणेशगीता-भगवद्गीतयोः प्रतिपादितस्य आत्मतत्त्वस्य समीक्षणम्

**विद्वान् निरञ्जन भट्टः**
सहायकाचार्यः (संविदा)
अद्वैतवेदान्तविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः
राजीवगान्धीपरिसरः, शृङ्गेरी

**लेखसारः:** वेदान्तेषु परमपुरुषार्थस्य स्वात्मतत्त्वावस्थानरूपस्य मोक्षस्य प्रतिपादनं कृतमितिसर्वैः विदितमेव । श्रीव्यासमहर्षिप्रणीतस्य महाभारतस्य भीष्मपर्वणि कुरुक्षेत्रयुद्धस्य आरम्भे साक्षात् भगवतो मुखारविन्दात् विनिःसृता सर्वोपनिषदां सारसङ्ग्रहभूता च स्मृतिप्रस्थानत्वेन प्रसिद्धा श्रीमद्भगवद्गीता अद्यापि सर्वेषां लोकानाम् उद्दिधीर्षया अष्टादशसु अध्यायेषु तत्त्वज्ञानं बोधयन्ती विराजते ।

यथा भगवता श्रीकृष्णेन उपदिष्टा भगवद्गीता प्रसिद्धा तद्वदेव अनेकैः महर्षिभिः अन्यैश्च भगवदवतारभूतैः अनेकेषु प्रसङ्गेषु कृतो गीतोपदेशः अनेकत्र पुराणेषु उपलभ्यते । तत्र गणेशपुराणे भगवता गजाननेन राज्ञे वरेण्याय सिन्दूरनामकस्य असुरस्य वधानन्तरम् उपदिष्टा गणेशगीता अपि अन्यतमा । अत्र भगवान् गजाननः वरेण्याय राज्ञे भगवद्गीतासमानार्थकैः श्लोकैः निःश्रेयसप्राप्त्युपायान् सरलया भाषया उपादिशत् ।

उपनिषत्सारसङ्ग्रहभूतायां भगवद्गीतायामपि उपनिषत्प्रतिपादितं शरीरादिव्यतिरिक्तं नित्यं निर्विकारम् आत्मतत्त्वमेव भगवता परमपुरुषार्थसाधनत्वेन उपदिष्टमितिउपलभ्यते । गणेशगीतायामपि प्रथमाध्याये 'साङ्ख्ययोगसारार्थ'नामके भगवता गजननेन एतस्मिन्नेवार्थे प्रकारान्तरेण कृतःउपदेशः उपलभ्यते । स्वयं गजानन एव सर्वजगज्जन्मादिकारणमितिप्रतिपाद्य आत्मानः साक्षित्वं जगद्द्रष्टृत्वं सर्वकर्मसम्बन्धरहितम् अविकारम् अप्रमेयम् अव्यक्तम् सर्वगतम् अव्ययं च स्वरूपम् उपपादयति। एवं च बहुषु विषयेषु भगवद्गीतायाः गणेशगीतायाश्च अर्थतःसाम्यं द्रष्टुं शक्यते।

भगवता श्रीकृष्णेन अर्जुनं निमित्तीकृत्य सर्वेभ्यः संसारतरणेच्छुकेभ्यः सर्वकर्मसंन्यासपूर्वकम् आत्मज्ञानमेव परं निःश्रेयसं प्राप्तुं साधनमितिउपदिष्टम् । तद्वत् गणेशगीतायां भगवान् गजाननः वरेण्यं राजानं निमित्तीकृत्य सर्वलोकोद्दिधीर्षया आत्मतत्त्वज्ञानम् अनेकोपायसमन्वितम् उपदिदेश । उभयोरपि गीतयोः उपदिष्टम् आत्मतत्त्वस्वरूपं सुतरां समानमेव इत्यत्र नास्ति विप्रतिपत्तिः। श्रुतिप्रतिपादितस्य अद्वितीयात्मतत्त्वस्यैव प्रतिपादनम् उभयोरपि गीतयोः दरीदृश्यते इत्यतःवेदान्तसिद्धान्तोपपादने उभयोरपि गणेशगीता-भगवद्गीतयोः नितराम् उपयोगः महान् अस्त्येव ।

**मुख्यशब्दाः** - गणेशपुराणम्, गणेशगीता, श्रीमद्भगवद्गीता, अद्वितायात्मतत्त्वम्, स्थिरप्रज्ञः

**नमस्तस्मै गणेशाय ब्रह्मविद्याप्रदायिने ।**

**यस्यागस्त्यायते नाम विघ्नसागरशोषणे ॥**

वेदान्तेषु परमपुरुषार्थस्य स्वात्मतत्त्वावस्थानरूपस्य मोक्षस्य प्रतिपादनं कृतमितिसर्वैः विदितमेव । वेदान्तशास्त्रस्य आधारत्वेन उपनिषदः, भगवद्गीता, ब्रह्मसूत्रमितिप्रस्थानत्रयं प्राचीनाचार्याः अङ्ग्यकार्षुः । तत्रापि श्रीव्यासमहर्षिप्रणीतस्य महाभारतस्य भीष्मपर्वणि कुरुक्षेत्रयुद्धस्य आरम्भे साक्षात् भगवतो मुखारविन्दात् विनिःसृता सर्वोपनिषदां सारसङ्ग्रहभूता च स्मृतिप्रस्थानत्वेन प्रसिद्धा श्रीमद्भगवद्गीता अद्यापि सर्वेषां लोकानाम् उद्दिधीर्षया अष्टादशसु अध्यायेषु तत्त्वज्ञानं बोधयन्ती विराजते । एवंरूपस्य गीताशास्त्रस्य प्रयोजनं तत्साधनं च श्रीमच्छङ्करभगवत्पादाचार्यैः भगवद्गीताभाष्यस्य उपोद्घाते सङ्क्षेपतःप्रतिपाद्यते । तद्यथा – "तस्यास्य गीताशास्त्रस्य सङ्क्षेपतःप्रयोजनं परं निःश्रेयसं सहेतुकस्य संसारस्यात्यन्तोपरमलक्षणम् । तच्च सर्वकर्मसंन्यासपूर्वकादात्मज्ञाननिष्ठारूपाद् धर्माद्भवति[1]" इति।

यथा भगवता श्रीकृष्णेन उपदिष्टा भगवद्गीता प्रसिद्धा तद्वदेव अनेकैः महर्षिभिः अन्यैश्च भगवदवतारभूतैः अनेकेषु प्रसङ्गेषु कृतो गीतोपदेशः अनेकत्र पुराणेषु उपलभ्यते । तद्यथा महर्षिणा अष्टावक्रेण उपदिष्टा अष्टावक्रगीता, भगवता दत्तात्रेयेण उपदिष्टा अवधूतगीता, भगवद्भक्ताय उद्धवाय भगवता श्रीकृष्णेन उपदिष्टा उद्धवगीता इत्यादयः । तत्र गणेशपुराणे भगवता गजाननेन राज्ञे वरेण्याय सिन्दूरनामकस्य असुरस्य वधानन्तरम् उपदिष्टा गणेशगीता अपि अन्यतमा । इयं च गणेशगीता गणेशपुराणस्य क्रीडाखण्डान्तर्गता एकादश अध्यायोपेता च वरीवर्ति । अत्र भगवान् गजाननः वरेण्याय राज्ञे भगवद्गीतासमानार्थकैः श्लोकैः निःश्रेयसप्राप्त्युपायान् सरलया भाषया उपादिशत् ।

मानवजीवनस्य परं लक्ष्यं भवतिनिःश्रेयसप्राप्तिरेवेतिउपनिषदाम् आघोषः । तदर्थमेव सर्वा अपि उपनिषदः तत्प्राप्त्युपायान् विविधैः प्रकारैः उपदिशन्ति । आत्मतत्त्वज्ञानमेव नित्यानन्दरूपस्य निःश्रेयसस्य साधनमितिप्रतिपादयन्ती उपनिषत् "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः[2]" "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः[3]" इतिच उपदिशति। कोऽयमात्मेतिजिज्ञासायां "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्[4]" इतिसृष्टेः पूर्वं यत् स्वगतादिभेदशून्यं सद् आसीत् तदेव सृष्ट्यनन्तरम् "ऐतदात्म्यमिदं सर्वम्" इतिप्रतिपाद्य "स आत्मा तत्त्वमसि[5]" इतिसर्वस्यापि जन्तोः प्रत्यगात्मत्वेन तस्यैव शरीरादिव्यतिरिक्तस्य सतःआत्मत्वम् उपदिशति। आत्मा च ब्रह्म "अयमात्मा ब्रह्म[6]" इत्यादिश्रुतेः । एवं जगत्कारणत्वेन निर्दिष्टं निर्गुणं निराकारम् अनन्तम् आनन्दस्वरूपं च ब्रह्म आत्मत्वेन ज्ञातव्यमितिवेदान्तेषु प्रतिपादितम् । एतदेव ब्रह्मात्मत्वज्ञानं निःश्रेयससाधनं भवति।

उपनिषत्सारसङ्ग्रहभूतायां भगवद्गीतायामपि उपनिषत्प्रतिपादितं शरीरादिव्यतिरिक्तं नित्यं निर्विकारम् आत्मतत्त्वमेव भगवता परमपुरुषार्थसाधनत्वेन उपदिष्टमितिउपलभ्यते । एतदात्मतत्त्वं जायते, अस्ति, वर्धते, विपरिणते,

---

1 भगवद्गीता-शाङ्करभाष्यम्. (उपोद्घातः)

2 बृहदारण्यकोपनिषत् – ४.५.६

3 छान्दोग्योपनिषत् – ८.७.१

4 छान्दोग्योपनिषत्- ६.२.१

5 छान्दोग्योपनिषत् – ६.८.७

6 माण्डूक्योपनिषत् - २

 ISSN: 2320-740X

अपक्षीयते विनश्यतिइत्येवं षड् भावविकाररहितमितिद्वितीयाध्याये प्रतिपादितम् । तद्यथा –

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे[1] ॥

इति। ततः शरीरस्य विनाशित्वं विक्रियावत्त्वं च प्रतिपाद्य अविक्रियत्वम् आत्मनः प्रतिपाद्यते –

नैनं छिन्दन्ति शस्त्राणि नैनं दहतिपावकः ।

न चैनं क्लेदयन्त्यापो न शोषयतिमारुतः॥

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।

नित्यः सर्वगतःस्थाणुरचलोऽयं सनातनः[2] ॥

इति। शस्त्रादिभिः विक्रियावत्त्वम् निराकृत्य अयमात्मा इन्द्रियाविषयत्वात् अव्यक्तः । अत एव कारणात् चिन्ताया अपि अविषयः, तस्मात् अचिन्त्यः । निरवयवोऽयमात्मा दध्यादिवत् न विकारी भवति। अतोऽयमात्मा अविकार्यः इतिआत्मतत्त्वमुपदिश्य एतादृशम् आत्मानं विदित्वा शोकरहितो भवतिइतिप्रतिपादितम् उपलभ्यते –

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।

तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि[3] ॥ इति।

गणेशगीतायामपि प्रथमाध्याये 'साङ्ख्ययोगसारार्थ'नामके भगवता गजननेन एतस्मिन्नेवार्थे प्रकारान्तरेण कृतःउपदेशः उपलभ्यते । स्वयं गजानन एव सर्वजगज्जन्मादिकारणमितिप्रतिपाद्य आत्मानः साक्षित्वं जगद्रष्ट्टत्वं सर्वकर्मसम्बन्धरहितम् अविकारम् अप्रमेयम् अव्यक्तम् सर्वगतम् अव्ययं च स्वरूपम् उपपादयति। तद्यथा –

अहं साक्षी जगच्चक्षुरलिप्तः सर्वकर्मभिः ।

अविकारोऽप्रमेयोऽहमव्यक्तो विश्वगोऽव्ययः[4] ॥

इति। एवंस्वरूपे तस्मिन् जनाः मायया मोहिताः सन्तः तं षड् भावविकारेषु योजयन्तीतिउपपाद्य ततःतस्य शस्त्रसङ्घातादिभिः अविक्रियत्वमपि प्रतिपादयति। वध्यमाने शरीरे अवध्यत्वमुक्त्वा शरीरान्तर्वर्तित्वेन स्वयं अविकारादिलक्षणलक्षितःगजानन एव आत्मत्वेन उपलभ्यते इतिप्रतिपादितं भवति। तेन प्रत्यगात्मनोऽपि गजाननाभेदः उक्तो भवति। तदुक्तम् –

अच्छेद्यं शस्त्रसङ्घातैरदाह्यमनलेन च ॥

अक्लेद्यं चैव पानीयैरशोष्यं मारुतेन च ।

अवध्यं वध्यमानेऽपि शरीरेऽस्मिन्नराधिप[5] ॥

1 श्रीमद्भगवद्गीता – २.२०

2 श्रीमद्भगवद्गीता – २.२३-२४

3 श्रीमद्भगवद्गीता – २.२५

4 गणेशगीता – १.२८

5 गणेशगीता – १.३१-३२

इति।

भगवता श्रीकृष्णेन स्थितप्रज्ञस्य लक्षणं भगवद्गीतायाः द्वितीयाध्याये उपपादितम् । मनोगतान् सर्वान् इच्छाविशेषान् परित्यज्य प्रत्यगात्मस्वरूपे एव बाह्यलाभापेक्षां विना सन्तुष्टः स्थितप्रज्ञः ।

"यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः।

तत्र को मोहः कः शोक एकत्वमनुपश्यतः[1]" ॥

इतिश्रुतिरपि इममर्थं द्रढयति। अर्थात् एषणात्रयत्यागं कृत्वा आत्मारामः आप्तकामः संन्यासी इत्ययमर्थःप्राप्यते । यस्य मनः आध्यात्मिकादिदुःखप्राप्तौ प्रक्षुब्धं न भवति, सुखप्राप्तौ च तृष्णारहितःविगतरागभयक्रोधश्च यः, सः स्थितप्रज्ञः इत्युच्यते । तथैव यथा कूर्मः भयप्राप्तौ सर्वतःस्वाङ्गानि उपसंहरति, तथा इन्द्रियाणि सर्वविषयेभ्यः उपसंहरतितस्य प्रज्ञा प्रतिष्ठिता इति। तदुक्तम् –

प्रजहातियदा कामान् सर्वान् पार्थ मनोगतान् ।

आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।

वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते[2] ॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।

इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता[3] ॥

इति। एवं स्थितप्रज्ञस्य लक्षणमुक्त्वा ज्ञाननिष्ठस्य योगिनः निर्ममस्य निरहङ्कारस्य सर्वसंसारोपरमरूपं ब्रह्मनिर्वाणमेव फलं प्रतिपादितम् । यथा –

विहाय कामान्यः सर्वान् पुमाँश्चरतिनिःस्पृहः ।

निर्ममो निरहङ्कारः स शान्तिमधिगच्छति॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।

स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति[4] ॥

इति। एतस्मिन्नेवार्थे एतत्प्रतिच्छाया एव श्लोकाः गणेशपुराणोक्तगणेशगीतायामपि उपादिष्टाः उपलभ्यन्ते । तद्यथा –

मानसान् अखिलान् कामान् यदा धीमांस्त्यजेत् प्रिय ।

स्वात्मनि स्वेन सन्तुष्टः स्थिरबुद्धिस्तदोच्यते ॥

वितृष्णः सर्वसौख्येषु नोद्विग्नो दुःखसङ्गमे ।

गतसाध्वरुड्रागः स्थिरबुद्धिस्तदोच्यते ॥

---

1 ईशावास्योपनिषत् - ७

2 श्रीमद्भगवद्गीता – २.५५-५६

3 श्रीमद्भगवद्गीता – २.५८

4 श्रीमद्भगवद्गीता – २.७१-७२


ISSN: 2320-740X

यथाऽयं कमठोऽङ्गानि सङ्कोचयतिसर्वतः।

विषयेभ्यस्तथा खानि सङ्कर्षेद्योगतत्परः[1] ॥

इतिस्थिरप्रज्ञस्य लक्षणमुक्तम् । 'स्थिता प्रतिष्ठिता आत्मानात्मविवेकजा प्रज्ञा यस्य सः स्थितप्रज्ञः[2]' इतिस्थितप्रज्ञशब्दस्य व्युत्पत्तिं प्रदर्शयन्ति श्रीशङ्करभगवत्पादाचार्याः । अयमेवार्थःस्थिरप्रज्ञशब्दस्यापि सन्दर्भेऽस्मिन् योजयितुं शक्यते । एवं स्थिरप्रज्ञस्य त्यक्तममता-अहङ्कारस्य नित्यज्ञानरतस्य तुरीयावस्थां प्राप्तस्य ब्रह्मज्ञानात् मुक्तिरेव प्राप्यते इतितत्फलमपि प्रतिपाद्यते –

ममताऽहङ्कृती त्यक्त्वा सर्वान् कामांश्च यस्त्यजेत् ।

नित्यं ज्ञानरतो भूयाज्ज्ञानान्मुक्तिं प्रयास्यति॥

एनां ब्रह्मधियं भूप यो विजानातिदैवतः।

तुरीयावस्थां प्राप्यापि शीलान्मुक्तिं स ऋच्छति[3] ॥

इति। एवं च बहुषु विषयेषु भगवद्गीतायाः गणेशगीतायाश्च अर्थतःसाम्यं द्रष्टुं शक्यते । भगवता श्रीकृष्णेन अर्जुनं निमित्तीकृत्य सर्वेभ्यः संसारतरणेच्छुकेभ्यः सर्वकर्मसंन्यासपूर्वकम् आत्मज्ञानमेव परं निःश्रेयसं प्राप्तुं साधनमितिउपदिष्टम् । तदात्मज्ञानप्राप्त्युपायाः भक्तियोगकर्मयोगादयश्च यथाप्रकारं प्रतिपादिताः । तद्वत् गणेशगीतायां भगवान् गजाननः वरेण्यं राजानं निमित्तीकृत्य सर्वलोकोद्दिधीर्षया आत्मतत्त्वज्ञानम् अनेकोपायसमन्वितम् उपदिदेश । उभयोरपि गीतयोः उपदिष्टम् आत्मतत्त्वस्वरूपं सुतरां समानमेव इत्यत्र नास्ति विप्रतिपत्तिः।

"एको देवःसर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।

कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च[4] ॥"

इत्येवं श्रुतिप्रतिपादितस्य अद्वितीयात्मतत्त्वस्यैव प्रतिपादनम् उभयोरपि गीतयोः दरीदृश्यते इत्यतःवेदान्तसिद्धान्तोपपादने उभयोरपि गणेशगीता-भगवद्गीतयोः नितराम् उपयोगः महान् अस्त्येव ।

**परिशीलितग्रन्थसूचीः**

श्रीमद्भगवद्गीता शाङ्करभाष्यसहिता

गणेशगीता (गणेशपुराणम्)

ईशावास्योपनिषत्

बृहदारण्यकोपनिषत्

छान्दोग्योपनिषत्

माण्डूक्योपनिषत्

श्वेताश्वतरोपनिषत्

******

1 गणेशगीता – १.५३-५५

2 भगवद्गीताशाङ्करभाष्यम् – २.५२

3 गणेशगीता- १.६८-६९

4 श्वेताश्वतरोपनिषत् – ६.११

# पुरुषार्थचतुष्टये वेधोपलब्धग्रहाणामुपयोगिता

**ब्रजेशपाठकः**

सहायकाचार्यः (अतिथि)

केन्द्रीयसंस्कृतविश्वविद्यालयः

श्रीराजीवगान्धीपरिसरः शृङ्गेरी

**मुख्यशब्दाः** –

पुरुषार्थः, पुरुषार्थचतुष्टयम्, वेधयन्त्रं, वेधशाला, वेधोपलब्धग्रहः, दृक्सिद्धग्रहः, जातकशास्त्रम्, सिद्धान्तज्योतिषम्, ज्योतिषम् ।

**सारांशः** -

**ज्योतिषशास्त्रे दृग्गणितस्यैवादरः सर्वतोभावेन वर्तते, परन्तु दृग्गणितैक्यतासिद्धये वेधस्यावश्यकता भवति। अतोऽत्र परम्परायां वेधनस्यादेशः पदे-पदे दृश्यते। एतदर्थमेव प्रायशः सर्वेष्वपि सिद्धान्तग्रन्थेषु यन्त्राध्यायस्य यन्त्रवर्णनस्य वा पृथगस्तित्वं दृश्यते, यत्र वेधविषयकं ज्ञानं निहितं भवति। यद्यपि शास्त्रेऽस्मिन् गणितीयाधारेणैव सर्वेषां ग्रहाणां तत्सम्बन्धिविषयाणाञ्च साधनं कृतम् परन्तु गणितागतानां सर्वेषां ग्रहादीनां दृक्प्रत्ययकारकत्वमन्वीक्ष्यैव भारतीयाः प्राचीनकालादेव तेषां प्रयोगं कुर्वन्तःआसन्, यस्योद्घोषणा सर्वैः सुविज्ञदैवज्ञैः स्वस्वग्रन्थेषु कृतास्ति। आवश्यकतैवाविष्कारस्य जननीतिउक्तिः सुप्रसिद्धा एव । जगतियथा सर्वेषां कार्याणामारंभात् प्राक् तेषामावश्यकतामनुभवन्ति जनाः। प्रसङ्गेऽस्मिन्नपि तथैव अतीवप्राचीनकालादाकाशस्थग्रहादीनां दर्शनेन प्रभावेण च चमत्कृतैर्मानवैः वेधक्रिया संस्थापिता,संरक्षिता, संवर्धिता च । ममाभिप्रेतं यत् वेधप्रक्रियायाः या खलु भारतीया परम्परा, तस्याः संरक्षणं संवर्धनं च स्यात्। वेधप्रक्रियाद्वारा ग्रहाणां स्फुटतया ज्ञानं भवतितथा च सिद्धान्तग्रन्थेषु वर्णितानां ग्रहस्पष्टादिसूत्राणां परीक्षणमपि भवति। अथ चानेन समस्तयज्ञयागादिक्रियासु स्फुटतया फलसिद्धिद्वारा मानवाः धर्मार्थकाममोक्षाणां पुरुषार्थानां सम्यक् सिद्धिमवाप्नुवन्ति।**

पुरुषार्थशब्दः'पुरुष+अर्थ' इत्यनयोः संयोगेन निष्पन्नो भवति। पुरि शरीरे शेते इतिपुरुषः । अर्थशब्दस्य तात्पर्यं भवतिउद्देश्यं प्रयोजनं वा। पुरुषस्य अर्थःइतिविग्रहे **षष्ठी** इतिसूत्रेण षष्ठीतत्पुरुषसमासे कृते पुरुषार्थ इतिशब्दःनिष्पद्यते । पुरुषसम्बन्धिप्रयोजनानीतितदर्थः। स च चतुर्विधः धर्मार्थकाममोक्षाख्यः।

यथाह विष्णुपुराणे **धर्म्मार्थकाममोक्षाश्च पुरुषार्था उदाहृताः।**[1] एते पुरुषार्थाः 'पुरुषार्थचतुष्टयम्' इत्यनेन व्यपदिश्यन्ते।

---

1 विष्णुपुराणस्य प्रथमांशस्य, अ.सं.१८, श्लो.सं.२१

यदि किञ्चित् जीवनलक्ष्यं न स्यात् तर्हि नानाविधान् सुखोपभोगानुपभुज्यापि मानवःआत्मानं कृतकृत्यं नानुभवति। अतएव मानवानुग्रहतत्परैः शास्त्रकारैः मनुष्यजीवनं साङ्गोपाङ्गमभ्यस्य तत् प्रवृत्तिश्च सम्यगालोच्यैते चतुर्विधाः पुरुषार्थाः धर्मार्थकाममोक्षात्मकाः साध्यत्वेन प्रदत्ताः । यतःसर्वेषां शास्त्राणां प्रयोजनं भवतिपुरुषार्थसिध्दिः अतःज्योतिषशास्त्रस्यापि प्रयोजनं पुरुषार्थसिद्धिरेव। ज्योतिषशास्त्रेण धर्मार्थकाममोक्षाख्याः चत्वारः पुरुषार्था उपलभ्यन्ते । यथोक्तं प्रश्नमार्गे –

**अध्येतव्यं ब्राह्मणैरेव तस्मात् ज्योतिश्शास्त्रं पुण्यमेतद्रहस्यम् ।**

**एतद्बुध्वा सम्यगाप्नोति यस्मादर्थ-धर्म-मोक्षमग्र्यं यशश्च ।।**[1]

पुनश्च भास्कराचार्यः –

**यो ज्यौतिषं वेत्ति नरः स सम्यग् धर्मार्थकामाँल्लभते यशश्च ।।**[2]

पुनश्च नारदपुराणे -

**ज्यौतिषाङ्गं प्रवक्ष्यामि यदुक्तं ब्रह्मणा पुरा ।**

**यस्य विज्ञानमात्रेण धर्मसिद्धिर्भवेन्नृणाम् ॥१॥**[3]

निर्दिष्टैः प्रमाणैरिदमागतं यत् ज्योतिषशास्त्रस्य विज्ञानेन पुरुषार्थचतुष्टयस्य सिद्धिर्भवतीति। ज्योतिषशास्त्रं कालविधानशास्त्रं वर्तते। ज्योतिषशास्त्रं श्रौतस्मार्तक्रियाणां, यज्ञयागादीनां, होमजपादीनां सर्वेषां कृते शुभाशुभमुहूर्तं ज्ञापयति। कालज्ञानं विना श्रौतस्मार्तकर्माणि गर्भाधानजातकर्मयज्ञोपवीतविवाहादयः संस्काराश्च ऊषरधरायां वापितं बीजमिव निष्फलाः भवन्ति। यथोक्तमपि -

**अतीनानागते काले दानहोमजपादिकम् ।**

**ऊषरे वापितं बीजं, तद्वद्भवतिनिष्फलम् ॥**[4]

अस्मिन् प्रसङ्गे स्पष्टग्रहाणां महती उपयोगिता भवति, यतोहि यावन्तःग्रहाः सुस्पष्टाः भवन्ति तावन्ति फलानि स्फुटतया लभ्यन्ते । अतएव दृग्गणितैक्यताविषये भास्कराचार्यः भणतिसिद्धान्तशिरोमणौ –

**यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम् ।**

**स्यात् प्रोच्यते तेन नभश्चराणां स्फुटक्रिया दृग्गणितैक्यकृद्या ॥**[5]

सूर्यसिद्धान्तेऽपि –

**तत्तद्गतिवशान्नित्यं यथा दृक्तुल्यतां ग्रहाः।**

1 प्रश्नमार्गे अ.१ श्लो.१३ पृ. २०

2 सिद्धान्तशिरोमणेः मध्यमाधिकारस्य कालमानाध्यायस्य श्लो.सं.१२, पृ.सं.१०

3 संक्षिप्तनारदपुराणे पृ.सं.-२४१ (गीताप्रेस गोरखपुर)

4 ज्योतिर्निबन्धस्य श्लो.सं.१२, पृ.सं.२

5 सिद्धान्तशिरोमणेः गणिताध्यायस्य स्पष्टधिकारस्य श्लो.सं.१, पृ.सं.९७ डॉ.मुरलीधरचतुर्वेदः

**प्रयान्ति तत् प्रवक्ष्यामि स्फुटीकरणमादरात्।।**[1]

जातकसारदीपेऽपि प्रस्फुटद्युचराधीनमेव सर्वं फलमितिनिगदितमस्ति –

**विवाहे जातके यात्रा प्रश्नवास्तु व्रतादिषु ।**

**ज्योतिश्शास्त्रात् फलं सर्वं प्रस्फुटद्युचराश्रयम् ।।** [2]

पुनश्च जातकसारदीप एव -

**जातकादिषु सर्वत्र ग्रहैर्ज्ञानं प्रजायते ।**

**तस्माद्गणितदृक्तुल्यात्स्वतन्त्रात्साधयेद् ग्रहान् ।।**

**तत्तु सम्यक् प्रकारेण प्रवक्तुं नैव शक्यते ।**

**सिद्धान्तानान्तु सर्वेषां साम्यन्नास्ति मिथो यतः।।**

**प्रत्यक्षसमयाच्चैते येन पक्षेण यत्र वै ।**

**स्फुटं दृक्तुल्यतां यान्ति तेन सर्वविनिर्णयः ॥**[3]

अन्यच्च ज्योतिर्विवरणे -

**यात्रोद्वाहप्रभृतिषु फलं स्पष्टखेटाश्रयं यत् तस्मात्तत्साधन इह बुधैर्भाषतेऽपि क्वचित्ते ।**

**स्पष्टा न स्युः परमपुरुषांशाश्चला लक्ष्यचारास्तस्मात्साध्या बहुविधमतैर्नैकपक्षाभिमानः ॥**[4]

तथाह वसिष्ठः -

**यस्मिन् पक्षे यत्र काले येन हग्गणितैक्यकम् ।**

**दृश्यते तेन पक्षेण कुर्यात्तिथ्यादिनिर्णयम् ॥**[5]

दामोदरपद्धतौ च -

**यान्ति संसाधिताः खेटा येन हग्गणितैक्यकम् ।**

**तेन पक्षेण ते कार्याः स्फुटास्तत्समयोद्भवाः ॥**[6]

श्रीगणेशदैवज्ञेन तु बृहत्तिथिचिन्तामणौ स्पष्टतया दृग्गणितैक्यस्यैव प्राधान्यमङ्गीकृतम् । ज्योतिषं तु सर्वथा प्रायोगिकं प्रत्यक्षञ्च शास्त्रं विद्यते।

तदर्थमेवेयमुक्तिः प्रसिद्धा –

**अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम् ।**

---

1 सूर्यसिद्धान्तस्य स्पष्टाधिकारस्य श्लो.१४

2 जातकसारदीपस्य अ.सं.१७ श्लो.सं.२

3 जातकसारदीपस्य अ.सं.१७ श्लो.सं.१,३,४

4 जातकसारदीपस्य अ.सं.१७ श्लो.सं. ५

5 जातकसारदीपस्य अ.सं.१७ श्लो.सं. ६

6 होरारत्नस्य अ.सं.२ श्लो.सं.३२

 ISSN: 2320-740X

**प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ॥**

वेधाधारेण यत् किमपि फलमुपलभ्यते तदेवास्माभिः गृह्यते। गणनाभिर्यत् फलं लब्धं तद्यदि वेधैर्नोपलभ्यते तदा तस्य ग्रहणं न कदापि कर्तव्यमितिशास्त्रनिर्देशः। अतएव सवितुरयनज्ञाने यदि विकृतिः समायातितदा प्रत्यक्षपरीक्षणं कर्तव्यमितिबृहत्संहितायां अयनज्ञानप्रसङ्गे वराहमिहिरेण प्रतिपादितम् । तद्यथा -

**साम्प्रतमयनं सवितुः कर्कटाद्यं मृगादितश्चान्यत् ।**

**उक्ताभावे विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः ॥**[1]

सिद्धान्तसुन्दरेऽपि -

**मुनि प्रणीते मनुजैः क्वचित्ते दृश्यतेऽन्तरम् ।**

**तदा तदेव संसाध्यं न कार्यं सर्वमन्यथा ॥**[2]

एवं बहुविधप्रमाणैर्ग्रहाणां स्फुटीकरणस्य दृक्तुल्यतायाश्च महत्वम् स्पष्टम् । ग्रहाणां दृक्तुल्यतायाः परीक्षणं वेधयन्त्रैर्भवति। वेधः ज्योतिषशास्त्रस्य प्राणभूतं तत्वम्। व्याकरणदृष्ट्या वेधशब्दो विध् धातोः घञ् प्रत्यये कृते निष्पद्यते[3]। आकाशस्थग्रहनक्षत्रादीनां यन्त्रैः नेत्रैश्चावलोकनमेव वेधः । शलाकया, यष्टिना केनाप्यन्यमाध्यमेन वा आकाशस्थसूर्यादीनामवलोकनमितितदर्थः। अत्र पूर्वोक्तशलाकानलिकादिभिः ग्रहनक्षत्रादीनां पिण्डानां वेधनं भवतितदर्थमेव एतस्याः प्रक्रियायाः नाम वेधः सञ्जातः।

वेधोऽयं द्विविधः -**दृष्टिवेधः यन्त्रवेधश्च** ।

सृष्ट्यारम्भकालादेवाकाशस्थानां ग्रहर्क्षादिपिण्डानां गतिं स्थितिञ्चावलोक्य मानवैः निरन्तरमन्वेक्षणेनैव वेधनप्रक्रिया प्रारब्धा, कालान्तरे परिष्कृतरूपेण च संवर्धिता। सिद्धान्तग्रन्थेषु दृग्गणितैक्यता पदे-पदे दृश्यते। विभिन्नेषु ग्रन्थेषु ग्रहभगणसंख्यायाः भेदं बीजादिकञ्चावलोक्य निश्चेतुं शक्यते यदस्माकं देशे वेधप्रक्रिया निरन्तरं प्रचलितासीत्। यन्त्राणां अभावात् सामान्योपकरणेनैव स्वयोगविद्यया च निर्जनस्थलेषु सततं निरभ्राकाशावलोकनरूपं वेधकर्म श्रीमतां महर्षीणां तपोरूपं साधयति। अतएव वेधविज्ञानां दैवज्ञानामादरः शास्त्रे विशिष्टरूपेण दृश्यते । तद्यथा -

**यथा भटः प्रौढरणोत्कटोऽपि शस्त्रैर्विमुक्तो परिभूतिमेति।**

**तद्वन्महाज्योतिषनिस्तुषोऽपि यन्त्रेणहीनो गणकस्तथात्र ।।**[4]

नहि केवलं वेधविज्ञानां प्रशंसा अपितु वेधानभिज्ञदैवज्ञानां निन्दापि प्रतिपादिता विद्यते। तद्यथा -

**ये विदन्ति खचरन्यधक्रमं नौ ग्रहक्रमविदोऽपि गोचरे ।**

**ते मृषावचनभाषितो जना यान्ति हास्यमपकीर्तिलाञ्छिताः ।।**

1 बृहत्संहिता अ.३ श्लो.२

2 सिद्धान्तसुन्दरम्, ग्रहानायनाधिकारः श्लो.९ पृ.सं.८७

3संकृतहिन्दीशब्दकोशस्य पृ.सं.१०५१, (वामनशिवराम आप्टे, श्रीप्रकाशन)

4यन्त्रराजस्य श्लो.सं.४ पृ.सं.२

भास्कराचार्यादिभिर्दैवज्ञैः कालावयवज्ञानार्थं यन्त्राणामुपयोगस्य निर्देशः कृतः। यन्त्राभावे तु कालस्य गतावयवानां ज्ञानमसम्भवमित्युक्तम् । यथोक्तं सिद्धान्तशिरोमणौ -

**दिनगतकालावयवा ज्ञातुमशक्या यतो विना यन्त्रैः।**[1]

अन्यच्च ब्रह्मसिद्धान्तेऽपि -

**संसाध्य स्पष्टतरं बीजं नलिकादियन्त्रेभ्यः ।**

**तत्संस्कृतग्रहेभ्यः कर्तव्यौ निर्णयादेशौ ॥**[2]

सौरभाष्येऽपि –

**संसाध्य स्पष्टतरं बीजं नलिकादियन्त्रेभ्यः ।**

**तत्संस्कृतास्तु सर्वे पक्षाः साम्यं भजत्येव ॥**[3]

एतावतेदं निश्चितं यत् प्राचीनकाले वेधप्रक्रियायाः विकासस्य तथा यन्त्राणामुपयोगस्य परम्परा प्रचलिता आसीत्। ज्योतिर्विद्याया आत्मा वेध एव, यतो हि 'प्रत्यक्षं ज्योतिषं शास्त्रम्' इतिमहतां वचनस्यान्वर्थता तदैव सिध्यतियदा गणितागतग्रहाः दृग्गोचरीभूताः भवन्ति।

**Bibliography –**


- विष्णुपुराण, गीताप्रेस गोरखपुर, 2014
- प्रश्नमार्ग, डॉ.शुकदेव चतुर्वेदी, रंजन पब्लिकेशन्स, 1999
- सिद्धान्तशिरोमणिः, डॉ.मुरलीधरचतुर्वेदः, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः वाराणसी, 1981
- संक्षिप्तनारदपुराण, गीताप्रेस गोरखपुर, 2011
- ज्योतिर्निबन्धः, शूरमहाठश्रीशिवराजः, विनायकगणेशआपटे इत्यनेन आनन्दाश्रममुद्रणालये प्रकाशितम्, 1919
- सूर्यसिद्धान्तः, कपिलेश्वरशास्त्री, चौखम्बा संस्कृत सीरिज ऑफिस, 1946
- जातकसारदीप, डॉ. सुरेशचन्द्र मिश्र, रंजन पब्लिकेशन्स, 2009
- होरारत्नम्, डॉ.मुरलीधर चतुर्वेदी, मोतीलाल बनारसीदास, 1986
- बृहत्संहिता, अवधविहारी त्रिपाठी, वाराणसेयसंस्कृतविश्वविद्यालयः, 1968
- सिद्धान्तसुन्दरम्, सदानन्दशुक्लः, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, 2008
- संकृतहिन्दीशब्दकोश, वामन शिवराम आप्टे, मोतीलाल बनारसीदास, 1969
- यन्त्रराजः, कृष्णशंकर केशवराम, निर्णयसागर मुद्रणालय, मुम्बई, 1936


******

1 सिद्धान्तशिरोमणिः,डॉ.मुरलीधरचतुर्वेदः,सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, यन्त्राध्यायः श्लो.१, पृ.४३७

2 होरारत्नम् अ.२ ग्रहा. श्लो.३५

3 जातकसारदीपस्य अ.सं.१७ श्लो.सं.७

 ISSN: 2320-740X

# विशेषनिरूपणम्

**शशांक शिवराम भट्टः**

अतिथ्यध्यापकः, न्यायविभागः

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**मुख्यशब्दाः** - विशेषसिद्धिः, परमाणुभेदसाधकः, पदार्थः, विशेषनानात्वम्, स्वतोव्यावृत्तत्वम्

इह जगतिसर्वेषां मनुष्याणां परमं लक्ष्यं विद्यते निःश्रेयसापरपर्यायः मोक्षः । परम्परया तत्प्राप्तिमार्गोपायभूतान्येव भवन्ति सर्वाण्यास्तिकदर्शनानि । तत्रान्यतमे भवतःमहर्षिगौतमकणादाभ्यां प्रणीते न्यायवैशेषिकदर्शने । महर्षिकणादेन वैशेषिकसूत्रे द्रव्यं, गुणः, कर्म, सामान्यं, विशेषः, समवायः, अभावःचेतिसप्तपदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानात् निःश्रेयसाधिगमः[1] भवतीतिसूत्रितं विद्यते । तत्र पञ्चमः पदार्थःभवतिविशेष इति। वैशेषिकदर्शने च व्यावृत्तिबुध्दिजनकत्वेन विशेषस्य सिध्दिरुक्ता, तद्यथा – सामान्यं विशेष इतिबुध्यपेक्षम्[2] इति। अत्र च विशेषस्य लक्षणं बुध्दिरेव । बुध्दिः अपेक्षा यस्येतिव्युत्पत्या व्यावृत्तबुध्दिविषयत्वं विशेषस्य लक्षणमितिलभ्यते । व्यावृत्तिबुध्दिजननार्थमेव कल्पितानां विशेषाणामनवस्थाभिया स्वत एव व्यावृत्तत्वं स्वीक्रियते । अत्र च न्यायवैशेषिकदर्शनयोः किञ्चित्सिध्दान्तवैषम्यं विद्यते । न्यायनये तावत् परमाण्वाद्यन्त्यद्रव्यवृत्तीनामेव विशेषत्वं कारिकावली-मुक्तावल्यादिग्रन्थावलोकनेन ज्ञायते । तदुक्तं कारिकावल्यां - अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः[3] इति। अन्ते भवःअन्त्यः, तथा च परमाण्वादिनित्यद्रव्यवृत्तिःएव विशेषः इतिअङ्गीक्रियते । वैशेषिकदर्शने तावत् सामान्यानामपि विशेषत्वं स्वीक्रियते । तत्र हि विशेषस्य द्वेधा विभागः कर्तुं शक्यते, सामान्यविशेषः, केवलविशेषः चेति । सामान्यविशेषो नाम सामान्यात्मकविशेषः इत्यर्थः। अत्र च द्रव्यत्वगुणत्वादिजातयः सामान्यधर्माः ये सन्ति तेषां विशेषत्वमपि स्वीक्रियते इतिसूत्रे कण्ठत एवोक्तं महर्षिकणादैः– द्रव्यत्वं गुणत्वं कर्मत्वञ्च सामान्यानि विशेषाश्च[4] इति। सूत्रे चकारेण पृथिवीत्वादीनां द्रव्यगतानां, रूपत्वादीनां गुणगतानां, उत्क्षेपणत्वादीनां कर्मगतानाञ्च जातीनां समुच्चयः। इदं द्रव्यमिदं द्रव्यमित्यनुगतप्रतीत्या यथा वा द्रव्यत्वं जातिरितिसिध्यति, तद्वदेव नेदं द्रव्यमितिव्यावृत्तिबुध्दिविषयत्वेन द्रव्यत्वस्य विशेषत्वमपि सिध्यतिइतिहि अत्र सूत्रकाराणामाशयः । एवञ्च सामान्यभूतानामेषां व्यावृत्तिहेतुतया विशेषत्वमप्यस्ति, तावता न ते मुख्यविशेषा इति। तत्राहुः प्रशस्तपादाचार्याः - प्राधान्येन सामान्यानि, स्वाश्रयविशेषकत्वात् उपचारेण विशेषाख्यानीति[5] । एवं

---

1 धर्मविशेषप्रसूताद्द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां पदार्थतत्त्वज्ञानान्निःश्रेयसाधिगमः ( वै.सू.1.1.2)

2 वैशेषिकसूत्रं-1.2.3

3 कारिकावली.श्लो.सं.6

4 वैशेषिकसूत्रं – 1.2.5

5 प्रशस्तपादभाष्यम्

सामान्यात्मकविशेषमुक्त्वा केवलविशेषः प्रतिपाद्यते सूत्रे यथा - अन्यत्रान्त्येभ्यो विशेषेभ्यः[1] इति। एतत्सूत्रावलोकनेन अन्त्यान् विशेषान् वर्जयित्वा अन्ये विशेषाः सामान्यानि भवन्तीत्यर्थःअवगम्यते । अन्ते अवसाने वर्तन्त इतिअन्त्याः[2] । अवसानं नाम व्यावर्तकसीमा इति, तदुपरि व्यावर्तकान्तरं नास्तीत्यर्थः। अन्तशब्देनात्र उत्पादविनाशरहितानि नित्यद्रव्याणि गृह्यन्ते । तथा चात्र व्यावृत्तिधीनियामकत्वमित्यस्य व्यावृत्तिधीमात्रनियामकत्वमितितात्पर्यस्वीकारात् विशेषलक्षणस्य सामान्यविशेषेष्वतिव्याप्तिः इतिशङ्कापि वारिता भवति। तदुक्तं प्रशस्तपादभाष्ये - नित्यद्रव्यवृत्तयो ह्यन्त्या विशेषाः । ते च खल्वत्यन्तव्यावृत्तिबुध्दिहेतुत्वाद्विशेषा एव इति[3] ।

सोऽयं विशेषः एकमात्रवृत्तिः, अनेकवृत्तिश्चेत्यपि द्वेधा विभक्तुं शक्यन्ते । आद्यो एकमात्रवृत्तिःयथा द्रव्यत्वसामान्यवतिआकाशे एव विद्यमानम् आकाशत्वं, काले एव विद्यमानं कालत्वमित्येवम् एकमात्रवृत्तिःविशेषः । सामान्यसमानाधिकरणत्वे सतिसामान्यसमानाधिकरणाभावप्रतियोगित्वे सतिगुणकियाभिन्नो विशेषः[4] इति लक्षणमेतद्विभागानुसारेण वक्तुं शक्यते । अनेकवृत्तिःविशेषः यथा द्रव्यत्वसामान्यवत्सु पिकशुकादिषु वर्तमानम् अजगजादिषु अविद्यमानं पक्षित्वम्, गुणत्वसामान्यशुक्लनीलादिरूपेषु विद्यमानं रसगन्धादिषु अविद्यमानं रूपत्वम् इति। अनेकवृत्तिविशेषः पुनः द्वेधा विभक्तुं शक्यते यथा – समानासमानकालिकानेकवृत्तिःअसमानकालिकानेकमात्रवृत्तिः[5] इति। तत्र प्रथमः समानासमानकालिकानेकवृत्तिःयथा – समानकाले विभिन्नकाले च विद्यमानासु अनेकगोव्यक्तिषु समवेतं गोत्वम् । द्वितीयः असमानकालिकानेकमात्रवृत्तिःयथा - चैत्रस्य बाल्यादारभ्य वार्धकं यावद् अनन्तानि असमानकालिकानि यावन्ति शरीराणि भवन्ति, तावत्सु शरीरेषु समवेतं चैत्रत्वम् । इत्येवं रूपेण वैशेषिकसूत्रतद्व्याख्यादिपर्यालोचनया विशेषः निरूपितः।

मुक्तावली-दिनकर्यादावुक्तरीत्या विशेषलक्षणमत्र किञ्चिद्विचार्यते - तथा च अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितःइतिकारिकोक्तदिशा न्यायनये केवलविशेष एव स्वीक्रियते । स च परमाणूनां परस्परभेदसाधनाय परमाण्वादावङ्गीकृतःइत्येव, एवं सिध्दस्य तस्य आकाशादिवृत्तित्वमपि स्वीक्रियते इतिहि राध्दान्तः। तत्र अस्माभिः लोके दृश्यमानानां घटादिपदार्थानां भेदस्तावत्तत्तदवयवभेदादेव साधयितुं शक्यः यथा- अयं घटः घटान्तराद्भिन्नः एतत्कपालसमवेतत्वात्, अयं कपालः कपालान्तराद्भिन्नः एतदवयवसमवेतत्वात् इत्येवं रूपेण द्व्यणुकः द्व्यणुकान्तराद्भिन्नः एतत्परमाणुसमवेतत्वादितिद्व्यणुकपर्यन्तनामपि पदार्थानां परस्परभेदः तत्तदवयवभेदनिबन्धनो भवतियतो हि तेषां सावयवत्वात्, परन्तु परमाणूनां नित्यत्वान्निरवयवत्वाच्च परस्परपरमाणुभेदसाधनाय विशेषः

---

1 वैशेषिकसूत्रं – 1.2.6

2 अन्तेषु भवाः अन्त्याः ( प्रशस्तपादभाष्यम् )

3 प्रशस्तपादभाष्यम्

4 तर्कप्रवेशः - काणादसरणिः

5 तर्कप्रवेशः – काणादसरणिः

 ISSN: 2320-740X

इतिपदार्थःस्वीकृतः, एवं सिध्दः विशेषाख्यः पदार्थःआकाशादिनित्यद्रव्यवृत्तिरित्यपि स्वीक्रियते । तथा च परमाणूनां परस्परभेदसाधकानुमानञ्च अयं परमाणुः परमाण्वन्तरभिन्नः एतद्विशेषादिति। स च विशेषः प्रतिपरमाणुभिन्नः तस्मादेव अनन्तश्च । तत्र पुनः विशेषेषु परस्परभेदसाधनाय पदार्थान्तरस्यापेक्षा नास्ति, परमाणुभेदसाधकत्वेन सिध्दः विशेषः स्वमेव अन्येभ्यः व्यावर्तते, अयं विशेषः विशेषान्तरभिन्नः एतद्विशेषादिति। विशेषस्य विशेषान्तरस्वीकारे अनवस्थाप्रसङ्गः इतिभावः। अतःविशेषः स्वतोव्यावृत्तः ।

तत्र स्वोव्यावृत्तत्वं नाम किमितिजिज्ञासायामुच्यते - स्वतोव्यावृत्तत्वं च स्वभिन्नलिङ्गिकस्वविशेष्यकस्वसजातीयेतर-भेदानुमित्यविषयत्वमिति। स्वभिन्नलिङ्गिका-स्वविशेष्यिका-स्वसजातीयेतरभेदविषयिणी या अनुमितिः तद्विषयः - तदुद्देश्यः यः तद्भिन्नत्वम् इत्यर्थः। अत्र स्वभिन्नलिङ्गकत्वं नाम स्वभिन्नलिङ्गजन्यत्वम् । “अयं परमाणुः परमाण्वन्तरभिन्नः एतद्विशेषात्" इत्यनुमितिः स्वभिन्नलिङ्गक-स्वविशेष्यक-स्वसजातीयेतरभेदानुमितिः । स्वपदेन अनुमितिविशेष्यः ग्राह्यः, ततश्च स्वम् अयं परमाणुः, स्वभिन्नं लिङ्गम् एतत्परमाणुगतविशेषः, तज्जन्यत्वम् अनुमितेः वर्तते । एवं स्वविशेष्यकत्वं च अनुमितेः वर्तते, एतत्परमाणुविशेष्यकत्वात् । एवं स्वसजातीयं नाम एतत्परमाणुसजातीयं यत् इतरत् - परमाण्वन्तरं तद्भेदविषयकत्वं च अनुमितेः वर्तते । तद्विषयः - तदुद्देश्यः एतत्परमाणुः, तद्भिन्नत्वं विशेषे वर्तते । स्वपदेन विशेषस्य ग्रहणे तु तद्विशेष्यकस्वसजातीयेतरभेदानुमितिः “अयं विशेषः विशेषान्तराद्भिन्नः इतिअनुमितिः इतिवक्तव्यं, तस्यां च स्वभिन्नलिङ्गकत्वं नास्ति । अतःस्वपदेन विशेषः न ग्राह्यः, किन्तु विशेषाश्रयाः पदार्थाः ग्राह्याः, तद्भिन्नत्वं च विशेषेषु वर्तते इतिस्वतोव्यावृत्तत्वस्य समन्वयः करणीयः । तथा च प्रतियोगिनि स्वत्वं निवेश्यते, न तु अनुयोगिनि इत्युक्तं भवति। इदानीमत्र विशेषलक्षणे दलप्रयोजनं किञ्चिच्चिन्त्यते । अनुमितौ स्वभिन्नलिङ्गकत्वानिवेशे विशेषस्यापि स्वलिङ्गक-स्वसजातीय-विशेषान्तरभेदविधेयकानुमित्युद्देश्यत्वात्तादृशानुमित्युद्देश्यभिन्नत्वविरहात् असम्भवः। अनुमितिविषयत्वम् अनुमित्युद्देश्यत्वरूपमितिस्वीकारे सतिस्वविशेष्यकत्वदलस्य कुत्रापि दोषवारकतया सार्थक्यं नास्तीत्यतःस्वविशेष्यकेतिदलं स्पष्टार्थम् इति। नन्वत्र नञ्द्वयप्रवेशे गौरवात् स्वलिङ्गक-स्वविशेष्यक-स्वसजातीयेतरभेदानुमितिविषयत्वमेव स्वतोव्यावृत्तत्वमितिनञ्द्वयाघटितमेव लक्षणं वक्तुमुचितमितिशङ्कायां तत्र समाधानमुच्यते - अयं घटः घटान्तरात् व्यावृत्तः तादात्म्येन एतद्घटात् इत्यत्र घटादावपि तादात्म्येन घटहेतुकस्वसजातीयघटान्तरप्रतियोगिकभेदानुमितिविषयत्वेन घटादावपि विशेषलक्षणस्य अतिव्याप्तिः स्यादतःनञ्द्वयप्रवेशः । तन्निवेशे तु घटादौ स्वभिन्नस्वावयवसमवेतत्वलिङ्गक-स्वसजातीयभेदानुमितिविषयत्वस्यापि सत्त्वेन स्वभिन्नलिङ्गकानु-मितिविषयत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वं नास्ति इतिन अतिव्याप्तिः । भेदे स्वसजातीय-प्रतियोगिकत्वविशेषणं न दीयते चेत् स्वभिन्नलिङ्गक-स्वविशेष्यक-भेदानुमित्यविषयत्वं स्वतोव्यावृत्तत्वमित्येव लक्षणं पर्यवस्यति, तथा सतिविशेषेषु लक्षणस्य असंभवःएव, तद्यथा - विशेषः स्वेतरद्रव्यभिन्नः गुणशून्यत्वात् इतिगुणशून्यत्वलिङ्गकानुमितेः विशेषभिन्नलिङ्गकत्वात् तद्विषयत्वमेव विशेषेषु अस्ति इति, अतस्तद्वारणाय स्वसजातीयप्रतियोगिकभेदनिवेशः। एवमत्र स्वसजातीयत्वं च पदार्थविभाजकोपाधिरूपेण, स्वनिष्ठः यः पदार्थविभाजकोपाधिः तद्वत्त्वं स्वजातीयत्वम् । एवं नोच्यते चेत् द्रव्यस्यापि प्रमेयत्वेन रूपेण विशेषसजातीयत्वात्

तत्प्रतियोगिकभेदानुमितिम् आदाय असंभवापत्तिः, अतस्तद्वारणाय पदार्थविभाजकोपाधिरूपेण साजात्यनिवेशः । अत्र प्रश्नः भवतियत् नित्यद्रव्येषु परस्परव्यावृत्त्यर्थं विशेषाख्यपदार्थस्वीकारेऽपि नित्यद्रव्येषु ये गुणाः रूपादयः तेषां परस्परं कथं भेदः सिद्ध्यतिइतिप्रश्ने सतिविशेषपदार्थेन परमाणूनां भेदे सिद्धे सतित एव परस्परं भिन्नाः परमाणवःस्वगतगुणानां गुणान्तरापेक्षया भेदका भवन्ति "इदं रूपं परमाण्वन्तरगतरूपात् भिन्नम्, एतत्परमाणुवृत्तित्वात्" इति। अत्रेदानीं शङ्का उदेतियत् अन्त्यो नित्यद्रव्यवृत्तिरितिकारिकया अन्त्यत्वे सतिनित्यद्रव्यत्तित्वमितिविशेषलक्षणमुक्तं, तत्रान्त्यत्वं स्वतोव्यावृत्तत्वमेव अन्ते व्यावर्तकानामवसाने वर्तत इत्यन्त्या इतिव्युत्पत्त्या यस्य व्यावर्तकान्तरं नास्ति तत्वमित्यर्थलाभात् स्वतोव्यावत्तत्त्वस्यैव लक्षणत्वसम्भवे नित्यद्रव्यवृत्तित्वमनर्थकं स्यात्, यतो हि समवायस्यापि नित्यद्रव्यवृत्तितया समवाये अतिव्याप्तिवारकत्वमपि न सम्भवति। ननु अत्र वृत्तित्वं समवेतत्वमेव इतिविवक्षणीयं, तथा च समवायातिव्याप्तिवारकमेव तदितिशङ्कायां तत्रोच्यते - समवेतत्वमात्रेण तत्रातिव्याप्तिवारणं सम्भवतिचेत् नित्यद्रव्यांशवैयर्थ्यं तत्र दुर्वारमेव इत्यतःतत्र अन्त्यो नित्यद्रव्यवृत्तिरितिकारिकया विशेषाणां स्थानमेव कथ्यत इतिस्वीक्रियते । एतत्परमाणौ परमाण्वन्तरात् भेदसिद्ध्यर्थं हि विशेषः स्वीकृतः। स च भेदः विशेषं विनापि एतत्परमाणुत्वेन हेतुना एव सेत्स्यतियथा - "अयं परमाणुः परमाण्वन्तरभिन्नः, एतत्परमाणुत्वात्" इति, अतःविशेषस्वीकारे प्रयोजनं नास्ति इतिआशङ्कायां तत्र उच्यते - हेतोः यन्निरूपितप्रतियोगिकभेदसाधकत्वम् अभिमतं तदवृत्तित्वेन ज्ञात एव धर्मः भेदसाधकः हेतुः भवितुम् अर्हतिइतिस्वीक्रियते । अत्र एतत्परमाणुत्वरूपःधर्मः परमाण्वन्तरावृत्तित्वेन ज्ञातःसन् एव परमाण्वन्तरभेदसाधकः भवितुमर्हति। परन्तु परमाण्वन्तरावृत्तित्वं च केनापि हेतुना एव ज्ञातव्यं भवति। तथा च एतत्परमाणुत्वे परमाण्वन्तरावृत्तित्वसाधकहेत्वन्तरापेक्षायाम् अनवस्थाप्रसङ्गात् एतत्परमाणुत्वं न व्यावर्तकम्, किन्तु विशेष एव इतिस्वीकर्तव्यम् ।

एतद्विषये नवीनास्तु विशेषनामकमतिरिक्तपदार्थं नाङ्गीकुर्वन्ति । तेषामयमाशयः - विशेषाः यथा स्ववृत्तिधर्मं विना स्वत एव व्यावृत्ताः तथा नित्यद्रव्याण्यपि स्ववृत्तिवेशेषं विना स्वत एव व्यावृत्तानि भविष्यन्ति इतिविशेषः अनावश्यकः इति।

**आकरग्रन्थसूची**


- वैशेषिकसूत्रोपस्कारः - Vyasa Prakashan, D16/13, Manmandir, Varanasi 221001
- वैशेषिकरसायनम् - Sri Uttamur Viraraghavacharya, 5, Wason st, madras
- न्यायसिध्दान्तमुक्तावली ( दिनकरी-रामरुद्री-प्रभासहिता) - Sri Balamanorama Press, Mylapore, Madras 600004
- तर्कसङ्ग्रहः ( दीपिकाप्रकाशिका ) Elago Achukoodam, 166, R.H.Road, Mylapore, Madras 600004
- तर्कप्रवेशः (काणादसरणिः) – प्रज्ञानम्, श्रीमाता, #2/3 भारतीनगरम्, मेणसे, श्रृङ्गेरी 577139


******

 ISSN: 2320-740X

# श्रीकृष्णविलासमहाकाव्ये संलक्ष्यक्रमव्यङ्ग्यध्वनेः परामर्शः

**रमेश चन्द्र बरमोला**

सहायकाचार्यः (संविदा मु.स्वा.पी.) साहित्यम्

केन्द्रीयसंस्कृतविश्वविद्यालयः,

राजीवगान्धीपरिसरः, श्रृङ्गेरी

यद्यपि बहुविधतया काव्यांशाः काव्यस्य चारुतां प्रकाशयन्ति तथापि काव्ये कः तादृशः प्रधानभूतांशः? आहोस्वित् किं काव्यात्मभूततत्त्वम्? येन काव्यं सर्वातिशयेन शोभते इतिआलोच्यमाने काव्यतत्त्वविचक्षणाः भरतमुनिप्रभृतयः स्वीयान् सिद्धान्तान् आविष्चक्रुः। मतभेदेन रस-अलङ्कार-रीति-ध्वनि-वक्रोक्ति-औचित्यानां प्राधान्यं तैः तैः आचार्यैः प्राकाशि। विद्यमानेषु तेषु ध्वनिः निजतरङ्गैः चमत्कारातिशयेन कविप्रसूतकाव्यानि अभिसिञ्चन् नूनं वैशिष्ट्यं पुष्णाति। तल्लक्षणन्तावत्-

यत्रार्थ : शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरितिसूरिभिः कथितः[1]॥

यत्र पदे वाक्ये काव्यादौ वा उपसर्जनीकृतस्वार्थौ उपसर्जनं नाम गौणम् उत अप्रधानमित्यर्थः, अप्रधानीकृतःस्वम् आत्मा अभिधेयः, शब्दः याभ्यां तौ गुणीकृतात्मानौ अर्थःशब्दश्च इति। किमर्थमितिप्रश्ने तमर्थं यश्च अर्थः- 'सहृदयश्लाघ्यः काव्यात्मेतिव्यवस्थितः, किञ्च महाकवीनां वचनेषु सुन्दरीषु विद्यमानं लावण्यमिव सहृदयहृदयमाह्लादयति एतादृशं व्यङ्ग्यार्थं प्रकाशयतःसः तादृशः ध्वन्यते अस्मिन्निति‌ध्वनिः काव्यतत्त्वविद्भिः महत्त्वपूर्णं काव्यमितिध्वनिनाम्ना समुद्घोषितः। एतदेव सूत्ररूपेण प्रतिपादयति आचार्यमम्मटः - '**इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः**'[2] इति। तथैव दर्पणकारोऽपि- **वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्**[3] इति।

अस्य ध्वनेः प्रथमतया द्वौ भेदौ भवतः- **१.**अविवक्षितवाच्यध्वनिः, २.विवक्षितान्यपरवाच्यध्वनिश्च। अस्य विवक्षितान्यपरवाच्यध्वनेः असंलक्ष्यक्रमव्यङ्ग्यध्वनिः संलक्ष्यक्रमव्यङ्ग्यध्वनिश्च इतिद्वौ भेदौ वर्तेते। तत्र सम्यक् रूपेण लक्ष्यते वाच्यव्यङ्ग्ययोः पौर्वापर्यक्रमः यस्मिन् ध्वनौ सः संलक्ष्यक्रमव्यङ्ग्यध्वनि इतिनाम्ना व्यपदिश्यते। उदाहरणानि अस्य संलक्ष्यक्रमव्यङ्ग्यध्वनेः श्रीकृष्णविलासमहाकाव्ये परामृश्यन्ते।

सुमेरुपर्वतस्य वर्णनसन्दर्भे पद्यमिदं वर्तते-

सुरा युगान्तेषु सह प्रियाभिर्निषेदिवांसो यदधित्यकासु ।
उदन्वतामैक्यमुपागतानां पश्यन्ति कल्लोलशतप्रचारान्[4] ॥

---

1 ध्वन्यालोकः १.१३

2 काव्यप्रकाशः १.४

3 साहित्यदर्पणः ४.१

4 श्रीकृष्णविलासमहाकाव्यम् १.६

प्रलयकालेऽपि यस्य पर्वतस्य ऊर्ध्वप्रदेशेषु देवाः प्रियाभिः सह उपविशन्तःसन्तःसमुद्रस्य तरङ्गसमूहस्य गतिविशेषान् पश्यन्ति इतिवस्तुना प्रलयकालेऽपि अयं सुमेरुः पर्वतःनैव क्षीयते इतिवाच्यार्थः। इत्यनेन अन्येभ्यः पदार्थेभ्यः अस्य सुमेरोः पर्वतस्य वैशिष्ट्यं प्रतीयते। ततःअमरत्वञ्च वस्तुरूपेण ध्वन्यते । अतःवस्तुना वस्तु ध्वनिः ।

सुमेरुपर्वतस्य पराक्रमः वर्ण्यते अस्मिन् पद्ये-

मुहुर्बलादुन्नमयत्यहीन्द्रे मद्भारभुग्नं फणचक्रवालम् ।
मम प्रकम्पाश्चलिताब्धिशैला दिग्दन्तिनो हन्त कदर्थयन्ति[1] ॥

उर्वी वदति'मम शरीरभारेण नागराजः वक्रीभूतं फणानां समूहं पौनःपुन्येन महता प्रयासेन उत्तानीकरोति। तदा समुद्राः पर्वताश्च कम्पन्ते। तस्मात् ते च ऐरावतः, पुण्डरीकः, वामनः, कुमुदः, अञ्जनः, पुष्पदन्तः, सार्वभौमः, सुप्रतीकः इत्येतान् दिग्गजान् पीडयन्ति' इति। असौ वाच्यार्थः। वस्तुतःलोके समुद्राः पर्वताश्च दिग्गजान् नैव पीडयन्ति। तथापि महाकवेः काव्ये कवेः प्रौढोक्त्या तत्पीडनं सिध्यति। अत्र प्रौढोक्तिसिद्धवस्तुना उर्व्याः अत्यधिकबलशालित्वरूपं वस्तु ध्वन्यते। अतःअस्मिन् पद्ये कविप्रौढोक्तिसिद्धवस्तुना वस्तुध्वनिः ।

सञ्चरद्भिः दैत्यसैनिकैः आच्छादितस्य सुमेरुपर्वतस्य वर्णनपरं पद्यमिदम्-

आशामुखेषु भ्रमतामजस्रं तेषां चमूभिः परिसर्पिणीभिः।
तिरोहितामंशुमतो मयूखा न क्वापि मां संप्रतिसंस्पृशन्ति[2]॥

सर्वासां दिशां मुखभागेषु दैत्यसैनिकाः निरन्तरं सञ्चरन्ति। सञ्चरद्भिः दैत्यसैनिकैः आच्छादितां माम् उर्वी इदानीं कुत्रापि भास्करस्य किरणाः नैव संस्पृशन्ति इत्यर्थः। तेन वस्तुना उर्व्याम् ईषदपि स्थलं रिक्तं नास्ति उर्वी दैत्यसैनिकैः समाक्रान्ता वर्तते। अत्र दैत्यसैनिकानां संख्याबाहुल्यं व्यज्यते। तेन भास्करस्य किरणानां संयोगाभावाद् उर्व्याः दुःखातिशयः ध्वन्यते।

भगवतःविष्णोः सौन्दर्यवर्णनप्रसङ्गे पद्यमिदं वर्तते-

नवाभ्रवर्णं नलिनायताक्षं पीताम्बरं हारकिरीटिनं त्वाम् ।
वयन्तु सेवेमहि वीक्षमाणाः सायुज्यमन्विच्छतिकः सुखार्थी[3]॥

वयं भक्ताः नवघनच्छायं कमलविशालनेत्रं पीतवस्त्रधरं हारकिरीटिनं भवन्तं मूर्तिरूपं पश्यन्तःभजेम। पुनः कः सुखाभिलाषी निराकारं परब्रह्म प्राप्तुम् अभिलषति? न कोऽपि इतिवाच्यार्थः। तेन अमूर्ते परब्रह्मणि एतादृशं विलक्षणम् अद्वितीयं सौन्दर्यच्छटावैशिष्ट्यं द्रष्टुं नैव शक्यते इतिध्वन्यते । निर्गुणपरब्रह्मापेक्षया भगवतःविष्णोः अतिशयवर्णनेन व्यतिरेकालङ्कारः ध्वन्यते।

देवानाम् आत्मरक्षार्थं नारायणं प्रतिप्रार्थनावसरे पद्यमिदं वर्तते-

---

1 श्रीकृष्णविलासमहाकाव्यम् १.२२

2 श्रीकृष्णविलासमहाकाव्यम् १.२३

3 श्रीकृष्णविलासमहाकाव्यम् १.५१

 **ISSN: 2320-740X**

अनेकधा पालयितारमेवं सम्प्रत्यपि त्वां शरणं प्रपन्नाः।
सन्तापहारी ननु चातकानां भूयोऽपि भूयोऽपि पयोद एव[1]॥

हे! नारायण! त्वं बहुधा अस्मान् देवान् अरक्षीः। वयम् अधुनापि रक्षयितुः तव शरणमागताः। चातकपक्षिविशेषाणां पुनःपुनरपि पिपासापहर्ता मेघः एव न अन्यः इतिवाच्यार्थः। तेन यथा पयोदः चातकपक्षिणां सन्तापपिपासां अपहरतितथैव भवान् शरणागतानां सन्तापकष्टम् अपहरति। अतःसन्तापहरणे पयोदसदृशः भवान् इतिउपमालङ्कारः ध्वन्यते । किञ्च बहुधा पालयितारम् इत्यस्मात् भगवतःनारायणस्य व्यज्यमानेन पराक्रमेण उत्साहस्थायिकः वीररसोऽपि ध्वन्यते।

कंसः यमादीनां शस्त्राणि आहर्तुं दूतान् प्रेषयति। तत्सन्दर्भे पद्यमिदम्-

दण्डं यमात्पाशमपामधीशात् गदां कुबेरात् कुलिशं मघोनः।
आदातुकामः प्रहिणोतिदूतान् कंसः स्वदोर्विक्रमनिर्जिताशः[2]॥

निजबाहुपराक्रमेण सर्वदिग्जितःसः कंसः यमस्य दण्डं वरुणस्य पाशं कुबेरस्य गदां इन्द्रस्य वज्रञ्च आहर्तुं स्वदूतान् प्रेषयतिइतिवाच्यार्थः। अनेन यमः वरुणः कुबेरः इन्द्रश्च एते सर्वेऽपि मया कंसेन साकं योद्धुम् असमर्थाः वर्तन्ते। तस्मात् एतेषु यमादिषु आयुधानां किं प्रयोजनम् ? न किमपि प्रयोजनम् इतिवस्तु ध्वन्यते। अतःवस्तुना वस्तुध्वनिः ।

कंसः देवकीं हन्तुं यदा उद्युक्तः तदा वसुदेवःकंसं ब्रवीति-

भयेन युद्धेषु पुरन्दरादीन् सुरान् पराचस्त्रपया विमुञ्चन्।
महीश्वर! स्त्रीवधपातकेऽस्मिन् कथं तवोपक्रमते कृपाणः[3]॥

हे कंस ! युद्धेषु तव भयात् इन्द्रादिदेवाः विमुखाः सञ्जाताः। तस्मात् कारणात् लज्जया त्वं तेषु विमुखेषु खड्गप्रहारं नैव अकार्षीः। किन्तु, साम्प्रतं स्त्रीवधपापकर्मणि कथं तव खड्गः प्रवर्तते इतिवाच्यार्थः। तेन स्त्रीहननं भवतःकृते अतिशयं लज्जास्पदं त्वदीयपराक्रमवैरुध्यं लोकनिन्द्यञ्च कर्म इतिध्वन्यते ।

वर्षाऋतोः वर्णनप्रसङ्गे पद्यमिदम्-

स्मरेण लोकत्रितयेश्वरेण सम्भाविताज्जीवितनिर्विशेषम् ।
ऋतोर्वसन्ताज्जलदागमस्य जहार जातिर्निखिलं निकर्षम्[4] ॥

पयोदसमयस्य त्रयाणां लोकानां नाथेन कामेन जीवितसमानं कल्पितात् सुरभिकालात् अपकर्षं इतरगुणेभ्यः जातिमहत्वमेव श्रेष्ठमितिध्वन्यते ।

मथुरायां महोत्पाताः प्रादुरासन् परश्शतम् ।
कंसस्य कालमासन्नं सूचयन्तस्सुदारुणम्[5] ॥

---

1 श्रीकृष्णविलासमहाकाव्यम् १.६७

2 श्रीकृष्णविलासमहाकाव्यम् १.७१

3 श्रीकृष्णविलासमहाकाव्यम् २.११

4 श्रीकृष्णविलासमहाकाव्यम् २.३९

5 श्रीकृष्णविलासमहाकाव्यम्.८.१

मथुरानगर्यां भूपतेः कंसस्य भयङ्करम् उपस्थितं समयं सूचयितुं बहवः प्राणिनां शुभाशुभसूचकाः महोत्पाताः अकस्माद् आगताः इत्यर्थः। अत्र सुदारुणम् आसन्नम् इतिद्वाभ्यां पदाभ्यां कंसः झटित्येव मरिष्यतिइतिध्वन्यते ।

पिशितोत्पाटनायेव दैत्यानां वधमेष्यताम् ।

तद्रत्नसौधशिखरे गृध्रास्तुण्डमशातयन्[1] ॥

मांसभक्षिणः पक्षिविशेषाः गृध्राः नाशं गमिष्यताम् असुराणां शरीरमांसानि भोक्तुम् इव कंसस्य राजभवने विद्यमाने रत्नयुक्तकलशे लपनम् अशातयन् इत्यर्थः। अत्र गृध्राः कंसस्य राजसभायां विद्यमाने रत्नकलशे स्वतुण्डम् अशातयन् ।तच्च दैत्यानां मांसानाम् उत्पाटनाय इव इतिसम्भावितत्वात् उत्प्रेक्षालङ्कारः। तेन उत्प्रेक्षालङ्कारेण कंसस्य राजभवने आन्तरिकनाशसूचना इतिवस्तु ध्वन्यते । तस्मात् अर्थशक्तिमूलध्वनौ अलङ्कारेण वस्तुध्वनिः । किञ्च यथा मांसहन्तारः मांसकर्तनस्य प्राक् आयुधं तैक्ष्ण्यं कुर्वन्ति तदनन्तरमेव जीवान् घ्नन्ति । तथैव गृध्राः मांसानाम् उत्पाटनात् प्राक् रत्नकलशे स्वतुण्डेषु तीक्ष्णतां सम्पादनाय स्थापयन्ति इतिउपमालङ्कारोऽपि ध्वन्यते।

कृष्णकंसयोः युद्धसन्दर्भे पद्यमिदं वर्तते-

जयन्तु जगदाधाराः गोब्राह्मणदिवौकसः।

ब्रुवन्नित्यपतत्तस्मिन् वैनतेय इवोरगे[2]॥

अत्र कृष्णः कंसे, वैनतेय इव सर्पे अपतत् इतिकथनात् वाच्यः पूर्णोपमालङ्कारः । तेन कंसस्य झटित्येव मरणं भवतिइतिवस्तु ध्वन्यते । अतोऽत्र स्वतस्सम्भविना अलङ्कारेण वस्तुध्वनिः व्यज्यते। किञ्च गोब्राह्मणदिवौकसः प्रतिकृष्णनिष्ठभक्तिभावस्य व्यञ्जनात् भावध्वनिरपि सङ्गच्छते।

एवं रीत्या श्रीकृष्णविलासमहाकाव्यस्य पद्येषु ध्वनिप्रपञ्चस्य परामर्शेन **सद्यः परनिर्वृतिः** इतिकाव्यस्य परमं प्रयोजनं प्राप्तुं शक्यते इति।

**सन्दर्भग्रन्थाः**

मम्मटभट्टः, काव्यप्रकाशः, नागेश्वरीटीका, चौखम्बसंस्कृतसंस्थानम् , १९९५

आनन्दवर्धनः, ध्वन्यालोकः, लोचनव्याख्या, चौखम्बाकृष्णदास अकादमी देहली, २००५

आनन्दवर्धनः, ध्वन्यालोकः, दीधितिव्याख्या, चौखम्बाकृष्णदास अकादमी, २०१०

सुकुमारकविः, श्रीकृष्णविलासमहाकाव्यम्, आचार्यप्रकाशन इलाहबाद, २०१३

सुकुमारकविः, श्रीकृष्णविलासमहाकाव्यम्, राष्ट्रियसंस्कृतसंस्थानम्, २००६

विश्वनाथः, साहित्यदर्पणम्, चन्द्रकला, चौखम्बा विद्याभवनम्, १९९१

******

1 श्रीकृष्णविलासमहाकाव्यम् ८.४

2 श्रीकृष्णविलासमहाकाव्यम् ८.१७२


**ISSN: 2320-740X**

# पदवृत्तिप्रपञ्चनम्


**कार्तिक् भाग्वत्**

व्याकरणसहप्राध्यापकः

मुम्बादेवी आदर्शसंस्कृतमहाविद्यालयः, मुम्बई



**शोधसारः -**

"साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः । अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम् ॥" इतिपङ्क्तिस्तु सार्वजनीना । शब्दस्य साधुत्वानुशासनार्थं प्रवृत्तैषा स्मृतिः । ते च शब्दाः द्विविधाः ध्वन्यात्मकाः वर्णात्मकाः च । तत्र च शब्देन श्रावणप्रत्यक्षजन्यं ज्ञानं वृत्तिजन्यम् । सा च वृत्तिः तत्तद्दार्शनिकाभिप्रायेण बहुधा भिन्ना । कैश्चित् द्वे वृत्ती, कैश्चिच्च तिस्रो वृत्तयः, अन्यैश्च ततोऽधिकाः वृत्तयः अभ्युपगताः । तत्र विप्रतिपत्तयोपि बहवः। स्फोटाख्यस्याद्वितीयस्य ब्रह्मणः शब्दव्यङ्ग्यत्वमङ्गीकर्तृभिः वैयाकरणनव्यैः द्वे वृत्ती अङ्गीकृते शक्तिर्व्यञ्जनेति। बहुधा दार्शनिकैरङ्गीकृता लक्षणा वैयाकरणैः त्यक्ता । लक्षणया जन्यः बोधः अवश्यमेव सर्वजनमानसप्रसिद्धः तु अङ्गीकरणीय एव । अतः तज्जन्यबोधसिद्धिः, नैयायिकैस्तिरस्कृतायाः व्यञ्जनायाः सिद्धिःच प्रतिपादनीया इतिधिया तद्दिशि प्रयत्नः अयम् इति शम् ॥



**मुख्यशब्दाः** - वृत्तिः, शक्तिः, लक्षणा, व्यञ्जना, स्फोटः


स्फोटः इतिभारतीयव्याकरणपरम्परायां पाणिनीयदर्शनस्य च महत्त्वपूर्णो विषयः। सः स्फोटः कः? इतिप्रश्नस्योत्तरं भाष्यकारेण न्यस्तं यत् 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवतिस शब्दः[1]' इति। यस्मिन् समये शब्दस्य यः निर्धारितोऽर्थःस्फुटतिस एव स्फोटः । स्फुट्यते अर्थःअभिव्यज्यते अनेन इति, स्फुटन्ति प्रकटीभवन्ति अर्थाः यस्मात् स इतिवा स्फोटोऽसौ शब्दव्यङ्ग्यः अर्थव्यञ्जकश्च । वर्णपदवाक्यभेदेन स्फोटस्त्रिधा । तत्रापि जातिव्यक्तिभेदेन पुनः षोढा । अखण्डपदस्फोटोऽखण्डवाक्यस्फोटश्चेतिसङ्कलनयाऽष्टौ स्फोटाः । तत्र वाक्यस्फोटो मुख्यः,तस्यैव लोके अर्थबोधकत्वात्तेनैव अर्थसमाप्तेश्चेति। श्रूयते च एवं – 'वाक्यस्फोटोतिनिष्कर्षे तिष्ठतीतिमतस्थितिः' इति। सम्प्रतिसर्वदार्शनिकाद्यलङ्कारपर्यन्तैर्बहुविचार्यमाणः बहुतरवादखण्डनादिभूयिष्ठः विषयः वैयाकरणकुले पदवृत्तिप्रपञ्चनमितिशीर्षकमादायोपस्थाप्यते ।

लोके गौरस्ति, गौरागच्छतिइत्यादिवाक्येभ्यः गवानयनरूपार्थप्रतीतिः गोरश्वः पुरुषेत्यादिपदश्रवणेन च गवाश्वादीनां प्रतिपत्तिःच सर्वानुभूता । किन्तु न हि सर्वः शब्दःसर्वमर्थजातं बोधयति। यतो हि घटशब्दोच्चारणे घटरूपार्थस्यैव प्रतीतिः न पटादेः । इत्थमवबुध्यते यत् शब्दार्थयोरस्ति कश्चन सम्बन्धः, येन शब्दःस्वसम्बद्धमेवार्थं प्रतिपादयतीति। सः क इतिजिज्ञासायां नासौ संयोगः, तस्य द्रव्याश्रितत्वनियमात्, शब्दस्याद्रव्यत्वात् । वैयाकरणमते हि शब्दार्थयोर्भेदाभावेन तदसम्भव एव । अस्तु तर्हि अभेद एव सम्बन्धः इति न वाच्यम् - तस्य सम्बन्धत्वायोगात् ।

---

1 पस्पशाह्निके भाष्यम् ।

सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सतिद्विष्ठत्वे सतिसंसर्गतया विशिष्टबुद्धिनियामकः । नेदं सम्भवत्यभेदे । नापि कालिकसम्बन्धः, अतीतानागतयोरपि बोधापत्तेः । नापि समवायः – गुणगुण्यादेरेव तत्सम्भवात् । तस्मात् शब्दार्थयोः सम्बन्धः कॢप्तसम्बन्धव्यतिरिक्त इतिसर्वाभिमतमेव । उक्तं च हरिणा –

‘उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते । शक्तीनामसौ शक्तिः गुणानामप्ययं गुणः’ ॥

स च सम्बन्ध एव तत्त्वविद्भिः वृत्तिरित्यभिधीयते । सा च वृत्तिःदर्शनानुसारेण बहुधा भिन्नाथापि समयेऽस्मिन् वैयाकरणीये शाब्दबोधे कारणत्वेनापेक्षिता वृत्तिःद्विविधा – शक्तिर्व्यञ्जना च । सा च शक्तिः वाच्यवाचकभावापरपर्याया । अखण्डोपाधिरूपा ।

अत्र नैयायिकाः – प्रथमान्तमुख्यविशेष्यकशाब्दबोधवादिनः ’अस्माच्छब्दादयमर्थो बोद्धव्य’ इतिअर्थविशेष्यिका ’इदं पदमिममर्थं बोधयत्विति’ पदविशेष्यिका वा ईश्वरेच्छा शक्तिरित्याशेरते । परमेवं रीत्या प्रतिपादनन्न युक्तम्, ईश्वरेच्छारूपशक्तिस्वीकारे आधुनिकसङ्केतेषु ईश्वरेच्छाया अभावात् शक्त्यसम्भवरूपदोष इत्याक्षिप्ते तदेवं समादधुः यत् – सा च शक्तिः आधुनिकसङ्केतेष्यस्ति । ‘एकादशे अहनि पिता नाम कुर्यात्’ इतिश्रुत्या तत्रापि ईश्वरेच्छायाः सत्त्वमेव । एकादशाहकालीनपित्रुच्चारणविषयनामत्वेन सामान्यरूपेणेच्छा ईश्वरस्य इति। न च तत्र श्रुतिबलात् प्रामाण्यकल्पनेऽपि ग्रामनगरनद्यादिषु शक्त्यसम्भवरूपदोषः, तत्र ईश्वरेच्छायाः अभावात् । केचित्तु तत्र शक्तिभ्रमाल्लक्षणया बोधः इतिकल्पयाम इत्याहुः ।

तत्रैव नैयायिकनव्यास्तु इच्छामात्रस्य शक्तित्वमाशेरते । तथा सतिग्रामनगरनद्यादिषु दोषासम्भवेऽपि पटादिबोधनेच्छयास्माभिः घटादिपदप्रयोगेपि घटादिपदानां पटादिरूपार्थनिरूपितशक्तिमत्वापत्तिः। तथैव घटपदं पटरूपार्थं बोधयत्वितीच्छायाः सत्त्वात् । तस्मात् इच्छारूपा वा ईश्वरेच्छारूपा न शक्तिः, अन्यरूपैव सा ।

किञ्च शक्तिग्राहकप्रमाणानि व्याकरणोपमानादीन्येव प्रतिपादयत्याचार्यः । श्रूयते च एवं ’शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च’ इत्यादि । तेषु शक्तिग्राहकशिरोमणित्वेनाभिप्रेतेन प्रयोज्यप्रयोजकवृद्धव्यवहारेण नैयायिकाभिप्रेतशक्तेः दुर्ग्रह एव । तथा ह्ययमस्ति व्यवहारः – प्रयोजकवृद्धोच्चारितं पटमानयेत्यादिवाक्यमाकर्ण्य पटानयने प्रवृत्तं प्रयोज्यवृद्धमवलोकयन् बालः पटानयनं प्रवृत्तिजन्यं चेष्टात्वात्, मदीयस्तन्यपानादिचेष्टावत् इत्याद्यनुमानेन प्रयोज्यवृद्धस्य पटानयनजनिकां प्रवृत्तिमनुमाय, सा च प्रवृत्तिःपटकर्मिकानयनविशेष्यककार्यज्ञानजन्या प्रवृत्तित्वात्, मदीयप्रवृत्तिवदित्यनुमानेन प्रयोज्यवृद्धस्य घटकर्मकानयनविशेष्यककार्यताज्ञानमनुमाय, तच्च कार्यताज्ञानं पटमानयेतिवाक्यजन्यम्, तदन्वयव्यतिरेकानुविधायित्वात् इत्यनुमानेन त्रयेण तत्र वाक्ये तादृशज्ञानजनकत्वमनुमिनोति। तदनन्तरम् आवापोद्वापाभ्यामन्वयव्यतिरेकाभ्यां पदेष्वपि पदार्थबोधकत्वं परिकल्प्य, यथा तत्तद्विषयासम्बद्धानामिन्द्रियाणां तत्तद्विषयकप्रत्यक्षज्ञानजनकत्वं नोपपद्यते तद्वदेव अर्थैरसम्बद्धनां पदानाम् अर्थबोधकत्वं कथं स्यादितिअनुमितिं मनसि निधाय, अर्थबोधकत्वोपपादकत्वेन शब्दार्थयोः शक्तिरूपसम्बन्धमध्यवस्यति। तथा बोधजनकतान्यथानुपपत्त्या कल्प्यमानः शक्तिरूपःयः सम्बन्धः स बोधरूपकार्योत्पत्तेः प्रागावश्यकः कार्यनियतपूर्ववृत्तित्वात् कारणस्य । परन्तु

 ISSN: 2320-740X

तवाभिप्रेतेश्वरेच्छारूपसम्बन्धस्य तदानीमसिद्धत्वेन, अविद्यमानस्य च ज्ञातुमशक्यत्वेन, ज्ञातायाः एव शक्तेः बोधजनकत्वेन, तदानीं नैयायिकाभिमतशक्तिज्ञानस्यासम्भवात् नार्थबोधकत्वम् उपपादयितुं शक्यम् । यदि तु तदुपपादनाङ्गत्वेन मार्गान्तराश्रयणं तर्हि व्यवहारस्य शक्तिग्राहकत्वोच्छेदापत्तिः, यच्च सर्वविरुद्धम् ।

किञ्च सम्बन्धो नाम – सम्बन्धिभ्यां भिन्नः, द्विष्ठो, आश्रयतया विशिष्टबुद्धिनियामकश्च भवतीत्यभियुक्तव्यवहारः । यथा घटवद्भूतलमित्यत्र संयोगरूपःसम्बन्धः सम्बन्धिभ्यां भिन्नो द्विष्ठो घटनिरूपितसंयोगाश्रयो भूतलमितिविशिष्टबुद्धिनियामकश्च । नात्र घटशब्दःइच्छावान्, तदर्थो वा इच्छावानित्यस्ति व्यवहारः । तस्मात् इच्छायाः सम्बन्धत्वमेवासङ्गतम् । तस्याः आत्मनि समवेतायाः शब्दार्थरूपसम्बन्धिद्वयवृत्तित्वासम्भव एव । न च विषयतासम्बन्धेन इच्छायाः शब्दार्थोभयवृत्तित्वं वाच्यम्, विषयतासम्बन्धस्य वृत्यनियामकत्वात् । तस्मादेव इच्छाविषयेऽपि घटे इच्छवान् घटः इतिप्रतीतिः न कस्यचन ।

किञ्च इच्छयाः एव कारणत्वनियामकत्वे दण्डात् घटो जायताम् इतीच्छाविषयत्वमेव दण्डस्य घटोत्पत्तौ कारणतेति, तदितरेषां लोकप्रसिद्धानां कारणतैव न स्यात् । किञ्च धूमेन वह्निः जायतामित्यत्र धूमवह्न्योर्यदि इच्छयैव सम्बन्धः तर्हि व्याप्तेः तत्त्वकल्पनमप्यनुचितमेव स्यात् ।

यदपि दीक्षितादयः घटादिविषयकबोधजनने घटादिपदानां सामर्थ्यमेव शक्तिः, सैव सबन्ध इत्यभिप्रयन्ति । यत्र घटपदगजोभयविषयकसमूहालम्बनस्मरणात् घटशाब्दबोधः तत्र घटबोधसमूहालम्बनज्ञानविषयत्वस्य गजेपि सत्वात् गजस्यापि घटवाचकत्ववारणाय बोधजनकतावच्छेदकविषयताकत्वं शक्तिः इतिस्वीकार्यमितिवदन्ति तन्न । स्वेनैव स्वस्योपपादनात् आत्माश्रयापत्तेः । तद्यथा चक्षुरादिभिः घटादिप्रत्यक्षजनने चक्षुर्घटयोः मध्ये जनकत्वं विहायापि संयोगरूपसम्बन्धान्तरं विवक्षितम् । तथा चात्र बोधजनकत्वस्य सम्बन्धत्वे जनकत्वसम्बन्धं विना अन्याभावात् आत्माश्रयतापत्त्या दोषः । किञ्च बोधजनकत्वस्य पदमात्रवृत्तित्वेन इच्छावत्सम्बन्धत्वासम्भव एव । तस्मात् शब्दार्थयोस्सम्बन्धान्तरमेव शक्तिः – वाच्यवाचकभावापरपर्याया ॥

ननु कथमस्य सम्बन्धत्वं, यतो हि 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इतिन्यायानुरोधेन वाच्यभावःवाचकभावःइतिच लभ्यते । वाच्यभावः= बोधविषयत्वरूपः, वाचकभावः= बोधजनकत्वरूपः। एवं च बोधजनकत्वस्य पदमात्रवृत्तिता, बोधविषयत्वस्य च अर्थमात्रवृत्तित्वमितिभवत्पूर्वप्रतिभादितल्लक्षणासमन्वय एव, इतिचेत् न ॥ वाच्यवाचकभावस्य अखण्डोपाधित्वात् । अतःतस्य शब्दार्थोभयवृत्तित्वेन विशिष्टबुद्धिनियामकत्वेन च सम्बन्धत्वं सुस्थम् ।

तद्ग्राहकञ्च इतरेतराध्यासरूपं तादात्म्यम् । उक्तं च पातञ्जले भाष्ये[1] - “सङ्केतस्तु पदपदार्थयोः इतरेतराध्यासरूपःस्मृत्यात्मकः, योऽयं शब्दःसोऽर्थः, योऽयमर्थःस शब्दः” इति। इतरेतराध्यासरूपःइत्यस्य इतरेतराध्यासो रूप्यतेऽनेन इतिकरणे घञ् । इतरेतराध्याससाध्यः इत्यर्थः। स्मृत्यात्मकः इत्यनेन गृहीतस्य एव सङ्केतस्य

1 पातञ्जलं भाष्यमित्यस्य पतञ्जलिमुनिना कृतस्य सूत्रस्य यद्भाष्यं तदित्यर्थः।

ISSN: 2320-740X

शक्तिग्राहकत्वं सिद्धम् । किं च स्मृत्यात्मकः इत्युक्ते पाणिन्यादिस्मृतिः आत्मा यस्य सः इति। एवं च पाणिन्यादिस्मार्तसङ्केतेस्य वाचकतानियामकत्वं सिद्धम् । एवं चाधुनिकसङ्केतस्थले द्वादशेऽह्नि क्रियमाणे नामनि घटगोविन्दादिषु शक्यतावच्छेदकारोपात् बोधः । तत्र सङ्केतःशक्तिग्राहकः, न तु शक्तिः । भेदाभेदरूपस्य तस्य सम्बन्धत्वायोगात् । भेदसम्बन्धस्तु अप्रसिद्धः । अभेदस्य न्यक्कृतं सम्बन्धत्वम् । शक्त्युपकारकत्वात् शक्तित्वव्यवहारः "मम आत्मा भद्रसेनः" इतिसेवके व्यवहारवत् ।

तस्मादेव 'तस्य भावस्त्वतलौ' इतिसूत्रे "प्रकृतिजन्यबोधे प्रकारीभूतःअर्थःभावप्रत्ययार्थः' इतिन्यायानुसारं 'डित्थादिषु प्रकृत्यर्थव्यतिरिक्तप्रत्ययार्थाभावात् भावप्रत्ययान्तवृत्तिःन प्राप्नोतिडित्थत्वमितिइत्याशङ्क्य प्राथमकल्पिकेन कृतां क्रियां, गुणं वा यः कश्चित्करोतिस उच्यते डित्थत्वमितिते एतत् एवं डित्थाः कुर्वन्तीति। प्राथमकल्पिके कथमितिचेत् – काथञ्चित्कः प्रयोगः, एकैव व्यक्तिः प्रकारतया विशेष्यतया च भासते' इत्यर्थकमुक्तम् भाष्ये[1] । द्वादशेऽहनि पिता नाम कुर्यादितिश्रुत्या स्मृत्या वा नामत्वेन नामबोधेऽपि तत्तद्रूपेण ईश्वरेण सङ्केताकरणेन तत्र आरोप एव ।

कः शब्दः? कोऽर्थः? इतिप्रश्ने घट इत्ययं शब्दःघट इत्ययमर्थःइत्येकाकारोत्तरदर्शनात्, वृद्धिरादैचितिस्मृत्या, ओमित्येकाक्षरं ब्रह्म इत्यादिश्रुत्या च शब्दार्थयोः इतरेतराध्यासरूपं तादात्म्यं सर्वसम्मतम् । तादात्म्यं च तद्भिन्नत्वे सतितदभेदेन प्रतीयमानत्वम् । अभेदस्य अध्यस्थत्वेन नाग्न्याद्युच्चारणे मुखे दाहाद्यनुभवाद्यापत्तिः। वास्तविकाभेदेऽपि न वैयाकरणानां क्षतिः, पदार्थस्यापि बुद्धिस्थत्वात् । शशशृङ्गवन्ध्यासुतादीनां प्रातिपदिकत्वसिद्ध्यर्थत्वेन तदादर्तव्यत्वाच्च । तस्मात् तादात्म्यस्य निरूपकत्वेन विवक्षितोर्थःशक्यः, आश्रयत्वेन विवक्षितोऽर्थःशक्तः इतिच उच्यते । शब्दार्थयोः तादात्म्यादेव श्लोकमशृणोत् अथ अर्थं शृणोति, अर्थं वदतिइत्यादिव्यवहाराः रामेतिद्व्यक्षरं नाम मानभङ्गः पिनाकिनाम् इत्यादिप्रयोगाः आबहोः कालादपि प्रचलिताः सेत्स्यन्ति ।

एषा च शक्तिः साधुष्विव अपभ्रंशेष्वप्यस्ति । शक्तिग्राहकशिरोमणेर्व्यवहारस्य तत्रापि तुल्यत्वात् । अत एव "सामयिकः शब्दादर्थप्रत्ययः" इतिवैशेषिकसूत्रमपि सङ्गच्छते । उक्तं च हरिणा "वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः" इति। आप्तोपदेशः शब्दःइत्यत्र वात्स्यायनः न्यायभाष्यकारोऽपि "ऋष्यार्यम्लेच्छानां समानमाप्तलक्षणम्" इति। अभिहितमेवं महाभाष्ये भगवता पतञ्जलिना "समानायामर्थावगतौ शब्देनापशब्देन च, तत्र नियमः क्रियते" इति। एवं एतादृशैः प्रसङ्गैरिदमभिप्रेतं भवतियत् साधव इव अपभ्रंशा अपि अर्थप्रतिपादनसमर्था इति। अत एव मीमांसकानामार्यम्लेच्छाधिकरणं सङ्गच्छते । न च अपभ्रंशेष्वपि शक्तिसत्त्वे अर्थवत्वेन प्रातिपदिकत्वात् स्वाद्युत्पत्त्या साधुत्वापत्तिप्रसङ्गः इतिचेत् न । साधुत्वस्य च व्याकरणव्यङ्ग्यार्थविशिष्टशब्दनिष्ठपुण्यजनकतावच्छेदक-जातिविशेषत्वात् ।

सा चा शक्तिस्त्रिधा –

---

1 तस्य भावः त्वतलौ इति सूत्रे भाष्यम् ।

 ISSN: 2320-740X

- शास्त्रकृत्कल्पितावयवशक्त्यन्विता पाचकादिषु स्थिता योगः ।
- तदभाववत्वे सतिसमुदायशक्तिनिरूपिता मणिनूपुरादिस्थिता रूढिः ।
- शास्त्रकल्पितावयवार्थविशेषणीभूतार्थनिरूपिता रूढ्यर्थान्वितपङ्कजादिव्याप्ता योगरूढिः[1] ।

एषैव शक्तिः पुनः प्रकारान्तरेण द्विधा । सर्वलोकतन्त्रवेद्या कोशादिषु स्थिता प्रसिद्धा । सहृदयहृदयवेद्या प्रकरणादिगम्या अप्रसिद्धा । एवं च गङ्गायां घोषः इत्यत्र गङ्गाशब्दस्य प्रवाहे प्रसिद्धा, तीरेऽप्रसिद्धा च शक्तिः । "सर्वे सर्वार्थाभिधानसमार्थाः"[2] । एवं च सर्वत्रापि शक्यतावच्छेदकारोपेण शक्त्यैव बोधः । तत्र च 'पुंयोगादाख्याया'मितिभाष्यं मानम् । स्त्रियां वर्तमानात् पुंवाचकात् शब्दात् ङीष्विधीयते सूत्रेण । गोपे गोपालनकर्तृत्वेऽपि तत्स्त्रियां तत्वाभावात् कथं गोपत्वव्यपदेशः इतिपृष्ट्वा गोपत्वमारोप्यते इत्युक्तम् । तत्रैव कैयटे "आरोप्यते च ताद्रूप्यम्' इत्युक्तम् । तत्र च भाष्ये 'चतुर्भिः प्रकारैः तस्मिन् स इत्येतद्भवतितात्स्थ्यात्, ताद्धर्म्यात्, तत्सामीप्यात्, तत्साहचर्यात् – मञ्चा हसन्ति, सिंहो माणवकः, गङ्गायां घोष, यष्टीः प्रवेशय" इत्युक्तम्[3] । तत्र कैयटोऽप्याह – "बालेषु मञ्चत्वारोपात् मञ्चपदप्रवृत्तिः" इति।

तत्र तावत् शक्यसम्बन्धो लक्षणा इतितु नोचितम् । गभीरायां नद्यां घोषः इत्यादौ दोषापत्तेः । यतो हि न तावत् गभीरपदं तीरलक्षकं नद्यामित्यस्यानन्वयापत्तेः, न हि तीरं नदी । अत एव न नदीपदेऽपि गभीरपदार्थानन्वयात् न हि तीरं गभीरम् । न च प्रत्येकं पदद्वये सा, विशिष्टनदीबोधानापत्तेः । किं च एकं तात्पर्यग्राहकमपरत्र गभीरत्वविशिष्टनदीतीरे लक्षणा इतिचेत् तत् किम् इत्यत्रैव विनिगमनाविरहः ।

लक्षणायाः वृत्यन्तरत्वे कार्यकारणभावद्वयं कल्पनीयमित्यपि दोषः । तथा हि – बोधं प्रतिवृत्तिजन्योपस्थितिः कारणम् । तत्र शक्त्या यत्र बोधः तत्र लक्षणायाः अभावात् कारणाभावेऽपि कार्यसिद्धिरूपदोषवारणाय शक्त्याख्यवृत्तिजन्योपस्थितिः तादृशशाब्दबोधं प्रतिकारणम् । लक्षणाख्यवृत्तिजन्योपस्थितिः तादृशशाब्दबोधं प्रतिकारणमितिकार्यकारणभावद्वयं कल्पनीयमितिदोषः ।

किञ्च गङ्गायां मीनघोषौ स्तः इत्यत्र अन्यसाकाङ्क्षत्वेन द्वन्द्वस्यैवासाधुतापत्तिश्च । अस्मन्मते तु उभयत्रापि गङ्गात्वमेव प्रवृत्तिनिमित्तमित्यदोषः । हरिरप्याह – 'अर्थमात्रं विपर्यस्तं, शब्दःस्वार्थे व्यवस्थितः' इति। अतः'सतितात्पर्ये सर्वे सर्वार्थवाचकाः' इतिभाष्यात् लक्षणा नास्त्यैव । सतितात्पर्ये इतिकथनात् घटपदात् न पटप्रत्ययः । अत एव लोके 'ममेदं तात्पर्यमिति' व्यवहरन्तो दृश्यन्ते । तस्मात् आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्वयव्यक्तिबोधे, व्यक्तिविशेषबोधे वा लक्षणा इतिव्यवाहारः इतरेषाम् ।

एवं च गङायां घोषः इत्यत्र तीरे गङ्गात्वारोपेपि ततःप्रतीयमानस्य शैत्यपावनत्वयोः कथं भानमितिचेत् – व्यञ्जनया इत्यभिदध्महे । व्यञ्जना कः पदार्थःइतिचेत् – मुख्यार्थबाधनिरपेक्षबोधजनकः, मुख्यार्थसम्बद्धासम्बद्धसाधारणः,

---

1 केचित्त्वत्र अश्वगन्धादिसिध्यर्थं योगजरूढिमाश्रयन्ति, तन्मुधैव । तत्र प्रासङ्गिकेनैव अर्थनिश्चयात् । न ह्येकस्मिन् काले एकधोच्चारिते पदे उभयसम्भवः ।

2 योगवाचस्पत्यम् ।

3 तात्स्थ्यात् तथैव ताद्धर्म्यात् तस्तामीप्यात् तथैव च । तत्साहचर्यात् तादर्थ्यात् ज्ञेया वै लक्षणा बुधैः ॥ इति च श्लोकस्तु प्रसिद्ध एव ।

प्रसिद्धाप्रसिद्धार्थविषयकः, वक्त्रादितात्पर्यप्रतिभाद्युद्बुद्धसंस्कारविशेषो व्यञ्जना । मुख्यार्थबाधनिरपेक्षबोधजनकः, मुख्यार्थसम्बद्धासम्बद्धसाधारणः इतिदलद्वयेन व्यञ्जनायाः लक्षणातो भेदः सिद्धः । तस्याः मुख्यार्थबाधग्रहाधीनत्वात्, मुख्यार्थावश्यसम्बद्धत्वात् च । प्रसिद्धाप्रसिद्धार्थविषयकः इतिदलेन शक्तेः भेदः, तस्याः प्रसिद्धार्थमात्रवृत्तित्वात् । वक्त्रादितात्पर्यप्रतिभाद्युद्बुद्धसंस्कारः इत्यनेन सहकारिकारणानि प्रतिपादितानि । तस्मात् सर्वदा, सर्वस्य च ईदृश एव बोधः भवेदितितु न काङ्क्ष्यं, सहकारिकारणादीनाम् अनुपस्थितौ तदसम्भवात् । तानि च - 'संयोगो विप्रयोगश्च साहचर्यं विरोधिता । अर्थःप्रकारणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥ सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥' इति।

यत्तु तार्किकाः केचित् व्यञ्जनायाः लक्षणयैव गतार्थत्वमाहुः तन्न । अनुमित्यर्थं व्याप्तिग्रहस्य नितान्तमपेक्षितत्वात्, सर्वविधसहचारदर्शनालिङ्गितकोटिशः विशिष्टप्रत्ययविषयकव्याप्तेः सर्वैः ग्रहीतुमशक्यत्वात् ।

किञ्च, केचित्तु लक्षणया एव व्यञ्जना गतार्था इतिअभिप्रयन्ति, तदपि न । तात्पर्यानुपपत्तिसन्धानेन लक्षणादरणं सम्भवति। अन्वयानुपपत्तिस्तु लक्षणाङ्गीकर्तृभिः अपि तद्बीजत्वेन नोपात्तुं शक्या । यतः'गङ्गायां घोषः' इत्यत्र गङ्गाशब्दस्य तीरे इव घोषशब्दस्य मकरमीनादौ लक्षणायां स्वीकृतायामपि अन्वयसम्भवेन विवक्षितार्थाग्रहरूपदोषः । किञ्च 'नक्षत्रं दृष्ट्वा वाचं विसृजेत्' इतिवाक्येऽन्वये न काप्यनुपपत्तिः। अथापि तत्र नक्षत्रशब्दस्य तद्दर्शनकाले लक्षणाद्रियते मीमांसकैः । अतःतात्पर्यानुपपत्तिःएव लक्षणाबीजमितितैः स्वीकार्यम् । परन्तु यत्रापि व्यञ्जनयार्थग्रहः तत्र सर्वत्रापि तात्पर्यानुपपत्तिःस्यादेव इतिन नियमः । 'गच्छ गच्छसि चेत् कान्त तत्रैव स्याज्जनिर्मम' इत्यत्र तावत् इहस्थया जीवित्रा तद्देशे जनिः नाप्तुं शक्या इतिहेतोः तात्पर्ये अनुपपत्तिःस्यात्, परन्तु तत्र शक्यसम्बन्धः गृह्यमाणेऽर्थे कथं प्रतिपाद्यः इतितु मृग्यम् ।

किञ्च 'अयं गौरवितो महान्' इतिवाक्यात् अयं गौरवितःअर्थात् पूज्यः इतिप्राकरणिकः शक्त्या प्रतिपन्नः बोधः । ततःकस्यचित् पुरुषस्य अयं गौः अर्थात् जडः, अवितःअर्थात् मेषतःमहान् पीनः इतिअप्राकरणिकस्य परस्य उपहासरूपस्य अर्थस्य या प्रतीतिः सा कथमुपपाद्या इतिचिन्त्यं भवेत् । किञ्च यदा श्लेषोऽलङ्कारः अर्थात् शब्दस्यैकस्य अनेका अर्थाः तदा विशिष्टस्य वक्तृतात्पर्यादन्यस्य श्रोतृबोधे सम्भवतिसति, व्यञ्जनाया अस्वीकारे तादृशबोधस्य कारणं मृग्यं स्यात् । यतो हि अवश्यमयं शब्दादेवोपस्थितोऽर्थः, वाक्येन्वयं चार्हति। अशाब्दश्चेत् बोधः तदानन्वयः स्यात्, 'न हि शाब्दमशब्देनान्वेतीति' न्यायात् ।

किञ्च 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इतिन्यायेन व्यङ्ग्यार्थप्रत्यायने अभिधालक्षणयोः असामर्थ्ये शब्दादेव अनुभूयमानोर्थःशब्दप्रमाणस्यैव विषयः । इत्थं प्रयोजनादेः अर्थस्य प्रतीतिः व्यञ्जनयैव सम्भवेत् ।

अभ्युपगता चैषा व्यञ्जना भवच्छिष्टेन नीलकण्ठभट्टेन दीपिकाव्याख्ययां "यदि पुनरानुभविकः लोकानां स्वरससवाही 'शब्दादमुमर्थं प्रत्येमी'त्यनुभवःतदा वैयञ्जनिकी प्रतीतिः गीर्वाणगुरुणाप्यशक्यवारणा" इतिवदता ।

 ISSN: 2320-740X

एवं च व्यञ्जनायाः पृथग्वृत्तित्वसिद्धौ निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च सिद्धा इत्यादिषु सर्वेषु बहुश्रुताः प्राज्ञाः प्रमाणमितिनिवेदयत्ययं नारसिंहः ।

**॥इतिशम्॥**

**परिशीलिताः प्रधानग्रन्थाः**

भूषणसारः

वैयाकरणसिद्धान्तलघुमञ्जूषा

परमलघुमञ्जूषा

महाभाष्यम्

शब्दशक्तिप्रकाशिका

******

# Natakantam Hi Sahityam - An Outlook

**Dr. M. Srinivasa Murthy**

Guest Faculty, Dept. of Sahitya

Central Sanskrit University,

Rajiv Gandhi Campus, Sringeri-577139

**Keywords**: The Nataka has much importance in Literature - Natakantam hi Sahityam with regard to writing aspect - Because of the writing of Nataka only, his creativity reaches the highest peaks of the literary art - The language of the Nataka is more lucid and unconstrained - for the better understanding of the formation of dramatic structure only the Nataka has to be studied at the end.

**Abstract** : It is a well known fact that the study of the Sanskrit Literature gives not only happiness but knowledge also. In the Sanskrit Literature not only the Sravya Kavyas but the Natakas are also implied. A famous saying is there in Sanskrit Literature as "Natakantam Hi Sahityam". Generally it is accepted that it represents the aspect of the study of the Nataka Literature. Actually it can be interpreted according to the writing aspect also. The article mainly deals with the comparison of Sravya Kavya and Nataka to prove the essence of the sentence "Natakantam Hi Sahityam".

**Article :** It is often said in the literary teachings/conferences that Natakantam hi Sahityam. Generally, this sentence is used in accordance with reading aspect. That means a Sanskrit student at first should study the Panchakavyas, Raghuvamsa etc.. And thereafter Champu Kavyas and thence Natakas. Then only his study of literature comes to an end, and he becomes able to study Sanskrit Shastras.

It means, how the Upanishads have much importance in the Vedas same as the Nataka has much importance in Literature. How the knowledge of the Vedas without the perception of the Upanishads results in incomplete knowledge, the study of literature without the knowledge of Nataka remains in vanity.

The sentence "**Natakantam hi Sahityam**" may be taken into consideration with regard to writing aspect also.

It would not be an exaggeration to interpret it as follows:

Though, the poet writes many kavyas creatively, because of the writing of Nataka only, his creativity reaches the highest peaks of the literary art.

Here, the opinion expressed by Rajasekhara as "**Natakaantam Kavitvam**" gives strength to this kind of interpretation.

Actually, there would be no higher quality of creativity in the Nataka than the Gadya – Padya Champu Kavyas. Moreover, the language of the Nataka is more lucid and unconstrained.

It would not be accepted in general that Venisamharam is more full of literary values with respect to language and composition than Kiratarjuneeyam. Therefore, for the better understanding of the formation of dramatic structure only, it might have been be told by the elders that the Nataka has to be studied at the end, but not for the knowledge of the language.

The Nataka writer creates some roles of the play and makes an apt word form and exhibits in the society according to the nature and behaviour of the roles.

He takes very much care to hide himself and not to express a single opinion on his own against the nature of the roles. In other words, he would be neutral and let the roles behave according to the plot. This kind of neutrality is called as Self Obliteration(1) by the European critics..

Self Obliteration can only be attained by the Matured Poet but not by all, as the source of the poetry is nothing but Self Expression.

Though the poet gets Self Obliteration now and then at the time of revealing the feelings of the roles in the Sravya Kavya (Audible Poetry), he cannot stand for a long time without getting merged with the roles.

Self Obliteration is the first and the foremost qualification of the Writer of the Nataka. After writing the Sravya Kavya, the poet gets interested in writing Nataka. In the Nataka, the nature of the writer is not seen. In other words, the writer would not be visible in the creation of Nataka.

Here, a doubt may be raised that though the creator of the universe is not seen in the creation directly, he can be perceived as he is all pervading or omnipresent. In the same way, the poet in the Nataka though is not seen directly, he acts through the roles throughout the play. Then how Self Obliteration can be accepted actually? In this context, Self Obliteration means nothing but neutrality as discussed here before. Here, it is to be understood that neutrality means not speaking the words that would not be suitable for the roles, and that is nothing but Self Obliteration. This is the first quality to be obtained by the Nataka Writer. The quality of self restraint would not be seen in the writer that writes mere Sravya Kavya.

The Writer of Sravya Kavya would be full of Poetic Passion but not of execution skills of the plot.As the Self Obliteration is the last step in the creation of the poetry, it is said as 'Natakantam hi Sahityam'.

In the Sanskrit Language, the Kavya Lakshana(2) (Definition of Poetry) is said in accordance with Nataka only. Afterwards, with a little difference, the same Lakshana is accepted for Sravya Kavya also.

Though the difference is noteworthy, as the Nataka is more worthy, it is agreed by the scholars as the Nataka is the End of Literature ('Natakantam Hi Sahityam').

In the selection of the Plot and execution of the Rasa (Perfection of Sentiment) both, the writer of the Sravya Kavya and the Writer of the Nataka, may be the same, but, in the execution of the plot, the Writer of the Nataka bears more difficulty than the writer of the Sravya Kavya.

Characterization is the unavoidable duty of the Nataka Writer, which is not compulsory for Sravya Kavya writer. The writer of the Sravya Kavya is free to describe whatever, however and whenever he wants. He has no restrictions such as: these parts of the story

 **ISSN: 2320-740X**

should be abandoned, this is not describable etc. If his Kavya is complete and beautiful, he is treated as succeeded.

But, the skill of the Nataka writer is supposed to be shown in the execution of the plot only. All the stories cannot be taken as a plot of the Nataka, though they are admirable. All the incidents cannot be shown in the Nataka though the plot is useful. The execution of the plot should not be disturbed, though some parts are deserted.

If the Nataka is supposed to be considered as a Sravya Kavya, then the incompleteness of the Nataka would be clearly noticeable. Mere as a Kavya, it cannot be complete on its own. It should rely on the sibling arts such as: music, painting etc.. Some parts of the plot would be only thoughtful.

Poetry means nothing but a description. By restraining the describing capabilities within as much as possible, the writer of the Nataka surrenders whole responsibility to the role players for making the Nataka completely beautiful by giving the essential literary piece.(3)

The same poet, by taking the same plot can make it completely beautiful in the Sravya Kavya form. When it comes to the matter of poetic greatness, the Nataka is considered to be incomplete and having lesser poetic values when compared to the Sravya Kavya. It cannot compete with the Ramayana or the Mahabharata and the Pancha Mahakavyas as well.

By the keen observation of the Natya Sastra and some Natakas like Venisamhara etc., it would be very much clear that the Abhinaya of the roles always cannot be exhibited directly. It needs spectators' imagination in many situations.

In the Ratnavali Natikaa (5)written by Harshavardhana, the beauty of Makarandodyana should be imagined by the spectator only. In the Veni Samhara Nataka written by Bhatta Bana, the chaos in the war field should be assumed but cannot be exhibited at all.

Thus, the Nataka demonstration also gives complete result of happiness to the spectators if they can assume. It means one that enjoys the happiness of the Sravya Kavya completely with his imaginary power can alone feel the happiness of the Nataka.

Thus, it is clear that the Sravya Kavya alone can help in obtaining the knowledge of the language. Therefore, it can be stated that the sentence "**Natakantam Hi Sahityam**" represents the matter of literary composition.

It is a well known fact that by watching the Nataka one can more easily enjoy the happiness than by reading the Sravya Kavya. The skill of the Nataka writer is the only cause of that. So that it would not be a contravention to say that the sentence "Natakantam Hi Sahityam" represents the aspect of literary composition.

**End Notes :** 1.An Introduction to the Study of Literature

2.Kavya Prakasha

3. Sahitya Silpa Sameeksha of Sri Pingali Lakshmi Kantam.

**Bibliography :** 1. An Introduction to the Study of Literature – William Henry Hudson,George G.Harrap & Company,London.1913

:2. Kavya Prakasha – Pullela Srirama Chandrudu, Samskrita Bhashaprachara Samiti, Hyderabad..2010

3. Sahitya Silpa Sameeksha of Sri Pingali Lakshmi Kantam.- Pingali Lakshmi Kantam, Visalandhra Publishers, Vijayawada.1970.

******

 ISSN: 2320-740X

# अपूर्वसाधनम्

**डा. प्रशान्तगांव्करः**

सहायकप्राध्यापकः

के.एल्.ई.आयुर्वेदमहाविद्यालयः

बेलगावि, कर्णाटकम् – ५९००३

**मुख्यशब्दाः - अपूर्वम्, अपूर्वाधिकरणम्, अपूर्वभेदः, परमापूर्वम्, अङ्गापूर्वम्, प्रधानापूर्वम्**

वेदार्थविचारपुरस्सरं वेदार्थनिर्णयद्वारा धर्मानुष्ठानोपयोगितया स्वर्गादिप्राप्तये प्रवृत्तमिदं भगवज्जैमिनिप्रणीतं द्वादशाध्यायात्मकमिदं मीमांसाशास्त्रम् । शास्त्रस्यास्य विषयः साक्षात्परम्परया वा निखिलपुमर्थसाधनं धर्म एव । स च धर्मः वेदैकगम्य इतिसूत्रितं 'चोदनालक्षणोऽर्थो धर्मः'[1] इति। शास्त्रस्यास्य प्रमेयभूतस्य धर्मस्य सिद्धिःप्रमाणाधीना इतिहेतोः द्वादशलक्षण्यां प्रथमाध्याये प्रमेयसिध्यर्थं प्रमाणानि निरूप्य द्वितीयाध्याये प्रमेयभूतं धर्मस्वरूपम्, तत्रापि विशिष्य तद्गतानेकत्वरूपो भेदो निरूप्यते । अतःभेदनिरूपणमेव अध्यायार्थः।

तत्र द्वितीयस्य प्रथमपादे प्रतिपदाधिकरणे सोमादेः यागादेर्द्वयोरपि फलभावनाकरणत्वस्वीकारे तयोरुभयोरपि अदृष्टार्थत्वकल्पनापत्तेः न द्वयोरपि करणत्वं अपि तु अन्यतरस्यैव, तथा सतिएकस्यैवादृष्टार्थत्वम् इतरस्य तु दृष्टद्वारा तदर्थत्वम् एवेतिनिरूप्य कतरस्य फलभावनाकरणत्वम् इतिजिज्ञासायां भावार्थाधिकरणमवतरति। तत्र च 'सोमेन यजेत' इत्यादौ यागादेः धात्वर्थस्यैव भावनाकरणत्वं न तु सोमादेः उपपदार्थस्येतिसिद्धान्तितम् । किञ्च धात्वर्थस्यैव करणत्वोक्त्या तस्यैव अपूर्वार्थत्वमितिच लभ्यते । अनन्तरम् अपूर्वाधिकरणे अपूर्वमेव नास्तीतिपूर्वपक्षिणः कथनेन अपूर्वस्यैवाभावे कथं धात्वर्थस्य तज्जनकत्वं स्यादित्येवं पूर्वाधिकरणसिद्धान्तलभ्यस्य धात्वर्थस्यैव अपूर्वजनकत्वम् इत्यर्थस्य आक्षिप्यमाणत्वात् आक्षेपिकीसङ्गत्या अपूर्वस्य सद्भावःस्थापयिष्यते । अपूर्वभेदोपयोगिचिन्तनस्य पादार्थत्वात् अपूर्वसाधनस्य च अपूर्वभेदोपयोगित्वात् पादसङ्गतिर्लभ्यते । भावनाभेदस्यैव प्राधान्येन द्वितीये प्रतिपाद्यत्वात् तस्यैव अध्यायार्थत्वेऽपि तत्फलत्वेन अपूर्वभेदस्यापि निरूपणात् अध्यायसङ्गतिरपि लभ्यते । अपूर्वसद्भावनिरूपणमेवात्र विषयः। अपूर्वमस्ति वा न वेतिसंशयः । इत्थम् अनेन सङ्गतिः विषयः सन्देहश्च प्रोक्ताः भवन्ति ।

तत्राधिकरणे पूर्वपक्षः – प्रमाणाभावात् नास्त्यपूर्वम् इति। वस्तुसत्तावबोधनार्थानि प्रत्यक्षादीनि पञ्चप्रमाणानि । न च अपूर्वे तानि प्रवर्तन्ते । न तावत् प्रत्यक्षप्रमाणेन अपूर्वसद्भावःसाधयितुं शक्यते, रूपादिशून्यत्वेन चक्षुराद्ययोग्यत्वात् । यतो हि यागस्वर्गयोः साध्यसाधनभावे सिद्धे मध्ये अपूर्वकल्पनस्य प्रसङ्गः । परं यागस्वर्गयोः साध्यसाधनभाव एव प्रत्यक्षेणावगन्तुं नैव शक्यते, कथं तर्हि यागजन्यमपूर्वं प्रत्यक्षस्य विषयः भवितुमर्हतिन प्रत्यक्षं तत्सद्भावे प्रमाणम् । नाप्यनुमानम् । अविनाभूतलिङ्गाभावात् । 'यजेत स्वर्गकामः' इत्यादिषु तादृशापूर्वबोधकं किमपि

1 जैमिनिसूत्रम् (१.१.२)

पदं नैव पश्यामः इतिन च शब्दस्तत्र प्रमाणम् । सादृश्याभावात् नाप्युपमानं प्रमाणम् । अदृष्टपूर्वस्य अदृष्टसदृशस्य च उपमानाविषयत्वात् । प्रमाणान्तराभावेऽपि श्रुतार्थापत्तिरेव अपूर्वसद्भावे प्रमाणं भवतु इतिब्रूमः । यतो हि क्षणिकस्य यागस्य कालान्तरभाविस्वर्गप्राप्तिकारणत्वं तु श्रुतमेव । अर्थात् तयोः साध्यसाधनभावसम्बन्धः उपपादनीयः । अतःश्रुतार्थापत्तिद्वारा मध्ये यत्किञ्चित् कल्प्यते, तदेव अपूर्वम् । अतःअर्थापत्तिःअपूर्वसद्भावे प्रमाणं भवतु इतिचेत् न – अर्थापत्त्याऽपि न सिध्यत्यपूर्वसद्भावः। यतो हि यागस्य स्वर्गसाधनत्वनिर्वाहार्थं मध्ये अपूर्वं कल्पनीयं परं सम्प्रतिअपूर्वस्यैव स्वर्गसाधनत्वमितियागः अन्यथासिद्धः स्यादितियागस्वर्गयोः साध्यसाधनभावःन उपपादितो भवति। तस्मात् अयं श्रुतविरोधीतिश्रुतार्थापत्तिरपि अपूर्वसद्भावे न प्रमाणम् । अत एवोक्तम् –

**प्रामाणपञ्चकाज्ञानादपूर्वं षष्ठगोचरः ।**

**तस्मादन्वर्थनामैतन्न वस्तुत्वेन गम्यते ॥**[1]

तर्हि अपूर्वम् अवान्तरव्यापाररूपेण वा शक्तिरूपेण वा कल्प्यते – तदा शक्तेः यत् कारणत्वमुच्यते तदा शक्तिमतःकारणत्वविघातकत्वं नास्ति एवमेव अवान्तरव्यापाररूपेण यत्कल्प्यते तदा व्यापारिणः अन्यथासिद्धिकल्पकत्वं नास्ति । अतःअपूर्वं शक्तिरूपम् अथवा अवान्तरव्यापाररूपम् इतिपक्षं स्वीकृत्य इदमपूर्वं श्रुतयागस्वर्गयोः साध्यसाधनभावोपपादकं भवतिअतःअर्थापत्त्या अपूर्वं साधयितुं शक्यते इतिचेत् न – शक्तिः स्वातन्त्र्येण न तिष्ठति। यागस्य इयं शक्तिः यागनिष्ठा वक्तव्या । यदि याग एव नास्ति चेत् कथं यागनिष्ठा स्यादियम् । व्यापारोऽपि व्यापारवन्निष्ठः । प्रकृते यागस्य अयं व्यापारः स्यात् नष्टे यागे कथं तिष्ठेत् सः । अतःअपूर्वं न शक्तिः न वा अवान्तरव्यापारः भवितुमर्हतिकिन्तु यागजन्यं स्वर्गस्य साधनं किञ्चिदित्येव वक्तव्यम् । अतःअपूर्वजननार्थमेव यागः न स्वर्गजननार्थम् इतिश्रुतयागस्वर्गयोः साध्यसाधनभावःनैव उपपादयितुं शक्यते इतिनार्थापत्तिःप्रमाणम् । ननु यागः क्षणिकः तथापि फलं भवतीतिफलं दृष्ट्वा अपूर्वं कल्पनीयम् । तर्हि यागनिष्ठतया अपूर्वकल्पनं मास्तु परं यागाश्रयात्मनिष्ठतया अपूर्वं कल्पनीयम् । एवं यजमाननिष्ठतया भवतु । एतावता शक्तिरूपत्वं वा व्यापाररूपत्वं वा भवितुमर्हतिअतःअपूर्वम् अस्ति इतिचेत् – एतादृशगुरुभूतापूर्वकल्पनां विनाऽपि यागस्वर्गयोः साध्यसाधनभावःउपपादयितुं शक्यत इतिअयं पक्षः त्याज्य एव ।

यद्यपि क्षणिको यागः कालान्तरभाविस्वर्गजननाय नैव समर्थ इतितु स्पष्टमेव । तथापि – क्षणिको यागः नश्यतीतितद्ध्वंसस्तु भवत्येव । सः ध्वंसः यागजन्यः । स एव अवान्तरव्यापारो भवतु । तस्यैव अवान्तरव्यापारत्वे लाघवमस्ति । यागस्य ध्वंसः उपस्थित इत्यतःयागजन्यत्वं सद्भावश्च क्लृप्तः इतिकेवलं फलजनकत्वमात्रं कल्पनीयम् ।

अपूर्वस्य तु यागजन्यत्वम्, सद्भावः, स्थायित्वम्, व्यापारत्वम्, फलजनकत्वमितिबहुकल्पनीयं भवति। यागध्वंसस्य तु उपस्थितत्वादेव अवान्तरव्यापारमात्रस्वीकारे लाघवम् । अतःअपूर्वं मास्तु इतिचेत् – न, यागध्वंसस्यावान्तरव्यापारत्वे

**'कर्मनाशाजलस्पर्शात् करतोया विलङ्घनात् ।**

1 तन्त्रवार्त्तिकम् (अपूर्वाधिकरणम्)

 ISSN: 2320-740X

**गण्डकीबाहुतरणात् धर्मः क्षरतिकीर्तनात् ॥'**

इतिसमग्रः श्लोकः । परन्तु ग्रन्थे **'धर्मः क्षरतिकीर्तनात्' 'प्रायश्चित्तेन नश्यन्ति पापानि सुमहान्त्यपि'**[1] इत्यादौ शास्त्रविरोधात् ध्वंसस्य ध्वंसासम्भवात् अन्यदेव कल्पनीयम् । यतो हि पूर्वमेव नष्टत्वात् 'कीर्तनात् धर्मः नश्यति' अर्थात् ज्योतिष्टोमः नश्यतीतिवक्तुं न शक्यते । क्षणिकस्य तस्य कीर्तनादिनाशकारणस्य अपेक्षा नास्त्येव । अतःधर्मपदेन धर्मजन्यः व्यापारः ग्राह्यः । तस्य नाशस्तु सम्भवति। यदि ध्वंस एव यागस्य अवान्तरव्यापारः तर्हि तस्य नित्यत्वात् कीर्तननाश्यत्वं नैव स्यात् । एवमेव प्रायश्चित्तेन नश्यन्ति पापानि सुमहान्त्यपीत्यत्रापि पापजन्यं यद् वर्तते – अवान्तरव्यापारः स एव नश्यतीतिवक्तव्यम् – स च व्यापारः पापध्वंसः यदि स्यात् तर्हि तस्य नित्यत्वात् नाशः नैव सम्भवतिइतिशास्त्रविरोधः । ध्वंसं परित्यज्य कीर्तनप्रायश्चित्तनाश्यमपूर्वं व्यापारत्वेन कल्पनीयमेव इतिचेत् न – धर्मः क्षरतीत्यत्र क्षर धातोः नश्यतीत्यर्थो मास्तु – इदानीं क्षरणमित्यस्य फलोत्पत्तिप्रतिबन्धकत्वमात्रमङ्गीक्रियते । ध्वंसः वर्तते परं तु फलं न भवतीतिकीर्तनं फलं प्रतिबध्नातीत्यर्थःस्वीक्रियते । अनेन फलजननाक्षमत्वं यत् धर्मस्य जातं तदेव क्षरणं नाम । तत् फलोत्पत्तिजननासामर्थ्यं च कीर्तनेन जातम् । एवं च कीर्तनस्य प्रतिबन्धकत्वमागतम् । कीर्तनं फलं प्रतिप्रतिबन्धकमितिकीर्तनाभावविशिष्टः धर्मः फलं प्रतिकारणम् । अथवा यदि कीर्तनस्य प्रतिबन्धकत्वकल्पने गौरवमितिविभाव्यते तर्हि कीर्तनात्यन्ताभावविशिष्टज्योतिष्टोमादेः स्वर्गकारणत्वं भवतु । एवं च विनाप्यपूर्वं ध्वंसरूपावान्तरव्यापारेणैव यागस्वर्गयोः साध्यसाधनभावोपपत्तौ अन्यथानुपपत्त्यभावात् नार्थापत्तिप्रमाणेन अपूर्वं सिध्यति।

किञ्च देवताप्रसादः द्वारं भवतु इतिकैश्चित् वेदान्तिभिः उच्यते तदपि न । यतो हि तस्यापि साध्यसाधनभावनिर्वाहकत्वं न सम्भवति। देवताप्रसादस्यापि इच्छादिरूपत्वात् क्षणिकत्वमेव । अतःप्रसादकल्पनात् प्रागपि ध्वंसस्य उपस्थिततत्वात् स एव उपस्थिततरो भवति। अतःयागध्वंसस्यैव व्यापारत्वकल्पनमुचितम् । ननु यागध्वंसः अभावरूपः, अभावरूपस्य यागध्वंसस्य फलजनकत्वं कथमितिचेत् अभावस्यापि कारणत्वं न बाधकम् । यथा अभावप्रमाणम् उपलब्ध्यभावरूपम् अभावोपलम्बकं भवति। एवमेव सन्ध्यावन्दनाद्यभावस्य च प्रत्यवायजनकत्वमस्तीतिअभावरूपस्य यागध्वंसस्य फलजनकत्वं सम्भवत्येव । अतःसर्वथा अपूर्वकल्पनं विनाऽपि ध्वंसरूपावान्तरव्यापारेणैव यागस्वर्गादिसाध्यसाधनोपपत्तेः अन्यथानुपपत्त्यभावात् नार्थापत्त्या अपूर्वं सिध्यतिइति प्राप्ते – अपूर्वसद्भावःइत्थं साध्यते –

**कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा ।**

**योग्यता शास्त्रगम्या या परा साऽपूर्वमिष्यते ॥**[2]

इतिअपूर्वसद्भावे शास्त्रमेव प्रमाणम् ।

1 भाट्टदीपिका (अपूर्वाधिकरणम्)

2 तन्त्रवार्त्तिकम् (अपूर्वाधिकरणम्)

अपि च **‘चोदना पुनरारम्भः’**[1] इतिजैमिनिसूत्रम् अपूर्वसद्भावसाधकम् । तत्र भाष्यकारैः एवं व्याख्यातम् – **“चोदनेत्यपूर्वं ब्रूमः । अपूर्वं पुनरस्ति यत आरम्भः शिष्यते ‘स्वर्गकामो यजेत’ इति। इतरथा हि विधानमनर्थकं स्यात् । भङ्गित्वाद्यागस्य ।”**[2] इति। यतःकर्मणा स्वर्गादिफलारम्भः (फलप्राप्तिः) ‘स्वर्गकामो यजेत’ इत्यादिना चोद्यते । अतःअपूर्वमस्तीतियावत् ।

फलं च तावत् जन्मान्तरे इह जन्मनि वा प्रधानकालात् अनन्तरमेवेतिनिर्विवादम् । अतःक्षणिकात् कर्मणः कालान्तरभाविफलोत्पत्तिःव्यापारमन्तरेण न सम्भवतीतिव्यापारापेक्षायां न ध्वंसस्य व्यापारत्वं सम्भवति।

‘यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्’ इत्यादि श्रुत्याऽवगतनिरतिशयसुखरूपस्य स्वर्गस्य अस्मिन् जन्मनि उपभोगः न सर्वथा सम्भवति। यदि स्वीक्रियते तर्हि सः श्रुतविरोधीतिजन्मान्तरभोग्य एव स्वर्ग एव स्वीकार्यः । तथैव इहापि **धर्मः क्षरतिकीर्तनात् प्रायश्चित्तेन नश्यन्ति पापानि सुमहान्त्यपि** इतिकीर्तनप्रायश्चित्तादीनां नाशकत्वश्रवणात् यन्नश्यतितादृशं कल्पनीयम् । येन श्रुतस्य नाशस्य मुख्यार्थ एव स्वीकृतो भवतिइतिकीर्तनात् नाशार्हं किञ्चित् कल्पनीयम् । यदि क्षरतीत्यत्र लक्षणया फलप्रतिबन्धकत्वमितिअर्थःस्वीक्रियते सः श्रुतविरोधी स्यात् । अतःनाशार्हः पदार्थःन यागः, तस्य पूर्वमेव नष्टत्वात्, न वा यागध्वंसः तस्य नित्यत्वात्, न वा यागफलम्, तस्य अनुत्पन्नत्वात् । अतःनाशार्हः पदार्थःअवान्तरव्यापाराख्यः कल्प्यते तच्च अपूर्वमेव । यद्यपि क्लृप्तत्वात् ध्वंसस्य तस्य द्वारकत्वकल्पनापेक्षया अपूर्वकल्पनस्य गुरुभूतत्वेऽपि तस्य फलमुखत्वात् अवश्यं प्रायश्चित्तनाश्यमपूर्वं कल्पनीयमेव । शब्दार्थस्य मुख्यार्थत्वनिर्वाहाय किञ्चित् अन्यत् कल्प्यते चेदपि फलमुखं गौरवं न दोषाय इतिनिषाधश्चासौ स्थपतिश्च इतिकर्मधारयः स्वीकृतः। कर्मधारयः श्रौतःइतिपश्चात् आपद्यमानं विद्यादिज्ञानं मुख्यार्थसम्पादनाय अङ्गीकृतं तद्वदेव नश्यतीत्यादौ मुख्यार्थसम्पादनाय नाशयोग्यमपूर्वमेव कल्पनीयम् । तत्र श्रुतार्थापत्तिरेव प्रमाणम् । श्रुतस्य स्वर्गसाधनत्वस्य अनुपपत्त्या यागेन अपूर्वं कृत्वा स्वर्गं कुर्यादितिएते शब्दाः कल्पिताः । तस्मात् प्रमाणम् । अपि च यागस्वर्गयोः साध्यसाधनभावनिर्वाहार्थमेव अपूर्वं कल्प्यते इतियागस्य न अन्यथासिद्धिः। **व्यापारेण व्यापारिणो नान्यथासिद्धिरिति**उच्यते ।

ननु शक्तिमतिव्यापारवतिवा यागे नष्टे तन्निष्ठापूर्वस्यापि नाशापत्तिःतदवस्था एव इतिचेत् – अपूर्वस्य यागजन्यत्वेऽपि यागनिष्ठत्वं नाङ्गीक्रियते । यतो हि यत्र फलं भवतितत्र तदीयः व्यापारः स्वीकर्तव्यः । फलं तु आत्मनि भवतिअतःतदीयव्यापारोऽपि अपूर्वाख्यः आत्मनिष्ठ एव । अतःफलसामानाधिकरण्यसिध्यर्थं फलबलेन अपूर्वस्य फलभोक्तृनिष्ठत्वमेव कल्प्यते इतिन विरोधः । तस्मात् यागस्वर्गयोः साधसाधनभावान्यथानुपपत्त्या सिद्धेः अवान्तरव्यापारे तस्य च धर्मः क्षरतिकीर्तनात् इत्यादिना कीर्तनादि नाश्यत्व कथनेन तत्फलपर्यन्तं स्थित्वा फलं जनयित्वा नश्यतीतिनाशयोग्यत्वे लब्धे ध्वंसस्य च अतादृशत्वेन अन्यस्य च क्लृप्तस्य पदार्थस्य यागाद्यवान्तरव्यापारत्वानुपपत्तेः अर्थापत्त्या अतिरिक्तम् अपूर्वं सिद्ध्यति।

---

1 जैमिनिसूत्रम् (२.१.५)

2 मीमांसाभाष्यम् (२.१.५)

 **ISSN: 2320-740X**

**अपूर्वभेदाः –**

यत्र एक एव प्रधानयागः यथा **'सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः'** इतितत्र प्रधानयागानुष्ठानसमनन्तर-मेकमपूर्वमुत्पद्यते तत् उत्पत्त्यपूर्वमित्युच्यते । इदमुत्पत्त्यपूर्वं न फलजनकं किन्तु परमापूर्वजनकम् । यदा पूर्वोत्तराङ्गकलापकर्मानुष्ठानं सम्पन्नं तदा परमापूर्वमुत्पद्यते । अन्यथा यदा पूर्वमेव परमापूर्वमुत्पन्नं तदा कः अङ्गानि अनुतिष्ठेत । अतःपूर्वोत्तराङ्गानुषठानसहितात् प्रधानात् परमापूर्वोत्पत्तिः। वस्तुतःप्रधानो यागः नष्टः ततःउत्पन्नमपूर्वमितिस्वीकर्तव्यम् । एवं च प्रधानानुष्ठानसमनन्तरमुत्पद्यते उत्पत्त्यपूर्वम् अङ्गानुष्ठानानन्तरं साङ्गप्रधानं परमापूर्वं जनयतीतिअपूर्वकल्पनद्वयमत्यन्तं लघुभूतम् ।

एकमेव प्रधानं यत्र, तत्र इयं अपूर्वकल्पना, यत्र तु अनेके प्रधाना भवन्ति तत्र तावन्ति उत्पत्त्यपूर्वाणि कल्पनीयान्येव । परं परमापूर्वं तु एकमेव, यत् फलजनकम् । यथा **'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'** इतिस्वर्गोद्देशेन दर्शपूर्णमाससंज्ञको यागः विहितः। तत्र दर्शे त्रयः प्रधानयागाः पूर्णमास्यां त्रयः प्रधानाः इतिआहत्य षड्प्रधानयागाः सन्ति । तस्मात् षड् उत्पत्त्यपूर्वाणि, ततःएकं परमापूर्वम् । परम् उत्पत्त्यपूर्वपरमापूर्वयोर्मध्ये अधिकतया समुदायापूर्वमप्येकं कल्प्यते । समुदायद्वयस्य विद्यमानत्वात् समुदायापूर्वद्वयमितिनवापूर्वाणि । अतःदर्शपूर्णमासयोः नवापूर्वाणि भवन्ति । अत्र समुदायापूर्वसद्भावे किं प्रमाणं स्यादितिप्रश्ने – **'पौर्णमास्यां पौर्णमास्या यजेत'** **'अमावास्यायां अमावास्यया यजेत'** इतिवाक्यद्वयं समुदायापूर्वाङ्गीकारे प्रमाणम् । कथमितिचेत् अत्र तृतीया निर्देशो वर्तते – तया करणत्वमवगम्यते । कस्येतिजिज्ञासायां त्रिकस्येतिसमाधानम् । एकं पौर्णमासीप्रातिपदिकेनोपात्तं त्रिकं अपरममावास्याप्रातिपदिकेनोपात्तं त्रिकमितित्रिकद्वयं गृह्यते । ततःयागत्रयनिष्ठा एका करणता अवगम्यते – तत् कदा सम्भवेत् इतिचेत् सा यदि एकं कार्यं जनयेत् तदैव । एककार्यनिरूपिता करणता त्रिषु वर्तते चेत् सा करणता एका इतिसिध्यति। तच्च कार्यमपूर्वम् । अतःउभयकारणतानिर्वाहाय त्रिकद्वयं वक्तव्यम् । तत्तु उच्यत एव । अतःसमुदायापूर्वद्वयमङ्गीक्रियते ।

प्रधानस्य उत्पत्त्यपूर्वयोग्यतासम्पादनमेव अङ्गापूर्वाणां कार्यम् । उत्पत्त्यपूर्वे उत्पन्ने अङ्गापूर्वाणि नश्यन्त्येव । उत्पत्त्यपूर्वमपि समुदायापूर्वं जनितं चेत् नश्यति, समुदायापूर्वमपि परमापूर्वं जनितं चेत् नश्यति। फलजनने परमापूर्वस्यापि नाशः । अतःफलनाश्यत्वमपूर्वस्य इति।

**आकरग्रन्थाः**


१. मीमांसाकौस्तुभः – श्रीखण्डदेवः- चौखम्बामुद्रणालयः – वाराणसी - १९९१

२. भाट्टदीपिका – श्रीखण्डदेवः- सद्गुरुमुद्रणालयः – नवदेहली - १९७२

३. मीमांसाभाष्यम् (मीमांसाशाबरभाष्यम्) - युधिष्ठिरो मीमांसकः - श्रीकामेश्वरसिंहसंस्कृतविश्वविद्यालयः – दरभङ्गा - १९८७

# अरिष्टचिन्तनम्

**श्रीनागपतिहेगडे**

अतिथ्यध्यापकः, ज्यौतिषविभागः

कें.सं.वि. – राजीवगान्धीपरिसरः,श्रृङ्गेरी

**मुख्यशब्दाः** - ज्यौतिषम् , अरिष्टयोगः, आयुः, फलानामनुभवः, मृतिः, अल्पायुः, सद्योरिष्टः, विफलाः, अरिष्टभङ्गः, बालरक्षा ।

**सारांशः** -

“आयुः पूर्वं परीक्षेत पश्चाल्लक्षणमादिशेत् । अनायुषां तु मर्त्यानां लक्षणैः किं प्रयोजनम्” ॥ इतिवचनानुसारं फलचिन्तनात् प्राक् आयुश्चिन्तनं कर्तव्यम् । आयुश्चिन्तनप्रकारेषु अरिष्टानां बलिष्ठत्वात् अरिष्टचिन्तनं कर्तव्यम् । अरिष्टयोगाः केषाञ्चन योगानां सत्वे विफलाः भवन्ति । ते च योगविशेषाः अरिष्टभङ्गशब्देन कथिताः । अतःअरिष्टभङ्गचिन्तनमपि कर्तव्यम् । अन्ततश्च सत्यपि अरिष्टयोगे जपहोमादिभिः तद्दूरीकृत्य शिशुः रक्षणीयः ।

त्रिस्कन्धात्मकेस्मिन् ज्योतिश्शास्त्रे विचार्येषु विषयेषु आयुरेव मुख्यतमम् । यतो हि सत्येवायुषि तदुक्तानां फलानामनुभवः। तदेवोक्तम् –

“आयुः पूर्वं परीक्षेत पश्चाल्लक्षणमादिशेत् ।

अनायुषां तु मर्त्यानां लक्षणैः किं प्रयोजनम्” ॥ [1]

इति। तच्चायुः गणितगम्यम् । किन्तु गणितसिद्धमायुः तत्रैव साध्यं यत्रारिष्टयोगो न भवति। अरिष्टयोगः यः कोऽपि वर्तते चेत् सः अरिष्टयोगः एव प्रबलस्सन् तदुक्तवर्षे शिशुं मारयति। अत एव आयुश्चिन्तनप्रकारेषु अरिष्टानां बलिष्ठत्वात् अरिष्टचिन्तनं प्रथममारेभिरे प्राञ्चः ।

तत्रादावाह वैद्यनाथः –

“आद्वादशाब्दान्तरयोनिजन्मनामायुष्यकला निश्चयितुं न शक्यते ।

मात्रा च पित्रा कृतपापकर्मणा बालग्रहैर्नाशमुपैतिबालकः ॥“ [2]

इति। तथा च

“आद्ये चतुष्के जननीकृताद्यैर्मध्ये तु पित्रार्जितपापसङ्घैः ।

बालस्तदन्त्यासु चतुःसमासु स्वकीयदोषैः समुपैतिनाशम् ॥ [3]

1 प्रश्नमार्गः – अध्यायः – ९, श्लोकसङ्ख्या - ३

2 जातकपारिजातः – अध्यायः – ४, श्लोकसङ्ख्या – १

3 जातकपारिजातः – अध्यायः – ४, श्लोकसङ्ख्या - २

 **ISSN: 2320-740X**

इति। एवमनेन जातस्य द्वादशवर्षपर्यन्तम् अरिष्टप्रसङ्गो वर्तत इतिवेद्यम् । तत्राद्येषु चतुर्षु वर्षेषु मातुः पापैः ततश्चतुर्षु पितुं पापैः अन्तिमेषु चतुर्षु च स्वकीयदोषैः मृतिर्जायेते ।

अग्रे वैद्यनाथेन मनुष्यायुषां भेदाः प्रतिपादिताः । आदौ अष्टौ वर्षाणि बालारिष्टमिति। ततो विंशतिपर्यन्तं योगारिष्टमिति। ततो द्वात्रिंशद्वर्षपर्यन्तम् अल्पायुरिति। ततःसप्ततिपर्यन्तं मध्यायुरिति। ततो वर्षशतं पूर्णश्चेतिविभागाः परिकल्पिताः । तदुक्तं –

"अष्टौ बालारिष्टमादौ नराणां योगारिष्टं प्राहुराविंशतिः स्यात् ।
अल्पं चाद्वात्रिंशतान्मध्यायुरासप्तत्याः पूर्णमायुः शतान्तम् ॥" [1]

इति। अत्रायं विशेषोवधार्यः यदरिष्टप्रमाणम् अष्टौ वर्षाणि इतिश्लोकेऽस्मिन् अभिहितं किन्तु आदिमश्लोके तद्द्वादशवर्षात्मकं प्रोक्तम् । एवमस्मिन्विषये प्राचां मतभेदाः दरीदृश्यन्ते ।

अमीष्वरिष्टयोगेषु पुनः ये योगाः वत्सरान्तमृतिप्रदाः ते सद्योरिष्टाख्या निगदिताः । तत्रोदाहरणम् – षष्टाष्टमव्ययेषु अन्यतमस्थाने स्थितश्चन्द्रः रविभिन्नेन केनचित् पापेन वीक्षितश्चेत् जातो मृत्युमुपैति। योगेस्मिन् बृहस्पतिर्लग्नगतोऽपि शिशुं रक्षितुं न प्रभवति। तथा च गण्डान्ततारासहितःशशाङ्कः पापेन युतो दृष्टो वा स्याच्चेदपि जातस्य मरणाय भवति। तदुक्तं यथा –

"गण्डान्ततारासहिते मृगाङ्के पापेक्षिते पापसमन्विता वा ।
बालो लयं यातिसमृत्युभागे चन्द्रे तथा पापनिरीक्षिते वा ॥[2] " इति।

तथा च सौम्यदृष्टिविवर्जितो भौमः चन्द्रनवांशस्थः सन् सप्तमभावे स्याच्चेत् जातःसप्तसप्ततितमे नक्षत्रे मरणं प्राप्नोति। यदि तु मन्दावनिजमार्तण्डाः पुत्रस्थानसमन्विताः स्युः तदापि जातःसप्तसप्ततितमे नक्षत्रे मृत्युमुपैति। यदि च सर्वेऽपि ग्रहाः निर्बलाः सन्तःआपोक्लिमगताः तदाऽपि जातःमासद्वयं ऋतुत्रयं वा जीवति। द्वौ पापौ उदयास्तगतौ क्रूरयुतश्चन्द्रः शुभदृष्टिरहितश्च यदि स्यात् तदापि सद्योमृतिर्वक्तव्या । क्षीणचन्द्रो व्ययगतःपापग्रहाः उदयाष्टमयोः स्थिताः केन्द्रेषु शुभानामभावश्च यदि स्यात् तदाऽपि क्षिप्रं मरणं प्रवदेत् ।

न केवलं शिशोः पित्रादीनामरिष्टयोगाः प्रकरणेऽस्मिन् प्रादर्षिषथ । यथा –

"ताताम्बिकासोदरमातुलाश्च मातामही मातृपिता च बालः ।
सूर्यादिकैः पञ्चधर्मयातैः क्रूरर्क्षगैराशु हताः क्रमेण ॥" [3]

सूर्यात् कूरर्क्षगैः पञ्चमधर्मयातैः रव्यादिभिर्ग्रहैः क्रमेण पितृमातृसहोदरमातुलमातामही-मातामहाशिशूनां मृतिर्भविष्यति।

ततश्च येष्वरिष्टयोगेषु मृतिकालो न निरदेशि तत्कालज्ञानमुच्यते । तत्र वर्षस्यान्तर्मरणमितिवाच्यम् । तत्राऽपि यस्मिन् काले चन्द्रः पापदृष्टः बलिष्ठश्च सन् योगकर्तृषु ग्रहेषु बलिष्ठस्य राशिं जन्मकाले चन्द्राधिष्ठितराशिं लग्नराशिं वा

1 जातकपारिजातः - अध्यायः – ४, श्लोकसङ्ख्या - ३

2 जातकपारिजातः - अध्यायः – ४, श्लोकसङ्ख्या - ५

3 जातकपारिजातः - अध्यायः – ४, श्लोकसङ्ख्या - ६

गच्छतितदा स मरिष्यतीत्यादेष्टव्यम् । तदेवमाख्यातम् –

"योगे स्थानं गतवतिबलिनश्चन्द्रे स्वं वा तनुगृहमथ वा ।
पापैर्दृष्टे बलवतिमरणं वर्षस्यानतःकिल मुनिगदितम् ॥ [1] इति।

पूर्वोक्ताः अरिष्टयोगाः केषाञ्चन योगानां सत्वे विफलाः भवन्ति । ते च योगविशेषाः अरिष्टभङ्गशब्देन कथिताः । यदि बलिष्ठो लग्नाधिपःशुभयुतःशुभदृष्टश्च सन् केन्द्रे स्यात् तर्हि जातो दीर्घायुर्भविष्यति। तथा सम्पूर्णगात्रश्चन्द्रः शुभक्षेत्रे शुभनवांशे वा स्याच्चेत् सर्वारिष्टनिहन्ता भवति। अथ बलान्वितःस्फुरदंशुमाली बृहस्पतिः केन्द्रस्थः चेत् तर्हि स एक एव बहून्यरिष्टानि दूरीकरोति। यदि तु जन्मकाले बुधगुरुशुक्रेष्वन्यतमः बलवान् केन्द्रगः पापयोगरहितश्च भवतिचेत् अरिष्टस्य भङ्गो वक्तव्यः । इत्थं लग्नाधिपःचन्द्रः बृहस्पतिः शुभग्रहाः एतेषां बलम् इष्टस्थितिश्चाश्रित्य अरिष्टभङ्गयोगाः प्रकीर्तिताः ।

अन्ततश्च सत्यपि अरिष्टयोगे जपहोमादिभिः तद्दूरीकृत्य शिशुः रक्षणीयः । अत्र गर्गवचनमेव प्रमाणम् । तद्यथा - "जपहोमचिकित्साद्यैर्बालरक्षान्तु कारयेत्" । इतिशम् ।

**Bibliography –**


- केशवीयजातकपद्धतिः, लेखकः – श्रीकेशवदैवज्ञः, प्रकाशकः – चौखम्भा संस्कृत संस्थानम् वारणासी, प्रकाशितवर्षम् – २०१५
- बृहज्जातकम्, लेखकः – श्रीवराहमिहिरः, प्रकाशकः – मोतीलाल बनारसीदास, प्रकाशितवर्षम् – २०१३
- जातकपारिजातः, लेखकः – श्रीवैद्यनाथः, प्रकाशकः – चौखम्भा संस्कृत संस्थानम् वारणासी, प्रकाशितवर्षम् – २०१३
- फलदीपिका, लेखकः – श्री मन्त्रेश्वरः, प्रकाशकः – चौखम्भा सुरभारती प्रकाशनम् वारणासी, प्रकाशितवर्षम् – २०१८
- प्रश्नमार्गः, प्रकाशकः – चौखम्भा सुरभारती प्रकाशनम् वारणासी, प्रकाशितवर्षम् – २०१३
- सचित्रसामुद्रिक-रहस्यम्, प्रकाशकः – रूपेश ठाकुर प्रसाद प्रकाशन् वारणासी, प्रकाशितवर्षम् – २०१४
- बृहत्पराशरहोराशास्त्रम्, लेखकः – श्रीबृहत्पराशरमुनिः, प्रकाशकः – चौखम्भा प्रकाशन् वारणासी, प्रकाशित वर्षम् – २०१५
- भारतीय कुण्डली विज्ञानम्, लेखकः – मोतीलाल हिंमतराम ओझा, प्रकाशकः – दर्शन ओझा - देवर्षि प्रकाशनम्, प्रकाशित वर्षम् – २०१७
- पञ्चस्वराः, प्रकाशकः - चौखम्भा सुरभारती प्रकाशनम् वाराणसी, प्रकाशित वर्षम् - २०१२


******

1 बृहज्जातकम् – अध्यायः – ६, श्लोकसङ्ख्या - १२

 ISSN: 2320-740X

# भारतीयज्ञानपरम्परायाः आधुनिकशिक्षाक्षेत्रे क्रियान्वयनस्य विमर्शः

**डाँ मुरलीश्यामः एच्**

सहायकाचार्यः

सर्वकारीय संस्कृतमहाविद्यालयः तृप्पणित्तुरा।(पूर्णवेदपुरी)

भारतस्य इदम् भारतीयम् तस्य ज्ञानपरम्परा एव भारतीयज्ञानपरम्परा। तस्य क्रियान्वयनम् एव भारतीयज्ञानपरम्परायाः क्रियान्वयनम्। भारतीयज्ञानपरम्परायाः आधुनिकशिक्षाक्षेत्रे क्रियान्वयनस्य विमर्शन विचारे चर्च्यते। **भारते विश्वविद्यालयाः -** भारतीयज्ञानपरम्परायाः क्रियान्वयनम् बहवः विश्वविद्यालयाः अनुष्ठानं कृतवन्तः। भारते 23 ऐ ऐ टि महाविद्यालयाः सन्ति। भारते 1027 विश्वविद्यालयाः सन्ति।

| **विश्वविद्यालयाः** | **सङ्ख्याः** | **भारतीयज्ञानपरम्परा विचारे संस्कृते वा कार्यः क्रियते।** |
|---|---|---|
| IIT | 23 | 8 |
| केन्द्रीयविश्वविद्यालयाः | 54 | 26 |
| राज्यस्तरीयविश्वविद्यालयाः | 490 | 137 |
| मानितविश्वविद्यालयाः | 126 | |
| स्ववित्तीयविश्वविद्यालयाः | 421 | 88 |
| आहत्य विश्वविद्यालयाः | 1057 | 259 |

एतासु सर्वासु संस्थासु भारतीयज्ञानपरम्परायाः आधुनिकशिक्षाक्षेत्रे कर्तुम् न शक्नुयात्। तथापि केचन विश्वविद्यालयाः अस्मिन् पाठ्यांशाः योजयितुम् शक्नुयात्। भारतीयज्ञनपरम्परायां गणितं ज्यौतिषम् प्राधान्यम् आवहति। तत्र गणितशास्त्रे केरलस्य योगदानं गुरुतरं वर्तते। नारायणपण्डितः (c. 1340-1400),परमेश्वरः (c. 1370-1460) , नीलकण्ठसोमयाजी (1444-1544), नीलकण्ठचित्रभानुः (1475-1550) , ज्येष्ठदेवः (c. 1500-1575), माधवसङ्गमग्रामः इत्यादयः प्रमुखाः गणितज्ञाः अभवन्। केरले करणसम्प्रदाये शुद्धदृग्गणिताधारेणपञ्चाङ्गः प्रचलति।

यद्यपि अन्यराज्येषु आधुनिककेलेण्डरपद्धतिः वर्तते केरले तावत् अद्यापि सौरमानपद्धतिः शुद्धदृग्गणिताधारेण प्रचलति। अस्मिन् विचारे वि पि कुञ्जिकण्णापोदुवाल् महोदयस्य शुद्धदृग्गणितम् अतीव प्रसक्तः वर्तते। कलिदिनसङ्ख्यानयनम्, अहर्गणानयनम्, रविगति प्राप्तिः मन्दोच्चम्, मन्दोच्चगतिः , शीघ्रोच्चम् इत्यादि विचारेषु अत्र वच्मि। अद्यापि विना धनव्ययेन शुद्धदृग्गणिताधारेण ग्रहाणां स्पष्टगतिसाधयितुम् शक्यते। प्रो ई श्रीधरन् महोदयः केरलीयगणितानां विचारे पुस्तकानां प्रकाशनम् अकुर्वन्। आचार्य प्रो ई श्रीधरन् महोदयानुसारं

शुद्धदृग्गणितोक्तरीत्या ये पाठाः पाठिताः तान् अत्र प्रस्तौमि। सूर्यस्य दिनगतिः 3549.68396 विकला भवन्ति। एवमेव चन्द्रस्य (13 -10-15 चन्द्रगतिः)790 कलाः 15 विकलाःभवन्ति। तस्य अहर्गणेन साक्षात् गुणनं क्रीयते चेत् ग्रहगतिना गुण्यते चेत् मध्यमग्रहगतिः लभ्यते। अग्रे शुद्धदृग्गणितवशात् कथ्यते।

**कटपयादि सङ्ख्याक्रमः।** -शुद्धदृग्गणिते कटपयादि सङ्ख्या क्रमेण सङ्ख्याः कथिताः सन्ति।

| 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 0 |
|---|---|---|---|---|---|---|---|---|---|
| **क** | **ख** | **ग** | **घ** | **ङ** | **च** | **छ** | **ज** | **झ** | **ञ** |
| **ट** | **ठ** | **ड** | **ढ** | **ण** | **त** | **थ** | **द** | **ध** | **न** |
| **प** | **फ** | **ब** | **भ** | **म** | | | | | |
| **य** | **र** | **ल** | **व** | **श** | **श** | **ष** | **स** | | |

## ।।शुद्धदृग्गणितम्।।

**कोलम्बवर्षाहतमातलीस्यात्  कोलम्बतो धूलिहृतैर्नयघ्नात् ।**

**दिनैश्च सेनानवगूढयानैः नैर्यातो च्यवरात् कलिवासरोघौः।।**[1]

**कोल्लं शक  1197 x 365=436905 = प्रथमफलम्।**

1197x10=11970, 11970/39=306.92 **द्वितीयफलम्।**

14,34,007 =**तृतीयफलम्।**

**प्रथमफलम् + द्वितीयफलम् + तृतीयफलम् =अहर्गणम्।**

436905+307+1434007=**1871219**

अस्य सप्तभिः विभज्यते चेत् वर्षारम्भदिनम् भवति।

1871219/7=  267317 शेषः =0

1871219 +मासवाक्य=**अभीष्टकलिमासस्य सङ्ख्या लभ्यते।**

1871219+मासवाक्य+दिनसङ्ख्या =**अभीष्टकलिदिनसङ्ख्या प्राप्यते।**

कोलम्ब वर्षः 1 चेत् ,

---

[1] शुद्धदृग्गणितम्-मध्यमप्रकरणम्-श्लोकः सं-1

 **ISSN: 2320-740X**

1x365+(10/39)=365+0.256410256 एकस्मिन् वर्षदैर्घ्यम् सिद्ध्यति।

1434007 इत्येतत् कोल्लवर्षारम्भे कलिदिनम् आसीत्।

आङ्ग्लवर्षात् 825 न्यूनिते कोल्लम्बवर्षम् प्राप्स्यते। कलिवर्षात् 3926 न्यूनिते कोल्लवर्षं(1198) प्राप्स्यते।

आङ्ग्लेयवर्षेण 3101 योज्यते चेत् कलिवर्षं प्राप्स्यते।5125

**कुलरतिर्विधुर्मान्त्रिकचिन्मय।**

**तदपितत्करचत्वरमत्सरी।।**

**मनुगमार्गगमातुलइत्यजा।**

**न्निखिलमासविरामदिनानिहि।।**[1]

**अहर्गणोपयोगी मासवाक्यानम् पट्टिका अधः प्रदत्ता वर्तते।**

| | | |
|---|---|---|
| मेषः -31 | 14,34,314+3=14,34,314 | 1x30+1 |
| वृषभः-62 | 14,34,314+62=14,34,376 | 30x2+2 |
| मिथुनः 94 | 14,34,314+3=14,34,408 | 30x3+4 |
| कर्कः-125 | 14,34,314+125=14,3 4,439 | 30x4+5 |
| सिंहः-156 | 14,34,314+156=14,34,470 | 30x5+6 |
| कन्या-186 | 14,34,314+186=14,34,500 | 30x6+6 |
| तुला-216 | 14,34,314+216=14,34,530 | 30x7+6 |
| वृश्चिकः-246 | 14,34,314+3=14,34,560 | 30x8+6 |
| धनुः-275 | 14,34,314+3=14,34,589. | 30x9+5 |
| मकरः-305. | 14,34,314+305=14,34,619 | 30×10+5 |
| कुम्भः - 335. | 1434314+335=14,34,649 | 30x11+5=335 |
| मीनः - 365 | 1434314+365=14,33,679 | 30×12+5=365 |

## अहर्गणानयनम् ।

सद्धृदधाङ्गविहृष्टा

कलितानन्दो भबूवभारतभूः।

दिवसे अस्मिन् संसत् प्रा

ग्रेखांशोदये ध्रुवानीताः।।[1]

[1] शुद्धदृग्गणितम्-मध्यमप्रकरणम्-श्लोकः सं-2

**(1871498) कलिदिनसङ्ख्या- सदृष्टाङ्गविहृष्टा (1843947)= 27551=खण्डशेषः। खण्डशेषः एव अहर्गणः भवति।** करणारम्भदिनम् 1947 आगस्त 15 सूर्यदयसमयः आसीत्। तस्मिन् दिनम् करणराम्भदिनम् इति मत्वा तस्मिन् दिनस्य ध्रुवाङ्काः अधः प्रदत्ताः वर्तन्ते। (कलिदिनम् -1843947)करणारम्भदिवसे तिरुवन्तपुरे ग्रहाणां ध्रुवसंख्या अधः प्रदत्ताः वर्तन्ते।

| | |
|---|---|
| **माबन्धुश्रीधरोलम्** | **3-29 -29- 35 सूर्यध्रुवाङ्कः।** |
| मणिचयधनगः | 3-8-16-55 चन्द्रध्रुवाङ्कः। |
| सन्निधाविन्दिरेन्दोः | 8-28-49- 7 केतुध्रवाङ्कः। |
| पुण्याभीज्ञोमनुष्यस्तपनहिमकरो | 1-5-4-11 राहुध्रुवाङ्कः। |
| भूपालंभोमरज्ञः | 0-25-33-14 कुजध्रुवाङ्कः। |
| खनिगणपुरपः | 1-21-53-2 बुधध्रुवाङ्कः। |
| पुण्यतत्त्वोन्नयार्थी | 7-10-46-11 गुरुध्रुवाङ्कः। |
| प्रज्ञोचारात्मयोगी | 3-15-26-2 शुक्रध्रुवाङ्कः। |
| कुनवनतकुलो भौमतश्चात्रसूक्ष्मात् | 3-16-4-1 शनिध्रुवाङ्कः। |

अभीष्टदिवसात् गतदिवससंख्यातः सदृष्टाङ्गविहृष्टा 1843947 ऋणीक्रियते चेत् खण्डशेषम् अथवा खण्डाहर्गणं प्राप्स्यते। 1871428 अभीष्टकलिदिनसङ्ख्या-1843947(करणारम्भदिनस्य कलिदिनसंख्या)= 27551=खण्डशेषः। अहर्गणम्।




[1] शुद्धदृग्गणितम्-मध्यमप्रकरणम्-श्लोकः सं-2

 ISSN: 2320-740X

## ग्रहमध्यमानयनप्रक्रिया।

ग्रहः कस्मिन् दिशि कुत्र वर्तते इति ज्ञानमेव ग्रहमध्यमानयनम्। पृथिवी अपेक्षया आकाशं द्वादशधा विभज्यते चेत् राशिः भवति। तत् अधः चित्रमाध्यमेन दर्श्यते।




## मध्यमसूर्यगतिसाधनम्।

**द्युगणः पड्डहतदिनातो वचसाप्तांशदी विरहितोशदीः।**

**द्युमणिस्स्युदोतस्मिन् वसुगौरहृतं कलादीकं योज्यम्।।[1]**

**खण्डशेषं द्विधा संस्थाप्य एकम् पड्ड इति 11 तः गुणना करणीया। वचसा तः 764 भागम् कर्तव्यम्। तदानीं अंशाः लभ्यन्ते।**

27551 X 11=303061= 396.676702 अंशाः

764 = 764

303061

302544-

…………………

517 शेषः

शेषात् 60 तः गुणनं कृत्वा 764 तः हरणं क्रियते चेत् कलाः अपि च पुनः शेषतः 764तः हरणं क्रियते तदा 40 कलाः भवन्ति।

517X60 =31020 =40 कलाः

764=764

31020-

30560

460

---

[1] शुद्धदृग्गणितम्-मध्यमप्रकरणम्-श्लोकः सं-10

460x60=27600

27600

764=36.12565445026178 विकलाः

396-40-36 एवं फलं प्राप्स्यते

**विरहितोंशदीः अर्थात् प्राप्तं फलम् खण्डशेषात् न्यूनीक्रियते तर्हि भागादि रविस्फुटम् लभ्यते।**

**396- 40-36 कलाः इदं फलम् खण्डशेषात् न्यूनीक्रियते तर्हि भागादि रविस्फुटम् लभ्यते।**

**396 इति संख्यां पुनः खण्डशेषात् शोधनीयम् करणीयम् । तदानीम् अंशाः लप्स्यन्ते।**

27551 -

396.

27155अंशाः प्राप्ताः। तस्या राश्यादि परिवर्तनार्थम् त्रिंशता विभागः करणीयः।

27155(प्राप्तम् अंशम्)/30(राशिमानम्)=905 फलम् राशयः , 5 शेषः अंशाः भवन्ति। राशिं 12 विभज्यते चेत् भचक्रम् अपि प्रस्तुतग्रहस्थितिः प्राप्स्यते। 905/12=75 भचक्रम् |5शेषः|905/12=75.41666666666667 भचक्रम्

5 राशिः 5 अंशाः लभन्ति।

**वसुगौरहृतं कलादीकं योज्यम्।।[1] इति वाक्यानुसारम् - खण्डशेषं वसुगौर 2374 तः हरणं कृत्वा तदा कलादिफलम् प्राप्स्यते।**

27551(खण्डशेषः)÷2374 =**11 .60530749789385**

5-5-11-00

03-29-29-35 सूर्यध्रुवाङ्कः

9-4-40-35 मध्यमरविस्फुटम्।

19 Jan 23 - सूर्यस्फुटम् - 9-4-40-00 एवं वर्तते।

**यदि खण्डशेषः 1 स्यात् ,**

1 X 11 = 0.0143979058 प्रथमफलम्

764

विरहितांशदीः इति सूत्रानुसारम् खण्डशेषात् संशोधनीयम्।

1-0.0143979058=.9856020942 द्वितीयफलम्।

=.9856020942x60=59.136125652

1/2374=0.00042122992 कलाः भवन्ति।

[1] शुद्धदृग्गणितम्-मध्यमप्रकरणम्-श्लोकः सं-10

 ISSN: 2320-740X

59.136125652+.00042122992=59.1365468 सूर्यस्य दैनिकगति कलाः।

=3548.19281विकलाः।

03-29-29-35 सूर्यध्रुवाङ्कः+

05-04-07-00 संशोधितम् फलम्

09-04-36-35 मध्यमग्रस्फुटम्।

**चन्द्रमध्यमानयनप्रक्रिया।दुष्टघ्नादिनवृन्दात्। कवनाप्तफलं विदुबवलभाद्यः।। हंसवलब्दलवाद्यैः। देहदयोप्तर्यतः कलाद्यश्च।।**[1]

खण्डशेषं 18 तः गुणना करणीया। कवन 41 तः हरणं करणीयम् । यत् फलं लभति तत् राशयादि परिवर्तनीयम्।शेषं 30 तः गुणनं कृत्वा 41 हरणं करणीयम् तेन अंशः लप्स्यते। अनेन प्रकारेण शेषं 60 तः गुणनं करणीयम् पुनः 41 तः विभजनीयम् तदा कलाः लप्स्यन्ते। शेषः 60 तः गुणनं कृत्वा 41 तः विभज्यते तदा विकलाः लप्स्यन्ते। राशिं 12 धा विभज्यते चेत् भचक्रं मिलति। शेषमेवनिजराशिः भवति। खण्डशेषात् हंसव 178तः हरणं क्रियते चेत् भागादिफलम् लप्स्यते। खण्डशेषात् देहदयतः (1888)हरणं क्रियते चेत्कलादिफलाः लप्स्यन्ते।

1x18=18, 18/41=.4390243902439024 । शेषं तु30 तः गुणनं कृत्वा 41 हरणं करणीयम् तेन अंशः लप्स्यते।

1/(हंसव)178=.0056179775280899 अंशादि फलम्।

1/(देहदया)1888=.000529661017 कलाःभवन्ति।

0.43902439x30=13.1707317

0.1707317x60=10.243902(10 कला)

0.243902x60=14.634

13 -10-15 चन्द्रगतिः

**उदाहरणम् -1**

(खण्डशेषः)27551x(द्युष्ट)18=495918

495918/41(कवन)=12,095.56097560976 राशिः।

1800 तः गुण्यते चेत् कलादिः प्राप्यते। 12,095.56097560976

X1800=21,772,009.75609757।प्रथमफलम्।

**हंसवलब्धफलाद्यैः योजनीयम्।**

27551/178=154.7808988764045फलम्(अंशः)।

[1] शुद्धदृग्गणितम्-मध्यमप्रकरणम्-श्लोकः सं-11

154.7808988764045X60=9,286.85393258427 कलाः। द्वितीयम् फलम्।

**देहदयाप्तं कलाद्यैः युतः। अर्थात्  खण्डशेषं देहदयैः आप्तं स्यात् तर्हि कलादि प्राप्स्यते।**

27551/1888=14.5926906779661 कलाः। तृतीयम् फलम्।

21,772,009.75609757 कलादयः प्रथमं फलम्+

9,286.85393258427 कलादयः द्वितीयम् फलम्+

<u>14.5926906779661 कलादयः तृतीयं फलम्</u>

=21781311.2025 कलाः

21781311/60= 363021भागम्  51 कला 56 विकला

=12100 राशि 21 भागम् 18 56 विकला

=1008भगण 11 राशि 17 भाग18 कला 56 विकला

**=4 राशिः-17भागः-18कला -56 विकला**

## अपरम् विधानम् ।

अहर्गणःxचन्द्रगतिः= मध्यमगतिः

27551(अहर्गणः)x790-581510743-(चन्द्रमध्यमगतिः)

=21781296 कला 36 विकला

04-17-18-56 प्राप्तम् फलम्।

<u>03-08-16-55 चन्द्रध्रुवाङ्कः</u>

<u>7-25-35-51 चन्द्रमध्यमम्।</u>

*******

 ISSN: 2320-740X

# ब्रह्मविद्याभरणप्रकाशितम् अध्यासभाष्यतात्पर्यम्

श्रीजित् टि.जि.

चोलदेशीयैरद्वैतानन्दस्वामिपादैःविरचितोऽयं ग्रन्थः भवतिब्रह्मविद्याभरणम्। नास्त्यस्य किञ्चिद्व्याख्यानम्। ब्रह्मसूत्रशाङ्करभाष्योपरि अतिविस्तृतया उपलभ्यमानमेकं व्याख्यानमस्तीदम्। ग्रन्थकारैः स्वविचारः भामती-कल्पतरु-परिमलान्तविचारैः पोषितो वर्तते। अतःभामत्यादिविचाराणां सङ्ग्रह एव ब्रह्मविद्याभरणमित्यपि वक्तुं शक्यते। परिमलान्तग्रन्थोक्तार्थं सनिष्कर्षं भङ्ग्यन्तरेण निरूपयन्तो भाष्यं व्याचक्षते ब्रह्मविद्याभरणकाराः। नैते एकान्तेन भामतीप्रस्थानं विवरणप्रस्थानं वा अनुसरन्ति। क्वचित् विवरणं क्वचित् भामतीति मतद्वयमपि निरूप्यतेतिविशेषः। साकल्येन परिमलान्तग्रन्थोपपादितभाष्यभावार्थपरिज्ञानोपयुक्तं यावत्, न किमपि ततोऽतिरिक्तमस्यां व्याख्यायामुपवर्णितम्, न च न्यूनम्। आभरणोक्तम् अध्यासभाष्यतात्पर्यमिह सङ्क्षिप्योच्यते।

वेदान्तमीमांसाशास्त्रं नारम्भणीयमितिशङ्कामुद्भाव्य परिह्रियते प्रथमम्। विषयप्रयोजननिर्णयोपयोगिन-मध्यासमत्राक्षिपति'युष्मत्' इत्यारभ्य। प्रत्यक्षस्य प्राबल्यमुक्त्वा तद्सिद्धजीवगतकर्तृत्वादीनामपि सत्यत्वं व्यवस्थापयितुं न शक्यते इतिप्रत्यक्षस्य दुर्बलत्वादितिततःसमर्थ्यते। "स्मृतिरूपःपरत्र पूर्वदृष्टावभासः" इतियदुक्तम् अध्यासस्य लक्षणं अव्याप्त्यादिदोषग्रस्तत्वत् तस्य लक्षणत्वमेव न सम्भवतिइतिशङ्कामुद्भाव्य समाधानमुच्यते। कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयस्तद्धर्माणाम् इतिवाक्योक्तमाक्षेपतात्पर्यं सुष्ठु वर्ण्यते। कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेतिइत्यत्रापि प्रामाण्यस्य द्वैविध्यं प्रदर्श्य समाधत्ते। पश्वादिभिश्चाविशेषात् इतिवाक्यस्य स्पष्टं प्रतिपादनं क्रियते।

**अध्यासभाष्यम्**

ब्रह्मविद्याभरणे अध्यासभाष्यस्य जिज्ञासाधिकरणे एव साक्षादन्तर्भावःकृतः। एवमध्यासविचारः प्रथमाधिकरणे जिज्ञासाधिकरणे 'अथातो ब्रह्मजिज्ञासा' इतिसूत्रस्य आमुखत्वेन कृतः। प्रथमतया ग्रन्थारम्भे अध्यासभाष्यस्य भाष्यत्वमाशङ्कते, पदविधया वाक्यविधया वा सूत्रार्थःनात्र संगृहीत इति। शास्त्राभिमतब्रह्मात्मैक्यरूपःविषयः विना बन्धमिथ्यात्वं न सम्भवतीतिभाष्ये सूत्रार्थःसंगृहीत इतिसमाधत्ते।

**शास्त्रानारम्भणीयत्वे शङ्काग्रन्थः**

वेदान्तमीमांसाशास्त्रं नारम्भणीयम् विषयप्रयोजनयोरभावात् इति। कर्तुत्वभोक्तृत्वादिगुणसहितस्य जीवस्य अकर्तृत्वाभोक्तृत्वादिविरुद्धगुणसहितेन ब्रह्मणा साकम् ऐक्यासम्भवात् वेदान्तशास्त्रस्य प्रत्यग्ब्रह्मैक्यात्मकविषयो न सम्भवति। एवं विषयाभावात् शास्त्रमिदं नारम्भणार्हम्। तथा च न्यायः 'विषयप्रयोजने सिद्धे शास्त्रमारम्भणीयम्' इति। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इत्यपि स्पष्टम्।

जीवस्य कर्तृत्वादिकं मिथ्या इतिवक्तुं न शक्यते, तस्य प्रत्यक्षसिद्धत्वात्। प्रत्यक्षसिद्धं बाध्यते तस्य भ्रमत्वात् इतिन मन्तव्यं, प्रत्यक्षस्य बाध्यत्वाभावात्। आगमः प्रत्यक्षं बाधते इतितु न युक्तं तस्य दुर्बलत्वात्। प्रत्यक्षञ्च

प्रबलमुपजीव्यत्वात्, ज्येष्ठत्वात् निरवकाशत्वाच्च। स्थूलोऽहम् इत्यादिकं यथा भ्रमः तथा अहं कर्ता इत्यादिप्रत्यक्षमपि भ्रम इतिन वक्तव्यं शरीरेन्द्रियाणामात्मनश्च भेदः युक्त्यासिद्ध इतिहेतोः। भेदावगमात् अन्धोऽहम् इत्यादि व्यवहारः गौणः। एवं विषयाभावात् तत्प्रमारूपप्रयोजनमपि नास्ति। विषयप्रयोजनयोरभावेन शास्त्रं नारम्भणीयमित्यभिप्रेत्य विषयप्रयोजननिर्णयोपयोगिन-मध्यासमत्राक्षिपति'युष्मत्' इत्यारभ्य। युष्मत्प्रत्ययगोचरः आत्मा च। एवं युष्मदस्मत्प्रत्ययौ इतिविरुद्धप्रवृत्तिनिमित्तकशब्दप्रतिपाद्यत्वेन भेदग्रहः दर्शितः। भेदावगतिः अध्यासं प्रतिबध्नाति।

**युष्मच्छब्दप्रयोगस्य प्रयोजनम्**

[1]जडपदार्थस्य बोधनार्थं इदंशब्दोल्लेखिप्रत्ययगोचर इतिवक्तव्ये, तद्विना युष्मच्छब्दोल्लेखिप्रत्ययगोचर इतिकथनेन किं प्रयोजनमित्यत्रोच्यते आत्मानात्मनोः परस्परविरोधे ज्ञापनीये, इदंशब्दापेक्षया अत्यन्तविरोधं द्योतयतियुष्मच्छब्द इति। यतश्च इदमस्मच्छब्दयोः 'इमे वयं' 'अयमहमस्मि' इतिलौकिकवैदिकसामानाधिकरण्यव्यवहाराधिक्यात् एतदुभयोः तथाविरोधः न स्फुरति।

**तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिः**

इतरेतरभावश्च तादात्म्यम्। धर्म्यध्यासः न सम्भवतिविरुद्धत्वात् इत्युक्तं पूर्वं, तेनैव धर्माध्यासोऽपि न सम्भवतीतियद्यपि सिद्धं तथाऽपि विशेषशङ्कानिरासार्थं पुनः कथनम्। शङ्काविशेषस्तु धर्म्यभेदाध्यासाभावेऽपि स्फटिके जपाकुसुमारुणिम्न[2] इव शरीरे आत्मधर्मस्य चैतन्यादेरध्यासः कुतो न स्यादिति। अत्र तु वैषम्यमुच्यते स्फटिके जपाकुसुमस्य प्रतिबिम्बः[3] भवितुमर्हतितस्य रूपवत्वात्, किन्तु शरीरे आत्मप्रतिबिम्बः न सम्भवति, आत्मनः नीरूपत्वात्। धर्म्यभेदाध्यासाभावेऽपि 'नीलं सलिलम्' इतिसलिले नैल्याध्यासः, तथा आत्मानन्तःकरणयोश्च भवतु इत्याशङ्कावारणाय सुतरामित्युक्तम्। उत्तरत्र देहात्मैक्याध्यासोऽपि निरस्यतिअस्मत्प्रत्यगोचरे इतिदलेन। विषयस्य तद्धर्माणाञ्चाध्यास इत्यत्र विषयशब्दः अन्तःकरणपर इतिस्पष्टमुक्तम्। तद्विपर्ययेण इत्यत्र वैपरीत्यमित्थं प्रकाशितम्, एकत्रात्मा अधिष्ठानमपरत्र जड अधिष्ठानमिति। एवमेव मिथ्येतिभवितुं युक्तमित्यत्र मिथ्याशब्दः असम्भवपर इतिज्ञेयम्। इत्येवं शङ्काग्रन्थं निरूप्य परिहारग्रन्थमारभ्यते तथाऽपि अन्योन्यस्मिन्निति।

**परिहारग्रन्थः**

प्रत्यक्षसिद्धञ्चेदपि जीवस्य कर्तृत्वभोक्तृत्वादिकं मिथ्यैव। नात्र प्रत्यक्षस्य प्राबल्यमुक्त्वा तद्सिद्धजीवगतकर्तृत्वादीनामपि सत्यत्वं व्यवस्थापयितुं शक्यते प्रबलागमापेक्षया प्रत्यक्षस्य दुर्बलत्वात्। तथा च स्मर्यते प्राबल्यमागमस्यैव जात्या तेषु त्रिषु[4] स्मृतम् इति। उपजीव्यैव प्रत्यक्षं इतरप्रमाणं प्रवर्ततेति, उपजीव्यत्वात् प्रत्यक्षस्यैव प्राबल्यमितिन वक्तव्यम्, उक्तसामान्यन्यायस्य विशेषन्यायात् बाधसम्भवात्। विशेषन्यायश्च उपजीव्योपजीवकयोरेव

1 स्वतः प्रत्ययाभाववान् इष्टानिष्टानभिज्ञो वा (सर्वलक्षणसंग्रहः, पृ.55)

2 अत एवेन्द्रियसन्नकृष्ट-जपाकुसुमगतलौहित्यस्य स्फटिके भानसम्भवान्न स्फटिकेनिर्वचनीयलौहित्योत्पत्तिः। (वेदान्तपरिभाषा -1)

3 प्रतिबिम्बम् – उपाध्यन्तर्गतत्वे सति औपाधिकपरिच्छेदशून्यत्वे सति बहिःस्थितस्वरूपकत्वम्। न्यायरत्नावली।

4 प्रत्यक्ष-अनुमान-आगमेषु इत्यर्थः।अद्वैतसिद्धिः बालबोधिनीव्याख्योपेता।

 ISSN: 2320-740X

उपदेशानुपदेशत्वे विपरीतं बलाबलम् इति। एवमेव तात्पर्यलिङ्गसहितत्वात्[1] प्रत्यक्षात् श्रुतिरेव प्रबला। अपिच अपच्छेदन्यायानुसारेणाऽपि उत्तरत्रोत्पन्नागमस्यैव पूर्वोत्पन्नप्रत्यक्षापेक्षया प्राबल्यम्। अत एवोच्यते नानुपमृद्य पूर्वमुत्तरमुत्पत्तुमर्हतीति। निरवकाशत्वात् श्रुत्यपेक्षया प्रत्यक्षस्य प्राबल्यमितिन वक्तव्यं, तस्य व्यावहारिकत्वेन सावकाशत्वात्। प्रत्यक्षस्य निरवकाशत्वेऽपि न तस्य प्राबल्यं भवतिअप्रामाण्यात्।

शरीरात्मनोः भेदावगमात् अन्धोऽहम् इत्यादिप्रत्यक्षं न भ्रमः , किन्तु गौण एव इतियदुक्तं तन्न समीचीनम्। 'य एवाहं स्वप्ने देवःस एव मनुष्यः ' इतिप्रतीतिस्तु 'यदेव रजतं सैव शुक्तिः' इतिवत् स्वप्नशरीरस्य मिथ्यात्वेन सर्वसम्प्रतिपन्नतया 'बाधायां सामानाधिकरणावगाहिनी' इतिशङ्काकलङ्किता न स्थायितया देहादात्मनि भेदनिर्णयोपयोगिनी। तस्मात् प्रबलस्य प्रमाणस्य सतिसम्भवे दुर्बलप्रमाणानुसारेणान्यथानयनायोगात् अद्वैतात्मबोधकत्वे न काचिदनुपपत्तिःश्रुतेरितिविषयसम्भवेन तत्प्रतीतिद्वारा मोक्षरूपस्य प्रयोजनस्यापि सम्भवात् शास्त्रमारम्भणीयमेव। न तत्र कोऽपि विरोधः ।

**अहमिदमितिव्यवहारः**

अन्योन्यात्मकतामध्यस्य अहमिदमितिव्यवहारः, अन्योन्यधर्मांश्चाध्यस्य ममेदमितिव्यवहारः इत्येवं मूलपङ्क्तेरन्वयः । अहमिदम् इत्यनेन मनुष्योऽहम् इतिशब्दाभिलापरूपो व्यवहारः विवक्षितः। 'इति' शब्देन प्रवृत्तिनिवृत्यादिरूपश्च। 'ममेदम्' इत्यत्र 'मम सुखं' 'मम रूपम्' इत्येवं शब्दाभिलापरूपो व्यवहारः। 'इति' शब्देन प्रवृत्त्यादिरूपश्च विवक्षितः।

एतादृशव्यवहारपर्यन्तानुधावनं विनाध्यासं व्यवहारो न स्यात् इतिउपपत्तिसूचनाय। अध्यस्य इतरेतराविवेकेन इत्यत्र 'अध्यस्य' इतिपदस्य क्त्वा प्रत्ययः विशेषार्थज्ञापनाय प्रयुक्तः। विशेषार्थश्च अध्यासक्रिया तथा व्यवहारक्रिया इत्युभयोः क्रिययोः कर्ता एक एव इतिबोधः। अध्यासं विना व्यवहारस्यानुपपत्तेः, अध्यस्य व्यवहार इतिल्यपःअर्थःज्ञेयः।

तत्र इत्थं निरूपितमस्ति, पूर्वपूर्वाध्यासस्योत्तरोत्तरध्यासं प्रतिसंस्कारद्वारा पूर्वकालत्वेन हेतुत्वद्योतनार्थं ल्यपः प्रयोग इति। एवं तत्र हेतुहेतुमद्भावेन प्रत्यगात्मनि अध्यासप्रवाह अनादिरितिभावःद्योतितः। इत अर्थाक्षिप्तं भवतिअध्यासपूर्वक एव व्यवहार इति। नैसर्गिकोऽयं लोकव्यवहार इत्यत्र नैसर्गिकत्वं इत्यस्य अनादित्वमित्यर्थः। अनादित्वस्य द्वैविध्यं प्रदर्श्यते स्वरूपेण प्रवाहतश्च इति। स्वरूपेणानादित्वं अजन्यानां पदार्थानां भवति, प्रवाहानादित्वञ्च जन्यानां पदार्थानां भवति। मिथ्याज्ञाननिमित्त इत्यस्य अनृताज्ञाननिबन्धन इत्यर्थः।

**अध्यासलक्षणविचारः**

"स्मृतिरूपः परत्र पूर्वदृष्टावभासः" इति अध्यासस्य लक्षणमुक्तम्। अस्य [2]लक्षणत्वमेव न सम्भवतिअव्याप्त्यादिदोषग्रस्तत्वादितिशङ्कामुद्भाव्य विचारः क्रियते। यद्यपि स्मृतिरूपत्वं हि 'इदं रजतम्' इत्यनुभवानन्तरं जायमाना या स्मृतिः तत्र वर्तते, तथाऽपि 'परत्र' इतिपदं न सम्भवतीतिप्रथमा शङ्का। एवमेव परत्र इतिपदेन

---

1 तात्पर्यवद्वाक्यं इतरापेक्षया प्रबलम्। उपक्रमोपसंहाराभ्यसापूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये।।वेदान्तसारः।

2 निर्दुष्टं लक्षणं स्यात्। अव्याप्ति-अतिव्याप्ति-असम्भवदोषाणां रहितत्वं निर्दुष्टत्वम्। अव्याप्तिः- लक्ष्यैकदेशावृत्तित्वम्। अतिव्याप्तिः- अलक्ष्ये लक्षणसत्त्वम्। असम्भवः-लक्ष्यमात्रे कुत्रापि लक्षणासत्त्वम्। (तर्कसंग्रहः (इन्दु-आदि व्याक्याचतुष्टयोपेतः) पृ.सं. 12।

पूर्वदृष्टदेशादन्यदेशत्वं यदि विवक्षितं तर्हि अहङ्काराद्यध्यासेष्वव्याप्तिर्भवति। यस्मिन्नेव साक्षिणि पूर्वं दृष्टा अहङ्कारादयः तत्रैवाध्यासात्। यदि परत्र इतिपदेन 'सत्ये' इत्यर्थःविवक्षितःतर्हि जडे आत्माध्यासस्य अन्योन्याध्यासमताऽभ्युपगमात् तत्राव्याप्तिः।

अपि च पूर्वदृष्टत्वमपि लक्षणे असङ्गतमेव। यतश्च शुक्तिरजतस्थले अपूर्वं रजतमुत्पद्यतेत्यङ्गीकारात् तत्र पूर्वदृष्टत्वं वक्तुं न शक्यते। दोषपरिहारार्थं पूर्वदृष्टपदस्य अर्थःपूर्वदृष्टसजातीयपर इतिस्वीक्रियते चेदपि दोषान्तरापत्तिः। तथाहि गर्भान्निर्गतस्य शिशोः पीतिमभ्रमे सजातीयपूर्वदर्शनासम्भवात्। येन प्रकारेणाध्यासः तेन प्रकारेण पूर्वदर्शनं विवक्षितञ्चेदपि दोष एव। संसर्गाध्यासे तदसम्भवात्। संसर्गांशे निष्प्रकारतया 'येन प्रकारेण' इत्येवं रूपस्यासम्भवात्। एवमेतादृशदोषसद्भावात् कथमेतदध्यासस्य लक्षणं भवितुमर्हतीति। लक्षणासम्भवे अध्यास एव न सिध्यति। अतःब्रह्मविद्याभरणकाराणां मते एतादृशशङ्कां मनसि निधायैव भगवद्पादैः' अध्यासो नाम अतस्मिन् तद्बुद्धिरित्यवोचाम' इत्युक्तम्। व्याख्याकर्तृमते पूर्वोक्तस्यैवानुवादव्याजेन तस्यैवार्थं स्फुटीकरिष्यत्यत्र।'अतस्मिन् तद्बुद्धिः' इत्यत्र अधिष्ठाने आरोप्यस्याभावःप्रतिपाद्यते। अयमर्थःअतस्मिन् इत्यत्र बहुव्रीहिसमासस्वीकारादुपलब्दः। समासश्च न विद्यते तत् यस्मिन् तत् - अतत्, तस्मिन् अतस्मिन्। एवञ्च बहुव्रीहिसमासात् विशेषार्थःप्रकट्यते। आरोप्याभावस्याधिष्ठाने प्रतिपादनात् एकत्र समानसत्ताकयोः प्रतियोगितदभावयोः विरोधात् विषमसत्ताकत्वं सूचयति। आरोप्यस्य तदभावस्य च वस्तुतःअधिष्ठानसत्तातिरिक्तसत्तानभ्युपगमात्। इत्थञ्च 'अधिष्ठानविषमसत्ताकबुद्धिः अध्यासः' इति फलितोऽर्थः। एतदनुसारेण स्मृतिपदं स्मर्यमाणवस्तुसादृश्यप्रतिपादकम्। तत्सादृश्यञ्च प्रतीतिकाले असत्वम्।

परत्र इतिपदं अधिष्ठानार्थकम्। तथा च अधिष्ठाने अपरोक्षतया भासमानस्य स्वरूपतोऽसत्वायोगात् अधिष्ठानार्थकम्। तथा च अधिष्ठाने अपरोक्षतया भासमानस्य स्वरूपतोऽसत्वायोगात् अधिष्ठानस्य यादृशं सत्वं तादृशसत्वराहित्ये प्रतिपादिते अधिष्ठानविषमसत्ताकावभासत्वं लक्षणं पर्यवस्यति। अधिष्ठानशब्दस्य अर्थ उच्यते यद्गतमवभास्यं तत् अधिष्ठानम् इति। अतःजडेऽपि ब्रह्माधारत्वं आरोपितमितितत् अधिष्ठानम्। जडसत्तापेक्षया ब्रह्मसत्ताया उत्कृष्टत्वात् अधिष्ठानविषमसत्ताकावभासत्वं जडे ब्रह्माध्यासेऽपि अस्तीतिन दोषः । एतादृशलक्षणपरिष्कारेण इतरख्यातय अयुक्ता इत्यपि सूच्यन्ते। स्वपक्षे तु न कोऽपि दोषः । इतरख्यातिवैषम्यं संगृह्य प्रदर्श्यते।

तार्किकपक्षे अधिष्ठानं अवभासस्य रजतादेः हट्टादिकं, तत्समानसत्ताकञ्च रजतम्। अस्य मतस्य व्यावृत्तिस्तु अधिष्ठानशब्देनैव भवति। सत्ख्यातिमते अधिष्ठानं शुक्तिरेव, किन्तु रजतं शुक्तिसमानसत्तकम्। आत्मख्यातिमते आत्मा अधिष्ठानं आरोप्यं तत्समानसत्ताकञ्च। अख्यातिमते तु तार्किकवदेव सर्वम्। अत्र सर्वत्र अस्मदुक्तरीत्या अधिष्ठानविषमसत्ताकत्वं नास्ति समसत्ताकत्वमेव। [1]असत्ख्यातिस्तु द्विधा साधिष्ठाना निरधिष्ठाना च। तान्त्रिकाणां भवतिसाधिष्ठाना। निरधिष्ठाना च शून्यवादिनाम्। अत्र आद्यपक्षस्य व्यावृत्तिःअधिष्ठानपदेन भवति। अयमाशयः

[1] असत एवाध्यस्तपदार्थाकारेण भानम्। सर्वलक्षणसंग्रहः,पृ.सं -26।

 ISSN: 2320-740X

स्वाधिष्ठानविषमसत्ताकत्वम् असतिनिरूपयितुं न शक्यते, तस्य निरधिष्ठानत्वात्। द्वितीयपक्षस्य व्यावृत्तिस्तु अवभासपदेन भवति। अवभासपदञ्च अपरोक्षावभासपरम्। असत् अपरोक्षतया नावभासते इतितस्य व्यावृत्तिः।

[1]अन्यथाख्यातिरपि निरस्यते। तन्मते देशान्तरस्थस्य असन्निकृष्टस्य रजतत्वस्य भानं शुक्तौ भवतीति। सिद्धान्ते तु दोषसहिता अविद्या शुक्तिगता रजतत्वेन परिणमते। अतःभ्रमकालीनरजतमादाय प्रतीत्युपपत्तौ देशान्तरस्थरजतप्रतीत्यनुपपत्तेः। मतान्तरेष्वस्वरसात्मकः विचारः एतावता कृतः। परं स्वमतं सूचयति'अन्ये तु यत्र यदध्यासः तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत इति' भाष्यवाक्यमिदं इतरमतपरतया इतरैः व्याख्यातम्। किन्तु अत्र तु स्वमतपरतया व्याख्यातमितिकश्चन विशेषः ब्रह्मविद्याभरणकाराणां व्याख्यानसामर्थ्यं प्रदर्शयति।

तथा च अधिष्ठानविषयीभूतःयः पदार्थःतस्य विषमसत्ताकरजताद्यात्मकताम् अनिर्वचनीयताम् आचक्षते इति। शुक्तौ रजतमध्यस्यतिचेत् शुक्तेः सत्ता [2]व्यावहारिकी, रजतस्य प्रातिभासिकी च। अत एवोक्तम् अधिष्ठानापेक्षया अध्यस्तस्य विषमसत्ता इति। [3]प्रातिभासिकपदार्थस्य अनिर्वचनीयता वेदान्तिभिरंगीक्रियते। अतःविपरीतधर्मित्वकल्पनामाचक्षते इत्यस्य अनिर्वचनीयताम् आचक्षते इतियो अर्थःग्रन्थकारैः उक्तः स साधुरेव। 'अन्ये तु यत्र यदध्यासः' इत्यत्र 'अन्ये तु' इतिपदं सामान्यतया मतान्तरोपन्यासार्थं खलु उपयुज्यते, तथाऽपि क्वचित् स्वमतोपन्यासार्थमपि उपयुज्यते इति। 'आत्मा स,भोक्तुरित्यपरे' इत्यत्र अपरे इतिपदं स्वमतोपन्यासे एव दृश्यते।

**तथा च लोकेऽनुभवः**

१) शुक्तिका हि रजतवदवभासते। २) एकश्चन्द्रः सद्वितीयवत्

मिथ्यात्वस्य लोकप्रसिद्धिं प्रदर्शयितुमत्र दृष्टान्तद्वयमुपन्यस्तम्। एकेन तत्सिद्धौ किमर्थं दृष्टान्तद्वयस्यावश्यकता इत्यत्रोच्यते। आद्यो दृष्टान्तःवियदादिसकलप्रपञ्चस्य ब्रह्मणि आरोपं सम्भावयितुम्। सिद्धान्ते वियत् ब्रह्म इतिद्वौ पदार्थौ स्तः ब्रह्मणि वियत् आरोप्यते। इत्येवं वैषम्यम्। इदञ्च वैषम्यमाद्येन दृष्टान्तेन परिह्रियते। तत्र शुक्तौ रजतमारोप्यते इतिप्रदर्शनात् तत्राऽपि पदार्थद्वयं वर्तते। अधिष्ठानाधेयभावःवर्तते इतिभावः। तर्हि द्वितीयदृष्टान्तःकिमर्थमितिचेदुच्यते एकमेव ब्रह्म जीवेश्वररूपेण भेदमवाप्नोतिइतिप्रदर्शयितुम्। अयं सिद्धान्तःआद्येन दृष्टान्तेन न समर्थ्यते वैषम्यात्। यतो हि शुक्तिका रजतवदवभासते इत्यत्र शुक्तावधिष्ठाने तद्भिन्नस्य रजतस्य आरोपःक्रियते, दार्ष्टान्तिके तु जीवेश्वरौ न ब्रह्मणः भिन्नौ अभिन्नावेव। तद्बोधनाय एकश्चन्द्रः सद्वितीयवत् इतिदृष्टान्त एव उचितः। एक एव चन्द्रः चक्षुराद्युपाधिवैचित्र्यात् द्विधा भातिएवमेव एकमेव ब्रह्म [4]अन्तःकरणोपाधिवैचित्र्यात् जीवरूपेण मायोपाधिवैचित्र्यात् ईश्वररूपेण च भाति।

1 तदभाववति तद्प्रकारकभानम्। नैय्यायिकानां मतम्। सर्वलक्षणसंग्रहः, पृ.सं. 15।

2 ब्रह्मप्रमाबाध्यत्वं व्यावहारिकत्वम्। अद्वैतसिद्धः।

3 ब्रह्मज्ञानं विना बाध्यमानत्वम्। सर्वलक्षणसंग्रहः. पृ.19।

4 जीवो नामान्तःकरणावच्छिन्नचैतन्यम। मायावच्छिन्नं चैतन्यं परमेश्वरः। वेदान्तपरिभाषा-प्रत्यक्षपरिच्छेदः।

**कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयस्तद्धर्माणामित्यस्याशयः**

अत्र स्वप्रकाशस्य निरंशस्य ब्रह्मणोऽधिष्ठानत्वं न सम्भवतीति आक्षेपः क्रियते। आक्षेपस्य तात्पर्यं किमितिमूलपङ्क्तौ न स्पष्टम्। किन्तु ब्रह्मविद्याभरणे स्पष्टतया भाष्यवाक्यस्य तात्पर्यं लभ्यते। तथा च आक्षेपस्याशयः इत्थमस्ति, अपरोक्षाध्यासं प्रतिन केवलम् आरोप्यवस्तुज्ञानम् अपि तु अधिष्ठानस्य सामान्यांशज्ञानम् अपरोक्षज्ञानं विशेषांशस्य अज्ञानञ्चापेक्षितम्। यतश्च तदा एव 'इदं रजतम्' इत्याकारकम् अध्यासः सम्भवति। कथमितिचेत् अधिष्ठानस्य सामान्यविशेषांशद्वयस्य सद्भावात् करणदोषेण विशेषांशज्ञानप्रतिबन्धे सतिसामान्यांशज्ञानं इन्द्रियेण भवतीतिवक्तुं शक्यते। अध्यासस्य क्लिप्तोऽयं प्रकारः प्रत्यगात्मविषये न सम्भवतितस्य निरंशत्वात् जन्यज्ञानासम्भवाच्च। तेन च नित्यज्ञानस्य करणदोषवशात् सामान्यांशमात्रावगाहित्वं विशेषांशानवगाहित्वं इत्येवं प्रकारः वक्तुं न शक्यते। प्रत्यगात्मन्यविषये इत्युक्तं मूले। तस्यार्थःव्याख्याने एवं वर्ण्यते बुद्ध्यादिभ्यः प्रातिलोम्येन निरंशत्वरूपेण अञ्चतिवर्तते इतिप्रत्यगात्मा, निरंश इति तात्पर्यम्। अविषय इत्यनेन अध्यासोपयुक्तसामान्यांशमात्रग्रहणराहित्यमुक्तम्। एवमेव पुरोऽवस्थिते इत्यस्य अपरोक्षे इति, विषये इत्यस्य सामान्यात्मना गृहीते इतिचार्थः उक्तः ।

**न तावदयमेकान्तेनाविषयः**

दृष्टान्तेनायमर्थःस्फुटीक्रियतेति। यथा घटवतिभूतले नीलो घटो नास्तीत्युक्त्या न एकान्तेन घटाभावो विवक्ष्यते, एवं अहंप्रत्ययविषयत्वेनाभ्युपगते आत्मनि स्वरूपज्ञानविषयत्वाभावोक्त्या न एकान्तेन विषयत्वाभावो विवक्षितः। अपि च ब्रह्मविद्याभरणे तस्य विशेषतया विषयस्य लक्षणं उच्यते। तथा च "येन हि ज्ञानं निरूप्यते स एव ज्ञानस्य विषयः", समन्वयः - अहं इतिज्ञानं आत्मना निरूप्यते, यथा घटज्ञाननिरूपकतया घटो विषयो भवति। एवमेव अहमितिज्ञानस्य विषयो भवतिआत्माऽपि।

**कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति**

अविद्यायाः दोषरूपत्वात् दुष्टपुरुषसंयुक्तानाम् इन्द्रियादीनां प्रमां प्रतिकरणत्वासम्भवात् प्रत्यक्षादीनां प्रामाण्यप्रसिद्धिः कथं, कथं वा श्रुतिस्मृत्यादीनां शास्त्रत्वप्र सिद्धिः । अलौकिकार्थप्रमापकं हि शास्त्रमित्युच्यते इतिभावं विचिन्त्य शङ्कते। प्रामाण्यस्य द्वैविध्यं प्रदर्श्य समाधत्ते। तथा च संवादिप्रवृत्तिजननयोग्यज्ञानजनकत्वलक्षणं अबाधितवस्तुविषयकज्ञानजनकत्वलक्षणं च इतिप्रामाण्यं द्विविधम्। आद्यं लौकिकवैदिकप्रमाणसाधारणम्। द्वितीयं तु ब्रह्मप्रमाणस्यैव। शुक्तिरजतज्ञानजनकस्य तु नोभयथापि इतिन तत्र प्रमाणत्वव्यवहारः। एतादृशप्रमाणप्रेरकतायामहङ्काराद्यध्यासरूपदोषोऽनुकूल एव, न प्रतिकूलः । असङ्गस्यात्मन अहङ्काराद्यध्यासं विना प्रमाणप्रेरकत्वासम्भवात्। तादृशप्रामाण्यपरिपन्थित्वं तु बाधस्यैव। स च यावद्ब्रह्मज्ञानं नास्ति लौकिकप्रमाणानामिति व्यावहारिकं प्रामाण्यं तेषामुपपद्यते। वेदान्तानां तु न कदापि प्रमेयबाधोऽस्तीतितत्त्वावेदकत्वं तेषामुपपद्यते इतिभाष्यवाक्यस्य शङ्कायाः आशयः।

 ISSN: 2320-740X

**पश्वादिभिश्चाविशेषात्**

ब्रह्मविद्याभरणे तावत् विवेकिनां द्वैविध्यमादौ प्रदर्श्य विचारं नयति। तथा च विवेकिनः द्विधा

१) देहातिरिक्तात्ममात्रपर्यवसितविवेकाः । २) अशनायाद्यतीतात्मपर्यन्तविवेकाः ।

तत्र आदावुक्तः विवेकः कर्तृत्वादि यो भ्रमः तद्विरोधी न भवति। अत एव ज्योतिष्टोमादिकर्मसु तस्य नास्ति विरोधः । अस्य विवेकिनः शरीरतादात्म्याध्यासः वर्तते। तेन च पश्वादितुल्यतया इष्टसाधनताज्ञाने लौकिकी प्रवृत्तिर्भवति। एवमेव अनिष्टसाधनताज्ञाने निवृत्तिश्च संभवति। मनुष्योऽहं इत्यादि व्यवहारश्च उपपद्यते। देहातिरिक्तात्मज्ञानम् अस्ति चेदपि कस्मिंश्चित् दोषे सतिदेहतादात्म्याध्यासः सम्भवति। न तत्र कोऽपि विरोधः । तत्तु लोके द्रष्टुं शक्यते, येषामस्ति देहातिरिक्तात्मज्ञानं तेऽपि लौकिकव्यवहारेषु स्वशरीरं स्वांगुल्या निर्दिश्यैव इष्टसाधनविषयेषु प्रवर्तन्ते। किन्तु अशनायाद्यतीतात्मज्ञानं तु तेषां लौकिकवैदिकप्रवृत्युपयोग्येव न भवति। प्रत्युत दृढरूपःस च निश्चयः वैदिकप्रवृत्तिविरोध्येव। आत्मनिश्चये सत्यपि यदि प्रारब्धदोषः तं न त्यजतितर्हि अध्यासोऽपि तं गृह्णाति। अत एव, तादृशप्रारब्धकर्मदोषवशादेव आत्मज्ञानी अपि कदाचित् 'ब्राह्मणोऽहं भुञ्जे' इति व्यवहरति। यद्यपि अयं व्यवहारः अध्यासप्रयुक्तः, न अनर्थं जनयति, तथाऽपि आत्मज्ञानं निर्विशेषतया प्राप्तुं प्रतिबन्धको भवति।

**अहमिदं ममेदम्**

आभरणे 'अहमिदं' 'ममेदं' इत्यस्य एकैकपदस्य विशिष्टं व्याख्यानं लभ्यते। अहमिदं - मनुष्योऽहं इति शब्दाभिलाभरूपव्यवहारः। इति- प्रवृत्तिनिवृत्त्यादिव्यवहारः। ममेदं - मम रूपं, मम सुखम् इत्यादि शब्दाभिलाभरूपव्यवहारः। इति- प्रवृत्त्यादिव्यवहारः। अहमिदम् - 'मनुष्योऽहम्' इतितादात्म्याध्यासः। ममेदम् - 'शरीरम्' इतिसंसर्गाध्यासः।

इत्येवं अध्यासभाष्यस्य हृदयमवगन्तुं जिज्ञासुभिरवश्यं परिशीलनीयमिदं व्याख्यानं ब्रह्मविद्याभरणाख्यमित्युक्त्वा विचारस्यास्योपसंहारः क्रियते।

**अनुशीलितग्रन्थसूची**


- ब्रह्मसूत्रशाङ्कभाष्यम्- चौखम्बाविद्याभवन्, वाराणसी-1998
- ब्रह्मविद्याभरणम् –श्रीमदद्वैतानन्दस्वामिपादाः,-The Sanskrit Education Society,Madras-1976
- ब्रह्मसूत्रशाङ्कभाष्यम्(चतुःसूत्र्यन्तपूर्णानन्दीयव्याख्यासहिततया-श्रीगोविन्दानन्दप्रणीतया रत्नप्रभया समन्वितम्) चोखम्भा संस्कृत संस्थान्-2004
- ब्रह्मसूत्रशाङ्कभाष्यम्(भामतीपरिमलादिसहितम्) –कृष्णदास अकादमी, वाराणसी -1982

- द्वादशदर्शनसोपानावलिः – गुडकम्पेनियस्- वडोदरा -1993
- शाङ्करदर्शनमर्मप्रकाशः – कृष्णज्योतिस् - राष्ट्रयसंस्कृतविद्यापीठम्, तिरुपतिः-1996
- वेदान्तपरिभाषा-धर्मराजाध्वरीन्द्रः- चौखम्बाविद्याभवन्, वाराणसी-1993
- सर्वदर्शनसंग्रहः-माधवाचार्यः- चौखम्बाविद्याभवन्, वाराणसी-1981
- अद्वैतसिद्धः-मधुसूदनसरस्वती- चौखम्बाविद्याभवन्, वाराणसी-1982
- सर्वलक्षणसंग्रहः-स्वामि गौरीशङ्करभिक्षुः-चौखम्बा संस्कृत सीरीज् आफिस्- वारणासी-2000


**********

 ISSN: 2320-740X

# दशोपनिषत्सु प्रणवमाहात्म्यम्

**आतिरा हरिहरन्**

शोधच्छात्रः

श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः

**मुख्यशब्दाः-**

कोऽयं प्रणवः,प्रणवस्य प्राधान्यम्,ओङ्कारस्य मात्राविचारः,प्रणव - ब्रह्मणोः ऐक्यम्,प्रणवोपासना।

**शोधसारः-**

अस्य प्रपञ्चस्य सत्यभूतं किमितिजिज्ञासायां, संज्ञां उपनिषत्सु बहुभिः मार्गैः तस्य समाधानं प्रदत्तं दृश्यते । कदाचित् गुरुशिष्यसंवादरूपेण, कदाचित् प्रश्नोत्तरप्रतिवचनेन, कदाचित् साक्षादेव। अस्य संसारस्य सत्यभूतं अस्ति ब्रह्म। तस्यैव ब्रह्मणः प्रतीकरूपेण प्रणवस्य ओङ्कारस्य प्रतिपादनं कृतम्। प्रमुखेषु दशोपनिषत्सु ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तैत्तिरीय-ऐतरेय-छान्दोग्य-बृहदारण्यकोपनिषत्सु प्रणवस्य माहात्म्यं निरूपितम् अस्ति। तेष्वपि माण्डूक्य-छान्दोग्य-तैत्तिरीयोपनिषत्सु च आधिक्येन ओङ्कारस्य माहात्म्यं प्रतिपादितं वर्तते। ईशावास्योपनिषदि एकत्रैव प्रणवमधिकृत्य अक्षरब्रह्मणः उपासना विहिता। किञ्च कठोपनिषदि " एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छतितस्य तत् ॥"[1] इत्यादि मन्त्रेण प्रणवस्य माहात्म्यं उपास्यत्त्वं च वर्णितं विद्यते। अपि च प्रश्नोपनिषदि सर्वेषाम् आलम्बनरूपेण ओङ्कारः प्रतिपाद्यते। मुण्डके च प्रणवोपासना मोक्षोपायः इत्युच्यते। माण्डूक्ये तावत् आत्मनः प्रतीकमित्युक्त्वा प्रणवःवर्णितः। तैत्तिरीये अपि अक्षरब्रह्मणः ओङ्कारस्य स्वरूपं "मह॒ इति॒ ब्रह्म॑ । ब्रह्म॑णा॒ वाव सर्वे वे॒दा महयन्ते । भूरिति॒ वै प्रा॒णः । भू॒व॒ इत्य॑पा॒नः । सु॒व॒रिति॑ व्या॒नः । मह॒ इत्यन्न॑म् । अन्ने॑न॒ वाव॒ सर्वे॑ प्रा॒णा महयन्ते । ता वा एतावर्ततुर्धा । चत॑स्रवतो व्याह॑तयः । यो वेदं । स वे॑द॒ ब्रह्म॑ । सर्वेऽस्मै॑ दे॒वा ब॒लिमाव॑हन्ति ॥"[2] इतिमन्त्रेण उच्यते। छान्दोग्ये प्रणवस्य माहात्म्यं वर्णितं दृश्यते।"ओमित्येतदक्षरमुद्गीथमुपासीत।ओमिति ह्युद्गायति तस्योपव्याख्यानम् ॥ "[3] इत्यादि मन्त्रेण।

**कोऽयं प्रणवः-**

"एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् । एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छतितस्य तत्।" इतिकठोपनिषन्मन्त्रानुसारं प्रणवःअक्षरब्रह्म इत्युच्यते । यत् श्रेष्ठम् आलम्बनं परं ब्रह्म ज्ञात्वा ब्रह्मविद् ब्रह्मलोके महीयते । दशसु उपनिषत्सु शान्तिपाठे मङ्गलवाचीशब्दत्त्वेन प्रणवस्य, अर्थात् ओम् इतिअक्षरस्य प्रयोगः दृश्यते । यथा- "ॐ

---

1 कठोपनिषद् 1,2,16

2 तैत्तिरीयोपनिषद् 1,5,3

3 छान्दोग्योपनिषद् 1,1,1

सहनाववतु|सह नौ भुनक्तु|सह वीर्यं करवाव है| तेजस्वि नावधीतमस्तु मा विद्विषावहै| ॐ शान्तिः शान्तिः शान्तिः"[1] इति|| ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ॐ शान्तिः शान्तिः शान्तिः|"[2] इत्यादि शान्तिमन्त्रेषु दृश्यते| ईशावास्योपनिषदि एकत्रैव प्रणवमधिकृत्य दृश्यते- "वायुरनिलममृतमथेदंभस्मन्तं शरीरम् |ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर ॥ "[3] इति|

**प्रणवस्य प्राधान्यम्-**

दशोपनिषत्सु प्रायेण सर्वत्रैव ओङ्कारस्य वर्णनं दृश्यते । यथा- ईशावास्योपनिषदि- "वायुरनिलममृतमथेदंभस्मन्तं शरीरम् । ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर ॥ "इतिमन्त्रे ओङ्कारस्य वर्णनं लभ्यते| केनोपनिषदि ,प्रायेण ओङ्कारविषये न किमपि वर्णनं उपलभ्यते| कठोपनिषदि, मन्त्रत्रयेषु ओङ्कारस्य प्रतिपादनं दरिदृश्यते । यथा "सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति|यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥"[4], " एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छतितस्य तत् ॥","एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्|एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥"[5] इति|प्रश्नोपनिषदि ओङ्कारस्य प्रतिपादनं पञ्चमप्रश्ने दृश्यते| यथा-"एतद् वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः|तस्माद् विद्वानेतेनैवायतनेनैकतरमन्वेति॥"[6],"स यध्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्याभिसंपध्यते|तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण श्रद्धया संपन्नो महिमानमनुभवति॥"[7], "अथ यदि द्विमात्रेण मनसि संपद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकम्|स सोमलोके विभुतिमनुभूय पुनरावर्तते ॥"[8], "यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नः|यथा पादोदरस्त्वचा विनिर्भुच्यत एवं ह वै स पाप्मना विनिर्भुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते तदेतौ श्लोकौ भवतः॥"[9] इति|मुण्डकोपनिषदि मन्त्रद्वयेण ओङ्कारस्य वर्णनं दृश्यते| यथा-"प्रणवो धनुः शारो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।

अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत् ॥"[10], "अरा इव रथनाभौ संहता यत्र नाड्यः स एषोऽन्तश्चरते बहुधा

1 कठोपनीषद् शान्तिपाठः

2 ईशावास्योपनिषद् शान्तिपाठः

3 ईशावास्योपनिषद् 17

4 कठोपनीषद् 1,2,15

5 कठोपनीषद् 1,2,17

6 प्रश्नोपनिषद् 5,2

7 प्रश्नोपनिषद् 5,3

8 प्रश्नोपनिषद् 5,4

9 प्रश्नोपनिषद् 5,5

10 मुण्डकोपनिषद् 2,2,4

 ISSN: 2320-740X

जायमानः।ओमित्येवं ध्यायथ आत्मानं स्वस्ति वःपाराय तमसः परस्तात् ॥ "[1] इति। माण्डूक्योपनिषदि, यथा- "ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद् भविष्यदितिसर्वमोङ्कार एव।यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव ॥"[2] , "सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति॥"[3], "जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रा।आप्तेरादिमत्वाद् वा आप्नोतिह वै सर्वान् कामानादिश्च भवतिय एवं वेद ॥"[4], "स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रा उत्कर्षादुभयत्वाद् वा उत्कर्षतिह वै ज्ञानसन्ततिं समानश्च भवतिनास्याब्रह्मवित् कुले भवतिय एवं वेद ॥"[5], "सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोतिह वा इदं सर्वमपीतिश्च भवतिय एवं वेद ॥"[6], "अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनात्मानं य एवं वेद य एवं वेद ॥[7] इतिओङ्कारस्य वर्णनम्।तैत्तिरीयोपनिषदि, "यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात् संबभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्।शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा।कर्णाभ्यां भूरि विश्रुवम्।ब्रह्मणः कोशोऽसि मेधया पिहितः।श्रुतं मे गोपाय।आवहन्ती वितन्वाना। कुर्वाणा चीरमात्मनः। वासांसि मम गावश्च। अन्नपाने च सर्वदा। ततो मे श्रियमावह।लोमशां पशुभिः सह स्वाहा।आ मा यन्तु ब्रह्मचारिणः स्वाहा। वि मायन्तु ब्रह्मचारिणः स्वाहा। प्रमायन्तु ब्रह्मचारिणः स्वाहा। दमायन्तु ब्रह्मचारिणः स्वाहा। शमायन्तु ब्रह्मचारिणः स्वाहा। यशो जनेऽसानि स्वाहा। श्रेयान् वस्यसोऽसानि स्वाहा। तं त्वा भग प्रविशानि स्वाहा। स मा भग प्रविश स्वाहा। तस्मिन् त्सहस्रशाख। नि भगाहं त्वयि मृजे स्वाहा। यथापःप्रवता यन्ति। यथा मासा अहर्जरम्। एवं मां ब्रह्मचारिणः। धातरायन्तु सर्वतःस्वाहा। प्रतिवेशोऽसि। प्र मा भाहि। प्र मा पद्यस्व।"[8], "ओमितिब्रह्म। ओमितीदं सर्वम्।ओमित्येतदनुकृतिर्ह स्म वा अप्यो श्रावयेत्याश्रावयन्ति।ओमितिसामानि गायन्ति। ओं शोमितिशस्त्राणि शंसन्ति।ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति। ओमितिब्रह्मा प्रसौति। ओमित्यग्निहोत्रमनुजानाति।ओमितिब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति।ब्रह्मैवोपाप्नोति॥"[9], इतिओङ्कारस्य माहात्म्यं निरूपितम् अस्ति। ऐतरेयोपनिषदि प्रायेण ओङ्कारविषये न किमपि वर्णनं न दृश्यते। छान्दोग्योपनिषदि ओङ्कारस्य वर्णनम् एवमस्ति - "ओमित्येतदक्षरमुद्गीथमुपासीत। ओमितिह्युद्गायतितस्योपव्याख्यानम्॥", "एषां भूतानां पृथिवी रसः पृथिव्या आपो रसोऽपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वागरसो वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः"[10], "स एष

---

1 माण्डूक्योपनिषद् 2,2,6

2 माण्डूक्योपनिषद् 1

3 माण्डूक्योपनिषद् 7

4 माण्डूक्योपनिषद् 9

5 माण्डूक्योपनिषद् 10

6 माण्डूक्योपनिषद् 11

7 माण्डूक्योपनिषद् 12

8 तैत्तिरीयोपनिषद् 4,1

9 तैत्तिरीयोपनिषद् 8,1

10 छान्दोग्योपनिषद् 1,1,2

रसाना रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः॥"[1], "कतमा कतमर्क्कतमत्कतमत्साम कतमः कतम उद्गीथ इतिविमृष्टं भवति॥"[2], "वागेवर्क् प्राणः सामोमित्येतदक्षरमुद्गीथः। तद्वा एतन्मिथुनं यद्वाक् च प्राणश्चर्क् च साम च॥"[3], "तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे ससृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम्॥"[4], "आपयिता ह वै कामानां भवतिय एतदेवं विद्वानक्षरमुद्गीथमुपास्ते॥"[5], "तद्वा एतदनुज्ञाक्षरं यद्धि किंचानुजानात्योमित्येव तदाहैषो एव समृद्धिर्यदनुज्ञा समर्धयिता ह वै कामानां भवतिय एतदेवं विद्वानक्षरमुद्गीथमुपास्ते॥"[6], "तेनेयं त्रयीविद्या वर्तत ओमित्याश्रावयत्योमितिशसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन॥"[7], "देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजहुरनेनैनानभिभविष्याम इति॥"[8],इति।बृहदारण्यकोपनिषदि ओङ्कारस्य वर्णनम् दृश्यते। यथा-"द्वया ह प्राजापत्या देवाश्चासुराश्च। ततःकानीयसा एव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्धन्त। ते ह देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति॥"[9], "ते ह वाचमूचुस्त्वं न उद्गायेतितथेतितेभ्यो वागुदगायत्। यो वाचि भोगस्तं देवेभ्य आगायद्यत्कल्याणं वदतितदात्मने। ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीतितमभिद्रुत्य पाप्मनाऽविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपं वदतिस एव स पाप्मा॥"[10], "एष उ वा उद्गीथः प्राणो वा उत्प्राणेन हीद सर्वमुत्तब्धं वागेव गीथोच्च गीथा चेतिस उद्गीथः॥"[11] इति।

**ओङ्कारस्य मात्राविचारः-**

माण्डूक्योपनिषदि ओङ्कारस्य मात्रात्रयम् अधिकृत्य विशदीकरोति| अ,उ,म् इतित्रयः मात्राः सन्ति।"जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रा। आप्तेरादिमत्वाद् वा आप्नोतिह वै सर्वान् कामानादिश्च भवतिय एवं वेद ॥" यथा- जागरितस्थानः वैश्वानरः व्याप्तिहेतुमत्वात् वा, आदिमत्वात् वा प्रथममात्रा अकारः भवातिइतियः जानातिसः सर्वान् कामान् आप्नाति।"स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रा उत्कर्षादुभयत्वाद् वा उत्कर्षतिह वै ज्ञानसन्ततिं समानश्च भवतिनास्याब्रह्मवित् कुले भवतिय एवं वेद ॥"यथा-स्वप्नस्थाने तैजसः भवतिद्वितीयः उकारः। "सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोतिह वा इदं सर्वमपीतिश्च भवतिय एवं वेद ॥" यथा-सुषुप्तस्थानः प्राज्ञः भवतिओङ्कारस्य तृतीयः मकारः इतियः अवगम्यते, सः लोकस्य याथार्थ्यं ज्ञायते।

---

1 छान्दोग्योपनिषद् 1,1,3

2 छान्दोग्योपनिषद्1,1,4

3 छान्दोग्योपनिषद् 1,1,5

4 छान्दोग्योपनिषद् 1,1,6

5 छान्दोग्योपनिषद् 1,1,7

6 छान्दोग्योपनिषद् 1,1,8

7 छान्दोग्योपनिषद् 1,1,9

8 छान्दोग्योपनिषद् 1,2,1

9 बृहदारण्यकोपनिषद् 1,1

10 बृहदारण्यकोपनिषद् 1,2

11 बृहदारण्यकोपनिषद् 1,20

 **ISSN: 2320-740X**

"अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनात्मानं य एवं वेद य एवं वेद ॥"मात्रासहितःओङ्कारः- अव्यवहारः, प्रपञ्चस्य उपशमसहितः, परिशुद्ध, अद्वैतःचेतिचतुर्थःपादाः भवन्ति ।

**प्रणव-ब्रह्मणोः ऐक्यम्-**

तैत्तिरीयोपनिषदि शिक्षावल्ल्यां मन्त्रत्रयेषु प्रणवस्य सम्पूर्णविवरणं दृश्यते । " यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात् संबभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा।कर्णाभ्यां भूरि विश्रुवम्।ब्रह्मणः कोशोऽसि मेधया पिहितः।श्रुतं मे गोपाय।आवहन्ती वितन्वाना। कुर्वाणा चीरमात्मनः। वासांसि मम गावश्च। अन्नपाने च सर्वदा। ततो मे श्रियमावह।लोमशां पशुभिः सह स्वाहा।आ मा यन्तु ब्रह्मचारिणः स्वाहा। वि मायन्तु ब्रह्मचारिणः स्वाहा। प्रमायन्तु ब्रह्मचारिणः स्वाहा। दमायन्तु ब्रह्मचारिणः स्वाहा। शमायन्तु ब्रह्मचारिणः स्वाहा। यशो जनेऽसानि स्वाहा। श्रेयान् वस्यसोऽसानि स्वाहा। तं त्वा भग प्रविशानि स्वाहा। स मा भग प्रविश स्वाहा। तस्मिन् त्सहस्रशाख। नि भगाहं त्वयि मृजे स्वाहा। यथापःप्रवता यन्ति। यथा मासा अहर्जरम्। एवं मां ब्रह्मचारिणः। धातरायन्तु सर्वतःस्वाहा। प्रतिवेशोऽसि। प्र मा भाहि। प्र मा पद्यस्व।"यथा,वेदेषु मध्ये प्रधानप्रतिवाद्यः, यः छन्दोभ्यः अमृतात् अधिसंबभूव, सः सर्वकामानां ईश्वर : ओङ्कारः मेधया बलीयते। मे शक्तं भूयात्,मे जिह्वा मधुरवाणीं भूयात्, मे कर्णेभिः समीचीनं कार्याणि विश्रुवं, त्वं ब्रह्मणः मेधया विहितःकोशः अस्ति | मम ज्ञानस्य संरक्षणं करोतु इति।"ओमितिब्रह्म। ओमितीदं सर्वम्।ओमित्येतदनुकृतिर्ह स्म वा अप्यो श्रावयेत्याश्रावयन्ति।ओमितिसामानि गायन्ति। ओं शोमितिशस्त्राणि शंसन्ति।ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति। ओमितिब्रह्मा प्रसौति। ओमित्यग्निहोत्रमनुजानाति।ओमितिब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति।ब्रह्मैवोपाप्नोति॥"यथा, ओमितिब्रह्ममस्ति।ओमितिसमस्त विश्वमस्ति। 'ॐ' इतिअनुमोदनसूचकं अक्षरम्, संवेदस्य स्तोत्राणि 'ॐ' एव गायन्ति; ॐ 'शोम्' इतिकेवलम् शास्त्रं पठन्ति।'ॐ' इत्यनेन यज्ञे अध्वर्युः प्रतिवदति। 'ॐ' इत्यनेन ब्रह्मा सृष्टिः आरभ्यते ।अग्निहोत्रं 'ॐ' इत्यनेन एव अनुमतम्। ज्ञानव्याख्यानात् पूर्वं ब्राह्मणः 'ॐ' इतिउक्त्वा "ब्रह्म प्राप्नुयाम्" इतिउच्यते। वस्तुतःसः 'ब्रह्मं' प्राप्नोतिच।

**प्रणवोपासना-**

छान्दोग्योपनिषदि प्रथमखण्डे प्रणवोपासनायाः प्राधान्यमुच्यते। यथा-"ओमित्येतदक्षरमुद्गीथमुपासीत। ओमितिह्युद्गायतितस्योपव्याख्यानम्॥ " ॐ उद्गीथः भवति।सामवेदस्य जपःभवति। एवम् ॐ इतिव्याख्यानम्।"एषां भूतानां पृथिवी रसः पृथिव्या आपो रसोऽपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः॥ "सर्वेषां वस्तूनां सत्ता भवतिपृथिवी । भूतानां पृथिवी रसः, पृथिव्याम् आपः, अपाम् ओषधयः, औषधीनां पुरुषः,पुरुषस्य वाक्, वाचा ऋक्, ऋचः सामः, साम्ना उद्गीथः च ।"स एष रसानां रसतमः परमः पराध्योऽष्टमो यदुद्गीथः॥"सः उद्गीथः रसानां रसः भवति।तत् परमोन्नतस्थाने एव वर्तन्ते।"कतमा कतमर्क्कतमत्कतमत्साम कतमः कतम उद्गीथ इतिविमृष्टं भवति॥" अनन्तरं कतमं, ऋक्, सामं, उद्गीथा इतिविमृष्टं भवति। "तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे ससृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम्॥"यथा मिथुनौ

एते च ते च ॐ नित्याक्षरे लसन्ति; इदानीं प्रियायाः मिथुनस्य च मिलने खलु एकैकस्य परस्य कामं पूरयन्ति।
"आपयिता ह वै कामानां भवतिय एतदेवं विद्वानक्षरमुद्गीथमुपास्ते॥"अनेन ओङ्कारेण तेषां मनुष्याणां कामतृप्तिर्भवति|"तद्वा एतदनुज्ञाक्षरं यद्धि किंचानुजानात्योमित्येव तदाहैषो एव समृद्धिर्यदनुज्ञा समर्धयिता ह वै कामानां भवतिय एतदेवं विद्वानक्षरमुद्गीथमुपास्ते॥"यथा- सः ओङ्कारः मनुष्याणां कामानाम् आशीर्वाददाता च भवति|"तेनेयं त्रयीविद्या वर्तत ओमित्याश्रावयत्योमितिशसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन॥"ओङ्कारेण त्रियीविद्या वर्तते,तेन पुरोहितःऋक् पठति, यजुं उच्चारयति, सामं जपति। एतत् सर्वं च तस्य माहात्म्येन च।
"तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद। नाना तु विद्या चाविद्या च यदेव विद्यया करोतिश्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीतिखल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति॥"[1]
ओङ्कारः ज्ञानं एव, ज्ञानेन श्रद्धया वेदगुह्येन यत् कार्यं करोतितत् तस्य अधिकं पुरुषत्वं भवति|
"देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति॥"
देवाः असुराः च एकत्र संघर्षं कृतवन्तौ, उभौ च सर्वशक्तिमान् पितुः सन्तानौ आस्ताम्। अथ देवाः ओङ्कारस्य अथवा उद्गिथस्य शस्त्र गृहीतवन्तः। एवं प्रकारेण तेन ओङ्कारेण विजयः प्राप्ताः च।
एवमेव उद्गीथमधिकृत्य बृहदारण्यकोपनिषदि अपि वर्णनं कृतम्। यथा-"द्वया ह प्राजापत्या देवाश्चासुराश्च। ततःकानीयसा एव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्धन्त। ते ह देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति॥"प्रजापतेः द्वयौ पुत्रौ भवान्तौ देवासुरौ । ते एषु लोकेषु परस्परस्पर्धया वर्तन्ते । देवाः असुराणामुपरि जेतुम् उद्गीथमुपयुक्तम् ।"ते ह वाचमूचुस्त्वं न उद्गायेतितथेतितेभ्यो वागुदगायत्। यो वाचि भोगस्तं देवेभ्य आगायद्यत्कल्याणं वदतितदात्मने। ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीतितमभिद्रुत्य पाप्मनाऽविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपं वदतिस एव स पाप्मा॥ " यथा-ते देवाः वाचं प्रतिउद्गीथमालापयतु इत्युक्तम् । वाग्देवता अनुसरतिश्च ।देवाः उद्गीथया आक्रमणं करोतिइतिअसुराः विदुः। ते पाप्मना तं अविद्यन् | छान्दोग्योपनिषदि यद् उक्तं तत् अत्रापि समानं वर्तते। "एष उ वा उद्गीथः प्राणो वा उत्प्राणेन हीदं सर्वमुत्तब्धं वागेव गीथोच्च गीथा चेतिस उद्गीथः॥" "उच्च प्राणः, गीथा च प्राणतन्त्रा वाक् , इत्युभयमेकेन शब्देनाभिधीयते, स उद्गीथः ॥[2] इतिशांकरभाष्यम् ॥

**उपसंहारः-**

एवम् प्रकारेण ओङ्कारः एव प्रपञ्चः। प्रपञ्चः तु शब्दमयो भवति। प्रपञ्चस्य उत्पत्तिःशब्दादेव जायते, तत् शब्दःएव ओङ्कारः। ब्रह्मप्राप्त्यर्थं विद्यमानः श्रेष्ठः उपासना भवतिप्रणवोपासना। तस्य जपेन मोक्षः प्राप्येत । यः महत्तमया रीत्या ओङ्कारस्य साधनां कुर्यात् सः ईश्वरज्ञानी अथवा ब्रह्मज्ञानी भवेत् । ओङ्कारः नाणकस्य पार्श्वद्वयमिव व्यावहारिकपन्थानं तथातिशयात्मकं कालदिगतीतं सर्वाधिष्ठानं सर्वकारणं परमात्मानञ्च प्रतिनिधीकरोति। अकारः जाग्रदवस्थामुकारः स्वप्नावस्थां मकारःसुषुप्त्यवस्थां च प्रतिबिम्बयन्ति । एताः सर्वा अप्यवस्थाः मात्रातीतायामन्तिमायां

1 छान्दोग्योपनिषद् 1,1,10

2 बृहदारण्यकोपनिषद् 1,20 मन्त्रभाष्यम्

 ISSN: 2320-740X

तुरीयावस्थायां विलीयन्ते। अत्राकारोकारमकाराः क्षणिकाः नश्वराश्च भवन्ति। मात्रातीते तुरीये विलयं प्राप्तास्वेवैताः अनश्वरतां यान्तिद्य ओङ्कारस्याकारोकारमकारमात्राः सृष्टिस्थितिलयान् प्रतिनिधीकुर्वन्ति । सार्थावबोधेन यः प्रणवाक्षरस्य जपं करोति, सः सकलपापात् मुक्तः भवति। एवं मुख्यासु दशोपनिषत्सु ओङ्कारः ब्रह्मप्रतीकत्वेन उपासनामार्गत्वेन च वर्तते।सृष्टा असृष्टा च सर्वे चराचराः ओङ्कारे प्रतिबिम्बन्ते। ओङ्कारश्च परब्रह्म भवति।

**ग्रन्थसूचिः-**


1. छान्दोग्योपनिषत्. गोरखपुरः गीताप्रेस.
2. बृहदारण्यकोपनिषत्. गोरखपुरः गीताप्रेस.
3. ईशादि नौ उपनिषत्. गोरखपुरः गीताप्रेस.
4. गिरि, आनन्द. उपनिषद्भाष्यम् (१). वाराणसीः श्रीदक्षिणामूर्तिमठ प्रकाशन, 2018.
5. अद्वैतशारदा. दक्षिणाम्नाय श्री शारदापीठम्, https://advaitasharada.sringeri.net.


*******

# स्वतन्त्रतासंग्रामप्रसङ्गे गान्धिविजयनाटकस्य महत्त्वम्

**अजयकुमारमिश्राः**

असिस्टेंट प्रोफेसर

केन्द्रीयसंस्कृतविश्विद्यालय,नव दिल्ली

**मुख्यशब्दाः** - एचिसन महाविद्यालये, लोकमान्यः बाल गंगाधर तिलकस्य, दक्षिणअफ्रीकायात्राकथां औपनिवेशिकात्याचाराणां, भारतीय-स्वतंत्रता-संग्रामे राष्ट्रीयभावनायाः आंग्लसर्वकारविरुद्धे कान्तासम्मितोपदेशस्य आधिकारिक-कथावस्तुरुपेण 'गिरमिटिया' अफ्रीकादेशे नेटालप्रदेशे आर्थिकराष्ट्रवादस्य आंग्लाधिकारी हन्टरः नाट्यशास्त्रसिद्धान्तं पौलटैक्स इतिजालियांवालाबाग-काण्डस्य तोटकसन्ध्यंगः व्रजसन्ध्यंगः विद्रवः सन्ध्यंगः गांधी - इरविन समझौता निर्वहण-सन्धिरुपेण, डायरः, हिन्दीनिकटवर्ती , अमृतमहोत्सववर्षे

**शोधसारः** - सर्वथा अचर्चितमिदम् नाटकमधिकृत्य शोधपत्रमिदं संस्कृतानुरागिणां कृते सार्थकं भविष्यति। भारतीय-स्वतन्त्रतासंग्रामे संस्कृतस्य अवदानस्य प्रसंङ्गेऽपि अस्य महत्त्वमधिकं वर्तते। अतःस्वतन्त्रायाः अमृतमहोत्सववर्षे गान्धिविजयनाटकमिदं आधुनिक-संस्कृत-साहित्यस्य श्रीवृद्धिं अपि कर्तुं सर्वथा सामर्थ्यं भजते।

भारतवर्षस्य अमृतमहोत्सवकालप्रसंगे गांधिविजयनाटकमधिकृत्य एका महत्त्वपूर्णा चर्चा वर्तते । किमर्थम् प्रश्नोऽयम् उदयति? सामान्यतः संस्कृतसाहित्यस्य आधुनिक-इतिहासग्रंथेऽपि सम्यक्तया चर्चा न प्रतिभाति। साहित्य-अकादमीतः प्रकाशितं आचार्य शिशिर कुमार दास द्वारा संपादित-इतिहासपरकग्रन्थे - **ए हिस्ट्री और इण्डियन लिटरेचर (1911 - 1956) स्ट्रगल फौर फ्रीडम : ट्रफ़ एंड ट्रेजडी** [1] मध्ये अस्य लेशमात्रमपि चर्चा नास्ति। यद्यपि आचार्य दास महोदयः पुस्तकेऽस्मिन् भारतीय साहित्येषु वर्णितेषु महात्मागांधिव्यक्तित्वानां विषयेषु वर्णनं करोतिपरन्तु गांधिविजयनाटकस्य प्रसंगः नायाति। एदर्थमपि अस्योपरि चर्चा अपेक्ष्यते। भास्करवर्णेकरः अपि - **संस्कृत वाङ्मय शब्दकोश** (द्वितीय भागे) मध्ये अस्य रचनाकारस्य कालविषये न लिखितम् अस्ति। पुस्तकमिदं प्रथमसंस्करणरूपेणैव प्रतिभातियस्य प्रकाशनम् मोतीलाल बनारसी दास वाराणसीतः अस्ति । मथुराप्रसाद दीक्षितस्य आत्मजः साहित्याचार्यः श्री सदाशिव दीक्षितेन अस्य भूमिका बहुसंक्षेपेण लिखिता अस्ति। नाट्यकारस्य दीक्षितस्य अपरं नाटकस्य भारतविजयस्य भूमिकानुसारेण सः लाहौर (सम्प्रतिपाकिस्ताने) एचिसन महाविद्यालये प्राचार्य पदे कार्यरतः आसीत्, परन्तु लोकमान्यः बाल गंगाधर तिलकस्य प्रखर स्वातंत्र्यभावोपेत-प्रभावात् स स्व आचार्यपदं त्यक्त्वा भारतीय-स्वतंत्रता-संग्रामे सन्नद्धः जातः।

रुपककारः दीक्षितः नाटकेऽस्मिन् महात्मागांधिनः दक्षिणअफ्रीकायात्राकथां तत्र प्रवासी- भारतीयजनानां औपनिवेशिकात्याचाराणां च अपाकर्तुं महात्मनः संघर्षमहात्त्यं अंगीकृत्य ऐतिहासिकघटनां च अवलम्ब्य

[1] साहित्य अकादेमी, दिल्ली, 1995

 ISSN: 2320-740X

बहुचारुरूपेण वर्णनं करोति। यद्यपि रचनायाम् अंकद्वयमेव वर्तते, परन्तु रचनाकारः दीक्षितदृष्ट्या नाटकमिदं वर्तते। अतएव अभिनव- नाट्यशास्त्रलेखनदृष्ट्या अपि विमर्शः अत्र सम्भाव्यते । दीक्षितमहोदयः प्रथमांकस्य प्रारंभ एव लिखति– **अहो! विविधदेशदेशान्तरागतानां राष्ट्रहितैकबद्धपरिकराणां सकलजनमाननीयानां विदुषां परिषदा ज्ञप्तोऽहम...... गांधिविजयनाटके - नोपस्थातव्यमस्माभिरितिप्रतिपात्रं विधीयतां तत्नः (प्रथम अंक,गांधिविजयनाटकम्)** अस्यां पंक्तौ नाटकस्य उद्देश्यं अपि स्पष्टतया स्फुरति। नाटकमिदं राष्ट्रजनहिताय च लिखितमस्ति। नाटककारः नाटके न केवलं नेटालस्य (दश्रिणअफ्रीका) अपितु सम्पूर्णभारते आंग्लानां अत्याचाराणां, शोषणोत्पीड़ानां सद्यः अंकनैः आर्थिकराष्ट्रवादस्य प्रखरतया वर्णनं करोति। यथा नाटके सूत्रधारः प्रतिपादयतियत् अस्य नाटकस्य प्रधानोद्देश्यं न केवलं वृद्धानां कृते अपितु बालानां मध्ये अपि राष्ट्रीयभावनायाः संचाराय लिखितम् अस्ति। अस्य रुपकस्य भाषा सरला मनोहरा च अस्ति। अतएव वर्तमान- शिक्षणसंस्थानेष्वपि पाठ्यक्रमेषु योजयितुं शक्यते। नाटकस्य प्रथमे अंके तु महात्मा गांधिनः आंग्लसर्वकारविरुद्धे घोरसंघर्षस्य गाथा अस्ति। परन्तु नाटकस्य अन्तिमांके गांधिमहोदयस्य औपनिवेशिक-सर्वकारोपरि नैतिकचारित्रिकी विजयस्य उद्घोषणा भवति। नाटकेऽस्मिन् नाट्यकारः ऐतिहासिकदृष्टिं अनुपालनं कुर्वन् नाट्योपरि आचार्यमम्मटस्य **कान्तासम्मितोपदेश**स्य भावनां गुंफयति। अस्मात् कारणात् अपि **गांधिविजयं** स्ववैशिष्ट्यं भजते। भारतवर्षस्य स्वतन्त्रतासंग्रामस्य अमृतमहोत्सववर्षे अस्य मंचप्रयोगोऽपि अपेक्ष्यते। आधुनिके संस्कृतसाहित्ये सामान्यतया साहित्येन सह इतिहासस्य समन्वयः दुर्लभः प्रतीयते। अतएव भारतीय-स्वतंत्रता- संग्राम-काले संस्कृतनाटकानाम् योगदानं प्रतिपादनाय नाटकमिदमपि महनीयम्।

नाटकस्य आधिकारिक-कथावस्तुरुपेण महात्मागांधिनः अफ्रीकादेशे 'गिरमिटिया' इत्याख्य भारतीयश्रमिकाणां कल्याणाय अहर्निश तत्र आंग्लसत्ताप्रतिरोधी घोरप्रतिरोधः दृश्यते। तदन्तरम् तस्य नैतिकमूल्येन अहिंसात्मकान्दोलनेन च विजयं तु नाटकस्य आधिकारिक-कलावस्तु प्रतिभाति।[1]

नाट्यकारः नेटालप्रदेशे भारतीयोपरि पौण्डत्रयदण्डं, तेषां अंगुल्यंकदानं अंकनम् कृत्वा अर्थापचय-इष्टनाशजन्यशोकद्वयोः माध्यमयोः आर्थिकराष्ट्रवादस्य भावनां संबलयति।[2]

नमकसत्याग्रहस्य चर्चा अपि ऐतिहासिकघटनारुपेण समायोजिता अस्ति।[3] तथैव कारणं विना भारतीयोपरि घोरः शारीरिकार्थिकदण्डादीनां प्रसंगाः अपि दुःखदायकाः सन्ति।[1] एकः प्रसिद्धः आंग्लाधिकारी हन्टरः अपि गभीरशोधोपरान्तं अस्य अत्यन्तकठोरात्याचारं भर्त्स्यति।[2]

---

[1] गान्धि - युज्यते चैवम्,परंतु केवल जवाहरलाल एवं भोकृत्यः, किन्तु अहिंसकाः सर्वे अपि राजनैतिका भोकृत्याः,लवणकरोऽपि मुच्यताम्,, द्वितीय अंकः पृष्ठ 23

[2] पं- अनेनैव अफ्रीकायां नेटाल प्रदेशे भारतीयेभ्यः प्रतिवर्षं पौण्डत्रदण्डग्रहणं पाटच्चरदेयम् अंगुल्यकदानं च निवारितम्।,द्वितीय अंकः पृष्ठ 15।

[3] गान्धिविजयनाटकम्,प्रथम अंकः ,पृष्ठ 10।

रुपकमिदं द्वयंकात्मकमपि भूत्वा नाटकरुपेण प्रतिपादितम् अस्ति। तथैव नाट्यशास्त्रसिद्धान्तं अतिक्रम्य अस्मिन् नाटके एकं पात्रं हिन्द्याम् संवयति। यथा कल्लू कथयति- **पचास रुपये के मूल्य से पांच रुपये देते हैं,जो कहना नहीं मानता है, उसकी प्रतिष्ठा धूल में मिला देते हैं।**[3] अत्र अभिनव-संवादशैली भाषावैज्ञानिकदृष्टया अनुसन्धानस्य विषयः दृश्यते। केन कारणेन परिवर्तनमिदम्? किं संस्कृतमपि समयानुकूल-परिवर्तनाय कटिबद्धम्?

नाटके अत्र आर्थिकदण्डरुपेण **पौलटैक्स इति**विधानस्य तु चर्चा अस्ति परन्तु गवर्नर जनरल लार्ड एलगीन पंचविशतिअपेक्षया केवलं पौण्डत्रयं जनानां हितस्य कृते कृतम् यस्याः चर्चा नास्ति । यथा अनुभवामि अहं साहित्यलालित्यरोचनाय विस्तृतप्रंगोऽयम् नापेक्ष्यते[4] परन्तु जालियांवालाबाग-काण्डस्य वर्णनं अपि बहुहृदयविदारकं वर्तते।

भारतवर्षस्य स्वतन्त्रतायै नाट्यकार : दीक्षितः सरदारपटेल-मदनमोहनमालवीय - बालगंगाधरतिलक – राजेन्द्रप्रसाद – जवाहरलालनेहरू - सम्पूर्णानन्दादीन् स्मरतियस्मिन् इन्द्रस्य शौर्यं धर्मशास्त्रीयमूल्यानि अपि परिलक्ष्यन्ते। औपनिवेशिकसत्ताविरुद्धे महात्मागांधिना तीव्रनिर्भीकश्च स्वरः स्वाभाविकतया श्रूयते नाटकेऽस्मिन्। **गांधी - एवं कृते यदि गोरण्डाः ताडयन्ति तथा ताडयन्तु,सर्वं सोढव्यम्। न किञ्चिदपि प्रतिकर्तव्यम्।** [5]

मूलोद्भवस्थानमित्यर्थः। मुनिहृन्मिलिन्दमित्यस्यार्थो मुनिहृदयरूपभ्रमरयुक्तम्। अत्र मिलिन्दशब्दस्य अर्थो भ्रमरः। अर्थात् मुनीनां हृदयानि मिलिन्दा यस्य पादकमलस्य पदारविन्दस्य, तत्पदारविन्दं भवतिमुनिहृन्मिलिन्दम्। अर्थात् गोविन्दस्य पदारविन्दं मुनिहृदयरूपभ्रमरझङ्कृतमस्ति इतिभावः। तत्रापि गोविन्दः कीदृशः इतिचेदुच्यते स्वच्छन्दः, स्वतन्त्रः, स्वेच्छाचारी इतियावत्। एवं तादृशं गोविन्दपदारविन्दं वन्दे प्रणमामि इत्यन्वयः। कीदृशं पदारविन्दमितिचेदाह- सुरेन्द्रादिमदादिदम् इति। अत्र किञ्चित् समीक्ष्यते- प्रकृते व्यवहृतासु मातृकात्रयेषु अस्य पदस्य त्रयः पाठभेदाः परिलक्ष्यन्ते। तद्यथा- प्रथममातृकायां पाठो वर्तते- सुरेन्द्रादिप्रदादिदम्, द्वितीयमातृकायां पाठः प्राप्यते- सुरेन्द्रादिमदादिदम्, तृतीयमातृकायाञ्च पाठः परिलक्ष्यते- सुरेन्द्रादिदं चेति। इदानीं त्रिषु पाठेषु कतमो युक्तः इत्यस्मिन् विषये समीक्षा विहिता। तत्र सुरेन्द्रादिप्रदादिदम् इतिप्रथममातृकापाठे स्वीकृते छन्दोभङ्गापत्तिःअर्थास्पष्टता अर्थक्लिष्टता च दृश्यते। अतःअयं पाठः त्यक्तः। सुरेन्द्रादिदम् इतितृतीयमातृकापाठे स्वीकृते सत्यपि छन्दोभङ्गो भवतिअर्थस्य च दुरवगाहता परिलक्ष्यते। अतःअयमपि पाठो न गृहीतः। सुरेन्द्रादिमदादिदम् इतिद्वितीयमातृकापाठस्वीकारे सतिछन्दोभङ्गः नास्ति। किञ्च अर्थस्फूर्तिरपि दृश्यते। सुरेन्द्रादिमदादिदम् इतिपाठस्वीकारे सतिइन्द्रवज्राछन्दोलक्षणमत्र समन्वेति। पुनश्च अर्थदृष्ट्या अपि अत्र आलोचनं सम्भवतियेन इष्टार्थप्राप्तिः भवेत्, तद्यथा- मदो हर्षो दर्पो वा। मद आदिर्येषां ते मदादयः। सुराणाम् इन्द्रः सुरेन्द्रः। सुरेन्द्र आदिर्येषां ते सुरेन्द्रादयो देवाः। तेषां मदादयः सुरेन्द्रादिमदादयः। सुरेन्द्रादिमदादीन् द्यतिच्छिनत्ति इतिविग्रहे सुरेन्द्रादिमदादिदम्। 'आतोऽनुपसर्गे कः' इत्यनेन दो अवखण्डने इतिधातोः कप्रत्यये रूपमिदम्। पदारविन्दमित्यस्य विशेषणम्। सुरेन्द्रादिदेवतानां दर्पहन्तारं गोविन्दपदारविन्दम्। यद्वा मदो हर्षः। वराह-वामनादिभिः विविधावतारैरसुरान् विनाश्य सुरेन्द्रादिभ्यो मदं हर्षं ददातिइतिसुरेन्द्रादिमदादिदः। यद्वा मदः सामर्थ्यम्, ऐश्वर्यादिकं वा। दर्परूपमदस्य कारणभूते ऐश्वर्ये मदशब्दस्य उपचारः। सुरेन्द्रादिभ्यः ऐश्वर्यप्रदमितियावत्। तादृशं पदारविन्दं वन्दे प्रणमामि इत्यर्थः। एवं सुरेन्द्रादिमदादिदम् इतिपाठस्य मद्दृष्ट्या युक्तत्वात् स एव मूले स्थापितः। अन्यत्र च अस्मिन् श्लोके पदं वर्तते दीनादिशन्दम् इति। अत्रापि त्रयः पाठभेदाः सन्ति। प्रथममातृकायां दिनादिशाहम् इतिपाठः, द्वितीयमातृकायां दिनादिशन्दम् इतिपाठः, तृतीयमातृकायाञ्च दीनादिप्रादं चेतिपाठो वर्तते। अत्रापि प्रथमतृतीयपाठयोः स्वीकारे छन्दोभङ्गः अर्थस्य अस्पष्टता परिलक्ष्यते। द्वितीयमातृकापाठस्वीकारे छन्दोमेलनम् अर्थस्पष्टता च भवतिइत्यतःदीनादिशन्दमितिद्वितीयमातृकागतपाठस्यैव युक्तत्वात् मूले स्थापितः। तस्य च विवरणं भवति- शं कल्याणं ददातिइतिशन्दः, तादृशमितिशन्दम्, पदारविन्दस्य विशेषणम्। दीनशब्दस्यार्थःभवतिदुःखितो दरिद्रो वा। दीन आदिः येषां ते दीनादयः। दीनादिभ्यः शन्दमितिदीनादिशन्दम्, दीनादिशन्दं गोविन्दपदारविन्दं वन्दे इत्यर्थः। रविनन्दनम् इतिपदस्यापि अर्थःअत्र क्लिष्टाय कल्पते। सामान्यतःधर्मराजानन्दप्रदायकमित्यर्थःप्रतिभाति। तच्च गोविन्दपदारविन्देषु सम्भवति। तथा हि रवेः नन्दः रविनन्दः धर्मराजः। तं नन्दयतीतिरविनन्दनन्दं गोविन्दपदारविन्दम्। यद्वा, रविनन्दस्य नन्दो यत्र तत् रविनन्दनन्दम्। इदञ्च तत्त्वं पुराणेषु स्पष्टम्। किञ्च, रवेः नन्दः रविनन्दः। रवेः सूर्यस्य नन्दः पुत्रः सुग्रीवः। तस्य नन्द आनन्दो येन तादृशं पदारविन्दम् इतिकश्चन अर्थःसम्भवेत्। यद्वा, रविश्च नन्दश्च इतिरविनन्दौ। रविनन्दयोः नन्दः येन स रविनन्दनन्दः। अस्मिन् पक्षे पदारविन्दस्य सामान्यारविन्दवत् सूर्यस्य आनन्ददायकता, कृष्णपदारविन्दश्च नन्दस्य आनन्ददायकः इत्येवमत्र सङ्गमनं कर्तव्यम्। अत्र रविचन्द्रनन्दमित्यपि

भवितुमर्हति। किन्तु क्वचित् मातृकायां तादृशः पाठो न दृष्टः इत्यतःसः पाठो ग्रहीतुमशक्यः। अनुप्रासार्थं नन्दनन्द इतिप्रयोगोऽपि युज्यते।

२. स्फोटप्रतिपादनप्रसङ्गे "यद्यपीहाष्टौ पक्षा उक्तास्तथापि वाक्यस्फोटपक्षे तात्पर्यं ग्रन्थकृताम्। तत्रापि जातिस्फोटे इत्यवधेयम्।"[1] इतिमूलोक्तवचनेन ज्ञायते यद्वैयाकरणा वाक्यजातिस्फोटमेव स्वीकुर्वन्ति। तत्र वैयाकरणाः वाक्यजातिस्फोटं स्वीचक्रुः इत्यतःप्रकृतिप्रत्ययादयो निष्प्रयोजकाः इतिन, अर्थबोधनाय प्रकृतिप्रत्ययादयः अपि उपकुर्वते इतिवैद्यनाथाचार्यस्य मतम्। एवं हि यथा शुद्धब्रह्मज्ञानलाभाय अन्नमयप्राणमयमनोमय-विज्ञानमयानन्दमयेतिपञ्चकोशान् कल्पयन्ति विद्वांसः, तथैव अखण्डवाक्यार्थबोधनाय वर्णपदवाक्यस्फोटकल्पना सहायीभूता भवतिइतिमतम्। अत्र पञ्चकोशपदेन आनन्दवल्लीस्थस्य पञ्चकोशस्य ग्रहणं कर्तव्यम् उत भृगुवल्लीगतस्य पञ्चकोशस्य इत्यत्र काचित् शङ्का विद्यते। तत्र प्रकाशितपुस्तके कमातृकायां वा पाठो विद्यते- "पञ्चकोशेति। आनन्दवल्ल्यामन्नप्राणमनो-विज्ञानानन्दमयात्मकपञ्च-कोशव्युत्पादनं वास्तवसर्वाधारब्रह्मबोधन-फलकमित्यर्थः। भृगुवल्ल्यां पञ्चमस्य ब्रह्मत्वेन कोशत्वस्य प्रागुक्तत्वात्।"[2] इति। अत्रैव विचार्यते- कमातृकायां प्रकाशितग्रन्थे वा अस्मिन् प्रसङ्गे पञ्चकोशदृष्टान्तःकस्याः वल्ल्याः इतिसाक्षात् निर्देशः नास्ति। केवलं भृगुवल्ल्यां पञ्चमस्य आनन्दशब्दस्य ब्रह्मत्वेन कोशत्वेन च ग्रहणं विद्यते इतिप्रतिपादितम्। परन्तु एतत् अशुद्धम्। यतो हि तैत्तिरीयोपनिषदः भृगुवल्ल्यां षष्ठोऽनुवाके मन्त्रांशः प्राप्यते- 'आनन्दो ब्रह्मेतिव्यजानात्' इति। अनेन आनन्दशब्दःब्रह्मत्वेन परिगण्यते, न तु कोशत्वेन। अतःप्रकाशितग्रन्थपाठे- "भृगुवल्ल्यां पञ्चमस्य ब्रह्मत्वेन कोशत्वस्य प्रागुक्तत्वात्।" इतियदुक्तम्, उपनिषदि भृगुवल्ल्याम् आनन्दशब्दस्य कोशत्वाभावात् न तत् संगच्छते इतिसः पाठः न स्वीकृतः।

एवमेव खमातृकायां गमातृकायां च पाठो वर्तते- "पञ्चकोशेति। आनन्दवल्ल्यामन्न-प्राण-मनो-विज्ञानानन्दमयात्मक-पञ्चकोश-व्युत्पादनं वास्तवसर्वाधार-ब्रह्मबोधनफलकमित्यर्थः। भृगुवल्लीस्थाः तु च ग्राह्याः। भृगुवल्ल्यां पञ्चमस्य ब्रह्मत्वेनाकोशत्वस्य प्रागुक्तत्वात्।"[3] इति। अत्र समीक्ष्यते- खमातृकायां गमातृकायाञ्च अस्मिन् प्रसङ्गे साक्षात् पाठः प्राप्यते- "भृगुवल्लीस्थाः तु च ग्राह्याः" इति। अयं च भागः कमातृकायां लुप्तो वर्तते। अस्यार्थः- भृगुवल्लीस्थाः पञ्चकोशाः ग्राह्याः इतिआयाति। ततःपरम् उभयोः मातृकयोः पङ्क्तिः वर्तते- "भृगुवल्ल्यां पञ्चमस्य ब्रह्मत्वेनाकोशत्वस्य प्रागुक्तत्वात्।" इति। तेन भृगुवल्ल्याम् आनन्दपदस्य ब्रह्मत्वेन अकोशत्वेन च परिग्रहणं वर्तते। वस्तुगत्या कमातृकागतपाठापेक्षया अस्याः पङ्क्तेः विवरणं खगमातृकयोः प्रायः समीचीनमितिदृश्यते। यतो हि कमातृकायां तु आनन्दशब्दःब्रह्मवाचकः कोशपरकश्चेति, तत्तु उपनिषद्दृष्ट्या न संगच्छते। परन्तु उभयोः खगमातृकयोः प्राप्तपाठे 'आनन्दो ब्रह्मेतिव्यजानात्' इतिमन्त्रांशेन आनन्दशब्दःब्रह्मवाचकः, न तु कोशवाचकः इतियदुक्तं तत् उपनिषद्दृष्ट्या समीचीनमितिप्रतीयते। किन्तु प्रकृते प्रसङ्गे न संगच्छते इतिअनुमीयते। यतो हि- प्रभाव्याख्यायाः

1 शब्दकौस्तुभः, प्रथमो भागः, गोपालशास्त्री, मुकुन्दशास्त्री (सम्पादकौ), पृष्ठम्-९

2 शब्दकौस्तुभः, प्रथमो भागः, (प्रभा-भावप्रदीपव्याख्याद्वयोपेतः), सत्यनारायणमूर्तिः (सम्पादकः), पत्रम्-५०

3 वरोदामातृका (खमातृका), पत्रम्- ३८; एसियाटिक्-सोसाइटिमातृका (गमातृका), पत्रम्- ४७

 ISSN: 2320-740X

स्फोटस्वरूपव्याख्यानात्मकस्य प्रकरणस्य प्रारम्भिके भागे पञ्चकोशप्रसङ्गे कश्चन पाठः अवाप्यते- "पञ्चकोशेति। यथा तत्रान्न-प्राण-मनो-विज्ञानानन्दमयात्मक-पञ्चकोशव्युत्पादनं वास्तवशुद्धब्रह्मबोधनाय तथा प्रकृत्यादिव्युत्पादनं वास्तवमुख्यस्फोटबोधनाय। नायं भृगुवल्लीस्थः। तत्र चतुर्णामेव उपायस्य उक्तत्वात्। किन्त्वानन्दवल्लीस्थः।" इति। तेन इदं ज्ञातुं शक्यते यत् प्रसङ्गेऽस्मिन् पञ्चकोशदृष्टान्तःआनन्दवल्लीस्थः एव बोधव्यः, न तु भृगुवल्लीस्थः इति। इदानीं भृगुवल्लीस्थाः तु च ग्राह्याः इतिखगमातृकयोः पाठस्वीकारे प्रभाव्याख्यायाः पूर्वापरपङ्क्तिविरोधः दृश्यते। तत्र आनन्दवल्लीस्थः पञ्चकोशः स्वीकरणीयः इतिप्रभाकृद्भिः उक्तम्। अत्र तावत् भृगुवल्लीस्थाः तु च ग्राह्याः इत्यनेन वाक्येन भृगुवल्लीस्थाः पञ्चकोशाः ग्रहणीयाः इत्यपि प्रभाकृतां मतम्। इदानीं प्रश्नः समुत्पन्नः, प्राप्तपाठयोः कः युक्तः इति। तत्रोच्यते प्राप्तपाठयोः न कश्चित् पूर्णतया युक्तः अस्मिन् प्रसङ्गे। तत्र खगमातृकाभ्यां प्राप्तेन पाठेन सह न इतिसंयोज्य "भृगुवल्लीस्थाः तु च न ग्राह्याः" इतिपाठे स्वीकृते सतिन क्वापि समस्या। न उपनिषदः विरोधः। भृगुवल्ल्याम् आनन्दस्य ब्रह्मवाचकत्वेन ग्रहणात् कोशत्वेन च अग्रहणात्। किञ्च भृगुवल्लीस्थः पञ्चकोशः न स्वीकरणीयः इत्यतःपूर्वापरपङ्क्तिविरोधः अपि नास्ति। तेन आनन्दवल्लीस्थः पञ्चकोशः एव ग्रहणीयः इत्यागच्छति। ततःपरं खगमातृकयोः पङ्क्तिः वर्तते- भृगुवल्ल्यां पञ्चमस्य ब्रह्मत्वेनाकोशत्वस्य प्रागुक्तत्वात्। इति। एतत् अपि अत्र संगतं भवति- सत्यमेव भृगुवल्ल्यां पञ्चमस्य आनन्दस्य ब्रह्मत्वेन ग्रहणं वर्तते, न तु कोशत्वेन। तेन भृगुवल्लीस्थाः पञ्चकोशाः न ग्रहीतव्याः इतिसिद्ध्यति। किञ्च आनन्दवल्लीस्थः एव पञ्चकोशदृष्टान्तःअत्र समाश्रयणीयः इत्यपि संगच्छते। तत्रापि तस्माद्वा एतस्माद्विज्ञानमयादन्यतरोऽन्तर आत्मानन्दमयः (तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्ली, पञ्चमोनुवाकः) इतिमन्त्रांशः प्रमाणत्वेन वर्तते। येन आनन्दवल्ल्याम् आनन्दशब्दस्य कोशपरकः अर्थो ज्ञायते। किञ्च आनन्दो ब्रह्मेतिव्यजानात् इति, भृगुवल्ल्याम् आनन्दशब्देन ब्रह्म एव उच्यते न तु कोशः। किन्तु ब्रह्मानन्दवल्ल्याम् आनन्दशब्देन कोश एव उच्यते। कोशप्रसङ्गेस्मिन् ब्रह्मानन्दवल्लीस्थः कोशपरकः आनन्दशब्दःएव युक्तः इत्यतःभृगुवल्लीस्थाः तु च न ग्राह्याः इतिपाठः समीचीनः स्यात् इतिआशयः।

**उपसंहारः** - प्रकृतप्रबन्धे शब्दकौस्तुभप्रभायाः प्रथमाह्निकभागसम्पादने समुपयुक्तमातृकाणां वैशद्येन

विवरणं प्रस्तूय प्रत्येकं मातृकाः परिशील्य पाठसमीक्षणं विहितम्। तेन च सुष्ठु पाठनिर्णये यत्नो व्यधायि। प्रभाव्याख्यायाः मङ्गलश्लोके अन्यत्र च विद्यमानानां केषाञ्चित् पदानां वाक्यानां वा प्राप्तमातृकाधारेण पाठसमीक्षणं विहितम्। तत्र कस्मिन् पाठे स्वीकृते कीदृशः अर्थःभवितुमर्हति, कश्च पाठः युक्ततमः, कथं च तत्प्रकृते संच्छते, प्रचलिकपाठस्वीकारे के दोषाः सम्भवन्ति च इत्यादयः अंशाः अत्र युक्तिपुरस्सरं परामृष्टाः। तेन अनेन पाठसमीक्षणेन दृढं युक्तं च पाठं सम्प्राप्य वैयाकरणाः नूनमेव लाभान्विताः भवेयुः इत्याशास्य इहैव अवसीयते।

### आश्रितग्रन्थसूची

1. शब्दकौस्तुभः। प्रभा- भावप्रदीपव्याख्याद्वयोपेतः। प्रथमो भागः। आचार्य-श्रीपाद सत्यनारायणमूर्तिः (सम्पा.)। तिरुपतिः । राष्ट्रियसंस्कृतविद्यापीठम् । २०११।

2. शब्दकौस्तुभः। प्रथमाध्यायस्य प्रथमपादो नवाह्निकभागपर्यन्तः। प्रथमो भागः। भट्टोजिदीक्षितः। गोपालशास्त्री-नेने, मुकुन्दशास्त्री (संस्कर्तारौ), जयकृष्णदास-हरिदास गुप्तः (प्रकाशकः), वाराणसी-चौखम्बा-संस्कृक-सीरीज-आफिस, १९२०।
3. उपनिषदां समुच्चयः। श्रीनारायणशंकरानन्दविरचितदीपिकासमेतानामथर्वशिखाद्यानां हंसोपनिषदन्तानां द्वात्रिंशन्मितानाम्। विनायकगणेशः आप्टे (सम्पादकः)। आनन्दाश्रमग्रन्थावलिः- आनन्दाश्रममुद्रणालयः, १९२५।
4. पुँथिर कथा। शम्पासरकारः। कलिकाता-रवीन्द्रभारतीविश्वविद्यालयः। २०११ (तृतीयं संस्करणम्)।
5. Descriptive Catalouge of Sanskrit Manuscripts in the Library of The Asiatic Society of Bengal (First Part - Grammar). Rajendralal Mitra (Ed.). Calcutta : Baptist Mission Press. 1877.
6. New Catalogus Catalogorum (Vol. - XXXIII). Dash, Siniruddha (Ed.). Madras : Chennai : University of Madras and National Mission for Manuscripts (New Delhi).
7. New Catalogus Catalogorum (Vol. - XIII). Dash, Siniruddha (Ed.). Madras : Chennai : University of Madras and National Mission for Manuscripts (New Delhi).
8. https://vmlt.in/ncc/33?page=38

******

 ISSN: 2320-740X

# संस्कृतस्य कृते संगणकभाषाशास्त्रस्य उपयोगिता

**देवेन्द्रकुमारः**

शोधछात्रः

संस्कृत एवं प्राच्यविद्याध्ययनसस्थानम्,

जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली-110067

**शोधपत्रसारांशः-**

सम्प्रतिवयमेकविंशतितम्यां शताब्द्यां वसामः। युगोऽयं प्रौद्योगिक्याधारितःवर्तते, अत एव अस्माकं दैनिकचर्यायां प्रौद्योगिक्याः उपस्थितिः सर्वत्र प्राप्यते। आधुनिकजीवने कोऽपि जनः यत्किमपि कर्तुमभिलषतिचेत् तत् सर्वं संगणकं विना न सम्भवति। अस्मिन् जगतिसर्वसाधनानि दृष्ट्वा वयमनुभवामः यत् सर्वकार्याणि मृदुयंत्रांशमाध्यमेनैव (Software) भवन्ति।

विषयेऽस्मिन् सम्यक्तया विचार्य केचन प्रश्ना अस्माकं मस्तिष्के आयान्ति, यथा- किमधुना संस्कृतभाषायाः कृते संगणकस्यावश्यकतास्ति न वा? यद्यस्ति, तर्हि का आवश्यकता, कीदृशी आवश्यकता च? आधुनिककाले संस्कृतस्य महती आवश्यकता संगणकविषये स्याद्यथा- कार्यसिद्धार्थम् (Programming), सूचनासंग्रहणे (Data Storage), यान्त्रिकानुवादे (Machine Translation) इत्यादिविषयविवेचनमस्मिन्शोधपत्रे विधास्यते सहैव पाणिनीयव्याकरणस्यानुसरणं संगणकं कथं करोतिकार्यक्रमनिर्माणवेलायां (Programming) च व्याकरणस्यानुप्रयोगः कथं भवतीत्यादिविषयाणां चर्चा शोधपत्रेऽस्मिन् भविष्यतीति।

**कूटशब्दाः-** मृदुयन्त्रांशः, रूपसिद्धिः, टंकणकार्यम्, अङ्कुरफलकम्, प्रत्याहारः, यान्त्रिकोऽनुवादः, सुबन्ततिङन्तौ इत्यादयः।

**संगणकीयभाषा पाणिनीयव्याकरणञ्च -**

वस्तुतःसंगणकं मुख्यरूपेण निम्नलिखितत्रिबिन्दूनामाश्रित्य प्रचलति, ते च- वाक्यरचना, रचनाक्रमः, व्याकरणञ्च। अस्मिन् विषये सम्यक्तया विचार्य संगणकविषयविशेषज्ञदलं मन्यते यत् संसारे यानि व्याकरणानि सन्ति, तेषु पाणिनीयव्याकरणमेव अन्यतमम्। संसारस्य कस्या अपि भाषायाः व्याकरणम् एतादृशं (संस्कृतसदृशम्) नास्ति। संगणकभाषाशास्त्रविशेषज्ञः कार्यक्रमकः (programmer) डॉ. हैरिसमहोदयस्य शिष्यः नोअम चोम्स्की (Noam Chomsky) वाञ्छतिस्म यत् संगणकपरिचालनार्थं संगणकीयनिर्देशाः क्रमबद्धरीत्या भवेत् तत्कृते च पाणिनीयव्याकरणसदृशं जननशीलव्याकरणमावश्यकमस्ति। ते संगणकभाषाशास्त्रे कार्यक्रमं निर्मातुं तस्य संरचनाप्रारूपयोर्निर्देशनम् अवाञ्छन्। एतदर्थं नैकनियमनिर्धारणस्यावश्यकतासीत्, येषामनुप्रयोगः कार्यक्रमनिर्माणे पौनः पुन्यरूपेण भवितुं शक्नोति। एते नियमाः स्वचालिताः भवेयुः, सहैव एतेषामुपयोगः कस्यापि कार्यक्रमनिर्माणसमये (Programming time) वारम्वारं भवितुं समर्थःभवेदित्याशयः। यथा- पाणिनीयव्याकरणे नूतनशब्दनिर्माणार्थं सूत्राणि सन्ति, तानि सूत्राणि प्रयोज्य शब्दव्युत्पत्तिर्भवति। तथैव संगणकभाषायामपि

(Programming Language) तेषामनुप्रयोगः भवितुं शक्नोति। संगणकभाषया नवीनमृदुयंत्रांशनिर्माणं (Software) भवति, यथा पाणिनीयव्याकरणे सुबन्त-तिङन्त-णिजन्तनिर्माणं भवति।

**शब्दव्युत्पत्तिकृते संगणकं संस्कृताय कथमुपयोगि-**

येन प्रकारेण संस्कृतभाषायां सुबन्त-तिङन्ताः भवन्ति। एवञ्च रूपसिद्धिशब्दसिद्धयः भवन्ति। यथा-

| स्थितिः | सूत्रम् | वृत्तिः |
|---|---|---|
| अद्+लट्, लिट्, लुट्, ऌट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, ऌङ् | लट्, लिट्, लुट्, ऌट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, ऌङ्। एषु पञ्चमो लकारश्छन्दोमात्रगोचरः॥ लः कर्मणि च भावे चाकर्मकेभ्यः[1] | लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च॥ |
| अद् +लट् | वर्तमाने लट्[2] | वर्तमानक्रियावृत्तेर्धा तोर्लट् स्यात्। अटावितौ। उच्चारणसामर्थ्याल्ल स्य नेत्वम्। भू सत्तायाम्॥ १॥ कर्तृविवक्षायां भू ल् इतिस्थिते --- . |
| अद्+तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथाम्ध्वमिड्वहिमहिङ् | तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथाम्ध्वमिड्वहिमहिङ्[3] | एतेऽष्टादश लादेशाः स्युः॥ |
| अद्+तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथाम्ध्वमिड्वहिमहिङ् | लः परस्मैपदम्[4] | लादेशाः परस्मैपद संज्ञाः स्युः॥ |
| अद्+तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथाम्ध्वमिड्वहिमहिङ् | तङानावात्मनेपदम्[5] | तङ् प्रत्याहारः शानच्कानचौ |

1 पाणिनि अष्टाध्यायी, ३/४/६९

2 पाणिनि अष्टाध्यायी, ३/२/१२३

3 पाणिनि अष्टाध्यायी,३/४/७८

4 पाणिनि अष्टाध्यायी, १/४/९९

5 पाणिनि अष्टाध्यायी, १/४/१००

 ISSN: 2320-740X

| | | |
|---|---|---|
| | | चैतत्संज्ञाः स्युः। पूर्वसंज्ञापवादः॥ |
| अद् +तिप्तस्झिसिप्थस्थमिब्वस्मस् | शेषात्कर्तरि परस्मैपदम्[1] | आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात्॥ |
| अद् +तिप्तस्झिसिप्थस्थमिब्वस्मस् | तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः[2] | तिङ उभयोः पदयोस्त्रिकाः क्रमादेतत्संज्ञाः स्युः॥ |
| अद् +तिप् | शेषे प्रथमः[3] | मध्यमोत्तमयोरविषये प्रथमः स्यात्। भू तिइतिजाते॥ |
| अद् +तिप् | तिङ्शित्सार्वधातुकम्[4] | तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः॥ |
| अद् +शप्+तिप् | कर्तरि शप्[5] | कर्त्रर्थे सार्वधातुके परे धातोः शप्॥ |
| अद्+ति | अदिप्रभृतिभ्यः शपः[6] | लुक् स्यात्॥ |
| अत्+ति=अत्ति | खरि च[7] | खरि झलां चरः स्युः॥ |

इयमेव प्रक्रिया संगणके कार्यक्रमनिर्माणवेलायामपि (Programming time) प्रचलिष्यति। यथा-

<html>

1 पाणिनि अष्टाध्यायी, १/३/७८

2 पाणिनि अष्टाध्यायी, १/४/१०१

3 पाणिनि अष्टाध्यायी, १/४/१०८

4 पाणिनि अष्टाध्यायी, ३/४/११३

5 पाणिनि अष्टाध्यायी, ३/१/६८

6 पाणिनि अष्टाध्यायी, २/४/७२

7 पाणिनि अष्टाध्यायी, ८/४/५५

```
<body>
<%@ page
        language="java"
        pageEncoding="utf-8"
        contentType="text/html; charset=utf-8"
%>
<%@ page import="LexiconReader"%>
<%@ page import="java.util.*"%>
<%
Stringdatabase="C://ProgramFiles//ApacheTomcat4.0//webapps//devendr_sess//mmw1d
ata.txt";
        String sep = "\t";
        LexiconReader lr = new LexiconReader(database,sep);
        Hashtable table = lr.getFileDataAsHashTable();
%>
<H2>Welcome to Hashtable reader program</H2>
<%
String tableData =" ";
StringhtmlTable="<TABLE
BORDER=1><TR><TD>Name</TD><TD>Age</TD><TD>Address</TD><TD>School</TD>
</TR>";
Enumeration e = table.keys();
while(e.hasMoreElements()){
        String key = e.nextElement().toString();
        tableData = table.get(key).toString();
        StringTokenizer st = new StringTokenizer(tableData, sep);
        htmlTable = htmlTable+"<TR>";
        while(st.hasMoreTokens()){
                htmlTable = htmlTable+"<TD>"+st.nextToken()+"</TD>";
        }
```

 **ISSN: 2320-740X**

```
            htmlTable = htmlTable+"</TR>";
    }
            htmlTable = htmlTable+"</TABLE>";
    %>
    <%=htmlTable %>
    </body>
    </html>
```

**यथा-**

| **पाणिनि व्याकरण** | **Programming** |
|---|---|
| अथ | End block |
| विधि सूत्राणि | Operations like using class / functions |
| संज्ञा सूत्राणि | Define class / Variables / Entities |
| अधिकार सूत्राणि | Commenting in programming. |
| नियम सूत्राणि | Consonants |
| इति | End block |

**(Prof.Girish Nath Jha, Lectures)**

**संगणके पाणिनीयसूत्राणामुपयोगिता-**

पाणिनीयसूत्रेषु षट्प्रकारकाणि सूत्राणि भवन्ति। तेषामुपयोगः संगणकसन्दर्भे कथं भविष्यतीतिविषये सोदाहरणव्याख्या कर्तुं शक्यते। तेषु विधिसूत्रेषु एकं विधिसूत्रमस्ति- **इकोयणचि ।**[1] सूत्रास्यास्यवृत्तिरस्ति- इकः (इ उ ऋ लृ) स्थाने क्रमेण यणादेशः (य् र् ल् व्) भवति, अचि परे संहितायां विषये। तथैव (विधिसूत्रसदृशम्) संगणकभाषायामपि नियमाः भवन्ति, यथा – संगणकभाषायां केचन "डेटाटाइप्" (Formulas in Computer Language) भवन्ति, तेषु "इन्टीज़र्" (Integer e.g., 1234) , "कैरेक्टर्" (Character - e.g., abcd), "फ्लोट्" (Floating-point number - e.g., 1.234), इत्यादीनि नैकसूत्राणि भवन्ति। यथा-

/*

"इकोयणचि

1 अष्टाध्यायी ६/१/७७

------------------

vowels [ इ उ ऋ ऌ ] change to [य् व् र् ल् ] if followed by another vowel

*/

**step 1: def ShivaSutra**

- ShivasutraModule ss = new ShivasutraModule();

**step 2: def इक्**

-send इक् to ShivaSutra

-ss.interpret(इक्)

-obtain इक् list

-[इ उ ऋ ऌ]

**step3: def यण्**

-send यण् to ShivaSutra

-ss.interpret(यण्)

-obtain यण् list

-[य् व् र् ल्]

**step4: def अच्**

-send अच् to ShivaSutra

-ss.interpret(अच्)

-obtain अच् list

-[अ इ उ ऋ ऌ ए ओ ऐ औ]

**step5: operation इक्-->यण्/ - अच्**

- search for इक् in the string

 ISSN: 2320-740X

-if yes continue else stop

- search for अच् in the right context

-if yes continue else stop

- replace इक् member with यण्

**step6: stop**

-display results

-quit”[1]

एवञ्चास्यां भाषायामन्यान्यप्रत्याहारानुवृत्तिसदृशा नैकनियमाः भवन्ति, यथा- .java, .txt, .doc इत्यादयः । अन्यच्च- **लः परस्मैपदम्**[2], अस्य वृत्तिरस्ति यत् “लादेशाः परस्मैपद संज्ञाः स्युः” अर्थात् लकाराणां परस्मैपदसंज्ञा भवति। तेनैव प्रकारेण संगणकभाषायामपि नैकानि “class file” सन्ति, यथा-लकाराणां परस्मैपदसंज्ञा भवति। लकारसदृश इव संगणकभाषायां विशेषसंज्ञा भवति, यथा– Introduce class file, तत्र “Introduce class file” इतिफाइलमध्ये “public class Tokenizer” इत्यादि । अनेन सह अन्यसंज्ञा अपि भवन्ति, यथा- “.txt” “.doc” “.java” “.html” “.ppt” आदि। येषामुपयोगः संगणके “फाइल” (File) इत्यस्य ज्ञानार्थं भवति।

**सूचनासंग्रहणे संस्कृतस्यावश्यकता-**

संगणकसूचनासंग्रहणे संस्कृतभाषायाः प्रासङ्गिकता वर्तते। “न्यूनतमशब्देषु अधिकतमसूचनासंग्रहणं भवति” इतिसंस्कृतभाषायाः वैज्ञानिकता स्यात्। यदा वयं संगणकाङ्कुरफलके (Key board) टंकणकार्यं (Typing) कुर्मः, तदा संगणके प्रत्येकवर्णानां संग्रहणं भवति। तत्र रिक्तस्थानानुस्वारयोरपि (space key and Anusvar) संग्रहणं भवति। यतोहि संस्कृते रिक्तस्थानस्य न्यूनतमप्रयोगः भवति। यथा-

**चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः ।**
**चन्द्रचन्दनयोर्मध्ये शीतला साधुसङ्गतिः ।।**

उदाहरणस्यास्य आङ्ग्लभाषायामनुवादः भवतिचेत्, तत्र आङ्ग्लानुवादे नैकवाक्यानां निर्माणं भविष्यति। यथा-

In this world the sandalwood is cool = 30 characters (आङ्ग्ले)

The moon is cooler than even the sandalwood. = 36 characters

1Prof. Girish Nath Jha, Lecture in Faculty of Mathematics and Computer Science, Adam Mickiewicz University, Poland, Dec10 2014

2 पाणिनि अष्टाध्यायी, १/४/९९

The company of good people is cooler than the sandalwood and the moon. = 57 characters

सम्प्रतिसंगणकभाषासन्दर्भे उभयोः (आङ्ग्लसंस्कृतयोः) तुलना कर्तुं शक्यते, संगणके सूचनासंग्रहणं एवमेवास्ति-

One character = 2 bits (0 or 1)

8 bits = 1 byte

चन्दनं शीतलं लोकेत्यादि श्लोके (चतुर्षु पदेषु) संगणकभाषानुसारेण चतुरशीतिः वर्णाः (84 characters/without spaces) भवन्ति। अत्र स्वरव्यंजनैस्सह अष्टषट्यधिकैकशतं (84x2=168 bits) बिट्स् भविष्यन्ति । बाइट्स्गणनानुसारेण एकविंशतिबाइट्स् (21 bytes) भविष्यन्तीतितात्पर्यम् । किन्तु उपर्युक्तश्लोकस्याङ्लभाषानुवादे त्रयोविंशत्यधिकैकशतं वर्णाः (123 characters/without spaces)) भवन्ति। षड्चत्वारिंशतधिकद्विशतं (246 bits.) बिट्स् भविष्यन्ति अर्थात् एकत्रिंशत् बाइट्स् (30.75 bytes) भविष्यन्ति। अतःअत्र स्पष्टमस्ति यत् आङ्ग्लाभाषायाः अपेक्षा संस्कृते न्यूनतमवर्णेषु अधिकतमसूचनायाः संग्रहणं भवितुं शक्नोति' इत्यत्र न संशयः।

**यान्त्रिकानुवादे संस्कृतभाषा-**

कस्यापि प्राकृतिकभाषातःसंगणकेन (यन्त्रेण) अन्यभाषायामनुवादः यान्त्रिकानुवादः कथ्यते। स च त्रिविधः -

१- मानवसहायितयान्त्रिकोऽनुवादः (Human aided machine translation)

२- यान्त्रिकसहायितमानवीय अनुवादः (machine aided Human translation)

३- पूर्णतःस्वचालितयान्त्रिकोऽनुवादः (Fully automatic machine translation)

यान्त्रिकानुवादे नैकविघ्नाः भवन्ति, परञ्च संस्कृतभाषायामनुवादसमये अतिन्यूनाशुद्धिर्भवति। एतत्कारणमस्ति यत् संस्कृतवाक्यनिर्माणे कर्ता, कर्म, क्रिया इत्येतत् निश्चितस्थानं न वर्तते। एतेषां प्रयोगः कुत्रापि कुर्वन्तु, अर्थविषये सन्देहव्युत्पन्नः न भविष्यतिअर्थात् सर्वप्रकारेण वाक्ये अर्थनिष्पादनस्य योग्यता भवति, यथा- **रामः आम्रं खादति। आम्रं खादतिरामः। खादतिआम्रं रामः। रामः खादतिआम्रम् । आम्रं रामः खादति**। अत्र वाक्यं तु एकमस्ति, परञ्च तं वाक्यं पञ्च प्रकारेण वयं लेखितुं शक्नुमः, इयमस्ति संस्कृतभाषावैशिष्ट्यम्। श्लोकेऽपि एवमेव भवति-

वासांसि जीर्णानि विहाय नवानि गृह्णातिनरः अपराणि ॥
विहाय जीर्णानि वासांसि नवानि गृह्णातिनरः अपराणि ॥
नरः विहाय वासांसि जीर्णानि गृह्णातिअपराणि नवानि ॥
विहाय वासांसि जीर्णानि नरः नवानि अपराणि गृह्णाति॥
गृह्णातिनवानि अपराणि नरः विहाय वासांसि जीर्णानि ॥
जीर्णानि विहाय वासांसि गृह्णातिअपराणि नरः नवानि ॥

 **ISSN: 2320-740X**

अन्यभाषायां एवमेव न भवितुमर्हति। तत्र कर्ता कर्मेत्यादीनां पूर्वमेव निर्धारणं भवति। आंग्लभाषानुवादे पृथक् नियमाः सन्ति, यथा- subject + verb + object । परञ्च संस्कृते आङ्गलसदृशनियमाः न भवन्ति। तत्र वाक्यसंरचना अतीव मृदुला सरला च भवति। अतःस्पष्टमस्ति यत् संस्कृतभाषा यान्त्रिकानुवादेऽप्युत्तमोत्तमभाषास्ति।

**उपसंहारः-**

संगणकस्य कृते संस्कृतभाषा नैकक्षेत्रेषु अत्यन्तोपयोगि स्यात्। तत्र येन विधिना कार्यक्रमः निर्मीयते, तथैव पाणिनीयव्याकरणे शब्दव्युत्पत्तिर्भवति। पाणिनीयव्याकरणे यदा कोऽपि जनः रूपसिद्धिं करोति, तदा तत्र "धातोः" इतिसूत्रस्याधिकारः प्रचलति। अनेन प्रकारेण संगणकेऽपि कार्यक्रमनिर्माणवेलायां (Programming) HTML इतिभाषायामधिकारं प्रचलति। यथा- <h1>..........</h1>, <%.....in java....%> । अन्यच्च, यथा पाणिनीयव्याकरणे अन्यान्यसंज्ञाः (वृद्धि-गुण-दीर्घेत्यादयः) सन्ति, तथैव संगणकभाषायामपि नैकाः संज्ञाः भवन्ति, यथा- language="java", pageEncoding="utf-8", contentType="text/html; charset=utf-8" इत्यादयः। पाणिनीयव्याकरणे प्रत्याहाराः भवन्ति, तत्सदृशं संगणकेऽपि "डेटाटाइप्" "keywords" च भवन्ति। संस्कृते सूचनासंग्रहणेऽपि न्यूनातिन्यूनवर्णानामुपयोगः भवति, यथा आंग्लभाषायां किमपि वाक्यं एकत्रिंशत् (31) बाइट्स् मध्ये भवतिचेत्, संस्कृते तस्य वाक्यस्य संग्रहणं पञ्चदश (21) बाइट्स् मध्ये भवितुं शक्यते। यान्त्रिकानुवादेऽपि संस्कृतभाषा अतीव सुकरा भवति। संस्कृते कस्यापि वाक्यस्योपयोगः नैकरूपेण भवितुं शक्नोति, किन्तु तस्यार्थनिर्धारणे सन्देहः न भविष्यति, यथा- रामः आम्रं खादति, खादतिरामः आम्रम्, आम्रं रामः खादतीत्यादि। किन्तु अन्यभाषायां वाक्यस्य प्रयोगः संस्कृतानुसारेण भवतिचेत् अर्थस्यानर्थःभविष्यति। निष्कर्षतःवक्तुं शक्यते यत् संस्कृतभाषा संगणकस्य कृते अतिमहत्त्वपूर्णा भाषा स्यात्।

**सन्दर्भग्रन्थसूची-**


- पाणिनिमुनिप्रणीतः, *अष्टाध्यायीसूत्रपाठः*,रामलाल कपूर ट्रस्ट, बहालगढ, सोनीपत, हरियाणा– १९८८
- भट्टोजिदीक्षितप्रणीत, *वैयाकरणसिद्धान्तकौमुदी,* चौखम्बा सुरभारती प्रकाशन, वाराणसी
- Jha, Girish Nath, *Sanskrit Camputational Linguistic*, 4thInternational Symposium, New Delhi. India. 2010
- Jha, Girish Nath (1993). *Morphology of Sanskrit Case Affixes*: *A Computational Analysis* (Unpublished M.Phil. dissertation). Jawaharlal Nehru University: New Delhi.
- Ramakrishnamacharyulu, K.V., (1993), *'Paninian Linguistics and Computational Linguistics'*, Samvit, Series no. 27. pp. 52-62, Academy of Sanskrit Research, Melkote, Karnataka (India).
- Bharati, Akshar, Vineet Chaitanya and Rajeev Sangal, 1992, *'LFG, GB and Paninian Frameworks: An NLP viewpoint',* In Tutorial on NLP at CPAL-2: UNESCO Second Regional Workshop on Computer Processing of Asian Languages, Dept. of CSE, IIT Kanpur, pp. 1-42.

# कतमपदार्थविचारः

**Rahul Maity**
Ph.D Scholar
Department of Sanskrit and Philosophy
Ramakrishna Mission Vivekananda Educational
and Research Institute
Belur Math,
Howrah – 711202

**प्रबन्धसारः –**

कर्ता कर्म च करणं सम्प्रदानं तथैव च
अपादानाधिकरणं चेत्याहुः कारकाणि षट् ॥[1]

कर्त्रादीनि षट्कारकाणि व्याकरणे प्रसिद्धानि सन्ति। तेषु च षट्कारकेषु करणकारकम् अन्यतमम्। एकेनैव पाणिनीयसूत्रेण करणसंज्ञा विधीयते। तच्च सूत्रं साधकतमं करणम्। द्विपदात्मकेऽस्मिन् सूत्रे सन्ति बहवःविचाराः। ते एव विवेचनीयाः विषयाः अत्र प्रबन्धे यथामतिप्रदर्शिताः। सामान्येन महाभाष्यमाश्रीत्य लिखिते अस्मिन् व्याख्याने सूत्रव्याख्याकाराणाम् अन्येषामपि मतानि यथाप्रसङ्गम् अलोचितानि सन्ति। करोतिक्रियां निर्वर्तयतीतिकारकम्। क्रियाजनकं वा कारकम्। क्रियान्वयी वा कारकमितिकारकलक्षणमाश्रित्य साधकशब्दस्य कारकपर्ययात्वे साधकग्रहणस्य वैयर्थ्यं,तमब्ग्रहणस्य ज्ञापकत्वं च यथामतिप्रदर्शितं प्रबन्धे। ज्ञापकस्य च अन्यत्र चारितार्थ्यमपि प्रत्यपादि शोधप्रबन्धे। गङ्गायां घोषः, इत्युदाहरणे गौणाधारस्यापि अधिकरणत्वं कथं सिध्यतितद्विषये दीक्षितनागशयोः आशयश्च सुष्ठुतया प्रतिपादितो वर्तते। आधारशब्दे स्वरितत्वप्रतिज्ञया तत्र गौणाधारस्यापि अधिकरणत्वं साधयितुं शक्यं नवेतिविचारोऽपि सप्रसङ्गमुत्थापितो वर्तते। इत्थंभूते व्याख्याने अन्ततो निष्कर्षरूपेण सिद्धान्ताः अपि विलिखिताः सन्ति।

**कुञ्चिकशब्दाः** – कारकम्, साधकम्, पाणिनीयव्याकरणम्, तमब्ग्रहणम्।

**उपोद्घातः-**

‘साधकतमं करणम्’ (अष्टाध्यायी- १/४/४२) इत्यस्मिन् सूत्रे द्वे पदे स्तः साधकतममितिकरणमितिच। उभे अपि पदे प्रथमैकवचनान्ते स्तः। साध्नोतीतिसाधकम्। कर्तरि अर्थे ‘साधँ संसिद्धौ’ (धातुपाठः- ५/१९) इतिधातोः ‘ण्वुल्तृचौ’ (अष्टाध्यायी- ३/१/१३३) इतिसूत्रेण ण्वुलि, वोः स्थाने ‘युवोरनाकौ’ (अष्टाध्यायी- ७/१/१) इतिअकादेशे च साधकमितिपदं निष्पद्यते। केचन तु साध्नोत्यनेन इतिसाधकं ‘कृत्यल्युटो बहुलम्’ (अष्टाध्यायी- ३/३/११३) इतिसूत्रे

1 परमलघुमञ्जूषा। कारकार्थविचारः। पृ.सं-१६४।

 ISSN: 2320-740X

बाहुलकपदानुरोधात् करणे ण्वुलि साधकपदं साधयन्ति, परन्तु तथा बाहुलकात् करणे ण्वुलः कल्पनापेक्षया यथाप्राप्तं कर्तरि ण्वुलि कृते अपि दोषाभावात् व्याख्यान्तरकल्पना नाश्रीयते। ततश्च साधकशब्दात् 'अतिशायने तमबिष्ठनौ' (अष्टाध्यायी- ५/३/५५) इतिसूत्रेण तमप्प्रत्यये साधकतमम् इतिपदं निष्पद्यते, तस्यैव प्रथमायाः एकवचनान्तं पदं साधकतममिति। करणमितिच कृञ्धातोः 'कृत्यल्युटो बहुलम्' (अष्टाध्यायी- ३/३/११३) ल्युटि कृते निष्पन्नं पदम्। साधकतममितिहि संज्ञिवाचकं पदम्, करणमितिच संज्ञावाचकं पदम्। सूत्रे 'कारके' (अष्टाध्यायी- १/४/२३) इतिपदम् अधिक्रियते तच्च प्रथमान्ततया विपरिणम्यते। अर्थात् साधकतमं कारकं करणसंज्ञकं भवति। वस्तुतःसाधकतममुद्दिश्य करणसंज्ञा अनेन शास्त्रेण विधीयते।

**सूत्रार्थः**

ननु साध्नोतिइतिसाधकं, साध्यते अनेन इतिवा साधकमितिव्युत्पत्त्या किं साधकमितिकैमर्थ्याकाङ्क्षा जायते। तस्योत्तरमस्ति क्रिया इति। अर्थात् क्रियां साध्नोतियत्, क्रिया साध्यते येन इतिवा तत् कारकं करणसंज्ञकं भवति। अर्थात् क्रियासिद्धौ यत् प्रकृष्टम् अतिशयितं साधकं तत्कारकं करणसंज्ञकं भवति। तमप्प्रत्ययार्थो हि प्रकृष्टत्वम् अतिशयितं वा। ननु प्रकृष्टत्वं चात्र कीदृशं यतो हि सर्वेषामपि कारकाणां क्रियासिद्धौ उपकारकत्वं वर्तते एव। तदोच्यते नागेशेन, - अतिशयश्च "यद्व्यापारानन्तरमव्यवधानेन फलोत्पत्तिस्तत्त्वम्"[1] अर्थात् यत्कारकनिष्ठाव्यापारानन्तरं क्रियोत्पत्तिःतस्यैव कारकस्य करणसंज्ञा भवतीतिसूत्रार्थः। उक्तञ्च वाक्यपदीये भर्तृहरिणापि –

क्रियायाः फलनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्॥[2]

उदाहरणं यथा – रामेण बाणेन हतो वाली। अत्र हननक्रियायां रामस्य यथा उपकाकरत्वं वर्तते, तद्वत् वाणस्यापि, वालिनः अपि, तथापि बाणनिष्ठव्यापारानन्तरमेव हननक्रियासिद्धौ बाणस्य प्रकृष्टोपकारकत्वात् अनेन शास्त्रेण करणसंज्ञा भवति। करणसंज्ञकत्वाच्च 'कर्तृकरणयोस्तृतीया' (अष्टाध्यायी- २/३/१८) इतिसूत्रेण तृतीयाविभक्तिः भवति। विवक्ष्यते यदा यत्र इत्यत्र विवक्ष्यते इतिपदेन अधिकरणादिव्यापाराव्यवधानेनापि यदि क्रियानिष्पत्तिर्विवक्ष्यते तदा तेषामपि करणत्वं सिध्यतिइत्यर्थःबोधयतिआचार्यः। तेन स्थाल्या पच्यते इत्यादयः प्रयोगाः अपि संसिद्धाः। तदेवाह अग्रे भर्तृहरिः

वस्तुतःतदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः॥[3]

**तमपःवैय्यर्थम्**

ननु यदुक्तं प्रकर्षविविक्षायां सूत्रे अस्मिन् तमब्ग्रहणंग्रहणं तन्नापेक्षते, यतो हि सूत्रे अस्मिन् 'कारके' (अष्टाध्यायी- १/४/२३) इतिसूत्रस्याधिकारः वर्तते, तत्र च कारके इतिपदं कृञ्धातोः ण्वुलि करोतीतिकारकं इतिव्युत्पत्त्या निष्पादितः।

1 साधकममं करणम् (१/४/४२)। महाभाष्यस्य उद्द्योतटीकायाम्। पृ.सं- २५८।

2 वाक्यपदीयम्। (३/७/९०)।

3 वाक्यपदीयम्। (३/७/९१)।

किं करोतिइतिचेत् क्रियां करोतिइतिकारकम्। अस्य सूत्रस्य भाष्ये अपि इदं पदं पदान्तरेणाह भाष्यकृत् “साधकं निर्वतकं कारकसंज्ञं भवतीति”[1]। कारकपर्यायवाचकत्वे साधकशब्दं च बहुत्र निर्वक्ति भाष्यकृत्। तद्यथा ‘उपपदमतिङ्’ (अष्टाध्यायी- २/२/१९) इतिसूत्रभाष्ये आह – “साधनं हि क्रियां निर्वतयतिइति”,“अन्वर्थमितिचेदकर्तरि कतृशब्दानुपपत्तिः” इतिवार्तिकेऽपि कारकपदस्य अन्वर्थत्वं नाम करतीतिकारकम् इतियदा आश्रीयते तदा अकर्तरि कर्तृशब्दःउपपद्यते इतिआशङ्का कृता कैयटेन[2]। अनेनापि ज्ञायते यत् करोतिइतिव्युत्पत्त्या क्रियां करोतिइत्येव आशयः भाष्यकारस्य। अतःकारके इतियत् पदं सूत्रे उपतिष्ठते तस्यार्थः“क्रियानिर्वतकं” इति, तच्च साधकसमानार्थकमेव। अतःक्रिया सिद्धौ यदुपकारकं तत्कारकमितिव्युत्पत्त्या अपि कारकशब्दादेव साधकार्थःलब्धः, अतःसूत्रे साधकग्रहणं व्यर्थं भवति। तदेव व्यर्थं सत् अतिशयेन यत् साधकमितिप्रकर्षार्थं ज्ञापयिष्यतिअतःनात्र प्रयोजनं किञ्चित् पश्यामि तमब्ग्रहणस्य। इत्येतत्सर्वं प्रकरणं बुद्ध्या विविच्य भाष्यकारैः उक्तं – “तमब्ग्रहणं किमर्थमिति”[3]। साधकं करणम् इत्येव उच्यताम्। अस्य तात्पर्यमित्थमस्ति यत् काराकाधिकारादेव साधकत्वे लब्धे यत् अत्र साधकग्रहणं करोतिआचार्यः तज्ज्ञापयतिप्रकृष्टेन यत् उपकारकं तस्यैव करणसंज्ञा भवति। प्रकर्षश्चात्र पूर्वोक्तः नागेशसम्मतःएव। अतःनार्थःतमब्ग्रहणेन।

**तमपःग्रहणाभावे दोषः**

तमब्ग्रहणाभावे दोषमुद्भावयन्नाह महाभाष्यकारः - “साधकं करणमित्युच्यमाने सर्वेषां कारकाणां करणसंज्ञा प्रसज्येत”[4]। यतो हि अपादानादीनि सर्वाण्यपि कारकाणि क्रियासिद्धौ साधकानि एव भवन्ति। परन्तु तमब्ग्रहणे क्रियमाणे अयं दोषो न भवतीति।

**दोषपरिहारः**

तत्रोच्यते तमब्ग्रहणाभावे अपि दोषोऽयं निवारयितुं शक्यते, कथमितिचेदुच्यते - करणसंज्ञायाः प्राग् याः संज्ञाः उक्ताः ताः अपवादत्वात् भविष्यन्ति, अर्थात् अपादानविषये यदि करणसंज्ञा प्रसज्येत तर्हि न क्वचित् अपादानस्य प्रसक्तिः इतिकृत्वा, निरवकाशविधिः बलवती भवतिइत्यतःअपादानादिविषये करणसंज्ञा न स्यात्, उक्तञ्च भाष्यकृद्भिः – “अपदानसंज्ञामुत्तराणि कारकाणि बाधन्ते”[5] इति। कर्मादिषु परसंज्ञाविषयेषु चोच्यते परत्वात् करणसंज्ञायाः ताः बाधिकाः भविष्यन्ति, अतःतमब्ग्रहणाभावे अपि दोषः नास्ति इतितात्पर्यम्।

**पुनः शङ्का तत्परिहारश्च**

ननु धनुषा विध्यतिइत्युदाहरणे अपायक्रियायुक्तत्वात् धनुषः अपादानसंज्ञा प्राप्नोति, क्रियासाधकत्वाच्च

---

1 कारके(१/४/२३), महाभाष्यम्। पृ.सं- २५०।

2 कारके(१/४/२३), महाभाष्यस्य प्रदीपव्याख्यायाम् (द्वितीयखण्डः)। पृ.सं- २५०।

3 कारके(१/४/२३), महाभाष्यम्। पृ.सं- २५०।

4 साधकतमं करणम् (१।४।४२), महाभाष्यम्। पृ.सं – २५८।

5 आकाराडादेका संज्ञा (१/४/१), महाभाष्यम् (द्वितीयखण्डः), पृ.सं-२०१।

 **ISSN: 2320-740X**

करणसंज्ञा प्राप्नोति, उभयोः संज्ञयोः कतरा स्यादितिसन्देहः जायते, तत्र सर्वासु संज्ञासु करणसंज्ञायाः अवकाशः अस्ति, इत्यतःसा सावकाशा, अपादानसंज्ञा तु अपायक्रियासिद्धौ एव प्राप्ता, अतःइयं संज्ञा निरवकाशाविधिः, अतःनिरवकाशत्वात् अपादानसंज्ञा एव स्यात् इतिदोषे प्राप्ते, तमब्ग्रहणे क्रियमाणे प्रकृष्टोपकारकत्वात् करणसंज्ञा एव स्यात्, इतिदोषस्य परिहारः सम्भवतीतिचेत् उच्यते तमब्ग्रहणाभावे अपि प्रकर्षः गम्यते एव। ननु तमब्ग्रहणाभावे कथं प्रकर्षः गम्येत इतिचेदाह - लोकतःएतत्सिद्धं भवति। लोके यथा प्रकृष्टमाश्रित्यैव कार्याणि सिध्यन्ति, तद्वत् इह व्याकरणे अपि। लोके यथा अभिरूपाय कन्या देहि इत्यस्य अभिरूपतमाय कन्या देहि इतितात्पर्यार्थःगम्यते तद्वत् अत्रापि सर्वेषां कारकाणां करणत्वे सिद्धे प्रकृष्टोपकारकस्यैव करणत्वं स्वतःसिध्यतीतिभाष्यकृदाशयः। तदेवाह भाष्यकारः प्रकृतसूत्रभाष्ये "सर्वाणि च कारकाणि साधकानि न चासाधके प्रवृत्तिरितितत्र साधकतमम् इतिविज्ञायते"।[1]

**तमब्ग्रहणेन ज्ञाप्यम् वचनम्**

ननु तर्हि तमब्ग्रहणं व्यर्थमितितु साधितम्, इदानीं तर्हि किं तत्पदं सूत्रे पठनीयनम् उत त्यक्तुं शक्यम् इतिचेद् वृद्धिरेचिस्थं भाष्यं स्मर्यते विद्वद्भिः–"प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयतिस्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्"[2] अतःतमब्ग्रहणं व्यर्थं सत् ज्ञापकं भविष्यति, किं तज्ज्ञापनमितिचेदाह – कारकसंज्ञायां तरतमयोगं विना प्रकर्षः गम्यते चेद् तादृशः प्रकर्षः नाश्रीयते। शब्दसामर्थ्यगम्यः प्रकर्षः नाश्रीयते इतियावत्। प्रकृते च साधकपदेन सः प्रकर्षः गम्यते इत्यतःएतादृशः प्रकर्षः आश्रयितुं न शक्यते। ननु किमिदं प्रकर्षे निषेधः क्रियते, प्राप्तिपूर्वकं हि निषेधः, अतःप्रकृष्टे प्राप्तिः कथमासीत् यत्तत्र निषेधः विधीयते इतिचेत्, प्रकृष्टाप्रकृष्टयोः प्रकृष्टस्यैव ग्रहणं तु लोकतःएव सिद्धं तद्यथा दृश्यते लोके शास्त्रे च गौण्यमुख्ययोः उभयोः कार्यसम्भवे मुख्ये एव कार्यप्रवृत्तिरिति। लोकसिद्धमेव सिद्धान्तं परिभाषात्वेन पठतिआचार्यः – "गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः"[3]। अर्थात् गौणे मुख्ये च उभयत्र कार्ये प्राप्ते स्वतःएव मुख्ये कार्यं सिध्यति। लोकन्यायानुरोधेन तु सर्वदैवे मुख्ये एव कार्यं स्यात् गौणे च न स्यात्। अतःयदि कारकप्रकरणे अपि मुख्ये कार्यप्रवृत्तिःस्यात् तर्हि बहवःदोषाः आपद्यन्ते। के च ते दोषाः इतिअग्रे निरूपयिष्ये। अतःतान् दोषान् निवारयितुम् अस्याः परिभाषायाः कृत्स्ने व्याकरणे प्रवृत्तावपि कारकप्रकरणे नेयमाश्रीयते। इदमत्र अवधेयं यत् सामर्थ्यगम्यः प्रकर्षः आश्रीयते इत्यस्यैव तात्पर्यमस्ति गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः। अत्र प्रकरणे वस्तुतःद्वाभ्यां युक्तिभ्यां तमब्ग्रहणं खण्ड्यते।

**प्रथमायुक्तिः** - कारकाधिकारेणैव साधकत्वे लब्धे पुनः साधकं ग्रहणं व्यर्थं सत् ज्ञापयतिप्रकृष्टस्यैव ग्रहणं भवतिअतः तमब्ग्रहणं न कर्तव्यम्।

**द्वितीयायुक्तिः** - लोके यथा सामान्ये विशेषे च कार्ये प्राप्ते विशेषस्यैव ग्रहणं क्रियते तद्वदत्रापि शास्त्रे साधकस्य साधकतमस्य च करणसंज्ञायां प्राप्तायां साधकतमस्यैव तद्भविष्यतिइतिलोकन्यायसिद्धत्वादेव इष्टे सिद्धे तमब्ग्रहणं

1 कारके(१/४/२३)। महाभाष्यम्। पृ.सं- २५१।

2 वृद्धिरेचि (१/१/१)। महाभाष्यम्। पृ.सं- १६०।

3 परिभाषेन्दुशेखरः। परिभाषासंख्या – १५।

नापेक्षते। तथापि सूत्रे तमब्ग्रहणेन इदमेव ज्ञापितं यत् शब्दसामर्थ्यगम्यः प्रकर्षः अत्र कारकप्रकरणे नाश्रीयते, अर्थात् पूर्वं याभ्यां युक्तिभ्यां प्रकर्षः लब्धःतादृशः प्रकर्षः अत्र कारकप्रकरणे नाश्रीयते इति। गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः इतिपरिभाषा वा कारकप्रकरणे नाश्रीयते इतियावत्।

**ज्ञापकस्य फलम्**

उक्तपरिभाषायाः कारकप्रकरणेऽपि प्रवृत्तौ के दोषाः तदत्र ज्ञापकफलमुखेन उच्यन्ते। तिलेषु तैलमित्यत्र यथा तिलस्य अधिकरणसंज्ञा तद्वत् वटे गावः, कूपे गर्गकूलमित्यत्रापि वटादीनां अधिकरणसंज्ञा भविष्यतीति। ननु किं कारणं न प्राप्नोतिइतिचेद् आलोच्यते अत्र- 'आधारोऽधिकरणम्' (अष्टाध्यायी- १/४/४५) इत्यनेन हि सूत्रेण अधिकरणसंज्ञा विधीयते। अस्मिन् सूत्रे आधारग्रहणाभावे अपि अधिक्रियते अस्मिन्नितिव्युत्पत्त्या अधिकरणपदेनैव आधारे लब्धे आधारग्रहणं व्यर्थं भवति, तदेव पदं व्यर्थं सत् ज्ञापयतियत्र सर्वै अवयवैः सह अवयवी व्याप्तो वर्तते तत्रैव अधिकरणसंज्ञा स्यात्, यत्र च आधेयः कृत्स्नम् आधारं व्याप्य न तिष्ठतितत्र अधिकरणसंज्ञा न स्यात्, अर्थात् मुख्याधारस्यैव अधिकरणसंज्ञा स्यात् गौणस्य च न स्यात्। तथा सतितिलेषु तैलमित्यत्र मुख्याधिकरणस्यैव अधिकरणसंज्ञा भवति, तैलस्य तिलं व्याप्य स्थितत्वात्, गङ्गायां घोषः इत्यादिषु घोषस्य गङ्गाव्यापकत्वात् अधिकरणसंज्ञा न स्यात्, अत एवाह नागेशोऽपि लघुशब्देन्दुशेखरे – "एवञ्चेदं सूत्रं तिलेषु तैलमित्यादावेव प्रवर्तते, न हि गङ्गा तीरं वा सर्वावयैः व्याप्त, तीरधर्मस्य घोषाधारत्वस्यात्यन्तसामीप्यात्प्रवाहे आरोपोऽत्र बोध्य"[1] इति। इष्यते च उभयत्रापि अधिकरणसंज्ञा। अतःएव कारकप्रकरणे सामर्थ्यगम्यः प्रकर्षः नाश्रीयते इतिसिद्धान्तानुरोधात् गौणस्यापि आधारस्य अधिकरणसंज्ञां साधयितुं शक्यते।

ननु गङ्गायां घोषः इत्यत्र गङ्गापदस्य गौणाधारत्वं कुतः। अस्मिन् विषये द्वौ पक्षौ स्तः, संक्षेपेण इह तदुच्यते। प्रथमपक्षः – यदा गङ्गादिना घोषस्यात्यन्तसामीप्ये गङ्गापदस्य लाक्षणिकत्वं नास्ति, किन्तु मुख्यत्वमेव। द्वितीयपक्षः - यदा गङ्गादिना घोषस्य व्यवहितसामीप्यं तदा गङ्गापदं तीरे लाक्षणिकम्। अतःउभयेऽस्मिन्नपि पक्षे गङ्गायाः (मुख्यपक्षे) तीरधर्मस्य (लक्षणापक्षे) वा सर्वावयवव्यप्त्यभावेन अधिकरणसंज्ञा न स्यात्। परन्तु मुख्यत्वपक्षे तीरधर्मस्य घोषाधारत्वस्य अत्यन्तसामीप्यात् गङ्गापदशक्यप्रवाहे आरोपात् तस्य षोषाधारत्वमिष्यते। द्वितीयपक्षे, अर्थात लाक्षणिकत्वपक्षे व्यवहितसामीप्ये गङ्गापदस्य तत्तीरे लक्षणा। एवं पक्षद्वयेऽपि सप्तम्याः अनुपपत्तिरेव इतिग्रन्थकर्तृणामाशयः। एतादृशेषु प्रयोगेषु गौणाधारस्यापि अधिकरणत्वं यथा सिध्येत्तदर्थं शब्दसामर्थ्यगम्यः प्रकर्षो नाश्रीयते इतिज्ञापितवचनमाश्रयणीयमेव। गङ्गायां घोषः इत्यत्र पक्षद्वयमुद्भाव्य तस्य गौणाधारत्वं प्रतिपादनं किञ्चित्क्लिष्टमित्यतःगङ्गायां गावःइत्यप्युदाहरणमित्युक्तं नागेशैः। अत्रापि सर्वावयवव्याप्त्याभावेन मुख्याधारत्वाभावात् अधिकरणत्वं न स्यात्। परन्तु तमब्ग्रहणस्य वैयर्थ्यमाश्रीत्य समाधातुं शक्यते इतिआशयः।

इत्थमेव अन्यदेकं प्रयोजनमाह भाष्यकृत् - अपादानमितिमहासंज्ञया यदि प्रकृष्टस्यैव ध्रुवस्य अपादानसंज्ञा स्यात् तर्हि ग्रामादागच्छतिइत्यत्र मुख्यस्य ध्रुवस्यैव अपादानसंज्ञायां सत्यामपि सांकाश्यकेभ्यः पाटलिपुत्रकाः

1 साधकरतमं करणम्,लघुशब्देन्दुशेखरः। पृ.सं-७०४।

 ISSN: 2320-740X

अभिरूपतराः इत्यत्र गौणस्य ध्रुवस्य अपादानसंज्ञा न स्यात्। परन्तु शब्दसामर्थ्यगम्यप्रकर्षस्य अनाश्रयणे गौणस्यापि ध्रुवपदार्थस्य अपादानसंज्ञा सिध्यतियेन सांकाश्यस्यापि अपादानसंज्ञा निर्बाधा।

**स्वांशे चारितार्थ्यम् -**

साधकतमं करणमितिसूत्रे तमब्ग्रहणाभावे सूत्रं भवतिसाधकं करणमिति। कारकाधिकाराद् साधकत्वे लब्धे पुनः साधकश्रुतिः व्यर्थं सत् प्रकर्षं ज्ञापयिष्यति। परन्तु शब्देन गम्यमानस्य सामर्थ्यस्य अनाश्रयणात् गौणस्यापि साधकस्य करणसंज्ञा स्यात्, तेन रामः बाणेन वालीं हतवान् इत्यत्र रामस्यापि करणसंज्ञापत्तिः। परन्तु तमब्ग्रहणे क्रियमाणे दोषो न भवति। तमब्ग्रहणे क्रियमाणे प्रकर्षः प्रत्ययगम्यः न तु शब्दसामर्थगम्यो भवति। अतःतदा तु प्रकृष्टमाश्रयितुं शक्यते तेन प्रकृष्टस्यैव साधकस्य करणसंज्ञा सिध्यति। सारांशस्तु इत्थं - शब्दसामर्थगम्यस्य प्रकर्षस्य कारकप्रकरणे आश्रयाभावात् सर्वेषामपि कारकाणां क्रियासिद्धौ उपकारकत्वात् सर्वेषामपि कारकाणां करणसंज्ञायां प्राप्तायाम् अनेन तमब्ग्रहणेन प्रकृष्टोपकारकस्यैव करणसंज्ञा सिध्यति, इतितमब्ग्रहणं स्वांशे चरितार्थं भवति।

**स्वरितेनाधिकारसूत्रार्थेन सम्वन्धः -**

यदि करणम्, अधिकरणम् इत्यादिभिः महासंज्ञाभिः, तदाक्षेपकरणेन संज्ञिलाभाय एव आधारादिग्रहणं चरितार्थमित्युच्येत इतिनागेशवचसः तात्पर्यमित्थमस्ति, करणसंज्ञा विहिता, अधिकरणसंज्ञा विहिता, ते चे महासंज्ञे, तयोश्च के सञ्ज्ञिनः, इतिआक्षेपात् एव आधारः, साधकं इत्यादीनि पदानि चरितार्थानि, तथा सतितस्मिन्पक्षे प्रकर्षलाभाय तमब्ग्रहणस्य चारितार्थ्येन तस्य ज्ञापकत्वं न युज्येत।

स्वरितेनाधिकारः इतिसूत्रभाष्योक्तं पक्षमबलम्ब्य पक्षान्तरमुद्भावयन् समाधानमाह नागेशः –गङ्गायां घोषः, गङ्गायां गावःइत्यत्र उक्तप्रयोगादिसाधनाय कारकप्रकरणे उद्देश्यवाचके पदे स्वरितत्वप्रतिज्ञया गौणाधारादेर्ग्रहणं वाच्यम्, स्वरितेनाधिकं कार्यमित्यर्थः। स्वरितेनाधिकारः इतिसूत्रस्य स्वरितेन अधिकः कारः अर्थात् स्वरितस्वरयुतेन पदेन अधिकं कार्यं कार्यं सिध्यतिइत्यर्थोऽपि कल्पितःभाष्यकृद्भिः। अर्थात् यत्र स्वरितत्वमासज्यते तत्राधिकं कार्यं भवति। आधारोऽधिकरणं सूत्रे च आधारपदे स्वरितस्वरश्च प्रयुज्येत। तेन न्यायप्राप्तादधिकं कार्यं लभ्यते सर्वावयव्यप्त्या यः आधारः तस्यैव अधिकरणसंज्ञा न्यायप्राप्ता, आधारपदसामर्थ्यात्, ततोऽप्यधिकस्य ग्रहणलाभेन मुख्यभिन्नस्य गौणस्यासपि (औपश्लेषिकवैषयिकस्यापि) आधारस्य अधिकरणत्वं सिध्यति। ननु अधिकरणसंज्ञासूत्रे आधारपदे स्वरितत्वे किं मानमितिचेत्- साधकतमं करणमितिसूत्रे तमब्ग्रहणमेवात्र मानम्। तेन कारकरप्रकरणे उद्देश्यवाचकपदेस्वरितत्वं प्रतिज्ञातमितिज्ञाप्यते। तत्फलं च गौणाधारस्यापि अधिकरणत्वं सिध्यति, येन दध्नि सर्पि इत्यादिष्विव गङ्गायां गावःइत्यत्रापि गौणाधारस्य अधिकरणत्वं सिध्यति। परन्तु पाणिनिना करणसंज्ञासूत्रे तमब्ग्रहणं कृतं वर्तते, येन अभ्युपगम्यते यत् अधिकरणसूत्रे आधारपदे स्वरितत्वं नास्ति। तर्हि प्रकृतसूत्रे तमपःकिं फलमस्मिन् पक्षे इतिचेदाह नागेशः – एवञ्च व्यवधानेन फलोत्पादके करणत्वोपाचारेण तृतीयान्तप्रयगोस्य असाधुत्वबोधनं तमप्फलम्। अर्थात् यन्निष्ठव्यापारव्यावधानेन फलोत्पत्तिःतस्य न करणसंज्ञा इत्येव अस्य तात्पर्यम्। अतःअस्मिन्नपि पक्षे तमब्ग्रहणस्य गङ्गायां घोषः इत्येव प्रयोजनमितिदीक्षितोक्तं संगतमेव। परन्तु स्वरितेनाधिकारः इतिसूत्रार्थमादाय उक्तं समाधानं तु

सिद्धान्तपक्षः इतिकण्ठरवेणोक्तं वृहच्छब्देन्दुकृद्भिः – “एवञ्च तमपोऽभावे व्यवधानेन फलोत्पादकस्यापि करणत्वोपचारेणे तृतीयान्तप्रयोगापत्ति। सिद्धान्ते तु न इति”[1]। नागेशः वृहच्छब्देन्दुशेखरग्रन्थे इत्थं लिलेख- गौणमुख्यन्यायोपन्यासस्त्वसङ्गतःएव। विशिष्टरूपोपादान एव तत्प्रवृत्तेः। पदकार्यविषयत्वात्। अर्थात् गौणमुख्यन्यायस्य अत्र प्रसक्तिरेव नास्ति, यतो हि सर्वादीनि सर्वनामानि सूत्रभाष्ये संज्ञाभूतानां सर्वादिशब्दानां प्रतिषेधरमरभता वार्तिककृता, पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् (अष्टाध्यायी -१/१/३४) इतिसूत्रे असंज्ञायामितिवदता सूत्रकृता अन्वर्थसंज्ञया तत्प्रत्याख्यानं कुर्वता भाष्यकृता इदमेव ध्वनितं यत् गौणमुख्यन्यायः पदकार्यविषयकः एव[2]। अतःप्रकृते संज्ञाविषये अयं न्यायः वस्तुतःअत्र न प्रवर्तते इत्येव नागेशसिद्धान्तः।

**सिद्धान्तविन्दवः**

क्रियासिद्धौ यत् प्रकृष्टम् उपकारकं तस्यैव करणसंज्ञा भवति। प्रकृष्टञ्चात्र यन्निष्ठव्यापारानन्तरं क्रियोत्पत्तिःतत्त्वम्। साधकतमं सूत्रे प्रकर्षार्थःसाधकपदेन गम्यमानेऽपि तदर्थं कृतं तमप्प्रत्ययग्रहणं व्यर्थं सत् शब्दसामर्थ्यगम्यः प्रकर्षः कारकप्रकरणे नाश्रीयते इतिज्ञापयति।

गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः इतिन्यायः कारकप्रकरणे इदं सूत्रं विहाय न क्वचित् प्रवर्तते। गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः इतिन्यायस्यैव फलम् अस्ति – शब्दसामर्थ्यगम्यः प्रकर्षः आश्रीयते इति। नागशेस्तु गौणमुख्यन्यायस्यायमविषयः इतिमनुते।

**परिशीलितग्रन्थसूची**


- काशिका (न्यास-पदमञ्जरी-भावबोधिनीसहिता) (द्वितीयो भागः); वामनजयादित्यौ; जयशङ्करलाल-त्रिपाठी, सुधाकर-मालबीयः (सम्पादकौ); वारणसी – तारा प्रिटिंग वर्क्स; १९८६ (प्रथमं संस्करणम्)।
- वाक्यपदीयम् (पदकाण्डम्) (हेलाराजकृतम् प्रकाशाव्याख्यासहितम्, रघुनाथशर्माविरचितम् अम्बाकर्त्रीव्याख्यासहितञ्च); भर्तृहरिः; भगीरथप्रसादत्रिपाठी (सम्पादकः); वाराणसी – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः; १९९१।
- वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीसहिता)(प्रथमो भागः); भट्टोजिदीक्षितः; गिरिधरशर्मा – चतुर्वेदः, परमेश्वरानन्दशर्मा विद्याभास्करः (सम्पादकौ); देहली – मोतिलालबनारसीदास; १९९५।
- व्याकरणमहाभाष्यम् (उपाध्यायकैयटप्रणीतभाष्यप्रदीपस्तद्व्याख्यानभूतनागेशभट्टविरिचितभाष्य-प्रदीपोद्योतसहितम्) (प्रथमः खण्डः); पतञ्जलिः; भार्गवशास्त्रीजोशीशास्त्राचार्यः (सम्पादकः); सत्यभामावाई – पाण्डुरङ्गः (प्रकाशकः); मुम्बाई – निर्णयसागरमुद्रणालयः; १९४२ (प्रथमं संस्करणम्)।


---

1 साधकरतमं करणम्,वृहच्छब्देन्दुशेखरः। पृ.सं-८७२

2 गौणमुख्ययोर्मुख्ये कार्यसमप्रत्ययः, परिभाषेन्दुशेखरः, परिभाषासंख्या – १५, पृ.सं-७९।

 ISSN: 2320-740X

- व्याकरणमहाभाष्यम् (उपाध्यायकैयटप्रणीतभाष्यप्रदीपस्तद्व्याख्यानभूतनागेशभट्टविरिचितभाष्य-प्रदीपोद्योतसहितम्) (द्वितीयः खण्डः); पतञ्जलिः; भार्गवशास्त्रीजोशीशास्त्राचार्यः (सम्पादकः); सत्यभामावाई – पाण्डुरङ्गः (प्रकाशकः); मुम्बाई – निर्णयसागरमुद्रणालयः; १९४२ (प्रथमं संस्करणम्)।

- लघुशब्देन्दुशेखरः (बालबोधिनीव्याख्यया सहितः) (कारकप्रकरणम्); नागेशभट्टः; आचार्य श्रीपाद सत्यनारायणमूर्तिविरचित (बालबोधिनीकारः); हरेकृष्णशतपथी (सम्पादकः); तिरुपतिः – राष्ट्रीयसंस्कृतविद्यापीठम्; २००७।

- लघुशब्देन्दुशेखरः (षट्टीकोपेतः) (द्वितीयः भागः); नागेशभट्टः, बालकृष्णशास्त्री (सम्पादकः); गुरुप्रसादशास्त्री (समलङ्कर्ता वरवर्णिनीकारश्च) वाराणसी – चौखम्बा सुरभारती प्रकाशन; २०१३।

- लघुसिद्धान्तकौमुदी (भैमीव्याख्यया सहितः) (तृतीयः भागः) (कृदन्त-कारकप्रकरणम्); वरदराजाचार्यः ; भीमसेनशास्त्री (व्याख्याकारः सम्पादकश्च); दिल्ली, भैमी प्रकाशन; २०१९।

- परमलघुमञ्जुषा (कालिकाप्रसादशुक्लविरचितया ज्योत्स्नाटीकया समेतः); नागेशः; वरोदासंस्कृतमहाविद्यालयः, १९६१।

- वृहच्छब्देन्दुशेखरः (द्वितीयः भागः) ; नागेशभट्टः, सीतारामशास्त्री (सम्पादकः) ; वाराणसी; सम्पूर्णान्दविश्वविद्यालयः ; १९९८।

- परिभाषेन्दुशेखरः (सुबोधिनीहिन्दिव्याख्योपेतः) ; नागेशभट्टः ; विश्वनाथमिश्र (व्याख्याकारः), वाराणसी ; चौखम्बा सुरभारती प्रकाशन ; २०१६।


******

# रामायणे राज्यानुशासनस्य स्वरूपं व्याख्या च

**डॉ. नारायन सामाइ**

अस्थायी निदेशकः

अमृतवाणी आदर्श शोध संस्थान

सारुपालः, धोवाशिला, नीलगिरिः, वालासोर, ओडिशा 756040

अस्माकं देशः भारतवर्षः। अयं देशः उत्तरस्यां दिशि स्थितात् हिमालयात् आरभ्यः दक्षिणस्यां दिशि स्थितसमुद्रं पर्यन्तं विस्तृतः। एतादृशं विस्तृतं भूभागं प्रतिलोभः आसीत् सर्वेषां सम्राटजनानां। तेषाम् उद्देश्यं केवलमात्रम् आभारतम् एकच्छत्रम् आधिपत्यं स्थापयितुम्। वैदिकयुगात् अनन्तरं भारतवर्षे राजतन्त्रं गणतन्त्रं च आसीत्। तस्य प्रत्यक्षोहारणं भवतिरामायणं महाभारतञ्च। महाभारते दृश्यते पाण्डवाः राजसूयः अश्वमेधः यज्ञं सम्पाद्य सम्पूर्णम् आभारतं स्वशासनं विस्तारयितुम् संकल्पं कृतवन्तः। महाभारतात् पूर्वं रामायणं घटितम्।

वाल्मीकीयरामायणं भारतस्य आदिकाव्यमस्ति। ऐतिहासिकग्रन्थः नास्ति, कारणं रामायणस्थ घठनाः मानवीयकरणीयाः सन्ति। वस्तूतःरामायणस्य रूपद्वयमस्ति- एकं भवतिवाल्मीकीकृतरामायणम्, द्वितीयं भवतिरामायणस्य परिवर्द्धितप्रचलितरूपम्। यथा कीर्तिवासीरामायणम्, प्रादेशिकभाषानुसारेण प्रादेशिकलेखकैः लिखितरामायणम् च। चलचित्रं यथा समाजस्य चित्रं वा दर्पणः भवतितथा साहित्यं युगस्य दर्पणः भवतिइतिउक्त्यानुसारेण रामायणम् उद्घाट्य पश्यामः चेत् रामयुगस्य(त्रेतायुगस्य) परिचयः मिलति। तदानीन्तन समाजे हिन्दूनां जीवनदर्शनं, रीतिः-नीतिः, भोजनं-पानं, कला-कौशलं, शिक्षा-संस्कृतिः, सामाजिकः-राजनैतिकः-आर्थिकव्यावस्थानाम् इत्येतेषां अपि विवरणं मिलति। एतेषु रामायनकालीनावसरे राज्यानुशासनस्य अथवा राजनैतिकव्यावस्थायाः चित्रम् अहमिदानीं किञ्चित् प्रस्तौमि—

सिंहासनाधिकारिनः चयनम्(राज्ञः चयनम्)-

रामायणकाले राजवंशक्रमानुसारेण राज्ञः ज्येष्ठपुत्रः राजसिंहासनाधिकारी भवति, पुनश्च सः पुत्रः गुणवान् निष्ठावान् धर्मात्मा भवेत्। अयोग्यवशात् अथवा दुष्टप्रवृत्तिवशात् राज्ञः पुत्रः ज्येष्ठः सत्वेऽपि राजसिंहासनस्य अनधिकारी भवति। अतःप्रजानाम् आग्रहवशात् राजा सगरः स्वज्येष्ठपुत्रस्य असमजसस्य हस्तात् राज्यं हस्तान्तरं कृत्वा तं निर्वासितवान्। राजा ययातिस्वज्येष्ठपुत्रं त्यक्त्वा कनिष्ठपुत्रस्य गुणप्रभावेन तस्य हस्ते राज्यं समर्पितवान्। यद्यपि अयोध्यायाः राजसिंहासनस्य कृते दशरथस्य अमात्यादिभिः रामः चितःतथापि तत्र प्रजानाम् अपि चयनस्य मूल्यं दशरथेन दत्तम्। कारणं प्रजाः अपि रामे अनुरक्ताः आसन्। रामः ज्येष्ठः पुत्रः आसीत्, तेन सह सः सर्वेषु गुणेषु पारदर्शि आसीत् अतःरामः कोशलदेशस्य राजसिंहासनस्य अधिकारी भवेत इतिदशरथेन सूचितम्।–

ज्येष्ठं ज्येष्ठगुणैर्युक्तं प्रियं दशरथःसुतम्।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया॥

 **ISSN: 2320-740X**

इक्ष्वाकुवंशे इयं परम्परा सर्वदा प्रचलिता अस्ति इतिभरतःमातरं कैकेयीं बोधयतियदा सा माता दशरथेन दत्तेन वरेण भरतःराजा भवतु इतिइच्छति।

राज्ञः महत्वं कर्त्तव्यं गुणश्च-

राजा राष्ट्रस्य सर्वोच्चः पदाधिकारी भवति। राज्ञः अभावेन राष्ट्रं आपदग्रस्थं भवति। दशरथस्य मृत्युः, रामस्य वनगमनं, भरत-शत्रुघ्नयोः मातुलगृहे वासः, तर्हि राजसिंहासने कः उपवेक्ष्यतिइइतिचिन्तनीयः विषयः। तत् चिन्तनं दूरीकरणं कुर्वन्ति "राजकर्तारः" अर्थात् मन्त्रीपरिषत्। तस्याम् परिस्थितौ कस्यचित् प्रबन्धकस्य हस्ते राज्यं समर्पणीयमितिचिन्तयित्वा मातुलगृहात् आगतस्य भरतस्य हस्ते राजकार्यस्य समस्तोत्तरदायित्वं समर्पितम्। यतो हि सर्वगुणसम्पन्नः ज्येष्ठपुत्रः रामः न आसीत्। चतुर्दशवर्षेभ्यः परं रामस्य प्रत्यागमनेन पुनः रामस्य कृते राज्यं भरतःसमर्पयति।

आदर्शराज्ञः कृते ये गुणाः अपेक्षन्ते ते गुणाः रामे आसन्। वेद-वेदार्थयाः ज्ञाता, धार्मिकः, दूरदर्शीसम्पन्नः, महातेजस्वी, प्रजावत्सलः, परमवीरः, संयमी, वुद्धिमान, यशस्वी, ख्यातिमान्, दृढनियन्त्रकः, शीलवानः, विनम्रः, उपासकः, सामुद्रिकशास्त्रेषु निष्णातः, धैर्यवान्, राजनीतिज्ञः, अर्थनीतिज्ञः, शत्रुरहितः, जितेन्द्रियः, दयालु, दानवीरः, नीतिवान्, सौम्यस्वभावी, देशप्रेमिकः, धर्मज्ञः, शूरवीरः, कृतज्ञः, सत्यवक्ता, दृढप्रतिज्ञारक्षकः, सदाचारी, विद्वान्, सामर्थ्यशाली च इतिएतेः गुणाः समाविष्टाः भवन्ति एकस्मिन् आदर्शभूते राज्ञि।

वुद्धिमान् नीतिमान् वाग्मी श्रीमाञ्छत्रुनिवर्हणः।
विपुलांसो महावाहुः कम्वुग्रीवो महाहनुः॥
महोरस्को महेष्वासो गुढ़जत्रुररिन्दमः।
आजानुवाहुः सुशिराः सुललाटः सुविक्रमः॥
समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान्।
पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभलक्षणः॥
धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान्॥
प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता॥
रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता।
वेदवेदाङ्गतत्त्वज्ञो धनर्वेदे च निष्ठितः॥
सर्वशास्त्रार्थतत्वज्ञ स्मृतिमान् प्रतिभानवान्।

सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः॥[1]

रामः एकः आदर्शवान् राजा आसीत् येन प्रजानां प्रियः सः अभवत्। कैकेय्याः परमर्शेन राज्ञः दशरथेन आदेशेन रामस्य विना संकोचेन वनगमनं प्रतिप्रस्थानमितिरामस्य निर्लोभस्य परिचयः मिलति,

स जगाम वनं वीरः प्रतिज्ञामनुपालयन।
पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात्॥

कैकेयीं प्रतिश्रद्धा, भातृषु स्नेहः, सखाषु प्रेमः इत्यादिभिः रामस्य कर्तव्यपरायणस्य परिचयः मिलति, सर्वोपरि भरतःराज्यं प्राप्य अपि आनन्दं न कृत्वा पुनश्च राजसिंहासनं न अलङ्कृत्वा मुनिवेशेन जीवनधारणं, राजकार्यं वहनं सर्वं परिपाल्य भरतःअपि श्रेष्ठत्वं प्रतिपादयति। भरतस्य रामं प्रतिप्रार्थना—

गत्वा तु स महात्मानं रामं सत्यपराक्रमम।
अयाचद् भ्रातरं राममार्यभाव पुरस्कृतः॥
त्वमेव राजा धर्मज्ञ इतिरामं वचोऽव्रवीत्।
रामोऽपि परमोदारः सुमुखः सुमहायशाः॥

इयं समर्पिता-भावना अद्य अपि मनुष्यसमाजे भ्रातृषु सद्भावनां उद्घाटयति। तर्हि एतेन ज्ञायते भरतस्य स्थानमपि रामस्य स्थानात् न्यूनं नास्ति। राजा देवतुल्यः भवतिइतिरामः सुग्रीवस्य अग्रजं बालिं बोधयति, यः मनुष्यरूपेण विचरति। अग्निः, इन्द्रः, सोमः, यमः, वरुणः च इतिएतेषां देवतानां समतुल्यः राजा भवतिइतिरावणः कथयति। राजा उत्कृष्टगुणसम्पन्नः भवेत् येन प्रजानां गुणान् विचारयितुं सक्षमो भवेत्।

रामः प्रजावत्सलः आसीत्, प्रजानां दुःखं निवारयितुं सचेष्टवान् आसीत्। प्रजानां कृते ऐहलौकिकेन सह पारलौकिकलक्ष्यं प्राप्त्यर्थम् श्रीरामः सहायकः आसीत्, प्रजानां रक्षाकवचः स आसीत, शत्रूणां भेदकः, प्रजानां कृते यदि स्वप्राणाः त्यक्तव्याः भवन्ति तर्हि विना संकोचेन राज्ञाः रामेन तत् अवश्यमेव करणीयम् इतिरामः सर्वदा चिन्तनशीलः आसीत्। त्रिवर्ग-सिद्धिं प्राप्त्यर्थं राजा सहायकः भवेत। वर्णव्यावस्थायाः पालनं राज्ञः कर्त्तव्यं भवतिइतिरामं विश्वामित्रः उपदिशति। सम्पूर्णराज्यस्य भारः राज्ञः उपरि भवति, अतःप्रजानां रक्षा येन केन प्रकारेण राज्ञा अवश्यमेव करणीया। प्रजानां सुखार्थं राजा रामचन्द्रः स्वपत्नीम् अपि त्यजति। पितुः आदेशेन राजसिंहासनं त्यक्त्वा वनं गच्छति, केवलं प्रजानां रक्षा न अपि तु वने जीवानां प्राणान् अपि रक्षा कर्त्तुं सः निःस्वार्थेन प्रयत्नवान् भवति। आदर्शभूतस्य राज्ञः यत् कर्त्तव्यं भवतितत् सर्वं रामः परिपाल्य सः एकः सुशासकः इति न केवलं भारते अपि तु सम्पूर्णे विश्वे तत् प्रतिष्ठापयति।

अमात्यपरिषत् अथवा मन्त्रीपरिषत्—

1 वाल्मीकिय रामायणम्- वालकाण्डीय प्रथमः सर्गः

 ISSN: 2320-740X

राज्ये प्रजान् सुशृङ्खलया परिचालयितुं, समाजे वातावरणं समीचिनतया स्थापयितुं, स्वेच्छाचारितां सीमामध्ये आबद्धिकर्त्तुं, शत्रून् उपशमयितुं कश्चित् सुदक्षः राजा अपेक्षते। तं राजानं परिचालयितुं केचन उपदेष्टारः अपि अपेक्षन्ते। ये उपदेष्टारः सुमन्त्रणया राजानं प्रभावयिस्यन्ति। तेषां सुमन्त्रणा-प्रदातृणां एका समितिः राज्ञा क्रियते, या समितिः "मन्त्रीमण्डलः" रूपेण परिचितः। दशरथस्य मन्त्रीमण्डले धृष्टिः, जयन्तः, विजयः, सुराष्ट्रः, राष्ट्रवर्धनः, अकोपः, धर्मपालः, सुमन्त्रः चेतिअष्टौ मन्त्रीनः आसन्। रामायणं स्वाध्यायेन ज्ञायते मन्त्री विद्वान्, विनयशीलः, सलज्जः, कार्यकुशली, जितेन्द्रियः, श्रीसम्पन्नः, महात्मा, शस्त्रविद्यासु ज्ञानवान्, सुदृढः, पराक्रमी, यशस्वी, राजकार्ये अवधानी, तेजस्वी, क्षमावान्, कीर्तिमान्, स्मितपूर्वाभिभाषी भवेत्। वशिष्ठः, वामदेवः, सुयज्ञः, जाबालि, काश्यपः, गौतमः, मार्कण्डेयः, दीर्घायुः, कात्यायनः इतिएते मुनयः परामर्शदातारूपेण राजसभायां निरन्तरं आसन्। आयुषा, बुद्धिना, वेदशास्त्रपरम्परा-ज्ञानेन एते राज-सभायां सुविख्याताः आसन्। रामस्य राज्याभिषेकः कर्त्तुं एतेषां मन्त्रिनाम् अपि मतं राजा दशरथः स्वीकृतवान्। वने रामचन्द्रः सीतां उद्धार-कर्त्तुं सुग्रीवादिनाम् अपि परामर्शं स्वीकृतवान्। राम-रावणयोः युद्धे व्यूह-रचयितुं शत्रोः भ्राता-विभीषणस्य अपि विना संकोचेन परामर्शं रामचन्द्रः स्वीकृतवान्। वस्तूतःविभीषणः रामस्य शरणागतिं प्राप्तवान् रामस्य परामर्शदातृणाम् अनुमत्या एव। पुनश्च विभीषणस्य परामर्शमपि कदापि कदापि सुग्रीवःलक्षणः च पोषयतः। अनेन ज्ञायते राजा रामचन्द्रः मन्त्रिनां कृते यथोचितं सम्मानं दत्तवान्। किन्तु मारीचस्य सुपरामर्शं प्राप्य अपि रावणः सीतां अपहृतवान् येन रावणस्य दुर्गतिः अभवत्।

राजकीयविभागः—

रामायणे राष्ट्रस्य अष्टादश मुख्याधिकारीनाम् उल्लेखः अस्ति।–

१. मन्त्री (परिषदः प्रधानः)

२. पुरोहितः(मुख्यः ऋत्विजः)

३. युवराजः (राज्ञः उत्तराधिकारी)

४. चमूपतिः (मुख्यः सेनापतिः)

५. द्वारपालः (राजप्रासादस्य अधिकारी)

६. अन्तर्वेशिकः (अन्तःपुरस्य अधिकारी)

७. कारागाराधिकारी (कारागारस्य प्रमुखः)

८. द्रव्यसञ्चयकृत् (मुख्यः प्रबन्धकः)

९. अर्थविनियोजकः (वित्तविभागस्य अधिकारी)

१०. प्रदेष्टा (मुख्यः न्यायपतिः)

११. नगराध्यक्षः (नगर-प्रमुखः)

१२. कार्यनिर्माणकृत्(निर्माण-विभागस्य मुख्याधिकारी)

१३. धर्माध्यक्षः (न्याय-सभाध्यक्षः)

१४. सभाध्यक्षः (सभाप्रमुखः)

१५. दण्डपालः (दण्ड-व्यावस्थायाः मुख्याधिकारी)

१६. दुर्गपालः (दूर्गस्य अधिकारी)

१७. राष्ट्रान्तपालकः (सीमान्तप्रदेशस्य मुख्याधिकारी)

१८. अटवोपालकः (वनविभागस्य मुख्याधिकारी)

एते राष्ट्रस्य मुख्यासने विराजमानाः आसन्, राष्ट्रसञ्चालनार्थं राज्ञः कृते सहायकरूपेण भवन्ति।

न्याय-व्यावस्था—

रामायणस्य उत्तरकाण्डे न्यायव्यावस्था तथा न्यायालयस्य परिचयः मिलति। राजा प्रतिदिनं प्रातःकाले धर्मशास्त्रानुसारेण न्यायालयस्य बैटकं समाप्य अन्यस्मिन् कर्मणि विरतःभवति। प्राचीनपरम्परानुसारं न्यायालयस्य अध्यक्षरूपेण भवतिस्वयं राजा, यः धर्माध्यक्षः इतिनाम्ना सम्बोधितःभवति। निष्पक्षभावनया अपराधिनां कृते दण्डप्रणाली विधातव्या इतिन्यायसभायाः प्रमुखम् उद्देश्यम्। राजा हि प्रजानां केवलमात्रं अन्तिमः न्यायालयः अस्ति। राष्ट्रे स्थानीया ग्राम-सभा अपि प्रचालिता आसीत्। लघु लघु अपराधस्य कृते सा सभा अनुष्ठिता भवति। न्याय-याचकानां कृते शीघ्रमातिशीघ्रं अवश्यमेव न्यायः दातव्य भवतियेन राजानः तेषाम् अभिशापात् रक्षिताः भवन्ति। रामशासने अपि तथा नियमः आसीत्।-

रामेवानुपश्यन्तो नाभ्यहिंसन् परस्परम्।

रामशासनसमये नैकस्य तु कृते लोकान् विनाशयितुमर्हसि इतिनियमः प्रचलितः। युद्धकाण्डे रामः रावणं प्रतिकथयति—

भवान् चौर्यवत् मम स्त्रीयम् अपहृतवान् अतःभवान् दण्डनीयः, पुनः विभीषणस्य कृते आश्वासनं ददातिश्रीरामः— केवलं रावणः, रावणेन सह योगदानं कृतवन्तःयोद्धारः रावणस्य पापवशात् मम हस्तेन मरिष्यन्ति।

**सुरक्षा-सैन्य-युद्धव्यावस्था—**

अयोध्यानगर्याः सुरक्षा-प्रणाली सुचारु आसीत्। नगर्याः चतसृषु दिक्षु शत्रुणां कृते दुर्गमः दुर्जेयः भवति। अयोध्यायाः राष्ट्रान्तसीमाधिकारी राज्ञः विश्वासपात्रः आसीत्। रावणस्य लङ्कापुरी अपि तथा सुरक्षा-परिखा द्वारा आविष्टा आसीत्। सुरक्षार्थं भयङ्करः राक्षसः नियुक्तः आसीत्।

सैन्यानां अध्यक्षः सेनाध्यक्षः अथवा सेनापतिः आसीत्। सैन्यविभागस्य सञ्चालकः स्वयं राजा आसीत्। सेनाध्यक्षस्य अधीने वहु बलाध्यक्षः अथवा युद्धपतिः कार्यं कृतवान् इतिरामायणात् ज्ञायते। सेना-नियुक्तिकरणाय विश्वासनीयः पात्रः अपि अपेक्षितःआसीत्।

 ISSN: 2320-740X

रामायणं न केवलं हिन्दूनाम् अपि तु सम्पूर्णभारतीयानां विश्ववासीनां कृते एकमुपकारीदायकम् आदिकाव्यं भवति। संस्कारं रक्षतिरामायणम्। संस्कृतिं रक्षतिरामायणम्। अतःसाम्प्रतमपि येन भारतमिदं जीवति, येन भारतीया सभ्यता श्वसिति, येन च भारतीयाः संस्काराः प्राणवन्तःसन्ति, तद् रामायणमेव। अतःउक्तम्—

रामायणं महाकाव्यं सर्ववेदेषु सम्मतम्।
सर्व-पाप-प्रशमनं, दुष्टग्रह-निवारणम्॥
धर्मार्थकाममोक्षाणां, हेतुभूतं महाफलम्।
अपूर्वं-पुण्य-फलदं, शृणुध्वं सुसमाहिताः॥
रामायणं नाम परं तु काव्यं,
सुपुण्यदं वै शृणुत द्विजेन्द्राः।
यस्मिञ्छ्रुते जन्मजरादिनाशो,
भवत्यदोषः स नरोऽच्युतःस्यात्॥[1]

**सन्दर्भग्रन्थसूचि—**

१. प्राचीन भारतीय राज्यानुशासन, ज्योतिइन्टरप्राईजिज, दिल्ली, 2009

२. प्राचीन भारत की प्रशासनिक एवं राजनीतिक संस्थायें, श्रीसरस्वतीसदन,1998

३. उपकार, यू.जी.सी. नेट /जे. आर. एफ. /सेट, उपकार प्रकाशन, आगरा, 2019

४. रामायणम् (वालकाण्डम्) श्रीवलराम प्रकाशनी

******

1 उपकार, यू.जी.सी नेट /जे. आर. एफ./ सेट . पृ. 268(आर्षकाव्यम्)

# बृहद्वास्तुमालोक्ताः गृहारम्भमुहूर्तविचाराः

गिरीशभट्टः बि, दिनेश मोहन जोशी

**गिरीशभट्टः बि**

सिद्धान्तज्यौतिषशास्त्रे विद्यावारिधि(Ph.D)-शोधच्छात्रः

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**दिनेश मोहन जोशी**

मानविकी एवं समाजविज्ञानविभागः

भारतीयप्रौद्योगिकीसंस्थानम्, मुम्बई

**सारांशः –**

पञ्च अङ्गानि यस्मिन् तत् पञ्चाङ्गम् इतिबहुर्वीहिसमासः । तिथि-वार-योग-करण-नक्षत्राण्येव तानि पञ्चाङ्गानि । मुहूर्तनिर्णयार्थम् एतानि पञ्चाङ्गानि अत्यावश्यकानि भवन्ति । तिथि-वार-नक्षत्र-योग-करणानां मिथः संयोगेन जायमानैः योगैः शुभाशुभफलानि चिन्त्यन्ते । तादृशाः शुभाशुभयोगाः मुहूर्तग्रन्थेषु विस्तरेण निरूपिताः । मुहूर्तः नाम शुभकालविशेषः । शुभकर्माणि शुभसमये कृतानि चेदेव शुभफलदानि भवन्ति । अशुभसमये कृतानि चेत् अशुभदानि भवन्ति । सर्वेषां शुभकर्मणां कृते सर्वे मुहूर्ताः शुभदाः नैव भवन्ति । अतःकस्य कस्य शुभकर्मणः कृते कः कः मुहूर्तः शुभदः इतिपृथक् पृथक् निर्णेतव्यः भवति। मुहूर्तनिर्णयस्तु तिथिवारनक्षत्रयोगकरणाख्यानां पञ्चाङ्गानां परिशीलनं कृत्वा क्रियते । वेदविहितानि यज्ञादीनि, व्यावहारिकाण्यपि बहूनि कार्याणि कालाधीनानि भवन्ति । जन्मतःमृत्युपर्यन्तं क्रियमाणानां संस्काराणां व्रतोपवासादीनां च निर्णयः अयन-मास-पक्ष-तिथि-वार-नक्षत्र-योग-करण-राशि-लग्नादिवशात् नियतेनैव कालेन भवति। एतेषु कार्यविशेषसम्पादनार्थं कालनिर्धारणभूतेष्ववयवेषु तिथि-वार-नक्षत्र-योग-करणाख्यानि पञ्चाङ्गानि प्रमुखानि भवन्ति । तेषां पञ्चानाम् अङ्गानां समाहारः एव पञ्चाङ्गम् । मुहूर्तनिर्णयार्थम् एतानि पञ्चाङ्गानि अत्यावश्यकानि भवन्ति । सर्वेषामपि शुभकर्मणः आरम्भार्थं शुभमुहूर्तः अपेक्षितःभवति। गृहारम्भः अपि शुभकर्म एव । अतःगृहारम्भार्थमपि मुहूर्तः अपेक्षितःभवति। विविधवास्तुग्रन्थेषु मुहूर्तग्रन्थेषु च गृहारम्भमुहूर्ताः कथिताः सन्ति । अस्मिन् पत्रे बृहद्वास्तुमालोक्ताः प्रतिपाद्यन्ते ।

**गृहारम्भमुहूर्तः –**

**द्वारशुद्धिं निरीक्ष्यादौ भशुद्धिं वृषचक्रतः।**
**निष्पञ्चके स्थिरे लग्ने द्व्यङ्गे वालयमारभेत् ॥**
**त्यक्त्वा कुजार्कयोश्चांशं पृष्ठे चाग्रे स्थितं विधुम् ।**

 ISSN: 2320-740X

**बुधेज्यराशिगं चार्कं कुर्याद्गेहं शुभाप्तये ॥**[1]

गृहारम्भार्थं सर्वप्रथमं द्वारशुद्धिं विचारणीयम् । तदर्थमादौ वृषचक्रतःनक्षत्रशुद्धिःज्ञातव्यः । पञ्चकं (धनिष्ठा, शतभिषा, पूर्वाभाद्रपदा, उत्तराभाद्रपदा, रेवती - एतानि पञ्च नक्षत्राणि) त्यक्त्वा स्थिरलग्ने अथवा द्विस्वभावलग्ने गृहारम्भः करणीयः । कुजार्कयोः नवांशं त्यक्त्वा, अग्रतःतथा पृष्ठतःस्थितं विधुं च त्यक्त्वा, मिथुन-कन्या-धनु-र्मीनराशिषु स्थितम् अर्कञ्च त्यक्त्वा शुभमुहूर्ते गृहारम्भः करणीयः । (गेहारम्भलग्नं स्थिरलग्नं द्विस्वभावलग्नं वा भवति चेदपि कुजार्कयोः नवांशः लग्नस्फुटे न भवेत् । पुनश्च गृहारम्भलग्नतःअग्रतःपृष्ठतश्च चन्द्रः न भवेत् । मिथुन-कन्या-धनु-र्मीनराशिषु अर्कः न भवेत् इत्यभिप्रायः ।)

**गृहारम्भे कालशुद्धिः-**

**आरम्भं च समाप्तिं च प्रासादपुरसद्मनाम् ।**

**उत्थिते केशवे कुर्यान्न प्रसुप्ते कदाचन ॥**[2]

विष्णुः यदा उत्थितः(जाग्रदवस्थायां भवति) तदानीमेव प्रासादानां वासगृहाणां च आरम्भः समाप्तिः च करणीयः । विष्णोः निद्रासमये कदाचिदपि प्रासादसद्मनाम् आरम्भः समाप्तिश्च नैव करणीयः ।

**चैत्रादिमासेषु गृहारम्भस्य फलानि -**

**चैत्रे शोककरं गृहादिरचितं स्यान्माधवेऽर्थप्रदं**

**ज्येष्ठे मृत्युकरं शुचौ पशुहरं तद्वृद्धिदं श्रावणे ।**

**शून्यं भाद्रपदे त्विषे कलिकरं भृत्यक्षयं कार्त्तिके**

**धान्यं मार्गसहस्ययोर्दहनभीर्माघे श्रियं फाल्गुने ॥**[3]

यदि चैत्रमासे गृहारम्भः क्रियते तर्हि शोकाः सम्भवन्ति । वैशाखमासे गृहारम्भः क्रियते चेत् धनलाभः भवति। ज्येष्ठमासे गृहारम्भः क्रियते चेत् मृत्युः सम्भवति। आषाढमासे गृहारम्भः क्रियते चेत् पशूनां नाशः सम्भवति। श्रावणमासे गृहारम्भः क्रियते चेत् पशूनां वृद्धिःभवति। भाद्रपदमासे गृहारम्भः क्रियते चेत् शून्यता भवति। आश्वयुजमासे गृहारम्भः क्रियते चेत् कलहः सम्भवति। कार्तिकमासे गृहारम्भः क्रियते चेत् भृत्यानां क्षयः सम्भवति। मार्गशीर्षमासे पुष्यमासे वा गृहारम्भः क्रियते चेत् धान्यलाभः भवति। माघमासे गृहारम्भः क्रियते चेत् अग्निभयं भवति। फाल्गुनमासे गृहारम्भः क्रियते चेत् श्रीः प्राप्यते । एवमनेन प्रकारेण गृहारम्भार्थं वैशाखः, श्रावणः, मार्गशीर्षः, पुष्यः, फाल्गुनः – एते पञ्चमासाः शुभदाः, अन्यमासाः गर्हिताः (निन्दिताः) इत्यवगन्तव्यम् ।

---

1 बृहद्वास्तुमाला – 8, 9 श्लोकौ

2 बृहद्वास्तुमाला – गणनाविचारः – श्लोकः 48

3 बृहद्वास्तुमाला – गणनाविचारः – श्लोकः 49

<u>नारदमते गृहारम्भार्थं ग्राह्याग्राह्यमासाः –</u>

**गृहसंस्थापनं सूर्ये मेषस्थे शुभदं भवेत् ।**
**वृषस्थे धनशुद्धिःस्यान्मिथुने मरणं ध्रुवम् ॥**
**कर्कटे शुभदं प्रोक्तं सिंहे भृत्यविवर्धनम् ।**
**कन्यारोगं तुले सौख्यं वृश्चिके धनवर्धनम् ॥**
**कार्मुके तु महाहानिर्मकरे स्याद्धनागमः ।**
**कुम्भे तु रत्नलाभः स्यान्मीने सद्म भयावहम् ॥**[1]

नारदमुनेः मते मेषस्थे सूर्ये (वैशाखमासे) गृहारम्भः शुभः भवति। वृषभस्थे सूर्ये सति(ज्येष्ठमासे) गृहनिर्माणं क्रियते चेत् धान्यवृद्धिःभवति। मिथुनस्थे सूर्ये सति(आषाढमासे) गृहनिर्माणं क्रियते चेत् मृत्युः सम्भवति। कर्काटकस्थे सूर्ये सति(श्रावणमासे) गृहनिर्माणं क्रियते चेत् शुभं भवति। सिंहस्थे सूर्ये सति(भाद्रपदमासे) गृहनिर्माणं क्रियते चेत् भृत्यवृद्धिःभवति। कन्यास्थे सूर्ये सति(आश्वयुजमासे) गृहनिर्माणं क्रियते चेत् रोगः सम्भवति। तुलास्थे सूर्ये सतिगृहनिर्माणं क्रियते चेत् (कार्त्तकमासे) सुखं भवति। वृश्चिकस्थे सूर्ये सति(मार्गशीर्षमासे) गृहनिर्माणं क्रियते चेत् धनवृद्धिःभवति। धनूराशौ सूर्ये सति(पुष्यमासे) गृहनिर्माणारम्भः क्रियते चेत् महाहानिः सम्भवति। मकरस्थे सूर्ये सति(माघमासे) गृहनिर्माणम् आरभ्यते चेत् धनागमः भवति। कुम्भस्थे सूर्ये सति(फाल्गुनमासे) गृहनिर्माणम् आरभ्यते चेत् रत्नलाभः भवति। मीनस्थे सूर्ये सति(चैत्रमासे) गृहनिर्माणं क्रियते चेत् भयावहं (भयदायकं) भवति।

<u>जीर्णगृहस्य उद्धरणस्यारम्भे शुभाशुभमासाः –</u>

**जीर्णोद्धारे जलाग्न्यादिभयतःपतिते गृहे ।**
**श्रावणोर्जे तथा माघे कारयेत्सुखदं गृहम् ॥**
**देवालयं तडागाश्च वाटिकोद्धरणं गृहम् ।**
**गृहमासोदितं शस्तं माघेऽपि मुनिसत्तम ॥**
**तृणदारुगृहारम्भे मासदोषो न विद्यते ।**
**पाषाणेष्ट्यादिगेहानि निन्द्यमासे न कारयेत् ॥**
**शस्तं पशुगृहं ज्येष्ठे चाश्विने धान्यनीडकम् ।**
**पानीयशालिका माघे चैत्रे धारागृहं तथा ॥**[2]

जल-अग्नि-वाय्वादीनां वशात् पतितस्य गृहस्य जीर्णोद्धारः श्रावण-कार्त्तिक-माघमासेषु क्रियते चेत् गृहपतिः सुखं प्राप्नोति। श्रावण-कार्त्तिक-माघमासेषु अथवा केवलं माघमासे जीर्णानां देवालयानां तडागानां वाटिकानां गृहाणां च उद्धरणं शुभं भवति। तृणमयस्य दारुमयस्य च गृहस्यारम्भे मासदोषः न विद्यते । अर्थात् तृणमयं दारुमयं वा गृहं यस्मिन्

---

1 बृहद्वास्तुमाला – गणनाविचारः – 53 तः 55 श्लोकाः

2 बृहद्वास्तुमाला – गणनाविचारः – 61 तः 64 श्लोकाः

 ISSN: 2320-740X

कस्मिन्नपि मासे आरम्भं कर्तुं शक्यते । किन्तु पाषाण-इष्टिकादिभिः निर्मीयमाणानां गृहाणाम् आरम्भं निन्द्यमासेषु नैव कुर्यात् । ज्येष्ठमासे पशुगृहाणाम्, आश्वयुजमासे धान्यगृहाणां, माघमासे जलभाण्डारगृहाणां, चैत्रमासे धारागृहाणां (गङ्गातटवर्तिगृहाणाम् अर्थात् नदीतीरवर्तिगृहाणां) निर्माणं शुभदायकं भवति।

**हारम्भे पक्षशुद्धिः-**

**शुक्लपक्षे भवेत्सौख्यं कृष्णे तस्करतो भयम् ।**
**गृहनिर्माणकार्येषु पक्षशुद्धिं विचिन्तयेत् ॥**
**गीर्वाणपूर्वगीर्वाणमन्त्रिणोर्दृश्यमानयोः**
**शुक्लपक्षे दिवाकार्यं न निर्माणञ्च रात्रिषु ॥**[1]

शुक्लपक्षे गृहारम्भे कृते सतिसौख्यं भवति। कृष्णपक्षे गृहारम्भः कृतःचेत् तस्करभयं सम्भवति। शुक्लपक्षे यदा गुरुशुक्रयोः उदयः भवतितदा (अर्थात् गुरुशुक्रौ मूढौ न भवतःचेत्) दिवसे एव गृहारम्भः कार्यः । न तु निशि । एवं वसिष्ठमहर्षिणः मतम् ।

**गृहारम्भे निषिद्धतिथयः –**

**दारिद्र्यं प्रतिपत्कुर्याच्चतुर्थी धनहारिणी ।**
**अष्टम्युच्चाटिनी ज्ञेया नवमी शस्त्रघातिनी ॥**
**अमायां राजभीतिः स्याच्चतुर्दश्यां स्त्रियः क्षयः ।**
**एवं निषिद्धतिथयो गृहारम्भे प्रकीर्तिताः ॥**
**रिक्ताष्टमीदर्शरवीन्दुभौमा विवर्जनीया विदुषा प्रयत्नात् ॥**[2]

प्रतिपदि गृहारम्भः क्रियते चेत् दारिद्र्यं सम्भवति। द्वितीयायां तिथौ गृहारम्भः क्रियते चेत् धनहानिः सम्भवति। अष्टम्यां गृहारम्भः क्रियते चेत् उच्चाटनमेव भवति। नवम्यां गृहारम्भः क्रियते चेत् शस्त्रभयं सम्भवति। अमायां गृहारम्भः क्रियते चेत् राजभयं सम्भवति। चतुर्दश्यां गृहारम्भः क्रियते चेत् स्त्रीहानिः सम्भवति। भृगुमहर्षिणः मतेन रिक्तातिथयः, अष्टमी तिथिः, अमावास्या, रवि-चन्द्र-कुजवाराः च गृहारम्भविषये वर्जनीयाः भवन्ति ।

**गृहारम्भे नक्षत्रशुद्धिविचारः –**

**चित्रानुराधामृगरेवतीषु स्वातौ च तिष्ये च तथोत्तरासु ।**
**ब्राह्मे धनिष्ठाशततारकासु गेहादिकारम्भणमामनन्ति ॥**[3]

---

1 बृहद्वास्तुमाला – गणनाविचारः – 65, 66 श्लोकौ

2 बृहद्वास्तुमाला – गणनाविचारः – 67, 68, 69a श्लोकाः

3 बृहद्वास्तुमाला – गणनाविचारः –69b, 70a श्लोकौ

चित्रा, अनुराधा, मृगशिरः, रेवती, स्वाती, तिष्यः (पुष्यः), उत्तराफल्गुनी, उत्तराषाढा, उत्तराभाद्रपदा, ब्राह्मं (रोहिणी), धनिष्ठा, शतभिषा – एषु नक्षत्रेषु विद्वांसः गेहादिकानाम् आरम्भणकर्म प्रशस्तम् आमनन्ति ।

**पराशरमते गृहारम्भे नक्षत्रशुद्धिविचारः –**

**चित्राशतभिषक्स्वाती हस्तः पुष्यः पुनर्वसुः ।**
**रोहिणी रेवतीमूलवणोत्तरफल्गुनी ॥**
**धनिष्ठा चोत्तराषाढा भाद्रोत्तरान्विता ।**
**अश्विनीमृगशीर्षे द्वे अनुराधा तथैव च ॥**
**वास्तुपूजनमेतेषु नक्षत्रेषु करोतियः ।**
**समाप्नोतिनरो लक्ष्मीमितिप्राह पराशरः ॥**[1]

महर्षिपराशरस्य मते चित्रा, शतभिषा, स्वाती, हस्तः, पुष्यः, पुनर्वसुः, रोहिणी, रेवती, मूलं, श्रवणम्, उत्तराफल्गुनी, धनिष्ठा, उत्तराषाढा, उत्तराभाद्रपदा, अश्विनी, मृगशिरः, अनुराधा – एषु नक्षत्रेषु यः वास्तुपूजनं करोति(अर्थात् गृहारम्भं करोति) सः लक्ष्मीं (सम्पदं) समाप्नोतीतिपराशरमुनिः निगदति।

**गृहारम्भमुहूर्तविचारे मतान्तरम् –**

**हस्तादित्यशशाङ्कपुष्यपवनप्राज्येशमित्रोत्तराः**
**चित्राश्विश्रवणेषु वृश्चिकघटौ त्यक्त्वा विरक्ते तिथौ ।**
**शुक्राचार्यशनैश्चरज्ञशशिनो वारेऽनुकूले विधौ**
**सद्भिर्वेश्मनि सूतिकागृहविधिः क्षेमङ्करः कीर्तितः॥**[2]

हस्तः, पुनर्वसुः, मृगशिरः, पुष्यः, स्वाती, रोहिणी, अनुराधा, उत्तराफल्गुनी, उत्तराषाढा, उत्तराभाद्रपदा, चित्रा, अश्विनी, श्रवनम् – एषु नक्षत्रेषु तथा वृश्चिक-कुम्भलग्नयोः, रिक्तातिथीः विहाय अन्यासु तिथिषु, चन्द्र-बुध-गुरु-शुक्र-शनिवारेषु विधौ = चन्द्रे अनुकूले सतिगृहारम्भः तथा सूतिकागृहनिर्माणारम्भः क्रियते चेत् मङ्गलं भवति।

**वास्तुराजवल्लभे गृहारम्भमुहूर्तः –**

**वास्तोः कर्मणि धिष्ण्यवारतिथयोऽश्विन्युत्तराणां त्रिकं**
**हस्तादित्रयमैत्रतो द्वयमिदं पुष्यो मृगो रोहिणी ।**
**निन्द्यौ भूसुतभास्करौ च शुभदा पूर्णा च नन्दातिथिः**
**तेषां वैधृतिशूलगण्डपरिघव्याघातवज्रा अपि ॥**[3]

1 बृहद्वास्तुमाला – गणनाविचारः – 71 तः 73 श्लोकाः

2 बृहद्वास्तुमाला –गणनाविचारः – श्लोकः 74

3 बृहद्वास्तुमाला – गणनाविचारः – श्लोकः 75

 ISSN: 2320-740X

अश्विनी, उत्तराफल्गुनी, उत्तराषाढा, उत्तराभाद्रपदा, हस्तः, चित्रा, स्वाती, अनुराधा, ज्येष्ठा, पुष्यः, मृगशिरः, रोहिणी – एषु नक्षत्रेषु तथा मङ्गलवासरं रविवासरं च विहाय अन्यवारेषु, पूर्णातिथिषु, नन्दातिथिषु च गृहारम्भः शुभदायको भवति। वैधृतिः, शूलः, गण्डः, परिघः, व्याघातः, वज्रः – एते योगाः गृहारम्भार्थम् अशुभाः भवन्ति ।

**ग्रन्थान्तरे उक्तः गृहारम्भमुहूर्तः –**

**विष्कम्भव्यतिपातकौ च शुभदौ योगाः परे शोभनाः**
**शस्तं नागबवाख्यतैतिलगरं युग्मां तिथिं वर्जयेत् ।**
**मौहूर्त त्वथ विश्वमष्टनवमं पञ्चत्रिरागाद्रिकं**
**श्रेष्ठं च द्वितयं तुला वृषघटौ युग्मं धनुः कन्यके ॥**[1]

अन्यग्रन्थकारस्य मतानुसारं गृहारम्भार्थं विष्कम्भव्यतिपातयोगौ त्यक्त्वा इतरयोगाः शुभदाः भवन्ति। नागवान्, बवं, तैतिलं, गरम्- एतानि करणानि गेहारम्भार्थम् उत्तमानि भवन्ति । तथा समतिथयः अर्थात् द्वितीया, चतुर्थी, षष्ठी, अष्टमी, दशमी, द्वादशी, चतुर्दशी, अमावास्या गेहारम्भार्थं शुभानि नैव भवन्ति । विश्व(१३)-अष्टम(८)-नवम(९)-पञ्च(५)-त्रि(३)-राग(६)-अद्रिक(७)-द्वितय(२)मुहूर्ताः गेहारम्भार्थं शुभाः भवन्ति । तथा तुला-वृषभ-कुम्भ-मिथुन-धनु- कन्यलग्नानि गेहारम्भार्थं शुभानि भवन्ति ।

**गृहारम्भे लग्नशुद्धिः–**

**द्व्यङ्गे वा स्थिरभे च सौम्यरहिते लग्ने शुभैर्वीक्षिते**
**सौम्यैर्वीर्यसमन्वितैश्च दशमे निर्माणमाहुर्बुधाः ।**
**तैर्वा धीनवकेन्द्रगैः सुफलदं पापैस्त्रिषष्ठायगैः**
**क्रूरो ह्यष्टमसंस्थितोऽपि मरणं कर्तुर्विधत्तेतराम् ॥**[2]

शुभग्रहेण युक्तम् अथवा दृष्टं द्विस्वभावलग्नम् अथवा स्थिरलग्नं वास्तुकर्मसु शुभदं भवति। शुभग्रहः बलिष्ठस्सन् दशमभावे यदा भवतितदा वास्तुकर्म शोभनं भवति। अथवा पञ्चम-नवम-केन्द्रेषु शुभग्रहाः तथा त्रि-षष्ठ-एकादशभावेषु पापग्रहाः यदा भवन्ति तदा वास्तुकर्म शुभं भवति। यदि गृहारम्भवेलायाम् अष्टमभावे पापग्रहाः भवन्ति तर्हि गृहकर्तुः अर्थात् गृहस्वामिनः मरणं सम्भवति।

**वास्तुप्रदीपोक्तः गृहारम्भमुहूर्तः –**

**शनौ स्वाती सिंहलग्नं शुक्लपक्षश्च सप्तमी ।**
**शुभयोगः श्रावणश्च सकाराः सप्त कीर्तिताः ॥**
**सप्तानां योगतो वास्तुः पुत्रविपत्तिप्रदः सदा ।**
**गजश्च धनधान्यादिनित्यं तिष्ठन्ति सर्वतः॥**[1]

1 बृहद्वास्तुमाला – गणनाविचारः – श्लोकः 76

2 बृहद्वास्तुमाला – गणनाविचारः – श्लोकः 78

वास्तुप्रदीपग्रन्थानुसारं गेहारम्भार्थं सप्त सकारयोगाः भवन्ति – शनिवासरः, स्वातीनक्षत्रं, सिंहलग्नं, शुक्लपक्षः, सप्तमीतिथिः, शुभयोगः, श्रावणमासः चेति। एषु सप्तसु सकारयोगेषु सत्सु यः गृहनिर्माणारम्भं करोतितस्य गृहे सर्वदा गज-धन-धान्यादिकं स्थिरं तिष्ठन्ति । तथा पुत्रप्राप्तिरपि भवति, भूरि धनमपि तस्मै प्राप्यते ।

**वास्तुराजवल्लभे गृहस्य आयुष्यविचारः –**

**जीवःसौख्यमुपाकरोतिभृगुजो धान्यं श्रियं चन्द्रमाः**
**सूर्यो वेश्मपतिश्चतुष्टयमिदं नीचास्तगं दुर्बलम् ।**
**जीवे लग्नमुपागते शशिसुते जामित्रगेऽर्के रिपौ**
**शुक्रेऽब्धौ सहजे शनौ च शरदां गेहं शतं तिष्ठति॥**[2]

वास्तुराजवल्लभग्रन्थानुसारं बलवान् बृहस्पतिः गृहस्वामिनः कृते सौख्यम् आतनोति। बली शुक्रः धान्यम् आतनोति। बली चन्द्रः श्रियम् आतनोति। बली सूर्यः सौख्यादिफलचतुष्टयमपि ददाति। यदि उक्ताः चत्वारः ग्रहाः नीचस्थिताः अथवा अस्तङ्गताः अथवा दुर्बलाः चेत् पूर्णं फलं न प्राप्यते । लग्ने बृहस्पतिः, सप्तमे बुधः, षष्ठे सूर्यः, शुक्रः चतुर्थे, शनिः तृतीये च यदा भवतितदा गृहारम्भः क्रियते चेत् तद्गृहं शतायुर्भवति।

**मतान्तरेण गृहस्य आयुषः चिन्तनम् –**

**भृगुसुत इह लग्ने ह्यायगेऽर्के च खे ज्ञे**
**गृहमपि शतमब्दान् स्थायिकेन्द्रे सुरेज्ये ।**
**द्विगुणमपि च शुक्रे मूर्तिगे विक्रमेऽर्के**
**सुरगुरुसुतसंस्थे भूमिपुत्रे च षष्ठे ॥**[3]

यदि शुक्रः लग्ने, सूर्यः एकादशे, बुधः दशमे, बृहस्पतिः केन्द्रे च यदा भवतितदा गृहारम्भः क्रियते चेत् तद्गृहस्य शतवर्षमितम् आयुः भवति। शुक्रः लग्ने, सूर्यः तृतीये, बृहस्पतिः पञ्चमे, कुजः षष्ठे च यदा भवतितदा गृहारम्भः क्रियते चेत् तद्गृहस्य आयुः २०० वर्षमितःभवति।

| गृहारम्भमुहूर्तानां सङ्ग्रहः | |
|---|---|
| शुभमासाः | चान्द्रमासाः = वैशाखः, श्रावणः, कार्त्तिकः, मार्गशीर्षः, माघः, फाल्गुनः<br>सौरमासाः = मेषः, वृषभः, कर्काटकः, सिंहः, तुला, वृश्चिकः, मकरः, कुम्भः |
| शुभवाराः | सोमवासरः, बुधवासरः, बृहस्पतिवासरः, शुक्रवासरः, शनिवासरः |

1 बृहद्वास्तुमाला – गणनाविचारः – 80, 81 श्लोकौ

2 बृहद्वास्तुमाला – गणनाविचारः – श्लोकः 82

3 बृहद्वास्तुमाला – गणनाविचारः – श्लोक 83



**ISSN: 2320-740X**

| | |
|---|---|
| शुभतिथयः | द्वितीया, तृतीया, पञ्चमी, सप्तमी, दशमी, एकादशी, त्रयोदशी, पौर्णमी |
| शुभनक्षत्राणि | मृगशिरः, पुष्यः, अनुराधा, उत्तराफल्गुनी, उत्तराभाद्रपदा, उत्तराषाढा, धनिष्ठा, शतभिषा, चित्रा, हस्तः, स्वाती, रोहिणी, रेवती |
| वर्ज्ययोगाः | वैधृतिः, शूलः, गण्डः, परिघः, व्याघातः, वज्रः |
| शुभकरणानि | नागः, बवः, तैतिलः, गरः |
| शुभलग्नम् | वृषभः, मिथुनम्, सिंहः, कन्या, वृश्चिकः, धनुः, कुम्भः, मीनः |
| लग्नशुद्धिः | १,४,५,७, ९, १० – एषु स्थानेषु शुभग्रहाणां स्थितिः तथा ३,६,११ – एषु स्थानेषु पापग्रहाणां स्थितिः शुभदायको भवति। अष्टम-द्वादशस्थानयोः कोऽपि ग्रहः न भवेत् । |

**कोष्ठकः १ : गृहारम्भमुहूर्तानां सङ्ग्रहः**

**निष्कर्षः –** ब्रह्मचर्यं, गार्हस्थ्यं, वानप्रस्थं, संन्यासः – एतेषु चतुर्षु आश्रमेषु गृहस्थाश्रमः अत्यन्तं प्रधानं भवति। यतो हि अन्येषु त्रिषु आश्रमेषु स्थिताः जनाः गृहस्थाश्रममेव अवलम्ब्य जीवन्ति । यतो हि अन्येषाम् आश्रमवासिनां कृते गृहस्थाः एव धनधान्यादीनां व्यवस्थां कुर्वन्ति । एवं वास्तुग्रन्थेषु गृहस्थाश्रमस्य महत्त्वं वर्णितमस्ति । वास्तुरत्नाकरे भूपरिग्रहप्रकरणे स्वगृहविहीनेन गृहस्थेन कृतानि सर्वाण्यपि कर्माणि व्यर्थानि भवन्तीतिकथितम् । एवञ्च परगेहे स्थित्वा कृतानि सर्वाण्यपि श्रौतस्मार्तादिकर्माणि निष्फलानि भवन्तीतिनिगदितम् । अतःप्रत्येकमपि गृहस्थेन अनिवार्येण स्वकीयं गृहं निर्मातव्यं भवति। स्वगृहनिर्माणस्यारम्भस्तु शुभमुहूर्ते एव करणीयं भवति। यतो हि शुभमुहूर्ते गृहारम्भः कृतःचेदेव तद्गृहे निवसतां जनानां कृते क्षेमारोग्यसौख्यादयः प्राप्यते । अतःवास्तुग्रन्थेषु मुहूर्तग्रन्थेषु च प्रतिपादिताः गृहारम्भमुहूर्तविषयाः ज्ञातव्याः । योग्यदैवज्ञेन आदिष्टे शुभमुहूर्ते एव गेहारम्भः करणीयः भवति। अस्मिन् पत्रे बृहद्वास्तुमालोक्ताः गृहारम्भमुहूर्तविचाराः वर्णिताः । शोधपत्रमिदं छात्राणां कृते जिज्ञासूनां कते च नितान्तमुपयोगाय भविष्यतीत्युक्त्वा अस्य पत्रस्य कृते पूर्णविरामः दीयते ।

**सन्दर्भग्रन्थसूची –**


1. **मुहूर्तचिन्तामणिः ;** ग्रन्थकर्ता – रामदैवज्ञः, संस्करणवर्षम् – २०१५, प्रकाशनसंस्था – चौखम्बा सुरभारती प्रकाशनम्, वाराणसी
2. **महामहोपाध्यायपण्डितसुधाकरद्विवेदिविरचिता गणकतरङ्गिणी –** सम्पादकः – डा. भारतभूषणमिश्रः प्रथमसंस्करणम्; संस्करणवर्षम् – क्रि.श.२००२; प्रकाशनसंस्था – शिवसंस्कृतसंस्थानम् – वाराणसी
3. **भारतीयज्योतिषशास्त्रस्येतिहासः (A History of Indian Astrology) –** ग्रन्थकर्ता – आचार्यलोकमणिदाहालः; प्रकाशनसंस्था – चौखम्बा सुरभारती प्रकाशनम्, वाराणसी

4. **बृहज्जातकम्;** ग्रन्थकर्ता – वराहमिहिरः, व्याख्याकारः – केदारदत्त जोशी, संस्करणवर्षम् – २०१३, प्रकाशनसंस्था – मोतीलाल बनारसीदास, वाराणसी

5. **बृहत्संहिता – प्रथमो भागः ;** ग्रन्थकर्ता – वराहमिहिरः, व्याख्याकारः – पं.अच्युतानन्द झा, संस्करणवर्षम् – २०१४, प्रकाशनसंस्था – चौखम्बा विद्याभवनम्, वाराणसी

6. **बृहत्संहिता – द्वितीयो भागः ;** ग्रन्थकर्ता – वराहमिहिरः, व्याख्याकारः – पं.अच्युतानन्द झा, संस्करणवर्षम् – २०१४, प्रकाशनसंस्था – चौखम्बा विद्याभवनम्, वाराणसी

7. **मनुष्यालयचन्द्रिका;** ग्रन्थकर्ता – श्रीनीलकण्ठमूसतः, द्वितीयसंस्करणम्, संस्करणवर्षम् – २०१३, प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी

8. **शिल्पशास्त्रम्;** ग्रन्थकर्ता – ओड्रसूत्रधारबउरीमहाराणा, प्रथमसंस्करणम्, संस्करणवर्षम् – २००६, प्रकाशनसंस्था – चौखम्बा संस्कृत सीरीज आफिस्, वाराणसी

9. **वास्तुरत्नाकरः (अहिबलचक्रसहितः);** ग्रन्थकर्ता – श्रीविन्ध्येश्वरीप्रसादद्विवेदी, एकादशतमसंस्करणम्, संस्करणवर्षम् – २०१२, प्रकाशनसंस्था – चौखम्बा संस्कृत सीरीज आफिस्, वाराणसी

10. **वास्तु सर्वस्व; ग्रन्थकर्ता** – शैलेन्द्रशर्मा दैवज्ञः, संस्करणवर्षम् – २०१०, प्रकाशनसंस्था – रञ्जन पब्लिकेशन्स्, नवदेहली

11. **वास्तुमञ्जरी;** ग्रन्थकर्ता – सूत्रधारनाथेनः, द्वितीयसंस्करणम्, संस्करणवर्षम् – २०१४, प्रकाशनसंस्था – चौखम्बा संस्कृत सीरीज आफिस्, वाराणसी

12. **शिल्पदीपकः;** सम्पादकोऽनुवादश्च – डॉ ॥ कृष्ण जुगनू, प्रथमसंस्करणम्, संस्करणवर्षम् – २००५, प्रकाशनसंस्था – चौखम्बा संस्कृत सीरीज आफिस्, वाराणसी

13. **प्रमाणमञ्जरी;** ग्रन्थकर्ता – श्रीमन्नकुलसूनुसूत्रधारमल्लः, प्रथमसंस्करणम्, संस्करणवर्षम् – २००८, प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी

14. **वास्तुकल्पलता;** ग्रन्थकर्ता – प्रो ॥ हरिहरत्रिवेदी, प्रथमसंस्करणम्, संस्करणवर्षम् – २००७, प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी

15. **बृहद्वास्तुमाला;** सम्पादकौ – डॉ ॥ ब्रह्मानन्दत्रिपाठी & डॉ ॥ रविशर्मा च, संस्करणम् – २०१६, प्रकाशनसंस्था – चौखम्बा सुरभारती प्रकाशनम्, वाराणसी

16. **प्रासादमण्डनम्;** ग्रन्थकर्ता – सूत्रकारमण्डनः, संस्करणवर्षम् – १९४७, प्रकाशनसंस्था – श्रीदुर्गाप्रेस्, श्रीनगरम्

17. **मयमतम्;** ग्रन्थकर्ता – मयमुनिः, प्रकाशनवर्षम् – १९१९, महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन राजकीयमुद्रणालययन्त्रालये तदध्यक्षेण मुद्रयित्वा प्रकाशितम् ।

18. **समराङ्गणसूत्रधारः;** प्रकाशनवर्षम् – १९६५, प्रकाशनसंस्था – भारतभारतिप्रेस्, नवदेहली

 **ISSN: 2320-740X**

# उपासकस्य उत्क्रान्तिः

**भोजराजः. टि**

शोधच्छात्रः, वेदविज्ञानशोधसंस्थानम्

अद्वैतसिद्धान्तवाङ्मये बहवो विचाराः प्रसिद्धाः। तेषु अन्यतमः उपासकस्य मरणानन्तरं तस्य गतिः कीदृशी भवतिइतिविचारः। स च अस्मिन् शोधपत्रे प्रस्थानत्रयभाष्यम् आश्रित्य तत्रापि विशेषेण ब्रह्मसूत्रम् अनुसृत्य प्रस्तूयते। उपनिषत्सु तावत् केषुचित् स्थानेषु उपासनाः प्रदर्श्यन्ते। तासु उपासनासु काश्चन आरोप्यप्रधानाः सन्त्यः सम्पद् शब्देन अभिधीयन्ते। अनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति' इत्याद्याः। अन्याश्च काश्चित् उपासनाः आलम्बनप्राधान्येन अध्यास इतिवा प्रतीकोपासनाः इतिवा नाम्ना विख्याताः। यथा 'मनो ब्रह्मेत्युपासीत'[1], 'आदित्यो ब्रह्मेत्यादेशः'[2], इत्याद्याः प्रतीकोपासनाः सन्ति तथा। अन्याश्च उपासनाः सन्ति विशिष्टगुणयोगनिमित्ताः यथा 'वायुर्वाव संवर्गः', 'प्राणो वाव संवर्गः' इत्याद्याः। अर्थात् यासु उपासनासु आलम्बनस्य विशेषं धर्मम् आश्रित्य उपासना क्रियते ताः।

एतासु अन्यतमा काचित् उपासना हार्दोपासना अथवा हार्दविद्या इतिनाम्ना प्रथिता छान्दोग्योपनिषदि। **'अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म'**[3] इतिउपक्रम्य इयं विद्या विहिता वर्तते। तदनन्तरं तस्यामेव सरणौ **'अथ या एता हृदयस्य नाड्यः'**[4] इत्युपक्रम्य सप्रपञ्चं नाडीरश्मिसम्बन्धः निरूपितो वर्तते। तत्र च 'अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते' तथा 'तयोर्ध्वमायन्नमृतत्वमेति' इत्यपि श्रूयते। तस्माच्च एतासां सर्वासां श्रुतीनाम् अवलोकनात् अवगम्यते यत् यः इमां हार्दविद्याम् उपासते उपासकः सः अस्याः फलत्वेन शताधिकया नाड्या निष्क्रामन् रश्म्यनुसारी निष्क्रामतीतिअवगम्यते। अत्र कश्चित् प्रश्नः उदेतियत्, अस्याः उपासनायाः उपसकः यः वर्तते सः अहनि अर्थात् दिवाकाले म्रियमाणः एव तदानीं केवलं रश्म्यनुसारेण मार्गेण यातिइतःप्रैतिइतिनिरूपणीयम् आहोस्वित् दिवाकाले रात्रौ च अविशेषेण एव उपासकः रश्म्यनुसारेण यातिइतिवा ? इतिसंशयः। यतःअस्याः उपासनायाः प्रकरणे तावत् कोऽपि कालविशेषः न श्रूयते यदैव विद्वान् उत्क्रामतीति। अतःअयं संशयः जागर्ति। किञ्च रात्रौ रश्मीनाम् अनुपलम्भात् संशयः सञ्जातः।

वेदान्तिनां सिद्धान्तप्रतिज्ञा तावत् रात्रावहनि चाविशेषेण रश्म्यनुसारी सन्नादित्यमण्डलं प्राप्नोतिइत्येव। तत्र हेतुं प्रदर्शयन्ति वेदे रश्म्यनुसरणे अविशेषः एव श्रूयते इतिकृत्वा उपासकस्य प्रयाणम् अविशेषेणैव रश्म्यनुसारी एवेतिनिर्दिशन्ति आचार्याः। स्वकर्मफलं भुक्त्वा उपासकः नाडीद्वारा प्रयाणम् आरभते। नाडीनां च किरणैः अर्थात् रश्मिभिः सह निरूपितःपूर्वप्रकरणादिषु। एवं च उपासकः (जीवात्मा) नाडी-रश्मिमार्गादेव आदित्यादिमण्डलं

1 छा. उ – ३.१८.१

2 छा. उ – ३.१८.१

3 छा. उ – ८.१.१

4 छा. उ – ८.६.१

प्राप्नोतिइतिज्ञातव्यम्।

**रश्म्यनुसारित्वे अहोरात्रनियमानियमविचारः।**

**आक्षेपः-**

अत्र आक्षेपो भवति। **ननु** मृतःउपासकः नाडीः द्वारीकृत्य किरणानेव प्राप्नुयात् ततःतद्द्वारा प्रयाणम् अनुवर्तयेत् इतियदि स्थितिः तर्हि सा व्यवस्था अहनि अर्थात् दिवाकाले एव सम्भवति। कुतःइतिचेदुच्यते, दिवाकाले केवलं भास्करस्य सत्त्वात्। सूर्यस्तावत् दिने केवलं भवतीत्यतःतस्य मरीचयः अपि दिवाकाले केवलं भवन्ति ततश्च उपासकः यदि दिवाकाले म्रियते तर्हि केवलं तस्य नाड्यः किरणैः सह सम्बन्धं प्राप्तुमर्हन्ति। रात्रौ तु सूर्यसम्बन्धः शरीरेण अथवा जीवेन न भवतिइत्यतःरात्रौ नाडीकिरणसम्पर्कः उपपादयितुं न शक्यते। तथा च उपासकः रात्रौ मरणं प्राप्नोतिचेत् तदानीं रश्मिसम्बन्धं प्राप्तुम् अशक्यः सन् प्रातःकालपर्यन्तं प्रतीक्षां कुर्यात्। यतःसः उपासकः स्व-उपासनाफलत्वेन नाडीरश्मिद्वारेण एव प्रयाणं कुर्यादितिकृत्वा प्रातःकालपर्यन्तम् अर्थात् सूर्यस्य उदयपर्यन्तं प्रतीक्षां कुर्यादेव। तदनन्तरमेव रश्म्यनुसारेण प्रयातुं शक्नोति। अतःनाडीरश्मिसम्बन्धः अस्ति चेत् रात्रावहनि च समानरूपेण उपासकः रश्म्यनुसारी सन्नादित्यमण्डलं प्राप्नोतिइतिगदितुं शक्यते स्म रात्रौ तु नाडीरश्मिसम्बन्धविच्छेदात्[1] तदानीं प्रेतस्य रश्म्यनुसारित्वं नास्ति।

**सिद्धान्तः-**

अस्य आक्षेपस्य परिहारः क्रियते – रात्रावपि रश्म्यनुसारित्वम् उपासकस्य अस्त्येव, नाडीरश्मिसम्बन्धस्य यावद्देहभावित्वात् इति। तथाहि यस्मात् शिराकिरणसम्पर्कः यावद्देहभावी भवतितस्मादेव रात्रिकाले अपि उपासकस्य रश्म्यनुसारित्वं युज्यते। तन्निरूप्यते – यावत्पर्यन्तं देहो भवतितावत्पर्यन्तमपि नाडीनाम् आदित्यकिरणैः सह सम्पर्कः सम्भवत्येव। तत्र श्रुतिः प्रमाणत्वेन प्रदर्श्यते – 'अमुष्मादादित्यात्प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः'[2] इति। शिरा नाम नाड्यः प्रतायन्ते विस्तृता भवन्ति, ताः सृप्ताः, अर्थात् आदित्येन समं सम्बद्धाः इत्यर्थः। तदेव विस्तरेण निरूप्यते – अमुष्मादादित्यात्प्रतायन्ते रश्मयस्त आसु नाडीषु सृप्ता भवन्ति य आभ्यो नाडीभ्यः प्रतायन्ते विस्तार्यन्ते ते रश्मयोऽमुष्मिन्नादित्ये सृप्ताः इति।[3] अत्र उदाहरणत्वेन लौकिकः व्यवहारः प्रदर्श्यते – निदाघसमये ग्रीष्म-ऋत्वादिषु कालेषु रात्रावपि किरणानुवृत्तिःउपलभ्यते। तदानीं रात्रावपि प्रतापादिकं किरणकार्यं दृश्यते। अन्यस्मिन् तु काले सूर्यकिरणस्य स्तोकस्य अनुवृत्तिःलक्षयितुं कष्टकरी यथा ऋत्वन्तररजनीषु, शैशिरेषु दुर्दिनेषु यथा दिवाकालेऽपि किरणग्रहणं दुर्लभं तथा। 'अहरेवैतद्रात्रौ दधाति' इतिच एतदेव दर्शयति।

1 ब्र. सू – ४.२.१९ ॥ निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च॥

2 छा. उ – ८.६.२

3 आदिग्रहणेन चन्द्रापः सङ्गृह्यन्ते। चन्द्रमसा खल्वम्मयेन सम्बध्यमानानां सूरीणां भासां चन्द्रिकात्वम्। तस्मादप्यस्ति निशि सौर्यरश्मिप्रचार इति।


ISSN: 2320-740X

किञ्च यदि विदुषः उपासकस्य गतिः दिवाकाले केवलं भवेत् इतियदि श्रुत्या प्रतिपिपादयिषितं तर्हि तया दिवाकाले केवलम् अस्य उपासकस्य गमनं निरूपणीयम्, आगमे एव नियमः प्रतिपादितो भवतिस्म। परन्तु तादृशः कोऽपि नियमो न दृश्यते। गमनमेव केवलम् अवलोकयितुं शक्यते।

किञ्च यदि विद्वानपि[1] रात्रौ मृतःइत्यतःतदानीं किरणाः न दृश्यन्ते इतिमात्रेण निमित्तेन एव तस्य रश्म्यनुसारित्वं निराक्रियते तर्हि समग्रायाः विद्यायाः एव वैयर्थ्यं स्यात्। उपासकः रात्रिप्रायणापराधमात्रेण नोर्ध्वमाक्रमेत, पाक्षिकफला विद्येतिस्यात्। यतःदिवाकालपक्षे केवलं विद्या फलं प्रददातिरात्रिकाले तु म्रियमाणस्य नेदं फलं सिद्ध्यतिइतिपाक्षिकफलत्वप्रसङ्गः। अत्र च दिवाकाले वा विद्यायाः प्रयोजनमस्तीतिकृत्वा भवतु नाम विद्यायाः पाक्षिकफलत्वम् इत्यपि वक्तुं न शक्यते।

तथा सतिकस्यापि साधकस्य विद्यायां प्रवृत्तिरेव न स्यात्। कुत इतिचेत् मृत्युकालानियमात्। तथाहि केनापि जीवेन स्वस्य मृतिः कदा जायते इतिज्ञातुं न शक्यते। तथा च उपासनां कृत्वापि यदि रात्रौ मृतिः जायते तर्हि रश्म्यनुसारेण गमनं न स्यात् इतिचिन्तयेयुः। अथवा रात्रौ मरणं प्राप्यापि प्रातःकालपर्यन्तं प्रतीक्षा कर्तव्या इतिस्थितिः। तेन रूपेण प्रतीक्षां कृत्वापि कदाचित् केनचित् कारणेन रश्मिसम्बन्धः लभ्यते इतिन स्यात्। कदाचित् मृतं शरीरं तद्बान्धवाः पावकेन दहन्ति चेत् तदापि शरीरे विद्यमानानां नाडीनां रश्मिसम्बन्धः नोऽपलभ्येत अतःतदानीमपि उपासनं व्यर्थं भवेदितिसन्दिग्धे। अतःएवं चिन्तनं कुर्वन्तःउपासकाः न प्रवर्येयुः इत्यतःव्यवस्था सम्यक् उपपादनीया। तस्मात् सर्वदापि उपासकस्य मरणोत्तरं साक्षादेव रश्म्यनुसारेण एव गमनमुपपद्यते इतिनिरूपणीयम्।

किञ्च यदि रात्रौ मृतस्य रश्मियोगं विनैवोर्ध्वगतिः स्यात्तदा रश्मिश्रुतेर्दिवामृतविषयतया सङ्कोचः स्यादूर्ध्वगत्यभावे च विद्यायामप्रवृत्तिःस्यात् इतिअन्येनापि प्रकारेण पूर्वपक्षखण्डनम्। अत्र च प्रतीक्षयोर्ध्वगतिरितिन वाच्यं, यतःरश्म्युदयात् प्रागेव देहदाहः अभ्युपगम्यते तर्हि आदित्यप्रतीक्षावैयर्थ्यापातात् 'स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छति'[2] इतिअप्रतीक्षाश्रुत्या सह विरोधो स्यात् यतःएषाः श्रुतिः विदुषः अनुदीक्षामेव दर्शयति। तस्मात् यदा कदाचित् मृतस्यापि उपासकस्य रश्मिप्राप्त्या झटितिब्रह्मलोकप्राप्तिः अविशेषेणैव इदं रात्रिंदिवं रश्म्यनुसारित्वम् इत्येव निष्कर्षः।

अत्र च आधुनिकसंशोधनसाहाय्येनापि अयमंशः स्पष्टो भवतियत् शरीरस्य नाडीनां सूर्यकिरणानां च सम्बन्धः सर्वदा भवतिइति। "Benefits of Sunlight: A Bright Spot for Human Health"[3]...।

एवं दक्षिणायने मृतो विद्वान्विद्याफलमाप्नोतिन वेतिविद्याया नित्यवत्फलश्रुतेरुत्तरायणप्राशस्त्यशास्त्राच्च सन्देहे सतिइमं च निर्णयम् आलक्ष्य अपरः एकः विचारः एतत्सम्बद्धः एव आचार्यबादरायणेन प्रत्यपादि **'अतश्चायनेऽपि**

1 उपासक एव विद्वान् इति अत्र अवगन्त्यः।

2 छा. उ – ८.६.५

3 https://www.ncbi.nlm.nih.gov/pmc/articles/PMC2290997/

**दक्षिणे'**[1] इत्यस्मिन् सूत्रे। यतःपूर्वोक्ताः सिद्धान्ताः श्रुतिबोधिताः अंशाः रश्म्यनुसारित्वस्य अनियमाभावे न उपपद्यन्ते अतःदक्षिणायनेऽपि म्रियमाणस्य उपासकस्य समानमेव फलं भवतिउत्तरायणे मृतेन उपासकेन समम् इतिआशयः।

तथाहि – उदीक्षानुपपत्तेः, विद्यायाः अपाक्षिकफलत्वाच्च, मृत्योः अनियतकालत्वाच्च, दक्षिणायनेऽपि म्रियमाणो विद्वान् विद्याफलं प्राप्नोत्येव इतिभाष्यकाराः।

अत्र च कदाचित् पूर्वपक्षः स्यात् लोके तावत् मरणकाले कालस्य विषये आदरः यदा प्रकट्यते तदा उत्तरायणे मरणं प्राप्यते चेत् तदा उत्तमा गतिः भवतीतिलोकानाम् उत्तरायणमरणप्राशस्त्यप्रसिद्धिःवर्तते। किञ्च महाभारतस्य प्रसिद्धः महापुरुषः भीष्मः अपि स्वस्य शरीरस्य महद्घातानन्तरमपि मरणावाप्त्यर्थम् उत्तरायणकालस्य आरम्भार्थं प्रतीक्षां कृतवान् अतःएतद्द्वयदर्शनात् विदुषः दक्षिणायनोत्तरायणमरणयोः भेदः अवश्यं वक्तव्यः। 'आपूर्यमाणपक्षाद्यान्षडुदङ्ङेतिमासाꣳस्तान्'[2] इतिच श्रुत्या उत्तममरणार्थम् अपेक्षितव्यमुत्तरायणम् इत्येवं पूर्वपक्षे प्राप्ते तत्र उत्तरम् अनेन सूत्रेण दत्तं भवति।

एषा आशङ्का अपनोदनीया। यतःमरणमादत्य उत्तरायणस्य यावती अपि प्राशस्त्यप्रसिद्धिःश्रूयते इयं केवलम् अविद्वद्विषया वर्तते। यः अविद्वान् उपासनाद्यकर्ता, सामान्यः अथवा कर्मी सः यदि उत्तरायणे मरणं प्राप्नोतितर्हि केवलं तेन दक्षिणायनापेक्षया उत्तमा गतिः लभ्यते इतियोजना करणीया। अन्यच्च महाभारते भीष्मः उत्तरायणपर्यन्तं स्वस्य मरणस्य प्रतिपालनं करोतिइतियदुक्तं तत्तु केवलम् आचारपरिपालनार्थम् एव इतिज्ञातव्यमस्ति। किञ्च सः भीष्मः स्वस्य पितःसकाशात् वरमेकं यत् प्राप्तवाण् इच्छामरणित्वम् इतितस्य पितृप्रसादलब्धस्वच्छन्दमृत्योः ख्यापनार्थं च प्रतीक्षां चकार। अन्यत्तु यदाक्षिप्तं श्रुतिरपि उत्तरायणप्रतीक्षां बोधयतिइतितत्र तु श्रुतेः अर्थस्य समन्वयः ब्रह्मसूत्रे 'आतिवाहिकास्तल्लिङ्गात्'[3] इत्यस्मिन् अधिकरणे क्रियते।

अयमाशयः अज्ञानामुत्तरायणे दैवान्मरणं चेत्प्रशस्तमित्यभिज्ञाभिवचनरूपाचारपरिपालनार्थं भीष्मस्य प्रतीक्षा विदुषः तावत् उभयत्राप्यविशेषो विद्यासामर्थ्यादिति। भीष्मस्तु स्वयं विद्वानेव खलु इतिचेत् तत्र उच्यते – विदुषोऽपि च भीष्मस्योत्तरायणप्रतीक्षणमविदुष आचारं ग्राहयति"यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरो जनः"[4] इतिन्यायात्। श्रुत्या च षण्मासानितियदुक्तं तत्तु उत्तरायणदेवतापरेतिवक्ष्यते। तथा च देवतायाः सदा सत्त्वाद्विद्यया दक्षिणायनकालेऽपि तत्प्राप्तिरविरुद्धेतिभावः।

अत्र पुनरपि आक्षेपःक्रियते 'यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः। प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ'[5] इतिश्रीमद्भगवद्गीतायां कालप्राधान्येन उपक्रमं कृत्वा अहरादिः यः कालविशेषः तदानीं यस्य विदुषः मरणं सम्भवतितस्यैव

1 ब्र. सू – ४.२.२१

2 छा. उ – ४। १५। ५

3 ब्र. सू – ४। ३। ४

4 भ. गी – ३.२१

5 भ. गी – ८.२३

 ISSN: 2320-740X

संसारे अनावृत्तिःनियमितः। अर्थात् उत्तरायणे दिवाकाले अग्निसम्बद्धः सन् मृतःचेदेव योगी पुनः संसारमिमं न प्रविशतिइतिनियमनं विशेषं सूचयित्वा इदानीं कथं रात्रौ दक्षिणायने वा प्रयातःविद्वान् अनावृत्तिं यायात्? इति। अत्रोच्यते —

इयं च भगवद्गीता वेदान्तशास्त्रे स्मृतिप्रस्थानम् इतिकथ्यते। अत्र च यः श्लोकः प्रदर्शितःआक्षेपसन्दर्भे तत्र उत्तरायणादिः कालविशेषः यः प्रदर्शितःसः योगिनः प्रतिअहरादिकालविनियोगः तस्य अनावृत्तये स्मर्यते केवलम्। किञ्च एते योगसाङ्ख्ये तत्र प्रदर्शिते स्मार्ते भवतः, न श्रौते। तस्मात् श्रुतिस्मृत्योः परस्परम् अन्यः एव विषयो भवतीत्यतःविषयभेदात् प्रमाणविशेषाच्च अस्य स्मार्तस्य कालविनियोगस्य श्रौतेषु विज्ञानेषु अवतरणं न करणीयम्।

ननु स्मृतिर्नाम वेदोक्तस्यैव विषयस्यैव स्मरणात्मिका अत एव च ब्रह्मसूत्रादिषु अनुमान् इतिशब्दस्य प्रयोगोऽपि दृश्यते। तथा च **'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।'** (भ. गी. ८। २४) **'धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्'** (भ. गी. ८। २५) इतिच यावेव श्रौतौ देवयानपितृयाणौ कथितौ वेदे, तावेव प्रत्यभिज्ञायेते स्मृतावपि अतःकथमपि विषयभेदो नास्ति खलु इतिआक्षेपः।

अत्र उच्यते — 'प्रयाता यान्ति तं कालं वक्ष्यामि'[1] इतिरूपेण स्मृतौ तावत् कालप्रतिज्ञानात् विरोधमाशङ्क्य अयं परिहारः उक्तः। यदा पुनः स्मृतावपि अग्निः इत्यादिभिः शब्दैः देवता एव आतिवाहिक्यो गृह्यन्ते, तथा सतिन कश्चिद्विरोध वर्तते इत्यतःतत्र आक्षेप एव नास्ति। तदेव सूत्रकारः द्रढयति–

**योगिनः प्रतिच स्मर्यते स्मार्ते चैते॥** इति।

भगवदाराधनबुद्ध्यानुष्ठितं कर्म योगः[2], धारणापूर्वकोऽकर्तृत्वानुभवःसाङ्ख्यम् , 'इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इतिधारयन्' इतिस्मृतेः। कालाग्रहिणं प्रतिभिन्नार्थत्वमुक्तम्। यदि तु श्रौतार्थप्रत्यभिज्ञया कालशब्दो देवतापरस्तर्ह्यैकार्थ्यमेवेतिसमाधानार्थः। तस्मात् विद्यासामर्थ्यात् सर्वदापि अहनि वा रात्रौ वा, उत्तरायणे वा दक्षिणायने वा दिष्ठङ्गतस्य उपासकस्य फलप्राप्तिः भवत्येव इतिसिद्धम्।

अत्र च एवं निर्धारणानन्तरं जिज्ञासा स्यात् – आसृत्युपक्रमात् उपासकस्य उत्क्रान्तिः समाना इत्युक्तम्, सृतिस्तु बह्वीषु श्रुतिषु अनेकधा श्रूयते। नाडीरश्मिसम्बन्धेन एका गतिः श्रूयते यथा — 'अथैतैरेव रश्मिभिरूर्ध्वमाक्रमते'[3] इति। अपरा श्रूयते अर्चिरादिका – 'तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहः'[4] इति। इतोऽप्येका 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति' इति। 'यदा वै पुरुषोऽस्माल्लोकात्प्रैतिस इत्यपरा, 'सूर्यद्वारेण ते विरजाः प्रयान्ति'[5] इतिच

---

1 भ. गी – ८.२३

2 'अनाश्रितः कर्मफलं कार्यं कर्म करोति यः। स संन्यासी च योगी च' इति स्मृत्या अयमंशः ज्ञायते।

3 छा. उ – ८। ६। ५

4 बृ. उ – ६। २। १५

5 मु. उ – १। २। ११

अपरा।

तत्र संशयः जागर्ति — किम् एता सृतयः अर्थात् गतयः परस्परं भिन्नाः अथवा एकैव गतिः किन्तु अनेकविशेषणयुक्ता इति। अतःसोऽपि अंशः निरूप्यते। इयं गतिः या वर्तते सा अर्चिरादिका एका एव परन्तु अनेकविशेषणा भवति। कुतःइतिचेत् प्रथितो ह्येष मार्गः सर्वेषां विदुषाम् अतः।

तथा हि पञ्चाग्निविद्याप्रकरणे — 'ये चामी अरण्ये श्रद्धा१ँ सत्यमुपासते' इतिविद्यान्तरस्य अनुष्ठायिनामपि अर्चिरादिका एव सृतिः श्रूयते वेदे। किञ्च यदि एताः सृतयः अत्यन्तभिन्ना एव स्युः तर्हि भिन्नाः भिन्नाः सृतयः इत्येव स्यात् किन्तु एकैव एषा सृतिः अनेकविशेषणा ब्रह्मलोकप्रपदनी क्वचित् केनचित् विशेषणेनोपलक्षिता इत्यवगम्यते।

'तेऽर्चिषमेवाभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षड्डुदङ्ङेतिमासा१ँस्तान्' 'मासेभ्यः संवत्सरं संवत्सरादादित्यम्'[1] इत्यनया श्रुत्या अर्चिषः द्वारमपि ज्ञायते। तत्रैव अन्यान्यपि श्रुतिवाक्यानि प्रमाणत्वेन प्रदर्श्यन्ते।

**'यदा वै पुरुषोऽस्माल्लोकात्प्रैतिस वायुमागच्छतितस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति' (बृ. उ. ५ । १० । १)**

**'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छतिस वायुलोकं स वरुणलोकम्' (कौ. उ. १ । ३)**

इत्थं सर्वाः श्रुतीः अवलोक्य क्रमः अवगम्यते। आदौ अर्चिः – अहः – आपूर्यमाणः पक्षः (षण्मासाः) – संवत्सरः – वायुलोकः – आदित्यलोकः – चन्द्रलोकः – विद्युल्लोकः (वरुणलोकः) – इन्द्रलोकः – प्रजापतिलोकः – ब्रह्मलोकः इतिविदुषः उपासकस्य उत्क्रान्तिक्रमः भवति। अयं च दिवाकालं प्रतिअथवा उत्तरायणं प्रतिप्रतीक्षां कुर्यादितिनास्ति इतिविशेषः स च प्रतिपादितः।

**ग्रन्थाधमर्ण्यम् –**


- ब्रह्मसूत्रशाङ्करभाष्यम् । मोतीलाल बनारसीदास प्रकाशनम् । २०१० ।
- उपनिषद्भाष्यम् । श्रीदक्षिणामूर्ति मठ प्रकाशम् । २०११ ।
- "Benefits of Sunlight: A Bright Spot for Human Health"


******

1 छा. उ – ५ । १० । २

 ISSN: 2320-740X

# औणादिकसूत्रविमर्शः - उणादिसूत्रप्रयोगदीपिकावृत्तेः परिप्रेक्ष्ये

**कारिया राजेशकुमार वासुदेव**

शोधच्छात्रः

भाषासाहित्यभवनम्, गुजरात विश्वविद्यालयः, अहमदावाद

**प्रास्ताविकम् -**

मानवीयजीवनस्य सर्वार्थसाधकाः प्रबोधकाश्च सन्ति खलु चत्वारो वेदाः इमे ऋग्यजुस्सामाथर्वाख्याः । धर्मार्थकाममोक्षाख्यस्य पुरुषार्थचतुष्टयस्य प्रबोधकाश्चापि त इमे एव । साम्प्रतिके काले च एतेषां वेदानां साक्षात्स्वयमेव अध्ययनमवगमनं च महते क्लेशाय एव । वस्तुतःप्राचीनकाले त्वेतेषां वेदानामध्ययनाय अवगमनाय च महती गुरुपरम्परा ऋषिपरम्परा चाऽऽसीत् । परं सम्प्रतितु साऽपि लुप्तप्राया एव । क्वचित्क्वचित् अंशरूपेण वैदिकैः महता यत्नेन निश्प्रचं रक्ष्यमाणा अस्तीयं परम्परा, परं सा अङ्गुलीगण्या एवेतिनाऽत्र संशितिः काचित् ।

एतेषां लोकोपकारकाणां सर्वाभिष्टसाधकानां वेदानामवबोधाय वेदाङ्गानि महदुपकुर्वन्ति । इमानि च वेदाङ्गानि षट्सङ्ख्याकानि सन्तीतिपाणिनीयशिक्षाकृद् वदति-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ उच्यते ।**
**ज्योतिषामायनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।[1] इति।।**

एतानि वेदाङ्गानि वेदानामर्थावबोधनार्थं महदुपकुर्वन्ति । एतेषु सर्वेषु व्याकरणं मुखमुच्यते, प्रधानमुच्यते । व्याकरणमहाभाष्यकारः पतञ्जलिमहर्षिः पस्पशाह्निके[2] ब्रूते – **प्रधाने च कृतो यत्नः फलवान् भवति।** इति। यद्यपि सर्वाण्यपि वेदङ्गानि वेदार्थावगमायोपकारकाणि, परं तत्र व्याकरणं मुखवदुपकारकं भवति। अतःतत् मुख्यमित्यप्युच्यते । अत्र च व्याकरणं त्रिमुनिव्याकरणं सुविख्यातम् । तत्रापि पाणिनीया अष्टाध्यायी तु विश्वप्रसिद्धा एव । परमेतदतिरिच्य उणादिसूत्राणि अप्येतस्य व्याकरणस्य परिशिष्टभूतानि सन्ति ।

महर्षिपाणिनिना अष्टाध्याय्यां सूत्रमेकं प्रोक्तमस्ति – **उणादयो बहुलम्**[3] इति। अत्र एव उणादिसूत्राणामाधारशिला निहिता अस्ति । सूत्रस्यास्य विस्तृतव्याख्यानभूतानि विलसन्ति । किमर्थमेते उणादयः उच्यन्ते,

---

1 पाणिनीयशिक्षा वेदाङ्गपरिचयः ।

2 पस्पशाह्निकम् – पातञ्जलमहाभाष्यम् ।

3 उणादयो बहुलम् ।। पा. अष्टा. 3/3/1 ।।

इतिचेत् - उण्-प्रत्ययः आदिर्येषां त इमे उणादयः प्रत्ययाः ।[1] एतैः उणादिसूत्रैः कृदन्तशब्दानां व्युत्पत्तिःक्रियते । एतेषां साधुत्वं च साध्यते । सार्धसप्तशतं (750)सङ्ख्याकैः सूत्रैरसङ्ख्याः शब्दाः व्युत्पाद्यन्ते व्युत्पादयितुं च शक्यन्ते ।

एतावान् सामर्थ्यवान् वर्त्ततेऽयं पञ्चपादी पाणिनीयः उणादिकोषः, इमानि पाणिनीयानि उणादिसूत्राणि । तद्यथा प्रोक्तं महर्षिपतञ्जलिना महाभाष्ये – **लघ्वर्थमध्येयं व्याकरणम् न चान्तरेण लघुनोपायेन शब्दाः शक्याः विज्ञातुम्** [2] इति। । इत्थमियमुणादिवृत्तिःलघुनोपायेन कृदन्तशब्दसिद्ध्यर्थमुपकारिणी वर्त्तते ।

**<u>का नाम इयम् उणादिसूत्रप्रयोगदीपिका वृत्तिः? ( परिचयः प्रयोजनं च संक्षेपेण ) -</u>**

जातो हि आर्षव्याकरणाध्ययनाऽअध्यापनपरम्परायाम् आचार्यः सत्यानन्दवेदवागीशवर्यो नाम सुधीः मेधावी च वैयाकरणः । आचार्येणानेन अष्टाध्यायीस्थसूत्रेषु उदाहरणत्वेन समागतानाम्प्रयोगाणां प्रदर्शनाय अष्टाध्यायीसूत्रप्रयोगदीपिका नाम ग्रन्थः अलेखि । तथैव अत्र उणादिसूत्रेषु उदाहरणत्वेन प्रोक्तानां कृदन्तशब्दानां प्रयोगप्रदर्शनाय प्रबोधनाय च आचार्येण सत्यानन्द-वेदवागीशवर्येण उणादिसूत्रप्रयोगदीपिका नाम वृत्तिःव्यरचि प्राकाशि च । तत्र वेदादिभ्यः आर्षग्रन्थेभ्यः अन्विष्य विचित्य च उदाहरणानि प्रदर्शितानि । अनुपलब्धेषु च तत्र-तत्र ग्रन्थेषु उपयुक्तेषु उदाहरणेषु स्वयमाचार्येण पद्यात्मकानि उदाहरणानि प्रस्तुतानि ।

उणादिसूत्रप्रयोगदीपिकाकृद् आचार्यः सत्यानन्दवेदवागीशवर्यः पुरोवाचि लिखतियत् - **व्याकरणाष्टाध्यायीपाठनकाले सूत्रादीनामुदाहरणानि वेदादिग्रन्थेभ्यो देयानीति**वैयाकरणानां परमहंसपरिव्राजकाचार्याणां दण्डिविरजानन्दस्वामिनामादेशमनुपालयद्भिरस्माभिः पूर्वम् - अष्टाध्यायीप्रयोगदीपिकावृत्तिः(पृ. 700) इत्यभिधो ग्रन्थः प्राकाश्यत इति।[3] तदनुसन्दर्भे एव तृतीयः ग्रन्थोऽयम् आचार्येण प्राकाश्यतामानीतः।

**<u>उणादिसूत्रप्रयोगदीपिकाग्रन्थवैशिष्ट्यानि -</u>**

समस्तेऽस्मिन् ग्रन्थे आहत्य 9258 शब्दानां प्रयोगाः प्रादीयन्त आचार्यैर्वैयाकरणैश्च । ( तत्रच उणादिसूत्रविभागे 2264 शब्दानाम्प्रयोगाः, लिङ्गानुशासनसूत्रविभागे 1119 शब्दानाम् , गणपाठविभागे च 5875 शब्दानाम्प्रयोगाः प्रादर्श्यन्त इह । इत्थमाहत्य 9258 शब्दानाम्प्रयोगाः प्रास्तूयन्त इह उणादिसूत्रप्रयोगदीपिकायामिति। एतेषु 9258 सङ्ख्याकेषु प्रयोगेषु 2708 उद्धरणानि वेदेभ्यः समगृह्यन्त ।

इह ग्रन्थे वेदमन्त्रेषु स्वरनिर्देशोऽपि छात्राणां जिज्ञासूनां च सुगमतायै सुखबोधाय च प्रादर्शि । तद्यथा - उदात्ताः अचः स्थूलाक्षरेण, स्वरिताश्च वक्राक्षरेण प्रदर्शिताः सन्तीति। अपि च **वेदोद्धराणानाम्प्रयोगरूपेण प्रदानस्य मुख्यं**

---

1 अष्टाध्यायीभाष्यम् – प्रथमावृत्तिः 3/3/1 सूत्रव्याख्या- (पं. ब्रह्मदत्त जिज्ञासु जी कृतम्)

2 व्याकरणप्रयोजनानि - पस्पशाह्निकम् – पातञ्जलमहाभाष्यम् ।

3 उणादिसूत्रप्रयोगदीपिका – पुरोवाक् (आ. सत्यानन्दवेदवागीशः) ।

 ISSN: 2320-740X

**प्रयोजनं तु व्याकरणाध्यनेन सहैव छात्राणामध्यापकानामन्येषां च जिज्ञासूनां वेदान्प्रतिप्रवर्द्धेताभिरुचिरित्येव वर्त्तते ।**[1] इति। अपि च नाम्नैवैतस्य ग्रन्थस्य अभिलक्ष्यते यदत्र प्रयोगेषु विशिष्टं बलं प्रादायि इत्युक्ते प्रयोगप्रधानोऽयं वृत्तिग्रन्थ आचार्यैर्व्यरचीति।

अपिच यत्र-तत्र सूत्रस्थप्रयोगाणां वेदादिभ्यः आर्षग्रन्थेभ्यः सद्ग्रन्थेभ्यो वा उद्धरणानि नालभ्यन्त, तत्र-तत्र आचार्यैः स्वयम्पद्यात्मकानि उदाहरणानि विनिर्माय छात्राणां सत्प्रेरणायै प्रस्तुतानि यद्वयं छात्राः अध्येतारश्चापि इत्थम्प्रयोगानवगम्य प्रयोक्तुमर्हाम इति। तेनैव सह प्रयोजनमिमं लिखतिआचार्यः – उदाहरणानाम्पद्यात्मकप्रयोगरूपेण यदि पठनं मननं स्मरणं च क्रियते तर्हि तेषां लयानुसारी संस्कारः स्मृतौ साहाय्यकारी जायते[2] इति। अपिच सूत्रेषु प्रदत्तान्येतानि न केवलमौपचारिकाणि उदाहरणमात्राणि एव, अपितु अत्र नित्यं दैनन्दिनः व्यवहारः, शिष्टाचारः, नीतिबोधः, आयुर्विज्ञानम्, शिल्पकला, इतिहासः, खगोलम् भूगोलम् इत्यादयः बहुविधाः विषयाः उपविषयाः च प्रासङ्गिकतया तत्र-तत्र वर्णिताः प्रस्तुताः प्रबोधिताः च सन्ति आचार्येणेतिविशेषताः एतस्याः उणादिसूत्रप्रयोगदीपिका नाम वृत्तेः । इत्थं बहुविधैः वैशिष्ट्यैः अलङ्कृतोऽयं वृत्तिग्रन्थः चकास्ति वैयाकरणजगतिव्याकरणजिज्ञासूनां विद्यापिपासूनां च जिज्ञासा-पिपासयोः सुखं प्रशमनाय सन्तृप्त्यै च ।

**औणादिकसूत्रविमर्शः ( क्वुन् शिल्पिसञ्ज्ञयोरपूर्वस्यापि ) -**

सम्प्रतिवयम्पश्यामः परिशीलयामः च यत्कथमुणादिसूत्रेषु निहितानां कृदन्तशब्दानाञ्च व्युत्पत्तिमाध्यमेन प्रयोगप्रदर्शनव्याजेन च उणादिसूत्रप्रयोगदीपिका नाम वृत्तौ कथम्प्रकारेण के च विषयाः प्रतिपादिताः सन्ति आचार्येण ।

जगद्धिताय वृत्तिकर्मसु प्रवृत्तान्सर्वानपि समादरणीयान्सुधियः वृत्तिकारान् सश्रद्धं प्रणम्य शोधपत्रेऽस्मिन्नहं सत्यानन्दवेदवागीशाचार्याणामन्येषां वृत्तिकाराणां च उणादिसूत्रवृत्तिं प्रस्तूय सतीषूपलब्धास्वनेकासु वृत्तिष्वपि एतस्याः वृत्तेः प्रासङ्गिकतामुपयोगितां विवर्णयितुं प्रयते ।

एतदर्थमहमुणादिसूत्रेभ्यः सूत्रमेकं स्वीकृत्य विविधाभिः वृत्तिभिः समीक्षात्मकं तस्य विमर्शं प्रस्तौमि – **क्वुन् शिल्पिसञ्ज्ञयोरपूर्वस्यापि**[3] ।। इति।।

**वेदाङ्गप्रकाशः इतिशृङ्खलायां स्वामिदयानन्देन प्रकाशितःउणादिकोषः -**

नैके स्वनामधन्याः वैयाकरणाः विद्वांसः व्याकरणपरम्पराम्परिपालयन्तःस्वीयवृत्तिभिरलङ्कृत्य उणादिसूत्राणि व्याख्याय नवजिज्ञासुभ्यः महदुपकृतवन्तः। तेषामाचार्याणां वृत्तिमत्र शोधपत्रेऽस्मिन्प्रस्तौमि । तत्रादौ स्वामिदयानन्दसरस्वतिनां वृत्तिं प्रस्तौमि । स्वामिदयानन्दः सूत्रमिदमित्थं व्याचष्टे -

---

1 तत्रैव - उणादिसूत्रप्रयोगदीपिका – पुरोवाक् (आ. सत्यानन्दवेदवागीशः) ।

2 तत्रैव - उणादिसूत्रप्रयोगदीपिका – पुरोवाक् (आ. सत्यानन्दवेदवागीशः) ।

3 उणादिसूत्राणि – 2/33 ।। / उणादिसूत्रप्रयोगदीपिका – 2/33 ।।

**३३. शिल्पिनि संज्ञायां च गम्यमानायां सोपपदाद् अनुपपदाद्वा सामान्याद्धातोः क्वुन् (प्रत्ययः) भवति [शिल्पिनि] ॥ रजकः । इक्षुकुट्टकः । तक्षकः । ध्रुवकः । अभ्रकम् । चरकः । चषकः । ' भञ्जकः । शालभञ्जिका । पुष्पप्रचायिका । शुनकः । भषकः ॥**

इत्थं सूत्रान्ते सूत्रेणानेन ये शब्दाः सिद्ध्यन्ति साध्यन्ते वा ते निर्दिष्टाः सन्ति । ततःउत्तरं प्रतिशब्दं निर्वचनमधः प्रदत्तमस्ति स्वामिवर्येण । तत्र प्रसङ्गतःइक्षुकुट्टकः इतिशब्दस्य निर्वचनं लिखता महर्षिणा प्रतिपादितम् – इक्षून् कुट्टयतीतिइक्षुकुट्टकः , गौडिकस्येयं संज्ञा इत्यादि ।

**पं. युधिष्ठिरमीमांसकवर्यैः सम्पादितःस्वामिदयानन्दस्य उणादिकोषः -**

पं. युधिष्ठिरमीमांसकवर्यः स्वामिदयानन्दस्य उणादिकोषस्य सम्पादनमकरोत् । तत्र प्रायः व्याख्यायां बहु भेदं नाऽकरोत् , परमुपलब्धानि पाठान्तराणि प्रस्तूय सम्पादनकार्यमकुर्वताऽसौ सुधीः मान्यवरः । अत्र मान्यकार्यम्परित्यज्य विपश्चिदः एतस्य विशिष्टं प्रयत्नमेव अत्र प्रकाशयामि – तद्यथा इक्षुकुट्टकः इतिशब्दस्य पादटिप्पण्यां महोदयः लिखति– अत्र पाठो भ्रष्टः । अत्र – गौडिकः (गुडनिर्माता शिल्पी) वा । संज्ञायाम् – तक्षति.... इत्येवं शुद्धेन पाठेन भाव्यम् । इति। इत्थमन्याः अपि अपेक्षिताः टिप्पण्यः व्यधायि पण्डितप्रवरयुधिष्ठिरमीमांसकवर्येण । ताश्च यथावस्यकमग्रे द्रक्ष्यामः ।

**आचार्य-सत्यव्रत-शास्त्रिविरचिता हिन्दीसंस्कृतवृत्तिः-**

एतस्यामुणादिसूत्रवृत्तिकार-व्याख्यातृ-शृङ्खलायामेकम् इतोऽपि नाम वर्त्तते । तच्चास्ति – आचार्यः सत्यव्रतःशास्त्रीति। इदं सूत्रं व्याख्यातुकामः शास्त्रिवर्यः लिखति- **(अर्थः-) क्वुन् वर्त्तते उदकञ्चेतिपर्यन्तम् । शिल्पिनि वाच्ये संज्ञायां चोपपदपूर्वकमनुपपद पूर्वकञ्च धातुमात्रात्-क्वुन्प्रत्ययो भवति। उदाहरणम् - रजकः = पटपावकः । इक्षुकुट्टकः** = गौड़िकः। तक्षकः = गर्भमोचकः । वर्धकिः, शिल्पी, सूत्रधारः, पातालीयनागविशेषः । ध्रुवकः गीतारम्भपदम्, स्कन्धः स्थूणाभूतः। अभ्रकम् = खनिद्रव्यविशेषः । चरकः = वैद्यकशास्त्रावबोधकः । चषकः = पानपात्रम्, शालम् । भञ्जकः = मीनविशेषः, प्राकारः । त्रोटकः, पेषणकः । शालभञ्जिका = क्रीडा । काष्ठपुत्रिका = क्रीडा | पुष्पप्रचायिका = क्रीडा । शुनकः = कुक्कुरः । ऋषि विशेषः । भषकः = श्वा ।[1] इत्थम् अत्र शास्त्रिवर्यः उदाहरणोत्तरं प्रतिपदमर्थमपि अत्रैव प्रदत्ते । यद्यपि बहूनां शब्दानामर्थाः तत्र-तत्र निर्वचनेन सह दयानन्दस्वामिना प्रदत्ताः सन्ति । परं शास्त्रिवर्यः तत्रोपलब्धानर्थानत्र प्रादर्शयत् । अपि चाऽन्यानप्रदर्शितान् विशिष्टान् वाऽर्थानपि प्रास्तौत् । उदाहरणैः सह बहुत्र अर्थप्रस्तुतिः एतस्याः वृत्तेः एकमन्यतमं वैशिष्ट्यम् । अपि च अत्रैव विशिष्टा एका पादटिप्पणी अपि रजकशब्दार्थं प्रदत्ता । तद्यथा - *१– रजकः = रञ्जु + क्वुन् अत्र युवोरनाकौ इत्यनेन 'वु' इत्येतस्य ' अक' सर्वत्र सम्पद्यते । इति।।

एतदनन्तरमत्रापि स्वामिदयानन्दवृत्तिरपि प्रदत्ता इतितु पूर्ववदत्रापि समानमेवेतिन कश्चन विशेषः । हिन्दीभाषायामर्थप्रस्तुतिः निश्चयेन एतस्याः वृत्तेः वैशिष्ट्यमितितु तथ्यम् ।

1 श्रीमन्मुनिपाणिनि-प्रणीतः उणादिकोषः - 2/33 , (वृत्तिकारः – आ. सत्यव्रत शास्त्री)

 ISSN: 2320-740X

**डॉ. सोमलेखाविरचिता पीयुषाख्या संस्कृतहिन्दीवृत्तिः-**

अस्यामुणादिसूत्रवृत्तिकार-व्याख्यातृ-परम्परायाम् अन्यदपि नाम एकं चकास्ति – पीयुषाख्य-वृत्तिकारा डॉ. सोमलेखा इति। पीयुषाख्या वृत्तिःसंस्कृतहिन्दीतिद्वयोः भाषयोः विहिता अनया महाभागया । वृत्तावस्यामनया महाभागया छात्राणां सौविध्यं मनसि निधाय सूत्रस्थपदानाम्पदच्छेद-विभक्ती अपि प्रदर्शिते स्तः । इयमेतस्याः वृत्तेः विशिष्टताऽस्ति । तदनन्तरमियम् महाभागा प्रथमं संस्कृतेन सूत्रार्थमित्थं प्रस्तौति- सं० – शिल्पिनि वाच्ये सञ्ज्ञायाञ्च गम्यमाने उपपदपूर्वकादुपपदरहिताच्च धातोरुभयथा क्वुन् प्रत्ययः स्यात् ।[1] इत उत्तरमनया महोदयया हिन्दीभाषया अपि सूत्रार्थवृत्तिःप्रदर्शिता । इयं च छात्राणां सुखबोधायोपकारिणी स्यादितिविश्वासः । एतदनन्तरम् सोमलेखावर्या अपि स्वामिदयानन्दवृत्तिं प्रस्तौति। तदन्ते च शब्दसिद्धिप्रक्रियामपि यथावश्यकं सङ्केतेन निर्दिशति।

उणादिसुत्रवृत्तिकाराणामावलिः महती वर्त्तते । अनवच्छिन्नामिमां परम्परां पोषयन् वेदाचार्यः डॉ. रघुवीरः वेदालङ्कारवर्यः आर्यकुमारटीकोपेतं प्रतिसंस्कृतं च उणादिकोषम् सम्पादयामास । डॉ. वेदाचार्यवर्यः अष्टाध्यायी-व्याख्यानार्थं प्रोक्तां व्याख्यानशैलीम् अनुसरन् इत्युक्ते – पदच्छेद-विभक्ती, अनुवृत्ति-समासौ अर्थःउदाहरणानि सिद्धिश्चेतिक्रमम् अनुसरन् अर्यकुमाराख्यां वृत्तिं प्रावर्त्तयत । वत्तेः अस्याः वैशिष्ट्यं नाम सूत्रकार्यम् अत्र विशेषेण प्रत्यपादि आचार्येण इति। तद्यथा – रजकः इतिशब्दे सूत्रकार्यं प्रतिपादयन् आचार्यः लिखतियत् - रजकः- 'रञ्जे रागे'धातोः प्रकृतसूत्रेण क्वुन् प्रत्यये अनुनासिकलोपे व स्थाने अकादेशे च 'रज् + अक' स्वाद्युत्पत्तौ रुत्वे विसर्गे च 'रजक : ' इतिसिद्धम् ।[2] इत्यादिः । इदं च सूत्रकार्यम् एतस्य वैशिष्ट्यम् । इतोऽपि अन्यान् वृत्तिकारान् इव अयमपि महानुभावःस्वामिदयानन्दवृत्तिम् अपि सादरं यथायथं प्रस्तौतिस्वीयवृत्तौ । इतोऽपि वैशिष्ट्यं नाम अनेन महानुभावेन सूत्रस्थपदानां प्रतिपदं प्रयोगान् आश्रित्य वैदिक-प्रयोगदीपिका लौकिक-प्रयोगदीपिका चेतिअंशद्वयम् आश्रित्य वृत्तिरियं व्यरचि । अमरकोषादिभ्यः लौकिकग्रन्थेभ्यः उदाहरणानि उद्धृत्य बालानां सुखबोधाय प्रस्तुतानि इतिवैशिष्ट्योपेतःग्रन्थोऽयं महान् उपकारकः इति। तथापि सत्सु अपि एतेषु ग्रन्थेषु अन्यतमं वृत्तिग्रन्थं रचयामास अन्यतमः व्याकरणपरम्परानुगामी आर्षपद्धत्यनुरागी विदुषां वशंवदः विपश्चिद्वर्यः । स च कोऽयम् इतिप्रस्तौमि अत्र शोधपत्रेऽस्मिन् अहम् ।

यथा - अनन्तपारं किल शब्दशास्त्रम्[3] तथैव अनन्तपारा वैयाकरणपरम्परा । अत्र च उणादिसूत्रवृत्तिषु यद्यपि अष्टाध्यायीवत् तावत् कार्यं न जातम्, पुनरपि एतस्मिन् अपि क्षेत्रे नैके विद्वांसः स्वीयं योगदानम् अदुः । अत्रैव कृतभूरिश्रमेषु विपश्चिद्वर्येषु स्वनामधन्यः आचार्यः सत्यानन्दवेदवागीशवर्यः उणादिसूत्रेषु समागतानां प्रयोगाणां प्रबोधनाय उणादिसूत्रप्रयोगदीपिका नाम वृत्तिम् व्यरचयत् । कथं कीदृशीं वृत्तिम् अयं महोदयः अकरोद् इतिकिञ्चिद् इह शोधलेखे प्रस्तोतुं प्रवर्तेऽहम् । सूत्रार्थःतु अनेन सुरीश्वरेणापि तथैव व्यलेखि यथा दयानन्दस्वामिपादैःलिखितः। अत्र न कश्चन

1 सोमलेखा विरचित-पीयूष संस्कृतहिन्दीव्याख्याद्वयोपेतः उणादिकोषः – (2/33) ।

2 पृ. 182, आर्यकुमारटीकोपेतः उणादिकोषः ।

3 इति शास्त्रोक्तिः खलु ।

विशेषो नापि काचिद् विप्रतिपत्तिःइति। तद्यथा – **सूत्रार्थः- सोपपदात् निरुपपदाद्वा धातुमात्रात् क्वुन् प्रत्ययो भवतिशिल्पिनि अभिधेये सञ्ज्ञायां वा गम्यमानायाम् । रजकः । इक्षुकुट्टकः । तक्षकः । धुवकः । अभ्रकम् । चरकः । चषकम्। भञ्जकः। शालभञ्जिका क्रीडा । काष्ठपुत्रिका क्रीडा । पुष्पप्रचायिका क्रीडा । शुनकः । भषकः।**[1] इति। इत्थम् अयं महाभागः सूत्रार्थंप्रक्रियां विलिख्य अग्रे स्वीयां विशिष्टां प्रयोगदीपिकावृत्तिं प्रवर्त्तयति। तस्य अपि समीक्षां कुर्मः ।

दयानन्दस्वामिनः स्वीयां वृत्तौ सूत्रार्थोत्तरं उणादिसूत्राणां विशिष्टां प्रक्रियां निरुक्तिं प्रवर्त्तयन्ति । निरुक्त्या च शब्दस्य प्रकृतिप्रत्ययबोधे शब्दार्थावगमे च अत्यन्तं सौकर्यं जायते अध्येतृणाम् प्रयोक्तृणां च । दयानन्दस्वामिनः निरुक्तिं लिखन्ति , यथा - रजतीतिरजकः वस्त्रशोधको वा ।[2] इति। इमामेव निरुक्तिम् एकतन्त्रेण उपर्युक्ताः अन्येऽपि समेऽपि विद्वांसः न केवलम् अङ्गीकुर्वन्ति एव, अपितु स्वीयां वृत्तौ स्वामिनां कृतज्ञतापूर्वकं नाम स्मारं स्मारं प्रस्तुन्वन्ति अपि । अत्र पं. युधिष्ठइराचार्यः अत्र पादटिप्पणीपूर्वकं विशेषमेकं प्रस्तौति, तद्यथा - रजकरजनरजस्सूपसंख्यानम् ( अ० ६।४।२४ ) इतिवार्तिकेणानुनासिकलोपः।[3] इतितु शब्दसिद्धेः बोधे सौकर्याय इति। आचार्यसत्यव्रतशास्त्रिणा डॉ. सोमलेखावर्यया च हिन्दीसंस्तृतभाषयोः अपि स्वीया वृत्तिःकृता इतिअनयोः विशेषः । परं निरुक्तिनिर्वचने तु साक्षात् स्वामिनां निरुक्तयः एव उद्धृताः इतिन कश्चन विशेषः । आचार्यसत्यव्रतशास्त्रिणा उदाहरणप्रदानकाले एव तेषां संस्कृतपर्यायाः स्वीयेन महता प्रयत्नेन अन्विष्य स्वबोधेन वा प्रदत्ताः इतिमे मतिः । हिन्दीभाषया तु केवलं सूत्रार्थं प्रास्तौत् इति। तथैव डॉ. सोमलेखावर्या उदाहरणावसरे स्वीयेन महता यत्नेन हिन्दीभाषया अर्थान् प्रस्तुतवती इतिएतस्याः विशेषः, संस्कृते तु असौ प्रकृतम् अनुसृतवती । अफि च सूत्रार्थम् अपि आर्यभाषया हिन्दीभाषया प्रदत्तवती । आर्यकुमारटीकाकृद् वेदाचार्यः डॉ. रघुवीरः वेदालंकारवर्यः अपि महता यत्नेन आर्यकुमारटीकां व्यरचयत् । वैदिक-लौकिकोभयविधान् प्रयोगान् प्रदर्शयितुं प्रायतत इति। कांश्चन वैदिकान् प्रयोगान् प्रादर्शयत् । अपि च तेषु अनुपलब्धेषु अमरकोषात् अभिधानचिन्तामणिकोषात् अन्येभ्यो ग्रन्थेभ्यः स्फपटकान् वा प्रयोगान् प्रस्तोतुं महत् प्रयत्तवान् असौ मान्यवरः । प्रयत्नश्चासौ यथाशक्ति साफल्यमगात् इतिवक्तुं प्रभवामि अहम् अत्र ।

**<u>स्वयं निर्मितपद्येन लौकिकप्रयोगदीपिका (रजकः / तक्षकः / चरकः इतिशब्दाः) -</u>**

आचार्यः सत्यानन्दवेदवागीशवर्यः तु **रजतीतिरजकः**[4] इतिप्रदर्श्य स्वल्पां प्रक्रियां सङ्केतितवान् -[ रञ्ज रागे + क्वुन् ] इति। ततश्च शब्दस्यास्य प्रयोगप्रदर्शनाय - **वासांसि फलके श्लक्ष्णे निर्णिज्याद्रजकः शनैः ।(मनु.)**[5] कञ्चन पद्यात्मकं प्रयोगं प्रास्तौत् इति। एवम् अन्येष्वपि उदाहरणेषु एवमेव प्राथमिकतया वैदिकान् प्रयोगान् प्रदर्शयितुं प्रायतत,

1 उणादिसूत्रप्रयोगदीपिकावृत्तिः (2/33) । (पृ. 52)

2 द्र. - उणादिकोषः (वेदाङ्गप्रकाशः) (2/32) / पं. युधिष्ठिरमीमांसकसम्पादितः उणादिकोषः (2/33), डॉ. सोमलेखावृत्तिः - उणादिकोषः (2/33), आ.सत्यव्रतशास्त्रिवृत्तिः उणादिकोषः (2/33), आर्यकुमारटीकावृत्तिः - उणादिकोषः (2/33) ।

3 तदेव द्र. - पं. युधिष्ठिरमीमांसकसम्पादितः उणादिकोषः (2/33) ।

4 तदेव द्र. - उणादिसूत्रप्रयोगदीपिकावृत्तिः (2/33) । (पृ. 52 स्तम्भः - 1) ।

5 तदेव द्र. - उणादिसूत्रप्रयोगदीपिकावृत्तिः (2/33) । (पृ. 52 स्तम्भः - 1) ।

 ISSN: 2320-740X

सत्सु तेषु अनुपलब्धेषु पुनः लौकिकानि उदाहरणानि अन्विष्य प्रादर्शयत् इतितु आर्यकुमारटीकया एतस्य मान्यवरस्य प्रायः साम्यमितिवक्तुं प्रभवामि स्वीयानुसन्धाबलेन स्वाध्यायबलेन च अहमत्र एतस्मिन् सोधप्रपत्रे । परं ततःअग्रे अस्ति एतस्य सुधियः कश्चन विशेषः, स च नाम यत्र वैदिकाः लौकिकाः वा प्रयोगाः अन्विष्यान्विष्याऽपि सर्वथा नैवालभ्यन्त, तत्र अध्येतृवत्सलः सुधीः छन्दोज्ञाननिधिः असौ आचार्यः प्रयोगप्रबोधनधिया स्वयमेव सरलानि व्यावहारिकाणि च पद्यानि विनिर्माय प्रास्तौत् । अयं च विशेषः सम्प्रतिउपलब्धासु वृत्तिसु अद्य यावत् मया न क्वचिदपि व्यलोकि ।

तद्यथा **तक्षकः** इतिपदस्य प्रयोगं स्वरचितेन पद्येन प्रस्तौतिआचार्यः वेदवागीशवर्यः - **आसन्दी तक्षको रम्यां चकार नो गृहाय वै ।**[1] इति।

तथैव **चरक**-शब्दस्य एकं भावप्रकाशीयं प्रयोगं प्रदर्श्य स्पष्टतायै स्वीयं पद्यं प्रस्तौतिआचार्यः – **चरतीतिचरकः** [चरँ गत्यर्थः= क्वुन् ] । **1. चरकं** वैद्यशास्त्रम् । **2. चरकः** = गन्ता वा इतिस्वामिदयानन्दोक्तां निरुक्तिं प्रदर्श्य अन्ते स्वरचितं लघु पद्यद्वयम् - **1. 'चरकं त चिकित्सति'** । अपि च **2. 'स्थानेष्वष्टसु सम्पूर्णा संहिता चरकस्य वै'** । इतिप्रादर्शयत् । एतेन छात्रः अपि स्वीयं प्रयोगसामर्थ्यं वर्धयितुं प्रेरितःभवितुम् अर्हति। एतादृशान् स्वनिर्मितान् प्रयोगान् कर्तुं च प्रयतिष्यते इति। एतेन सह भावप्रकाशस्य अपि एकः प्रयोगः आचार्येण समुपस्थापितः- **'तस्माच्चरकनामासौ विख्यातःक्षितिमण्डले । (भाव.)**[2] इति। इत्थमेव –

भनक्तीति**भञ्जकः** = त्रोटक : छेदको वा [ भौँ आमर्दने (रुधा.) + क्वुन् ] – इतिभञ्जकशब्दस्य व्युत्पत्तिं निरुक्तिं स्वामिदयानन्दानुसारं प्रदर्श्य तस्य स्वनिर्मितं पद्यप्रयोगं प्रदर्शयति। तद्यथा –

**वायुना भञ्जकेनैते तरवो भूमिसात् कृताः ।** इति।

अपि च भञ्जकशब्दस्य प्रयोगः अष्टाध्याय्यां भगवता पाणिनिना **शालभञ्जिका क्रीडा** इतिनाम्ना अपि कृतःअस्ति । इत्युक्ते यथा पाणिनीया अष्टाध्यायी न केवलं व्याकरणस्यैव ग्रन्थः , अपितु व्याकरणव्याजेन लोकव्यवहारस्य प्रबोधकः तथैव इयम् उणादिसूत्रप्रयोगदीपिका अपि लोकव्यवहारप्रबोधिका । तस्याः क्रीडायाः विषये अष्टाध्याय्यां तु वर्णनम् अस्ति । परं वैदिकग्रन्थेषु तस्य प्रयोगः दुर्लभःइतिकृत्वा छात्रवत्सलः आचार्यः शालान् **'भञ्जन्ति यस्यां सा शालभञ्जिका क्रीडा'** इति**'पुष्पैः प्रचायन्ते पूजयन्ति यस्यां सा पुष्पप्रचायिका क्रीडा'** इतिच निरुक्तिप्रदर्शनपुरस्सरम् स्वरचितायाम् अष्टाध्यायीप्रयोगदीपिकायां प्रस्तुतं स्वनिर्मितं पद्यम् अत्रापि उपस्थापयति। अत्र शालभञ्जिका, उद्दालकपुष्पभञ्जिका, तालभञ्जिका, वीरणपुष्पप्रचायिका इत्यादीनां क्रीडानाम् अत्र पद्ये वर्णन विधाय तादृशीना क्रीडानां वर्णनं व्यधायि । एतासां क्रीडानां स्मारणं , परम्परायाः सरक्षणम्, क्रीडानाम् आयोजनेन स्वास्थ्यादि लाभाः तु सन्त्येव । अद्यत्वे वयं पश्यामः लघवःबालाः अपि स्वीयं समयम् अधिकाधिकं चलभाषादीनां (डिजिटल माध्यमानां) पुरतःयापयन्ति, तेन लाभः तु कथमपि न भवति। परं स्वास्थ्यहानिः तु जायते एव । अतःअद्यत्वे तु

---

1 तदेव द्र. - उणादिसूत्रप्रयोगदीपिकावृत्तिः (2/33) । (पृ. 52, स्तम्भः - 2) ।

2 तदेव द्र. - उणादिसूत्रप्रयोगदीपिकावृत्तिः (2/33) । (पृ. 52, स्तम्भः - 2) ।

स्वास्थ्यरक्षिकाणां स्वास्थ्यवर्धिकानां क्रीडानां च संरक्षणं संवर्धनं च आवश्यकम् अस्ति । तदपि इतःशिक्षितुं शक्यते । पद्यं तद्यथा –

**“रन्त्वा शालभञ्जिकां रेम उद्दालकपुष्पभञ्जिकाम् ।**

**तालभञ्जिकां रन्त्वा हि वीरणपुष्पप्रचायिकाम् ।।"**[1]

तथैव अपरा अपि एका लोके प्रसिद्धा क्रीडा शब्दसिद्धिप्रकरणे समुपतिष्ठते । साऽप्यत्र '**काष्ठं पुत्रीयतियस्यां सा काष्ठपुत्रिका क्रीडा**' इतिनिरुक्तिप्रदर्शनपुरस्सरं पद्यबन्धेन अत्र समुपस्थापिता आचार्येण –

'**ते काष्ठपुत्रिकां क्रीडां रमन्ते रविवासरे**' इतिपद्यम् आचार्येण निर्माय प्रस्तुतम् । अस्माभिः सम्प्रतिअश्रूयमाणासु अन्यतमा इयं क्रीडा । एतस्य सूत्रस्य व्याजेन सुयोगेन एतस्याः क्रीडायाः बोधः जायते । अपि च निश्चप्रचं एतादृशीनां क्रीडानां प्रोत्साहनं भविष्यतिइति। काव्यं हि समाजस्य दर्पणः भवति। समाजं दर्शयतिकाव्यम् इतिअत्र द्रष्टुं शक्नुमः वयम् ।

अत्रैव प्रसङ्गोपस्थितं शुनकशब्दं प्रयुञ्जानः आचार्यः एतस्य व्युत्पत्तिं प्रदर्श्य इत्थं स्वरचितं प्रस्तौति। '**शुनतिगच्छतीतिशुनकः**' - कुक्कुरो वा [ शुनँ गतौ + क्वुन्] -

'**स्ववीथ्यां शुनका नान्यान् सहन्ते शुनकान् क्वचित् ।**' इतिलोके दृश्यमानं शुनकैः सह शुनकानां पारस्परिकं वास्तविकं दृश्यम् अत्र पद्येन समुपास्थापयत् आचार्यः । तथैव अन्यस्य अपि एकस्य '**भषकः**' इतिशब्दस्य प्रयोगं निरुक्तिपुरस्सरं स्वीयेन पद्येन समुपस्थापयतिआचार्यः - भषतिभर्त्सयतीतिभषकः = श्वा [ भषँ मर्त्सने + क्वुन्] - '**श्रुत्वाऽसाधारणं शब्दं भषन्ति भषका निशि ।**' अयमपि भषकः शुनकस्य पर्यायवाची शब्दः। एतस्य अपि प्रयोगं प्रतिनिशं श्रूयमाणं शुनकानां भषकाणां रवम् अत्र पद्यात्मकतया प्रास्तौत् आचार्यः इतिआचार्यस्य काव्यात्मिकी प्रतिभा अपि एतेन ज्ञायते एव , ततःप्रेरणा अपि प्राप्यते च ।

**वैदिकप्रयोगदीपिका (तक्षकः इतिशब्दः) -**

उपरि मया यथा प्रदर्शितं यत् तक्षकः इतिशब्दं प्रदर्शयन् तस्य स्वनिर्मितेन पद्येन एकेन प्रयोगं प्रादर्शयत् आचार्यः । तस्यैव तक्षकः इतिशब्दस्य अर्थप्रदर्शनपूर्वकं छान्दसं (वैदिकं) प्रयोगम् अपि प्रादर्शयत् आचार्यप्रवरः । तद्यथा - तक्षतितनूकरोतीतितक्षक :- तनूकर्त्ता, छेदकः, वर्धकिः शिल्पी वा [तक्ष तनूकरणे क्वुन् ] । उदा. - 'तस्यास्तक्षको वैशालेयो वत्स आसीत् । (अ.८.१० (५). १४) इति।[2] इत्थम् अत्र उदाहरणप्रदर्शनपुरस्सरं तस्य स्वरः व्याकरणनियमात् भिन्नः परिलक्षितः, अतःतस्य समाधानमप्याह - अत्राऽन्तोदात्तत्वं छान्दसम् । इति। एवं ह्याचार्यः सामान्यं सरलं व्याकरणं बोधयन् तेन सहैव अन्यान् अपु बहुविधान् अंशान् प्राबोधयत्, येन छात्राणां बुद्धि इतिएतदपि ग्रन्थस्यास्य वैशिष्ट्यम् ।

**लौकिकप्रयोगदीपिका (इक्षुकुट्टकः / अभ्रकः इतिशब्दः) -**

1 अष्टाध्यायीसूत्रप्रयोगदीपिका ६.२.७४ ।

2 तदेव द्र. - उणादिसूत्रप्रयोगदीपिकावृत्तिः (2/33) । (पृ. 52, स्तम्भः - 2) ।

 ISSN: 2320-740X

उणादिसूत्राणां व्याख्यां कुर्वाणः आचार्यः महता परिश्रमेण लौकिकसाहित्यात् अन्विष्य अन्विष्य प्रास्तौत् । एतेन आचार्यस्य बहुश्रुततायाः बोधः भवति, अस्माभिरपि बहुश्रुतैः भवितव्यम् । अपि च व्याकरणम् अधीत्य वैदिकवाङ्गस्य लौकिकवाङ्गयस्य च स्वाध्यायः अपि कर्त्तव्यः इतिप्रेरणां शिक्षां च प्राप्नुमः । पश्यामः तादृशान् कांश्चन प्रयोगान् इह शोधपत्रे प्रस्तौमि । तद्यथा -

**इक्षुकुट्टकः** - इक्षून् कुट्टयतीतिइक्षुकुट्टकः = गौडिक : [कुट्ट छेदनभर्त्सनपूरणेषु + क्वुन्] इति**इक्षुकुट्टकः** इतिशब्दस्य निरुक्तिं व्युत्पत्तिं च प्रदर्श्य आचार्यः लौकिकं पद्यमित्थं प्रस्तौति- **'इक्षुकुट्टकमानाय्य स्विक्षुरसं प्रवर्त्तय ।'**

**अभ्रकः** - अभ्रतिगच्छतिचिरं गतियुक्तं भवतिशरीरं येन तद अभ्रकम् = खनिजविशेषः, औषधं सञ्ज्ञा वा [अभ्र् गत्यर्थः+क्वुन्] इत्येतत् तु स्वामिदयानन्दसरस्वतिभिः प्रदर्शितानुसारम् एव प्रदर्श्य उदाहरणं तु चक्रदत्तस्य प्रादात् - **'अभ्रकं तव बीजं तु मम बीजं तु पारदः । अनयोर्मेलनं देवि ! मृत्युदारिद्र्यनाशनम् ॥'** (चक्रदत्तः) इति।। इत्थम् आचार्यः महता परिश्रमेण शास्त्राणि आलोड्य ततःततःसारभूतान् अंशान् जिज्ञासुच्छात्राणां कृते प्रास्तौत् इतिस्वीयव्यवहारेण प्रशिक्षयति।

तथैव **धुवकः** - धुनोतिकम्पयतीति**धुवकः** = कम्पकः, गर्भमोचको जनः सञ्ज्ञा वा [धू विधूनने (तु) + क्वुन् ] इतिधुवकशब्दस्य अपि निरुक्तिपूर्वकं महता यत्नेन कुतश्चिद् अन्विष्य लौकिकम् उदाहरणम् अत्र प्रस्तुतम् । तद्यथा- **धुवकाय धनं देहि कार्यमस्य विशेषभृत् ।** इति।

तथैव सूत्रगतप्रसङ्गोपात्तं चषकशब्दं निर्वक्ति आचार्यः - **चषन्ति भक्षयन्ति अनेनास्मिन्नितिवा चषकम्** = भक्षणामत्रं पानपात्रम् वा [चषँ भक्षणे + क्वुन् ] इति। ततश्च उदाहरणमेतत् प्रस्तुतम् आचार्येण –

उदा. चषकेण पयः पीत्वा पूपान् याचतिबालकः । इति। पद्यमिदम् आचार्यस्य अन्यस्य वा ग्रन्थस्य इतितु सम्प्रतिगवेषणीयम् । परम् अन्यत्र आर्यकुमारटीकावृत्तौ पद्यमिदं स्फुटकम् इतिनाम्ना निर्दिश्य उपस्थापितम् । अतःसम्भाव्यते अन्यस्य कस्यचिद् ग्रन्थस्यापि सम्भवतिएतत् इति। आर्यकुमारटीकामतिरिच्य अन्यग्रन्थेषु एतादृशाः लौकिक-वैदिकप्रयोगाः सपरिश्रमम् उपस्थापयितुं प्रयत्तवन्तं विपश्चिदम् ग्रन्थं वा नालोकेऽहम् अधुना यावत् तु । इतिकृत्वा निश्चप्रचम् अहं वक्तुं पारयामि एतत् एतस्याः वृत्तेः वैशिष्ट्यम् इति।

अयमेव प्रकारः स्वनामधन्येन अनेन महाभागेन अष्टाध्याय्याः व्याख्याकाले, धातुपाठव्याख्याकाले, अपि च लिङ्गानुशासनादीनां व्याख्याकाले आश्रितःइति। समस्तेऽपि पाणिनीयव्याकरणे अयं परिश्रमः एतस्य विदुषः अभिनवप्रयोगः इतितु तथ्यम् । इतःबहुः प्राक् असौ महोदयः अष्टाध्याय्यां स्वरप्रकरणं दृष्ट्वा अनुपलभ्यमानां सस्वर अष्टाध्यायीं सर्वान् पाणिनीयोपदेशांश्च स्वयं सम्पाद्य प्राकाश्यतामानैष्ट ।

एतदुक्तरं स्वामिदयानन्दाचार्यैः **उणादयो बहुलम्**[1] इतिसूत्रगतं बहुलम् इतिपदमाश्रित्य बाहुलकात् सिध्यमानाः शब्दाः प्रादर्शि । इमे एव शब्दाः यथाक्रमम् अन्यैः सर्वैरपि उत्तरकालवर्त्तिभिः वृत्तिकारैः स्वामिदयानन्दनाम्ना एव उपस्थापिताः सन्ति ।

**<u>बाहुलकात् (उणादयो बहुलम्) इतिइह सूत्रे प्रवृत्तिः-</u>**

बाहुलकात् इतिपदस्य प्रयोगकारणात् सूत्रे अपठितेभ्यः धातुभ्यः अपि एते शब्दाः साध्यन्ते, यथा - आमलकी । कलापकः । मल्लिका । कनकम् । कटकम् । कण्टकः । इति।।

**आमलकम्** तावत्प्रथमम् एतस्य निरुक्तिः - आ समन्ताद् मलते धारयतीतिआमलकम् = धात्रीफलम् । [ आ + माँ धारणे+क्वुन्] प्रत्ययः, ततःच गौरादित्वात् षिद्गौरादिभ्यश्चेतिङीषि आमलकी इतिसिद्धिःजायते । अस्योदाहरणं भावप्रकाशनिघण्टोः स्वीकृत्य प्रस्तौतिआचार्यः - '**त्रिष्वामलकमाख्यातं धात्री तिष्यफलामृता**[2]' (भाव.) । इति

तथैव अग्रेपि - 'कलाम् अँशं पातीतिकलापकः - चन्द्रमा वा [ कला + पा रक्षणे + क्वुन्]'[3] – तस्य च प्रयोगप्रदर्शनं क्रियते आचार्येण इत्थम् - **कलापको मयूखैः स्वैरमृतमिव वर्षति।**[4]

'मल्लते धरतिगन्धं रूपं या सा मल्लिका पुष्पजातिर्वा - [मल्ल धारणे+क्वुन्+टाप्]'[5]

**'मल्लिकामुकुले भातिगुञ्जन् मत्तमधुव्रतः। मल्लिकासुरभिर्नूनं मदयत्येव मानसम् ।।'**[6] इतिपद्यमयेन प्रयोगेण आचार्यः सुगमतया मल्लिकाशब्दप्रयोगं बोधयति।

कनकशब्दं निर्वक्ति इह सूत्रे समागतम् - कन्यते दीप्यते काम्यतेऽभीप्स्यते वा तत् कनकम् = सुवर्णं वा [कनीँ - दीप्तिकान्ति + क्वुन्][7] इति। व्युत्पत्तिस्तु स्वामिदयानन्दप्रणीते वेदाङ्गप्रकाशे उणादिकोषे इत्थमेव प्रदत्ता । परं ततश्च लौकिकं प्रयोगं स्वयं प्राह - **कनकाभूषणैः कान्ता रोचतेऽतितरामिह ।** इति।

ततःअग्रिमः शब्दःकटकः त्र्यर्थकः । तद्यता– 1. कटत्यावृणोत्यङ्गं प्रदेशं वा प्रबन्धेन तत् कटकम् = आभूषणं, 2. गिरिमध्यभागः, 3. राजधानीं वा इति। [कटेँ - वर्षावरणयोः+क्वुन्]

तत्र प्रथमं तावत् - '**स्त्रीभिरिव नरैश्चापि कटके धार्यते करे ।** इतिआभूषणेऽर्थे प्रयोगः इह । ततश्च अग्रे -

---

1 पा.अष्टा. 3/3/1 ।।

2 भाव.प्र. निघं. ।।

3 द्र. - उणादिकोषः (वेदाङ्गप्रकाशः) (2/32) ।

4 तदेव द्र. - उणादिसूत्रप्रयोगदीपिकावृत्तिः (2/33) । (पृ. 53, स्तम्भः - 1) ।

5 तदेव - द्र. - उणादिकोषः (वेदाङ्गप्रकाशः) (2/32) ।

6 तदेव द्र. - उणादिसूत्रप्रयोगदीपिकावृत्तिः (2/33) । (पृ. 53, स्तम्भः - 1) ।

7 द्र. - उणादिकोषः (वेदाङ्गप्रकाशः) (2/32) ।


ISSN: 2320-740X

**तरवो देवदारोस्तु राजन्ते कटके गिरेः । दिल्ली तु कटकं नूनं भारतस्यास्ति सम्प्रति।** इतिप्रथमार्धे गिरिमध्यभागर्थे इह कटकशब्दःप्रयुक्तः, उत्तरार्द्धे च राजधान्यर्थे प्रयुक्तः कटकशब्दःएषः । लौकिकः प्रयोगः एषः कटकशब्दयुतःइह पद्ये ।

**।। संशोधनस्यैतस्य सम्भाविताः लाभाः उपसंहृतिश्च ।।**

- मदीयेन शोधपत्रेणानेन व्याकरणाध्ययनस्य सार्थकत्वं वेदानामध्ययनेनैव सफलीभवतीतिप्रतिपाद्यते ।
- शोधपत्रस्यैतस्य माध्यमेन व्याकरणशास्त्रस्य अध्येता यदा यदा सूत्रार्थान् उदाहरणानि वापि पठतितदा तदा तस्य प्रयोगज्ञानविषये अपि सः जागरुकः समर्थःप्रवृत्तश्च भवतिइति।
- उणादिसूत्राणामध्ययनपरम्परायां अभिनवप्रयोगस्य अवसराः वर्धिष्यन्ते इतितथ्यम् ।
- आचार्येण बहुत्र शास्त्रीयोदाहरणाभावे स्वरचितं पद्यात्मकम् उदाहरणं प्रयुक्तम् । एतेन अध्येता काव्यरचनेऽपि प्रवृत्तः भवितुमर्हति।
- प्रसङ्गवशात् यदि कुत्रचित् कस्यचित् सूत्रस्य शब्दस्य वा उदाहरणरूपेण शास्त्रीयः प्रयोगः नोपलभ्यते चेत्तत्कालमेव सः स्वयमपि प्रयोगवाक्यनिर्माणे प्रवर्त्तते ।
- लाभोऽयं शोधपत्रेणानेन भविता यत् आचार्यस्य वचनेषु स्वरशास्त्रस्य बहुत्र प्रयोगः सङ्केतश्च प्रदत्तः वर्त्तते । तेन च एतेन माध्यमेन पाणिनीयपरम्परया व्याकरणशास्त्रस्याऽध्ययनेन स्वरशास्त्रस्याऽपि सुगमतया बोधः भवति।
- काव्यमाध्यमेनोदाहरणप्रस्तुतिकाले आयुर्वेद-धनुर्वेद-नीतिविषयक-क्रीडादिविषयकामि बहुविधानि तथ्यामि ज्ञानञ्च आचार्यैः अनायासमेव प्रस्तुतम्। शोधपत्रेणानेन तस्मिन्विषये छात्रप्रवृत्तिःसम्भाव्यते ।

**आकरग्रन्थाः**


1- उणादिकोषः – रामलाल कपुर ट्रस्ट, रेवली, सोनपत, हरियाणा – 2000

2- पाणिनीयशब्दानुशासने उणादिसूत्रप्रयोगदीपिका - पुष्करक्षेत्र जोधपुर - राजस्थानम् - **2062**

3- उणादिकोषः – आर्यकुमार टीका, आचार्य प्रणवानन्द विश्वनीड न्यास, गुरुकुल पौंधा, देहरादूनम् – 2012

4- उणादिकोषः – वृत्तिकारः आचार्यः सत्यव्रतशास्त्री, - गुरुकुल एटा , प्रकाशिका – श्रीमती मिथिलेश कुमारी, सत्यसदन, चन्देरिया, चित्तौड़गढ़, राजस्थानम् – (आर्ष गुरुकुल एटा की स्वर्ण जयंती पर प्रकाशित) – 2003 .

5- उणादिकोषः पीयूषाख्या हिन्दीसस्कृतवृत्तिः– वृत्तिकारा - डॉ. सोमलेखा , डॉ. ईश्वरचन्द्र प्रकाशनम्, भिवानी, हरियाणा - 2008

6- उणादिकोषः (वेदाङ्गप्रकाशः तत्रत्यः त्रयोदशो भागः– प्रकाशकः - वै. यन्त्रालयः अजयमेरुः) ।

7- महाभाष्यम् – श्रीमद्भगवत्पतञ्जलिविरचितम्, चौखम्बा संस्कृत प्रतिष्ठानम् – 2001

8- महाभाष्यदीपिका (महाराजः भर्तृहरिः) पूणे - 1967

9- काशिकावृत्तिः(हिन्दी अनु. मधु सक्सेना) गाजियाबाद - 1976

10- मनुस्मृतिः - आर्ष साहित्य प्रकाशन ट्रस्ट - नई दिल्ली - 1996

11- निरुक्तम् (यास्काचार्यः) - अनु. भगीरथ शास्त्री, दिल्ली – 1963

12- शिक्षाशास्त्रम् (उदयनाचार्यः) - रामलाल कपूर ट्रस्ट - रेवली सोनीपत – 2008

13- वाक्यपदीयम् (महाराजः भर्तृहरिः) अमदावाद – 1984

14- वाचस्पत्यम् – मदनमोहन झा , **GOOGLE PLAYSTORE APP**

15- शब्दकल्पद्रुमः - मदनमोहन झा , **GOOGLE PLAYSTORE APP**

16- कारकतक्रम् (माधवी टीकासहितम् - ब्रह्माशंकरशास्त्री सम्पादितम्) कलकत्ता – 1942

17- चाणक्यनीतिः - विजयकुमार गोविंदराम हासानंद प्रकाशन - दिल्ली - 1998

18- वर्णोच्चारणशिक्षा (म.द.स. व्याख्या) - वैदिक यन्त्रालयः - अजयमेरुः - 1998

19- भाषाविज्ञान एवं भाषाशास्त्र (डॉ. कपिलदेव द्विवेदी) - विश्वविद्यालय प्रकाशन वाराणसी - 2014

******

 **ISSN: 2320-740X**

# वेदेषु गुरुत्वाकर्षणसिद्धान्तः

**उज्ज्वलदासः**

Phd research scholar, Department of sanskrit

Pondicherry university

Kalapet, puducherry-60501

## शोधसारः-

विज्ञानस्य सर्वासु शाखासु एका मौलिकी शाखा अस्ति भौतिकविज्ञानम्। भौतिकविज्ञाने सर्वेषु चर्चितेषु विषयेषु गुरुत्वाकर्षणबलम् (Gravitational Force) इतिसिद्धान्तोऽतिशेते। अस्य सृष्टजगतःसर्वाणि वस्तूनि तेषां द्रव्यमाणम् (Weight) इत्यनेन कारणेन परस्परमाकर्षन्ति, तदेव गुरुत्वाकर्षणबलमिति। द्रव्यमाणयुक्तेन केनचिद् वस्तुना अन्यद्वस्तु गुरुत्वाकर्षणबलेन आकृष्यते। अस्य गुरुत्वाकर्षणबलस्य कारणेनैव छायापथस्य अन्तो नक्षत्राणि भ्रमन्ति, पृथिवी सूर्यं परितो भ्रमति, पृथिवीं परितःचन्द्रो भ्रमति। पृथिव्या गुरुत्वाकर्षणबलं यदा अस्माकमुपरि कार्यं करोतितदेव अस्माभिः माध्याकर्षणबलम् (Gravity) इतिउच्यते। एतद् माध्याकर्षणबलमस्मान् पृथिव्याः केन्द्रं प्रतिउतो अध आकर्षति। पृथिव्या आकर्षणेन वस्तूनि भूम्यां पतन्ति। किन्तु चन्द्रो भूम्यां किमर्थं न पतति? सौरजगतो ग्रहाः कथं न कक्षच्युताः? इतिविविधाः प्रश्नाः श्रूयन्ते। एतेषां प्रश्नानामुत्तरमस्ति गुरुत्वाकर्षणबलमिति। गुरुत्वाकर्षणबलं भौतिकविज्ञानस्य विषयः तथापि वेदेषु गुरुत्वाकर्षणबलविषयेऽपि च तस्य प्रयोगविषये प्रत्यक्षरूपेण परोक्षरूपेण च वर्णना दृश्यते। प्रकृतेः रहस्यमतीव विस्मयकरम्। अस्माद् विस्मयादेव प्रचीनकाले ऋषि-मुनि-दार्शनिकाः तीक्ष्णमेधया प्रकृतेः रहस्योद्घाटनाय अपि च मानवजीवनस्योपरि प्रकृतेः महत्त्वं ज्ञातुं सर्वदा तत्परा आसन्। ते विद्वांसो बौद्धिकबलेन तार्किकबलेन च प्रकृतेः सर्वाणि तथ्यानि सूक्ष्मरूपेण विश्लिष्य सिद्धान्तं प्रतिगच्छन्ति स्म। प्रकृतिः एव विज्ञानस्य प्रयोगक्षेत्रमितिमन्यते स्म। यद्यपि वेदेषु विज्ञानस्य विविधा विषया वर्णिताः सन्ति तथापि शोधलेखेऽस्मिन् भौतिकविज्ञानस्य गुरुत्वाकर्षणबलविषयेऽपि च तस्य प्रयोगविषये वर्णना क्रियते।

**मुख्यशब्दाः-** गुरुत्वाकर्षणबलम्, वेदः, पृथिवी, सूर्यः, जलम्, अग्निः, ऋतुपरिवर्तनम्, अहोरात्रः, भौतिकविज्ञानमिति।

## प्रस्तावना-

संस्कृतसाहित्यस्य प्राचीनतमं निदर्शनं तथा सनातनधर्मस्य प्राचीनतमः पवित्रो धर्मग्रन्थो वेदोऽस्ति। विद्-ज्ञाने इतिधातोः करणकारके किञ्च अधिकरणकारके घञ्-प्रत्ययेन वेदशब्दो निष्पद्यते। भारतवर्षस्य चिरन्तनी मर्मवाणी अस्ति वेदः। अस्य देशस्य सर्वेषां धर्माणामुत्स एतेषु वेदेषु एव निहितोऽस्ति, एतेषु वेदेषु एव भारतीयानां सर्वेषां कर्मणां मीमांसा तथा सर्वेषां ज्ञानानां परिणतिः अवलोक्यते। भगवता मनुनोच्यते- **सर्वज्ञानमयो हि सः**[1] इति। वैदिकाः पृथिव्यां

1 मनुस्मृतिः.2.7

प्रथमसामाजिका आसन् ये च तत्तत्कालानुसारं प्रयोगानुकूलं पदार्थमाविष्कृतवन्तः। यद्यपि ते आध्यात्मिकवादिनः सन्तःस्वदिव्यदृष्टिबलेन विश्वसृजनतत्त्वं प्रत्यक्षीकृतवन्तः। वेदशास्त्रन्तु सर्वेषां ज्ञानविज्ञानानां बीजरूपं सूक्ष्मरूपेणादधाति। बीजात्मकज्ञानस्य अङ्कुरोद्गम उत्तरोत्तरकाले भारतीयदार्शनिकैः भाष्यव्याख्याकर्तृभिः बहुधा विश्लेषितः। यथा वेदेषु राजनीतिशास्त्रम्, आयुर्वेदः, अर्थशास्त्रम्, नीतिशास्त्रम्, समाजव्यवस्था, वर्णव्यवस्था, धर्मः चेत्यादीनां विषये वर्णना प्राप्यते तथैव विज्ञानस्य विविधाः शाखा यथा गणितशास्त्रम्, पदार्थविज्ञानम्, ज्योतिषशास्त्रम्, रसायनविज्ञानम्, शिल्पविज्ञानम्, पर्यावरणविज्ञानं चेत्यादिभिः शाखाभिः सह सम्बद्धानां विभिन्नानां विषयानामपि वर्णना दृश्यते।

Isaac Newton, Galileo Galilei, Johannes Kepler इतिसुप्रसिद्धा वैज्ञानिका गुरुत्वाकर्षणबलविषये विभिन्नं तत्त्वं सप्रमाणं प्रायोगिकञ्च तथ्यमुपस्थापितवन्तः। Isaac Newton इति1687 ईशवीयाब्दे प्रकाशिते तस्य "Philosophia Naturalis Principia Mathematica" इतिग्रन्थे गुरुत्वाकर्षणबलविषये स्वमतमुपस्थापितवान्। तस्य सूत्रमस्ति– Every particle of matter in the universe attracts every other particle with a force which is directly proportional to the product of their masses and inversely proportional to the square of the distance between them.[1] अर्थाद् अस्मिन् ब्रह्माण्डे प्रत्येकं द्रव्यकणः अन्यं प्रत्येकं कणमेकेन बलेन आकर्षतियत् तेषां द्रव्यमाणस्य गुणफलस्य साक्षात् समानुपातिकं भवतितथा च तेषां दूरत्वस्य वर्गस्य विपरीतानुपातिकं भवतिइति। गुरुत्वाकर्षणबलस्याविष्कारेण Isaac Newton इतिमहोदयस्य अवदानमेव किं प्रधानमस्ति? तस्मात् पूर्वं किं केनापि अस्मिन् विषये न प्रत्यक्षीकृतम्? वैज्ञानिकः Isaac Newton इतिसर्वप्रथमं गुरुत्वाकर्षणबलस्य गाणीतिकीं व्याख्यां प्रदत्तवान्। परन्तु तस्माद् बहुवत्सरात् पूर्वमेव वेदेषु गुरुत्वाकर्षणबलविषयेऽपि च गुरुत्वाकर्षणबलस्य प्रभावविषये प्रत्यक्षरूपेण किञ्च परोक्षरूपेण वर्णना प्राप्यते। वैदिककाले गुरुत्वाकर्षणबलम् (Gravitational Force) इतिनाम नासीत्, तथापि गुरुत्वाकर्षणबलस्य प्रभावविषये मनुष्येषु पर्याप्तं ज्ञानमासीत्। वेदानां बहुषु मन्त्रेषु गुरुत्वाकर्षणबलविषये वर्णना प्राप्यते।

## नभोमण्डलीयवस्तुषु गुरुत्वाकर्षणबलम्–

अस्मिन् महाविश्वे ग्रह-नक्षत्राणामिव कोटिः नभोमण्डलीयवस्तूनि सन्ति यानि परस्परस्य गुरुत्वाकर्षणबलस्य प्रभावेन शून्यमण्डले तिष्ठन्ति। अनेकेषां ग्रहाणाम् उपग्रह इतिनभोमण्डलीयवस्तूनि सन्ति यानि निर्दिष्टे कक्षपथे ग्रहान् परित आवर्तयन्ति। अस्माकं सौरजगतिः वृहस्पतिः (Jupitar), शुक्रः (Venus), शनिः (Saturn), वुधः (Mercury), मङ्गलः (Mars), पृथिवी (Earth), प्लुटः (Pluto), इउरेनासः (Urenus), नेपचुनः (Neptune) च प्रभृतयो नव ग्रहा भिन्नेषु कक्षपथेषु सूर्यमावर्तयन्ति। सूर्यो गुरुत्वाकर्षणबलेन पृथिव्यादीन् ग्रहान् आकर्षयन् अस्ति। अतःपृथिव्यादयो

1 Physics.p-150

 ISSN: 2320-740X

ग्रहाः तेषां कक्षपथाद् विच्युता न भवन्ति। वेदानां बहुषु मन्त्रेषु अस्मिन् विषये वर्णना प्राप्यते। ऋग्वेद उच्यते – सर्वेषामाकर्षणस्य केन्द्रमस्ति सूर्यः[1]। एकस्मिन् मन्त्रे सूर्यस्य आकर्षणेन तं परितःपृथिव्या परिक्रमणगतेः वर्णना प्राप्यते-

**आयं गौः पृश्निरक्रमीदसदन् मातरं पुरः।**

**पितरं च प्रयन्त्स्वः॥**इति[2]।

अर्थाद् अयं गौः अर्थाद् भूगोल अन्तरिक्षे सूर्यस्याकर्षणेन तमभितो भ्रमति। अथर्ववेद उच्यते, पृथिवी कम्पमाणा परिभ्रमति[3]। अनेन बोध्यते यत् पृथिवी स्वस्य कक्षे लट्टुवत् परिभ्रमन् सूर्यं परितःपरिभ्रमति। सूर्य आकर्षणबलेन द्युलोकं पृथिवीलोकं च स्व-स्व-स्थाने बध्नन्नस्ति अर्थात् परस्परेण सह संयोक्तुं न ददाति। तथाहि ऋग्वेदे- **सविता यन्त्रैः पृथिवीमरम्णादस्कम्भने सविता द्यामदृंहत्**[4]। अर्थात् सविता विभिन्नैः यन्त्रैः अर्थाद् गुरुत्वाकर्षणबलैः पृथिवीं सुस्थिरं कृतवान् किञ्च द्युलोकमुत द्युलोके स्थितान् ग्रह-नक्षत्रादीन् दृढरूपेण बध्नन्नस्ति। येन ग्रह-नक्षत्राणि स्व-स्व-स्थानाद् विच्युता न भवन्ति। अनेन ज्ञायते यद् वैदिकऋषीणां नभोमण्डलीयवस्तूनां गुरुत्वाकर्षणबलविषये पूर्णं ज्ञानमासीत्। वराहमिहिरस्य पञ्चसिद्धान्तिकायामपि पृथिव्याः स्थितिविषये वर्णना प्राप्यते-

**पञ्चमहाभूतमयस्तारागणपञ्जरे महीगोलः।**

**खेऽयस्कान्तान्तःस्थो लोह इवावस्थितो वृत्तः॥**इति[5]।

अर्थाद् अन्तरिक्षे नक्षत्राणां पञ्जरे पञ्चमहाभूतयुक्ता पृथिवी चुम्बकमध्ये स्थितो लोहवत् स्थिता वर्तते। अनेन ज्ञायते यत् चुम्बकवद् नक्षत्राणामपि आकर्षणशक्तिः वर्तते। तया आकर्षणशक्त्या पृथिवी अन्तरिक्षे स्थिता वर्तते। अनेन ज्ञायते यद् वराहमिहिरोऽपि गुरुत्वाकर्षणबलविषये अवगत आसीत्।

## पृथिव्या गुरुत्वाकर्षणबलम्-

द्रव्यमाणसम्पन्नवस्तुवत् पृथिव्यपि स्वस्योपरि उत स्वां निकषा सर्वाणि वस्तूनि आकर्षति। पृथिव्या इदं गुरुत्वाकर्षणबलं माध्याकर्षणबलम् (Gravity) इतिउच्यते। अतःपृथिवीपृष्ठे उत तां निकषा अवस्थितानां वस्तूनामुपरि स्वस्य केन्द्रं प्रतिपृथिव्या आकर्षणबलमिदं माध्याकर्षणबलमिति। किमपि वस्तु उपरिष्टात् त्यजनेन अस्य बलस्य क्रियया ऋजुरूपेण अधः पृथिवीपृष्ठे पतति। पृथिव्या गुरुत्वाकर्षणशक्तेः तथा गतेः वर्णना अथर्ववेदे प्राप्यते-

**मल्वं बिभ्रती गुरुभृद्भद्रपापस्य निधनं तितिक्षुः।**

**वराहेण पृथिवी संविदाना सूकराय वि जिहीते मृगाय॥**इति[6]।

---

1 कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति। ऋग्वेदः. 1.164.47

2 तदेव.10.189.1,यजुर्वेदः.3.6,अथर्ववेदः.6.31.1,सामवेदः.6.5.4

3 याप सर्पं विजमाना विमृग्वरी। अथर्ववेदः. 12.1.37

4 तदेव.10.149.1

5 पञ्चसिद्धान्तिका. 13.1

6 अथर्ववेदः.12.1.48

अर्थाद् गुरुत्वाकर्षणबलस्य धारणक्षमतायुक्ता इयं पृथिवी उत्तमजलदातृभिः मेघैः सह युक्तस्य सूर्यस्य किरणैः स्वस्य मलीनतां निवार्य सूर्यं परितो विशेषरूपेण गमनं करोति। अनेन ज्ञायते यद् वैदिका गुरुत्वाकर्षणशक्तिविषये ज्ञातवन्त आसन्। सिद्धान्तशिरोमणेः गोलाध्याये पृथिव्या गुरुत्वाकर्षणशक्तेः वर्णना प्राप्यते– पृथिव्या आकर्षणशक्तिः अस्ति। तया शक्त्या आकर्षितत्वाद् उपरिस्थं गुरुवस्तु पृथिव्यां पतति[1]। पृथिव्या आकर्षणशक्तिविषये पतञ्जलेः महाभाष्येऽपि वर्णना प्राप्यते- **लोष्ठः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छतिनोर्ध्वमारोहतिपृथिवीविकारः पृथिवीमेव गच्छति[2]।** अर्थात् क्षिप्तो मृत्तिकाखण्डो बाहुवेगं पुरयित्वा न तिर्यग्गच्छति, न चोर्ध्वं गच्छति, अपितु पृथिव्या विकारत्वादेव पृथिवीमेव आगच्छति। वेदेषु पृथिव्या माध्याकर्षणबलस्य प्रयोगविषये वर्णना प्राप्यते। जलमुच्चस्थानाद् निम्नस्थानं प्रतिप्रवहति[3]। जलं सर्वदा अधः प्रवहति[4]। पर्वतस्य पृष्ठाद् जलधारा अधः प्रवहति[5]। वृष्टिः एकविधो द्रवपदार्थः, या माध्याकर्षणबलस्य आकर्षणेन भूपृष्ठे पतति। ऋग्वेद उच्यते– सुन्दरी गतिविशिष्टा जलहारिणी सूर्यरश्मिः सर्वं कृष्णवर्णं नियमितगतिञ्च मेघं जलेन पूरयित्वा आकाशे गमनं करोति। अनन्तरं वृष्टिः मेघात् पतित्वा पृथिवीं सिञ्चति[6]। अनेन ज्ञायते यद् वैदिकऋषयः पृथिव्या गुरुत्वाकर्षणबलविषयेऽपि च तस्य प्रभावविषये सम्यगवगता आसन्।

## सूर्यस्य गतिशीलता-

पुरा वैज्ञानिका वदन्ति स्म पृथिवी सूर्यं परितो भ्रमति। सूर्यः स्थिर इतिते वर्णनां कुर्वन्ति स्म। परन्तु आधुनिकैः विज्ञानीभिः वयं ज्ञातवन्तो यत् सूर्यो गतिशील इति। सूर्यस्यापि एकं कक्षपथमस्ति। सूर्यो यस्मिन् छायापथे विचरति, तस्य छायापथस्य नाम मिल्किओये इति। सौरजगतो ग्रहा यथा सूर्यं परितो भ्रमन्ति तथैव सूर्यः स्वात्मानं परितो भ्रमणेन सह अस्माकं मिल्किओये इतिछायापथस्य अन्तःस्थानात् स्वकीयेन कक्षपथेन ग्यालाक्टिक् सेन्टार इत्येतत् परितःप्रदक्षिणं करोति। सूर्यस्य, ग्रहाणां नक्षत्राणाञ्च भ्रमणाय प्रधानं कारणमस्ति गुरुत्वाकर्षणबलमिति। सृष्टेः अनन्तरमेव वैदिकऋषयः 'सूर्यो गतिशीलः' इतिजानन्ति स्म। वेदानां बहुषु मन्त्रेषु सूर्यो गतिशील इतिउच्यते। अथर्ववेद उच्यते– गतिशीलः सूर्यदेव अन्तरीक्षम्, पृथिवीं द्युलोकं च प्रकाशयति- **चित्रश्चिकित्वान् महिषः सुपर्ण आरोचयन् रोदसी अन्तरिक्षम्[7]**। अन्तरिक्षे चन्द्रमा तथा द्युलोके सूर्यो धावति[8]। गुरुत्वाकर्षणबलस्य कारणेनैव सूर्यः स्वीये कक्षपथे विचरति। तथाहि यजुर्वेदे-

---

1 आकृष्टिशक्तिश्च मही तया यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या।
 आकृष्यते तत् पततीव भाति समे समन्तात् क्व पतत्वियं खे॥ सिद्धान्तशिरोमणिः.गोलोध्यायः. 6

2 https://jhalakrajan.blogspot.com/2021/02/force-gravitation-force.html

3 अपामिव प्रवणे....। ऋग्वेदः. 1.57.1

4 एदु निम्नं न रीयते। तदेव. 1.30.2
 वयं घ त्वा सुतावन्त आपो न वृक्तवर्हिषः। अथर्ववेदः. 20.57.14

5 प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयानाः। ता आववृत्रन्नधरागुदक्ता अर्हि बुध्यमनु रीयमाणाः। यजुर्वेदः. 10.19

6 कृष्णं नियानं हरयः सुपर्णे अपो वसाना दिवमुत्पतन्ति। ते आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते॥ ऋग्वेदः. 1.185.5, अथर्ववेदः. 13.3.9

7 तदेव.13.2.32

8 चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि। तदेव. 18.4.81

 ISSN: 2320-740X

**सूर्यस्यावृतमन्वावर्ते**[1]। सूर्यः स्वीये कक्षपथे एकाकी एव सञ्चरति। तथा च यजुर्वेदे- **सूर्य एकाकी चरति**[2]। पृथिवी सम्यगावर्तयति, उषा किञ्च सूर्योऽपि सम्यगावर्तयतः। इदं सम्पूर्णं जगदपि समावर्तनशीलम्। तथा च यजुर्वेदे- **समाववर्ति पृथिवी समुषाः समु सूर्यः। समु विश्वमिदं जगत्**[3] इति। अनेन ज्ञायते यत् सूर्यस्य गतिविषयेऽपि वैदिकऋषीणां पूर्णं ज्ञानमासीदिति।

## अग्नेः ऊर्ध्वगमनम्-

अग्नेः ऊर्ध्वगमनाय माध्याकर्षणशक्तेः भूमिका अस्ति। अग्निः मूलत उष्णो वाष्प इति। अनेन कारणेन अयमुष्णो वाष्पः तं परितो विद्यमानात् शीतलवाष्पाद् भारहीनः। वयं जानीमो वायौ उष्णे सतिआयतनं वर्धते किञ्च घनत्वस्य ह्रासो भवति। घनत्वस्य ह्रासेनैव वाष्पो भारहीनो भवति, अपि च उपरिस्थः शीतलः समीरणो भारवत्वात् पृथिव्या माध्याकर्षणशक्तेः आकर्षणेन अध आगच्छतिअपि च उष्णं वाष्पमुपरि प्रेषयति। अत उच्यते माध्याकर्षणबलाय किञ्च प्लवतायै अग्नेः शिखा सदैव उपरि गच्छति। वेदानां बहुषु मन्त्रेषु अग्नेः ऊर्ध्वगमनविषये वर्णना प्राप्यते। यजुर्वेद उच्यते– **ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुध्व दैव्यान्यग्ने**[4]। अर्थाद् अग्ने! ऊर्ध्वगामी भव। अग्निः प्रज्वल्य वायुमनुकरोतिकिञ्च अग्निः वायुना अधिकं प्रज्वलति। तथाहि यजुर्वेदे– **प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात्। आदस्य वातो अनुवातिशोचिरध स्म ते व्रजनं कृष्णमस्ति**[5]। अग्निः वायुना अधिकं प्रसरति। ऊर्ध्वगमनाय अग्निः वारंवारं प्रयत्नं करोति। तथा च यजुर्वेदे– **हरयो धूमकेतवो वातजूता उप द्यवि। यतन्ते वृथगग्नयः**[6]। अग्निशिखा सदैव उपरि गच्छति[7]। अनेन ज्ञायते यद् अग्नेः ऊर्ध्वगमनविषयेऽपि वैदिका अवगता आसन्।

## जलोच्छ्वासो जलह्रासश्च (EBB and TIDE)-

गुरुत्वाकर्षणबलस्य प्रभावेन पृथिव्यां जलोच्छ्वासो (TIDE) जलह्रासः (EBB) चेतिभवतः। चन्द्रस्य स्वस्य कोऽपि आलोको नास्ति। यजुर्वेद उच्यते- सूर्यस्य किरणैः चन्द्रः प्रकाशते[8]। पृथिव्या उपरि सूर्यस्य किञ्च चन्द्रस्य आकर्षणेन मूलतःचन्द्रस्य आकर्षणेन यदा समुद्रस्य जलस्तरः सामान्यस्तराद् उपरि गच्छतितदा जलोच्छ्वासः (TIDE) इतिभवति, अपि च यदा अधो गच्छतितदा जलह्रासः (EBB) इतिभवति। अथर्ववेद उच्यते– चन्द्रस्य किरणानामाकर्षणेन समुद्रस्य

---

1 यजुर्वेदः.2.26

2 तदेव.23.10,46

3 तदेव.20.23

4 तदेव.13.13

5 तदेव.15.62

6 तदेव.33.2

7 ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचींष्यग्नेः।

अथर्ववेदः. 5.27.1, यजुर्वेदः. 27.11

8 सुषुम्नः सूर्यरश्मिश्चन्द्रमा। तदेव. 18.40

जलवृद्धिर्भवति- **सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः**[1]। अनेन ज्ञायते यद् जलोच्छ्वासस्य कारणविषयेऽपि वैदिकऋषय अवगता आसन्।

## अहोरात्रः-

पृथिव्या आवर्तनगतये भूपृष्ठे अहोरात्रो भवति। सूर्यस्य आलोकेनैव पृथिवी आलोकिता उत्तप्ता च भवति। अथर्ववेद उच्यते- सूर्यदेवःस्वस्य किरणैः पृथिवीं प्रकाशयति[2]। पृथिवी सूर्यं परितो लट्टुवद् आवर्तयति[3]। आवर्तनसमये पृथिव्या यद् अर्धांशः सूर्याभिमुखं तिष्ठतितत्र सूर्यस्य आलोकः पतति, अतःतत्र भवतिदिनम्। विपरीतदिश अर्धांशे सूर्यस्य आलोको न पतति, अतःतत्र भवतिरात्रिः। अथर्ववेद उच्यते– सूर्यो दिवारात्र्योः निर्माता। सूर्यः पृथिव्या भागमेकमालोकयतिअपि च भागमन्यमेकमन्धकारेण आच्छादयति– **अभ्यन्यदेतिपर्यन्यदस्यतेऽहोरात्राभ्यां महिषः कल्पमानः**[4]। अन्यस्मिन् एकस्मिन् मन्त्र उच्यते- सूर्यो दिवारात्र्योः निर्माता– **अहोरात्रे परि सूर्यं वसाने प्रास्य विश्वा तिरतो वीर्याणि**[5]। अनेन ज्ञायते यद् अहोरात्रस्य कारणविषयेऽपि वैदिका अवगता आसन्।

## ऋतुपरिवर्तनम्-

पृथिवी स्वस्य कक्षपथे आवर्तयन्ती सूर्यस्य गुरुत्वाकर्षणशक्तेः आकर्षणेन एकस्मिन् निर्दिष्टे कक्षपथे निर्दिष्टे समये सूर्यं परित आवर्तयति। वेदेषु उच्यते– पृथिवी सूर्यं परितो भ्रमति[6]। पृथिव्या एदादृशी गतिः वार्षिकगतिः उत परिक्रमणगतिः इत्युच्यते। पृथिव्या वार्षिकगतये ऋतुपरिवर्तनं भवति। अथर्ववेदे विषयेऽस्मिन्नपि वर्णना प्राप्यते। अथर्ववेद उच्यते– ग्रीष्मः, वर्षा, शरत्, हेमन्तः, शिशिरः, वसन्त इतिषड् ऋतवःक्रमानुसारं पृथिव्या प्रतिष्ठापिताः

**ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमन्तःशिशिरो वसन्तः।**

**ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवि नो दुहाताम्॥** इति[7]।

अनेन बोध्यते यद् ऋतुपरिवर्तनविषयेऽपि ऋषीणां सम्यग्बोध आसीत्।

## निष्कर्षः-

गुरुत्वाकर्षणबलं यदि न अस्थास्यत् तर्हि इयं सुन्दरी पृथिवी अस्माकं वासयोग्या न अभविष्यत्, वयं निश्चितरूपेण अमृष्महि, पृथिवी असंख्येन खण्डेन विभक्ता अभविष्यत् किञ्च महाशून्ये भासमाना अभविष्यत्, सूर्यः तस्य केन्द्रे स्थातुं न

1 अथर्ववेदः.18.3.18

2 भुवो विवस्वानन्वाततान। अथर्ववेदः. 18.2.32

3 याप सर्पं विजमाना विमृग्वरी। तदेव. 12.1.37

4 तदेव.13.2.43

5 तदेव.13.2.32

6 आयं गौः पृश्निरक्रमीदसदन् मातरं पुरः। पितरं च प्रयन्त्स्वः॥ ऋग्वेदः. 10.189.1, यजुर्वेदः. 3.61, अथर्ववेदः. 6.31.1, सामवेदः. 6.5.4

7 अथर्ववेदः.12.1.36

 ISSN: 2320-740X

अशक्ष्यत्, एकेन महाविस्फुलिङ्गेन भग्नोऽभविष्यत्, महाविश्वस्य अन्यानि ग्रहनक्षत्राणि किञ्च तान्येव कानिचिद् वस्तूनि एव अस्माकं महाविश्वे इतःपरं न अद्रक्ष्यन्, सर्वत्र परमाणव अभ्रमिष्यन्। फलतःपृथिवीं सक्रियकरणाय गुरुत्वाकर्षणबलस्य अपरिहार्यमवदानमस्ति। गुरुत्वाकर्षणबलं पदार्थविज्ञानस्य विषयः तथापि वेदेषु गुरुत्वाकर्षणबलस्य प्रयोगविषये वर्णना दृश्यते। पृथिव्या भ्रमणक्रिया, द्युलोके स्थितानां ग्रहनक्षत्राणां भ्रमनक्रिया, समुद्रस्य जलस्फीतिः, मेघाद् जलविन्दुपतनम्, सूर्यस्य गुरुत्वाकर्षणबलम्, पृथिव्या गुरुत्वाकर्षणबलम्, ऋतुपरिवर्तनम्, अहोरात्रः प्रभृतिविषये वर्णना दृश्यते। अस्माकं देशो भारतवर्षः प्राचीनकालादेव सनातनधर्मपुरकं आध्यात्मिकवादमनुसरति। सर्वेषां जनानां मङ्गलाय आध्यात्मिक-आधिभौतिक-आधिदैविकशक्तिविकाशाय च सर्वे प्राक्तनाचार्याः, ऋषयः समाजसुधारकाश्च स्वात्मानं नियोजितवन्तः। यद्यपि ते न भौतिकविज्ञानस्य वैज्ञानिका आसन् परन्तु तेषां आविष्कृतविषयेषु गुरुत्वाकर्षणबलस्योल्लेखो दृश्यते। वैदिकऋषयो मन्त्रद्रष्टार आसन्। पारमार्थिकध्यानबलेनैव ते सर्वाणि भौतिकजातानि वस्तूनि प्रत्यक्षरूपेण ददृशुः। वेदमन्त्रा रहस्यात्मिका गूढा इतिमत्वा विषयोऽयं दृष्टिपथं नागतः। पुनश्च विज्ञानविषयः पाश्चात्यवैज्ञानिकप्रवाह इतिमत्वा अस्माकं शास्त्रेषु विद्यमानं विज्ञानविषयं चर्चयितुं क्लिष्टमनुभवन्ति आधुनिकाः।

**सन्दर्भग्रन्थसूची-**


- अथर्ववेद. अनु. विजनविहारी गोस्वामी. हरफ प्रकाशनी.कलकाता, 1358.
- ऋग्वेद. अनु. गंगा सहाय शर्मा.संस्कृत साहित्य प्रकाशन. नई दिल्ली, 2016.
- मनुस्मृतिः. अनु. विठ्ठलः शास्त्री.निर्णयसागरमुद्रणयन्त्रालयः,1887.
- यजुर्वेद. अनु. रेखा व्यास. संस्कृत साहित्य प्रकाशन. नई दिल्ली, 2015.
- सामवेद-संहिता. सम्पा. दुर्गादास-लाहिड़ी-शर्मा.
- सिद्धान्त-शिरोमणिः,गोलाध्यायः. अनु. राधावल्लभः.
- Panchasiddhantika. Tr. G Thibaut and Sudhakar Dvivedi. E J Lazarus and Co. Benares,1889.


******

# अभिराजयशोभूषणे गलज्जलिका

**B MOHAN KUMAR**

Research-scholar,

National Sanskrit University, Tirupati

Mobile number: 9491418516

विश्वेऽस्मिन् अपारे संस्कृतवाङ्मये नैकानि काव्यानि प्रादुर्भूतानि । तदाधारीकृत्यैव शास्त्रं प्रवर्तते लक्ष्यानुरोधेन लक्षणसङ्गतिः इतिसकलमपि काव्यशास्त्रजातं लक्ष्यलक्षणसमन्वयात्मकं भवति। तत्र लक्ष्याणि(काव्यानि) दृश्यश्रव्यादिभेदेन अनेकधाभिन्नानि। तदाधारीकृत्यैव लक्षणग्रन्थाः निर्मीयन्ते लक्षणग्रन्थेष्वपि लक्षणानि स्वकीयानि लक्ष्याणि इतरकविनिर्मितानि भवन्ति। साहित्यशास्त्रे केवलं लक्षणात्मकग्रन्थाः यथा नाट्यशास्त्रादयः। लक्ष्यलक्षणसमन्वयात्मकग्रन्थाः यथा काव्यप्रकाशादयः एवं क्रमः परिलक्ष्यते। तत्रापि द्वितीये भेदे लक्ष्यलक्षणानि स्वोपज्ञानि भवन्ति इत्यपि ज्ञायते यथा रसगङ्गाधरादीनि। तथापि विशिष्टतया एकमेव कथावस्तु, नायकं वा स्वीकृत्य स्वोपज्ञलक्षणानां स्वोपज्ञलक्ष्येष्वेव समन्वयं कृत्वा रचिताः ग्रन्था केचन दृश्यन्ते यथा प्रतापरुद्रयशोभूषणम्। अयं ग्रन्थः विद्यानाथेन विरचितःततःआरभ्य साहित्यशास्त्रे यशोभूषणग्रन्थपरम्परा सञ्जाता । तत्पश्चात् अनेके साहित्यशास्त्रकाराः यशोभूषणग्रन्थान् निर्मिमरे । यथा नञ्जराजयशोभूषणम्, अभिनवतीर्थयशोभूषणम् इत्यदि । अस्यामेव परम्परायाम् अभिराजरजेन्द्रमिश्रविरचितम् अभिराजयशोभूषणमपि राजते ।

अयं ग्रन्थः पञ्चोन्मेषैः विलसति। तत्राद्ये उन्मेषे तावत् ग्रन्थकर्तृभिः श्री अभिराजराजेन्द्रमिश्रमहोदयैः मङ्गलाचरणानन्तरं काव्यप्रशंसा, काव्यप्रयोजनम्, काव्यहेतवः, काव्यलक्षणम्, काव्यशाखाः इत्येतेऽशाः पञ्चसु प्रकरणेषु प्राचीननवीनलक्षणपुरस्सरं काव्यतत्त्वानि व्यचारिषत। अस्य उन्मेषस्य नाम भवतिपरिचयोन्मेषः।

द्वितीये शरीरतत्वोन्मेषे तावत् "काव्यशरीरत्वेन ख्यातयोः शब्दार्थयोः साङ्गोपाङ्ग-व्याख्यानमुपन्यस्तम्। तत्र शब्दार्थसम्बन्धः, शब्दशक्तिप्रकरणम्, रीतिवृत्तिप्रकरणम्, गुणालङ्कारप्रकरणञ्च यथाशास्त्रं, यथापरम्परं , यथाप्रत्यग्रचिन्तनञ्च समुपन्यस्तं मया"[1] ।इतिसाक्षात् मिश्रोमहोदयाः स्वकीयग्रन्थस्य नान्दीवाचि प्रकटितवन्तः।

तृतीये आत्मतत्त्वोन्मेषे महोदयैः ८१ कारिकाभिः रसात्मविवेकः, अलङ्कारात्मत्वविचारः, रीतिकाव्यात्मत्वविमर्शः, वक्रोक्तिकाव्यात्मत्वविचारः, औचित्यकाव्यात्मत्वविमर्शः, ध्वनेः काव्यात्मत्वम् इतिषण्णां साहित्यसम्प्रदायानां विचाराः क्रमविकासमाधारीकृत्य सुष्टु प्रस्तुताः।

तुरीये निर्मितितत्त्वोन्मेषे तु काव्यभेदनिरूपणम् एकस्मिन् प्रकरणे विशदीकृतम्। अत्र काव्यभेदनिरूपणं कुर्वन्तःअभिराजाः प्रकरान्तरेण दृश्य-श्रव्यभेदेन काव्यं द्विधा निरूप्य दृश्यकाव्यभेदे रूपरूपकनाट्यानि प्रदर्श्य

---

1 अभिराजयशोभूषणम् पृ.सं 5

 **ISSN: 2320-740X**

अभिनयचतुष्टयम्, रुपकाणि, उपरूपकानि तेषां भेदान् श्रव्यकाव्यभेदान् पद्यगद्यचम्पूकाव्यानि गद्यवैशिष्ट्यम्, पद्यविस्तरनिरूपणं, प्रबन्धकाव्य-महाकाव्यलक्षणम्, खण्डगद्यकाव्यादिलक्षणम्, कथाख्यायिकादीन् प्रतिपाद्य कथानिकालक्षणम्, लघुकथालक्षणम्, उपन्यासलक्षणञ्च विस्तारशः प्रत्यपादिषत।

अन्तिमे पञ्चमे प्रकीर्णतत्त्वोन्मेषविषये तु ग्रन्थकर्तृभिः मिश्रमहाशयैः एवम् उपन्यस्तं नान्दीवाचि यत् "अन्तिमे तु आद्यन्तं परिलक्ष्यते मदुपज्ञं मौलिकं चिन्तनम्। अत्र गीतितत्त्व-गलज्जलिका-छन्दोमुक्तकाव्यप्रकरणानि मयोपन्यस्तानि। गीतितत्त्वे गीतं, लोकगीतञ्च (Folk songs) व्याख्यातम्। ततश्च कजरी -नक्तक -प्रचरण -वट्टकक -रसिक -लाङ्गलिक -स्कन्धहारीक -फाल्गुनिक -चैत्रक -सूतगृह-उत्थापनादिसंज्ञानां लोकगीतानां लक्षणोदाहरणपुरस्सरं व्याख्यानं कृतं वर्तते" इति[1] ।

समकालीनकाले अनेके नवीनसाहित्यरूपाः संस्कृतसाहित्ये प्रादुर्भूताः सन्ति । नूतनविषयैः शैलीभिश्च एते रूपाः पाठकानां मनांसि आनन्ददोलिकासु विहारयन्ति । गलज्जलिका छन्दोमुक्तकव्यम् इत्यादीनि नूतनसंस्कृतसाहित्यरूपाणां महत्त्वपूर्णोदाहरणानि भवन्ति। आधुनिक-संस्कृत-अलङ्कारशास्त्रज्ञः अभिराजराजेन्द्रमिश्रः एतासाम् नूतनसाहित्यप्रक्रियानां सम्यक्प्रतिपादनं स्वकीये अभिराजयशोभूषणे अकरोत् ।

संस्कृतसाहित्ये गलज्जलिका इतिपदं, गजल-वाचकम्।भारते मुगलशासनकाले अनया साहित्यप्रक्रियया भारतीयसहित्यकाराः प्रभाविताः सञ्जाताः [2] । फलतःफारसीभाषायाः अनन्तरं गजलानि उर्दूभाषायाम् अपि लोकप्रियाः अभवन् । अद्यत्वेपि अस्य रूपस्य महती माङ्गलिका वर्तते। राजेन्द्रमिश्रः भट्टमथुरानाथशास्त्री तथा आचार्य बच्चूलाल अवस्थी इत्यनयोः उल्लेखम् करोति, याभ्यां संस्कृते गलज्जलिका विकसिता ।यतःतयोः फारसीभाषायां संस्कृतभाषायाञ्च उत्तमा प्रज्ञा आसीत्। भट्टमथुरानाथस्य साहित्यवैभवम्, गीतवीथी इतिग्रन्थौ गलज्जलिकाभूयिष्ठौ भवतः[3] ।

राजेन्द्रमिश्रेणैव प्रथमतया गजलस्य कृते गलज्जलिका इतिसंज्ञा उपकल्पिता[4] । पुनः पुनः गजलश्रवनं कृत्वा हर्षविषादाभ्यां प्रभावितःसहृदयः नूनम् अश्रुपातं करोति।तत एव इयम् गीतिः मिश्रमहोदयैः गलज्जलेतिआख्याता । सा एव गलन्नेत्रजलत्वाद्वा गलज्जलिकेत्यपि संज्ञिता भवति।

श्रावं श्रावं च गीतार्थं नयने वारि वर्षतः।
ध्रुवं हर्षविषादाभ्यां सचेता यदि पाठकाः[5] ॥
तत एव माया गीतिराख्यातेयं गलज्जला ।

---

1 अभिराजयशोभूषणम् पृ.सं 6

2 जजलाख्यं हि तद्गीतं भारतेपि प्रतिष्ठितम् ।

तुरुष्कशासने जाते पारसीके प्रतिष्ठिते ॥ अभिराजयशोभूषणम् 5/53

3 अभिराजयशोभूषणम् पृ. सं 280

4 अभिराजयशोभूषणम् पृ.सं 283

5 अभिराजयशोभूषणम् 5/66

गलन्नेत्रजलत्वाद्वा सा गलज्जलिका पुनः [1]॥

अथ चायं गजलः विविधबन्धविस्तरः दृश्यते । फारस्यां बन्धस्य दीर्घताप्रदर्शकः बहर इतिव्यवहृतोऽस्ति । सत्कवेः प्रयोगक्षमतादर्शी अयं बहरः क्वचित् लघीयान् कुत्रचित् द्राघीयान् च दृश्यते । संस्कृते गणानां यादृशीस्थितिः तथैव बहरेऽपि कश्चित् रम्यः गणक्रमः वर्तते ।कुत्रचिच्च सः गणक्रमः मुत्कारबे, मुसम्मन, सालिम इतिक्वचिच्च बहरे, कामिल,मुसम्मन इत्युच्यते ।एषु बहरेषु मफऊल,फऊलून,फाइलुन् इतिगणाः प्रसिद्धाः सन्ति ।अत्र कस्मिन् गणे कः गणक्रमः प्रयोक्तव्यः इत्यपि फारसीच्छन्दशशास्त्रे सुनिश्चितोऽस्ति ।

गजलस्य त्रयः भागाः भवन्ति यथा- मतला मक्ता सेरा च । फार्सीभाषायाम् गजलस्य मूलभावप्रकाशकं आरम्भवाक्यं मतला इतिउच्यते ।

गजलारम्भि यद्वाक्यं मूलभवप्रकाशकम् ।
तदेव फारसीवाचि मतलेतिसमुच्यते[2]॥

पुनः गजलेऽन्तिमम् वाक्ययुगलम् यत्र कविः नामाङ्कितःभवतिसः मक्तः [3] इतिउच्यते, मातला मक्तयोः मध्ये यानि वाक्यानि अन्यैः भिन्नभिन्नप्रयोजनैः सह गजलस्य मूलविषयम् विकासयन्ति तानि शेर इत्युच्यन्ते [4]। एवं गजलस्य त्रयः भागाः सन्ति। संस्कृतगलज्जलिकायां केवलं फार्सीगजलानां त्रयाणां भागानां नामपरिवर्तनं कृतम् , परन्तु भागानां प्रयोजनम् उभयभाषासु समानं तिष्ठति।

गलज्जलिकायां मताला मक्ता शेरा च क्रमशः आरम्भिका अन्त्यिका मध्यिका इतिउच्यन्ते ।

मतलाऽरम्भिका वाच्य शेर उच्येत मध्यिका ।
अन्त्यिका च तथैवास्तु मकतेतिमतम्मम[5] ॥

गलज्जलिकायाः एषां भागानां स्पष्टावगमार्थम् अभिराजराजेन्द्रमिश्रः आचार्यबच्चुलालअवस्थि महोदयस्य गलाज्जालिकाम् उदाहरति तत्र आरम्भिकायाः उदाहरणम् यथा

पिकाः कूजन्ति माकन्देषु कूजेयुः किमायतम् ?
समीरा दक्षिणात्या मन्दमञ्चेयुः किमायतम्[6]?

तस्मिन्नेव गलज्जलिकायां मध्यिकोदाहरणं यथा - .

इदं पाणौ सुरपात्रं सुरा कुम्भेऽन्तिके रामा ।
उदन्वन्तःसमे सर्वत्र शुशयेयुः किमायातम्[1] ?

---

1 अभिराजयशोभूषणम् 5/67

2 अभिराजयशोभूषणम् 5/75

3 अन्तिमश्चापि यो बन्धः कविर्नामाङ्कितः खलु । सोऽपि गजलततवज्ञैर्मततेति निगद्यते ॥(अभिराजयशोभूषणम् 5/76)

4 मतलामक्तयोर्मध्ये मूलभावैकपोषिणः। बन्धाःभिन्नाशया वापि कथिताः शेरसंज्ञकाः॥ (अभिराजयशोभूषणम् 5/77)

5 अभिराजयशोभूषणम् 5/80

6 अभिराजयशोभूषणम् पृ. सं 287


ISSN: 2320-740X

अतन्त्रं लोकतन्त्रं वा विवादो नामनि व्यर्थः

सुमन्त्रा यन्त्रिके तन्त्रे न सिध्येयुः किमायतम्[2]?

स्वतन्त्रत्वं भजेल्लोकः स्वतन्त्रत्वं परो धर्मः

युवानो यौवतं सम्भूय दिव्येयुःकिमायतम्[3]?

आरम्भिकायां कविः बच्चुलालअवस्थिः वर्तमानसमाजस्य व्यक्तीनाम् स्वार्थचिन्तनं सौन्दर्यास्वादविमतित्वञ्च प्रकटयति। मध्यिकायां कविः भौतिकवादजीवनपद्धतेः विध्वंसकरप्रभावं वर्णयति।

एवं तस्यामेव गलज्जलिकायाम् अन्त्यिकायाः उदाहरणम् यथा

न हि ज्ञानेन सिध्यत्यर्था इत्याश्रित्य विज्ञानम् ।

कदर्या आर्यमर्यादाम् विलुम्पेयुः किमायातम्[4] ?

अस्याम् अन्त्यिकायां कविः बच्चुलाल अवस्थिः अस्माकं जीवने लक्ष्यं प्राप्तुं प्रज्ञायाः माहात्म्यं सूचयति|अत्र ज्ञान इतिकवेः उपनाम । अन्त्यिकाचेयम् तेनाङ्किता ।संस्कृते अनेके कवयः उपनामाप्रयुञ्जानाः अपि दृश्यन्ते ।अतःअस्माभिः एतत्तु कविस्वातन्त्र्यमेवेतिज्ञेयम् ।

अभिराजराजेन्द्रमिश्रः उल्लिखतियत् संस्कृतगलज्जलिका केवलं फारसीगजलानां संविधानकमात्रमनुसरणं करोति, न तु तेषां साहित्यम्

संविधानकमात्रं हि फरसीगजलाश्रितम् ।

ग्राह्यम् न च प्रतिपद्यामित्यभिराजसम्मतम् [5]॥

यथा संस्कृतम् उर्दू चेतिद्वे भाषे भिन्न-भिन्न-संस्कृतीनां, भिन्नसमाजानां च प्रतिबिम्बे भवतः, अतःविषयचित्रणविषये गलज्जलिका गजलश्चेतिद्वावपि स्वतन्त्रावेव ।

पिङ्गलादिभिराचार्यैः लौकिकं च्छन्दः मात्रावर्णविभागेन द्विधा कथ्यते ।एषु प्रकारेषु वृत्तच्छन्दांसि अक्षरप्रधानानि, जातिच्छन्दांसि च मात्राप्रधानानि भवन्ति ।मात्राप्रधानेषु आर्यादिषु जातिच्छन्दस्सु मात्रागणनाधारेणैव लघुगुरुभावो विचार्यते न तु अक्षराणां गुरुलघुभावविवक्षया ।यद्यपि गलज्जलिकेयं मात्राप्रधाना भवतितथापि मात्राच्छन्दस्सु इव अत्र पञ्चगणविभागेत्यादि न भवति(अर्थादत्रकेवलं मात्राणां संख्या एव प्रधानम् )। संस्कृते ह्रस्वदीर्घाधारेण मात्रानिर्णयः भवति।

वृत्तरत्नाकरे लधुगुरुलक्षणम् यथा

सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः ।

---

1 अभिराजयशोभूषणम् पृ. सं 287

2 अभिराजयशोभूषणम् पृ. सं 287

3अभिराजयशोभूषणम् पृ. सं 288

4 अभिराजयशोभूषणम् पृ. सं 288

5 अभिराजयशोभूषणम् 5/85

वा पदान्ते त्वसौ वक्रो ज्ञेयोन्यो मात्रिको लृजुः[1] ॥

वृतमञ्जर्यां मात्रानिर्णययुक्तिः यथा

एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते |

त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनश्चार्धुमात्रकम्[2]||

राजेन्द्रमिश्रस्य शालभञ्जिकातःचतुर्दशमात्रायाः गलज्जलिकायाः उदाहरणं यथा

सत्यरक्षणे यत्नपरः

श्रुतिकटुदोषो गिरोऽभवम्[3]॥

शक्तिर्मिता धराऽनन्ता

धावन्धावन् स्थिरोऽभवम्[4]॥

चरितं दृष्ट्वा पुरोधासां

परित्यक्तमन्दिरोऽभवम्[5]॥

रक्तं लिखितं भालालिपौ

यतःकालिकाऽजिरोऽभवम्[6]॥

का मेऽपूर्णतया हानिः

शिवभाले चन्दिरोऽभवम्[7]॥

अभिराजश्शारदाऽत्मजः

रसगुणधमनीशिरोऽभवम्[8] ॥

उपर्युक्तायां गलज्जलिकायां प्रत्येकं पङ्क्तिः चतुर्दशमात्राः धारयति। अतःराजराजेन्द्रमिश्रस्य एषा, चतुर्दशमात्रागलज्जलिका भवति।

राजेन्द्रमिश्रस्य त्रयः गलज्जलिकासंग्रहाः सन्ति – कनीनिका, मत्तवारिणी शालभञ्जिका । येषु कनीनिकायां त्रिपञ्चाशत् , मत्तवारिण्यां षष्टिः,शालभञ्जिकायाम् अष्टषष्टिः गलज्जलिकाः सन्ति ।

1 वृत्तरत्नाकरः 1/9

2 छन्दोमञ्जरी पृ. सं 3

3 अभिराजयशोभूषणम् पृ. सं 292

4 अभिराजयशोभूषणम् पृ. सं 292

5 अभिराजयशोभूषणम् पृ. सं 292

6 अभिराजयशोभूषणम् पृ. सं 292

7 अभिराजयशोभूषणम् पृ. सं 292

8 अभिराजयशोभूषणम् पृ. सं 292


ISSN: 2320-740X

एवमभिराजराजेन्द्रमिश्रः गलज्जलिकेत्यादीनां लक्षणम् कृत्वा संस्कृतसाहित्यशास्त्राध्येतृभ्यः नूतनसाहित्यप्रक्रियानाम् परिचयं दत्वा एवमादिषु नूतनसाहित्यप्रक्रियास्वपि तेषाम् अभिरुच्युत्पादनं रचनौन्मुख्यं च सम्पादयति॥

**Bibliography:**


- ABHIRAJAYASOBHUSANAM of Prof. Abhiraja Rajendra Mishra, Vijayanta Prakashan,Allahabad.
- Vrittaratnakara of Kedarabhatta, ed . Acharya Baladev Upadyay, Chaukhamba Surabharati Prakashan, Varanasi. 3.Chandomanjari of Gangadasa, ed . By Dr. Brahmananda Tripathi, Chaukhamba Surabharati Prakashan, Varanasi.


******

# ईशावास्योपनिषद्प्रेक्षे विद्याविद्याविवेचनम्

**स्वागतिका दाशः**

शोधछात्रा, संहिता एवं संस्कृतविभागः

आयुर्वेदसंकायः, चिकित्साविज्ञानसंस्थानम्

काशी हिन्दू विश्वविद्यालयः, वाराणसी

**शोधनिर्देशकः- डा. मुरलीधरः पालीवालः**

प्राध्यापकः, संहिता एवं संस्कृतविभागः

आयुर्वेदसंकायः, चिकित्साविज्ञानसंस्थानम्

काशी हिन्दू विश्वविद्यालयः, वाराणसी

**कूटशब्दः- उपनिषद्, अविद्या, विद्या, मृत्युम्, अमृतत्वम् ।**

**शोधसारः**

चतुर्विधपुरुषार्थेषु प्रमुखः पुरुषार्थःभवतिमोक्षः। भारतीयपरम्परा मोक्षमेव जीवनस्य परमलक्ष्यमितिस्वीकरोति। मोक्षलाभाय एव धर्मादि पुरुषार्थाः प्रणीताः आचरिताः च जाताः मनीषिभिः। मोक्षप्राप्त्यर्थं पराविद्या प्रमुखं साधनमितिउपदिष्टाऽस्ति उपनिषत्सु। उपनिषत्सु प्राचीनतमा ईशावास्योपनिषदि विद्यया सह अविद्यया महत्वमपि प्रतिपाद्यते मोक्षप्राप्तिप्रसङ्गे। विद्यायाः अविद्यायाश्च सम्यक् अवधारणा अस्मिन् शोधप्रवन्धे आलोचिताऽस्ति।

**उपनिषद्परिचयः**

विषयवस्तु आधारीकृत्य वैदिकवाङ्मयः द्विधा विभज्यते- कर्मकाण्डं ज्ञानकाण्डं च। ज्ञानकाण्डस्य परमप्रामाणिकाः ग्रन्थाः भवन्ति उपनिषदः। अध्यात्मविद्यारहस्यप्रतिपादकाः वेदभागाः भवन्ति उपनिषदः। उप-नि-पूर्वकस्य विशरणगत्यवसादनाद्यर्थकस्य षदलृधातोः क्विप्प्रत्ययान्तस्य रूपं भवतिउपनिषद् इति। षदलृधातोः अर्थत्रयं विद्यते- विशरणं (नाशः), गतिः (प्राप्तिः), अवसादनं (शिथिलीकरणं) च। अतःउपनिषद् भवतिसा विद्या या मायासंसारस्य अनर्थकारकस्य कार्यस्य विनाशं करोति, संसारकारणभूतम् अज्ञानं शिथिलयतितथा मानवानां ब्रह्मप्राप्तेः सहायकः भवति। प्रसङ्गेऽस्मिन् शङ्कराचार्येण उक्तम्-

**उपनिषीदतिसर्वमनर्थकरं संसारं विनाशयतिसंसारकारणभूतामविद्यां च शिथिलयतिब्रह्म च गमयति।**[1]

अपि च

1ईशोपनिषद्भाष्यभूमिका

 **ISSN: 2320-740X**

**उप (समीपे) निषीदति(उपविशति) इतिउपनिषद् ।**

पुरा शिष्याः गुरोः समीपे उपविशन्तो अध्यात्मविद्याध्ययनमकुर्वन्, अतःइयं विद्या उपनिषदितिप्रसिद्धा जाता।

**उपनिषदां प्रतिपाद्यविषयः**

उपनिषद् 'वेदान्त' इत्युच्यते। वेदान्त इत्युक्ते वेदस्य अन्तःनाम परमलक्ष्यं यत्र वर्णितम् अस्ति । अतःउपनिषत्सु सर्वविधानामार्षविद्यानां समन्वयः परिलक्ष्यते।

उपनिषदाः भवन्ति भारतीयदर्शनशास्त्रस्य आधार एव। भारतीयदर्शनेषु प्रतिपादिताः ब्रह्मस्वरूपम्, ब्रह्मणः सर्वव्यापकत्वम्, अद्वैतवादः, त्रैतवादः, माया-मायीसिद्धान्तःइत्यादयः विषयाः उपनिषत्सु एव प्राप्यन्ते। उपनिषत्सु उत्तमनैतिकाचारः प्रतिपादितः। उपनिषदः निष्कामकर्माचरणे प्रेरयन्ति।उपनिषदः विश्वशान्तिभावनां सम्वर्धयन्ति।

**उपनिषदां संख्या**

उपनिषदां संख्याविषये मतपार्थक्यं दृश्यते। **सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्** इतिमुक्तिकोपनिषद्वाक्येन ज्ञायते यदुपनिषद् अष्टोत्तरशतादपि अधिकाः आसन्। मुक्तिकोपनिषदि **दशोपनिषदं पठ** इतिवाक्येन प्रमुखानां दशोपनिषदां वर्णनं प्राप्यते-

**ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरः।**
**ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश ॥**

श्रीमद्शङ्कराचार्यः दशभिः उपनिषद्भिः सह एकादशोपनिषद्रूपेण श्वेताश्वेतरोपनिषदं स्वीकृतवान् भाष्यं च कृतवानस्ति।

**ईशावास्योपनिषदः सामान्यः परिचयः**

उपनिषत्सु प्राचीनतमा ईशावास्योपनिषद् संहितोपनिषद् नाम्ना अपि प्रसिद्धा। शुक्लयजुर्वेदस्य चत्वारिंशत्तमे अध्याये इयं प्राप्यते। अत्र अष्टादशमन्त्राः सन्ति।

कर्मोपासनायाः ज्ञानोपासनायाः च समन्वयः अत्र परिदृश्यते।

परमात्मनः सर्वव्यापकत्वम् अत्र प्रतिपाद्यते।

निष्कामः सन् धनपिपासां त्यक्त्वा सात्त्विकजीवनशैलीम् अनुकर्तुम् अत्र उपदिश्यते।

आत्मनः व्यापकं स्वरूपम् अत्र वर्णितम् अस्ति। आत्मा गतिहीनः, मनसः जवीयः, देवैरपि अनाप्तः, स्थिरः सन् गतिशीलेषु श्रेष्ठः मातरिश्वा इतिआत्मा अभिधीयते।

उदात्तभावनायुक्तानाम् अस्याम् उपनिषदि प्रतिपाद्यविषयाणां सर्वेषु समयखण्डेषु उपयोगिता परिलक्ष्यते।

**विद्याविद्ययोः सम्यक् अवधारणा**

विद्यायाः व्युत्पत्तिप्रसङ्गे शब्दकल्पद्रुमे उक्तमस्ति-

**विद्या (स्त्री) विद्यतेऽसौ इति, विद् (संज्ञायाम्)+क्यप्+टाप्। परमोत्तमपुरुषार्थसाधनीभूता विद्या ब्रह्मज्ञानरूपा।**[1]

अविद्यायाः व्युत्पत्तिप्रसङ्गे शब्दकल्पद्रुमे उक्तमस्ति-

**अविद्या (स्त्री) न विद्या। अहङ्कारहेतुकमज्ञानं, मिथ्याज्ञानं, विद्याविरोधिनी अयथार्थबुद्धिः।**[2]

सामान्यतया अविद्या इत्युक्ते अपराविद्या लौकिकविद्या वा, विद्या इत्युक्ते पराविद्या आत्मविद्या वा गृह्यते। इहलोकस्य परलोकस्य च सुखप्राप्त्यर्थं इहलोके प्रतिपादनीयाः कार्मिकविधयः अविद्यायामन्तर्भवन्ति, आत्मनः यथार्थस्वरूपस्य परमात्मनः वास्तवस्वरूपस्य च प्रतिपादकः याज्ञिकविध्यतिरिक्तः ज्ञानमार्गः विद्यायाम् अन्तर्भवति। अविद्या स्वर्गाद्यर्थयागयज्ञादीनि कर्माणि निर्दिशति, विद्या परमात्मनि पूर्णसमर्पणमेव ज्ञापयति। अविद्या परमेश्वराश्रिता, अव्यक्तशव्देननिर्दिष्टा, मायामयी, स्वरूपप्रतिवोधरहिता, संसारकारिणी च इतिवेदान्तमते प्रतिपादिता-

**अविद्यात्मिका बीजशक्तिरव्यक्तशब्दनिर्देश्यापरमेश्वराश्रया मायामयी।**
**महासुषुप्तिः यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः॥**[3]

विद्यायाः स्वरूपप्रसङ्गे उच्यते यत् "**सा विद्या या विमुक्तये**" इति। अपि च सा विद्या रागद्वेषादि दोषरहिता, विशिष्टतया विशुद्धा, एकपदागमा अर्थात् ओमितिएकाक्षरस्य वोधयित्री सर्ववादानां सर्वविद्यानां अविरोधिनी पुष्टिकारिणी सत्यस्वरूपा च भवति-

**सत्या विशुद्धिस्तत्रोक्ता विद्यैवैक पदागमा।**
**युक्ता प्रणवरूपेण सर्ववादाविरोधिनी॥**[4]

अन्यासु उपनिषत्सु अपि अविद्यायाः विद्यायाः च उल्लेखः वर्तते। यथा-

- **प्रतिबोधविदितं मतममृतत्वं हि विन्दते ।**
  **आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ॥**[5]
  प्रतिबोधितावस्थासु यत् अनुभूयते, तदेव अमृतत्वप्रदायकं भवेत्। प्रतिबोधितावस्था आत्मना एव लभते, आत्मतत्वावधारिकया विद्यया एव अमृतत्वं विन्दते।
- **दूरमेते विपरीते विषूची अविद्या या च विद्येतिज्ञाता।**[1]

---

1शब्दकल्पद्रुम. चतुर्थखण्ड

2शब्दकल्पद्रुम. प्रथमखण्ड

3ब्र.सू.शा.भा.1.4.3

4वाक्य.9

5केनोपनिषद् 2.4

 ISSN: 2320-740X

अविद्या विद्या च विपरीतगुणविशिष्टाः। अविद्यया संसारबन्धनं विद्यया मोक्षं च प्राप्यते।

- **अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः।**
  **दन्द्रम्यमाणा परियन्ति मूढाः अन्धेनेव नीयमाना यथान्धाः॥**[2]
  यथा कोऽपि अन्धः अपरम् अन्धम् उपयुक्तं मार्गं निर्दिष्टुम् असमर्थःभवति, तथैव अविद्याग्रस्तः पुरुषः मोक्षमार्गोपदिष्टुम् असमर्थःभवति।
- **द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याविद्ये निहिते यत्र गूढे।**
  **क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः॥**[3]
  परंब्रह्मणि विद्या अविद्या च उभयोः गूढतया विद्येते। क्षयस्य नाम क्षयशीलस्य संसारस्य कारणं भवतिअविद्या, अमृतय्य नाम मोक्षस्य कारणं भवतिविद्या। उभयोर्यः जानातिस साक्षीरूपेण निर्विकारः तिष्ठति।
- **विद्यया देवलोको देवलोको वै लोकानां श्रेष्ठस्तस्मात् विद्यां प्रशंसन्ति।**[4]
  विद्यया श्रेष्ठलोकः देवलोकः आप्नुयात्, अतःविद्या प्रशंसिता भवति।
- **द्वे विद्ये वेदितव्ये इतिह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च।**[5]
  विद्या द्विधा इतिब्रह्मविदः वदन्ति परा-अपरानाम्ना। पराविद्या विद्याम् अपराविद्या अविद्यां च निर्देशयति।
- **तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते।**[6]
  अपराविद्यया साङ्गोपाङ्गवेदः अधिगम्यते पराविद्यया एकाक्षरब्रह्ममेव अधिगम्यते च।
- **अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः।**
  **जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः॥**[7]
  यथा कोऽपि अन्धः अपरम् अन्धम् उपयुक्तं मार्गं निर्दिष्टुम् असमर्थःभवति, तथैव अविद्याग्रस्तः पुरुषः मोक्षमार्गोपदिष्टुम् असमर्थःभवति।
- **अविद्याया बहुधा वर्तमाना वयं कृतार्था इत्यभिमन्यन्ति बालाः।**
  **यत्कर्मिणो न प्रवेदयन्ति रागात्तेनातुराः क्षीणलोकाश्च्यवन्ते॥**[8]

---

1कठोपनिषद् 1.2.4

2कठोपनिषद् 1.2.5

3श्वेताश्वेतरोपनिषद् 5.1

4बृहदारण्यकोपनिषद् 1.5.16

5 मुण्डकोपनिषद्.1.1.4

6मुण्डकोपनिषद् 1.1.5

7मुण्डकोपनिषद् 1.2.8

8मुण्डकोपनिषद् 1.2.9

अविद्याग्रस्ताभिमानिपुरुषाः आत्मानं कृतार्थं मन्यन्ते सांसारिकप्राचुर्यकारणात्। यदा तेषां कर्मफलः क्षीणः जायते तदा ते कर्मासक्ताः अभिमानिनः दुःखार्ताः सन् क्षीणलोकं नाम मृत्युलोकम् आप्नुवन्ति। अत्र अविद्यायाः क्षणिकत्वं प्रतिपादितमस्ति।

**ईशावास्योपनिषद्प्रेक्षे विद्याविद्याविवेचनम्**

ईशावास्योपनिषदि त्रिषु मन्त्रेषु अविद्या-विद्यातत्वानां विवेचनं विद्यते। ये अविद्यामुपासते ते अन्धं तमः अज्ञानलक्षणं तमः प्रविशन्ति। आत्मस्वरूपज्ञानादृते केवलं कर्मैव ये उपासते कर्मसु एव रताः सन्ति, ते अन्धतमं जन्ममरणचक्रमेव आप्नुवन्ति। अन्ये ये कर्म विहाय ज्ञानोपासनायाम् एव निरताः सन्ति,ते ततोऽधिकम् अन्धं तमः प्रविशन्ति। अर्थात् ये कर्मषु ज्ञानेषु वा रताः अर्थित्वेन संश्लिष्टाः सन्ति, ते बन्धनत्वाद् अन्धतमाख्ये अज्ञाने संसारचक्रे च आपतन्ति। ईशोपनिषदि उक्तमस्ति-

**अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।**
**ततो भूय इव ते तमो य उ विद्यायां रताः॥**[1]

विद्यायाः अविद्यायाः च फलस्य प्रभेदोऽपि अत्र प्रतिपाद्यते। विद्यया कर्मफलात् भिन्नं फलं प्राप्यते, अविद्यया देवताज्ञानात् भिन्नं फलं प्राप्यते। अस्मिन् प्रसङ्गे कठोपनिषदि उक्तमस्ति-

**दूरमेते विपरीते विषूची अविद्या या च विद्येतिज्ञाता।**[2]

बृहदारण्यकोपनिषदि अपि उक्तमस्ति-

**विद्यया तदारोहन्ति विद्यया देवलोको न तत्र दक्षिणायन्ति कर्मणा पितृलोकः।**[3]
अनेन विद्वांसः अस्मभ्यं व्याख्यातवन्तःयत् विद्याया अन्यत् फलम् अविद्यया अन्यत् फलं च प्राप्यते इति। अतःकेवलं विद्योपासनया अविद्योपासनया वा प्रतिनियतमेव फलं प्राप्यते। उक्तम् अस्ति ईशोपनिषदि-

**अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया।**
**इतिशुश्रुम धीराणां ये नस्तद्विचचक्षिरे॥**[4]

यतो विद्यया अविद्यया च भिन्नं भिन्नं फलं प्राप्यते, उभयोः निरताः जनाः संसारबन्धनमेव प्राप्नुवन्ति। अतःमोक्षाय ईशोपनिषदि मध्यमार्गं स्वीकार्यते। ईशोपनिषदः मतानुसारं यः विद्याम् अविद्यां च सम्यकतया वेत्ति युगपदेव आचरतिच, स एव अमृतत्वं आप्नोति। ये अविद्यामुपासते स नित्यनैमित्तिकादिभेदाभिन्नस्य कर्मणः आचरणं सम्यग्रूपेण ज्ञात्वा कर्मभिः

1ईशावास्योपनिषद9

2कठोपनिषद् 1.2.4

3बृहदारण्यकोपनिषद्1.5.16

4ईशावास्योपनिषद्10

 **ISSN: 2320-740X**

स्वर्गसुखमनुभूय पुनः संसारचक्रं प्राप्नोति। अतःतेन क्षणिकत्वं नश्वरत्वं वा अनुभूयते। पक्षे ये विद्यामुपासन्ते स आत्मस्वरूपं सम्यग्रूपेण अवबोध्यन्ते। अतःतेन नित्यत्वमनुभूयते। यः उभयं वेत्ति, कर्मणा नश्वरत्वस्य ज्ञानेन नित्यत्वस्य च अवबोधनत्वात् स विद्यायाः कर्मणि च निरासक्तः भवति। यथा प्रकाशम् अनुभवितुम् अन्धकारस्य अतिक्रमणमत्यावश्यकं, तथैव नित्यत्वमनुभवितुमनित्यतायाः अतिक्रमणम् अपरिहार्यं भवति। यः विद्यायाः अविद्यायाः उभययोः च वास्तवं स्वरूपं वेत्ति स निष्कामरूपेण लौकिककर्मानुपालनेन मृत्युपदवाच्यं संसारमतिक्रामतिनिरासक्तज्ञानेन अमृतपदवाच्यं परमलक्ष्यं मोक्षं च प्राप्नोति। अतःउच्यते-

**विद्यां चाविद्यां च यस्तद्वेदोभयं सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥**[1]

**उपसंहारः**

मानवजीवनस्य परमपुरुषार्थं भवतिमोक्षः। सर्वे वेदान्तग्रन्थाः मोक्षप्राप्त्यर्थं एकः विद्या एव मार्गः अस्ति इतिउपदिशन्ति। प्रायशः उपनिषदः अविद्यां मोक्षस्य प्रतिकूलविधायिकामितिसूचयित्वा अविद्यायाः आचरणं न करणीयमितिउपदिश्यन्ति। किन्तु ईशावास्योपनिषदि मोक्षस्य साधनरूपेण उभयो विद्याविद्यातत्वौ स्वीकार्येते। अत्र अविद्या मृत्योरतिक्रमणे नाम संसारस्य अनित्यतायाः अनुभवितुं सहायिका भवति, विद्या नित्यत्वप्रदायिनी च भवति। विद्याविद्ययोः समन्वयेन अर्थात् ज्ञानकर्मयोः समन्वयेन एव अमृतत्वस्य नाम परमपुरुषार्थस्य मोक्षस्य उपलब्धिः भवतिइतिईशावास्योपनिषदि प्रतिपादितमस्ति।

**सन्दर्भग्रन्थसूची**

1. ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुर
2. ईशावास्योपनिषद् भाष्य संग्रह, डॉ. देवेन्द्र नाथ पाण्डेय, जगदीश संस्कृत पुस्तकालय, जयपुर
3. ईशावास्योपनिषद्, श्रीअरविंद, श्रीअरविंद सोसायटी, पंडिचेरी, ISBN: 81-7060-042-1
4. EIGHT UPANISADS with the comentry of Shankaracharya(Volume One), Translated by Swami Gambhirananda, Swami Mumukshanda President, Advaita Ashrama, Mayavati, Champawat, Himalayas from its publication department, Kolkata, ISBN: 81-7505-016-0
5. THE UPAVISHADS-1 Isha Upanishad, Sri Aurobindo, Sri Aurobindo Ashram, Pondicherry, ISBN: 81-7058-749-2
6. ईशादि नौ उपनिषद् शाङ्करभाष्यार्थ, गीता प्रेस, गोरखपुर,ISBN: 81-293-0096-6
7. वाक्यपदीयम् ब्रह्मकाण्डम् व्याख्याद्वयोपेतम्, पद्मश्रीः पण्डितश्रीरघुनाथशर्मा,वाराणास्याम्, वाराणसी, ISBN: 81-7270-175-6
8. बृहदारण्यकोपनिषद् सानुवाद शाङ्करभाष्यसहित, गीता प्रेस, गोरखपुर

1ईशावास्योदनिषद्11

9. शब्दकल्पद्रुमः राजा राधाकान्तदेव वाहादुर विरचित, श्री वरदाप्रसाद वसु, श्री हरिचरण वसु, चौखम्बा संस्कृत सिरिज अफिस, वाराणसी
10. ब्रह्मसूत्रशाङ्करभाष्यम् वाचस्पतिमिश्रप्रणीता भामतीव्याख्यासम्वलिता, स्वामी योगीन्द्रानन्द, मन्त्री, षड्दर्शनप्रकाशन प्रतिष्ठान, उदासीन संस्कृत विद्यालय, ढुण्ढिराजगली, वाराणसी

**********

ISSN - 2320-740X

**Central Sanskrit University**

Established by an Act of Parliament

Accredited by NAAC with A++ Grade

**Shri Rajiv Gandhi Campus**

Menase, Sringeri - 577139